समर्पणम् ।



योभून्नरसेव्यः श्रीमत्साहिबदयालुरितिनाम्ना ॥ ख्यातो राजोपपदः प्रभुप्रभूतप्रभासभाप्रभृतः ॥ १ ॥

वंशीधरोऽस्य सनयस्तनयः प्रसिद्धो वंशीधरोऽजनि यथा वसुदेवतोऽत्र ॥

अस्यात्मजो गुणिगणोडुविधुर्म्महाचन्द्राख्यः प्रजेशपरिसेवितपादपीठः ॥ २ ॥

संहिताया भृगोर्भागस्तेन योगावली ह्यसौ ॥ लोकोपकृतये दत्ता मुद्रणार्थं मुंमपुरि ॥ ३ ॥

मुद्रागारे वेङ्कटेशाभिधे मुद्रापिताऽधुना ॥ श्रेष्ठिश्रीखेमराजेन ग्रन्थोद्धारपरेण वै ॥ ४ ॥

मार्गणऽस्या व्यतीताश्च बह्वब्दा रूप्यकव्ययः ॥ जातः कष्टेन महता लब्धा ज्जोतिःप्रदीपिका ॥ ५ ॥

१ प्रभु जो लाट गवरनर्जनरल उसने, बड़ी जो प्रभायुक्त सभा (कौंसिल) उसमें जो मेंबर किया गया ॥ (Member of the Legislative Council of India)

अथ भृगुसंहितायोगावल्यनुक्रमणिका ।

समर्पणम् ।



योभून्नरसेव्यः श्रीमत्साहिबदयालुरितिनाम्ना ॥ ख्यातो राजोपपदः प्रभुप्रभूतप्रभासभाप्रभृतः ॥ १ ॥
वंशीधरोऽस्य सनयस्तनयः प्रसिद्धो वंशीधरोऽजनि यथा वसुदेवतोऽत्र ॥
अस्यात्मजो गुणिगणोडुविधुर्म्महाचन्द्राख्यः प्रजेशपरिसेवितपादपीठः ॥ २ ॥
संहिताया भृगोर्भागस्तेनं योगावली ह्यसौ ॥ लोकोपकृतये दत्ता मुद्रणार्थं मुंबेपुरि ॥ ३ ॥
मुद्रागारे वेङ्कटेशाभिधे मुद्रापिताऽधुना ॥ श्रेष्ठिश्रीखेमराजेन ग्रन्थोद्धारपरेण वै ॥ ४ ॥
मार्गणऽस्या व्यतीताश्च बह्वद्रा रूप्यकव्ययः ॥ जातः कष्टेन महता लब्धा ज्जोतिःप्रदीपिका ॥ ५ ॥

---

१ प्रभु जो लाट गवरनर्जनरल उसने, बड़ी जो प्रभायुक्त सभा (कौंसिल) उसमें जो मेंबर किया गया ॥ (Member of the Legislative Council of India)

अथ भृगुसंहितायोगावल्यनुक्रमणिका।

इति श्री० अवर्णाद्यष्टोत्तरशतयोगफलकथनं नाम तृतीयं प्रकरणम् ।

१ चोग्रदण्ड—इति चकाराद्यभिप्रायेणात्रज्ञेयम् ।

विषयाः ।	पत्राङ्काः ।	विषयाः ।	पत्राङ्काः ।	विषयाः ।	पत्राङ्काः ।	विषयाः ।	पत्राङ्काः ।
दीर्घयोग०	१०७	नरनारायणयोग०	११०	तस्कारयोग०	११३	पूज्ययोग०	११४
दीस्वरयोग०	,,	निशाचरयोग०	,,	तिलंगीयोग०	,,	पुष्पकयोग०	११५
दारोहयोग०	१०८	नारंजीयोग०	,,	तास्वरीयोग०	,,	पुरातनयोग०	,,
दीनानाथयोग०	,,	नाचारीयोग०	,,	इति श्री० तवर्गयोगफलकथनंनामसप्तमंप्रकरणम् ।		पालोमायोग०	,,
दामोदरयोग०	,,	नवनीतयोग०	,,	पवनयोग०	११३	पर्जकयोग०	,,
दालभ्ययोग०	,,	तिरस्कारयोग०	१११	पर्वतीयोग०	,,	पौराणिकयोग०	,,
द्रष्टयोग०	,,	तमाकारीयोग०	,,	प्रेख्यायोग०	,,	पालाक्षयोग०	,,
धनसंज्ञकयोग०	,,	तमसायोग०	,,	प्रेमायोग०	,,	पुनरपिपालाक्षयोग०	,,
धमोहयोग०	१०९	तानसंज्ञकयोग०	,,	पावनयोग०	,,	फूलयोग०	,,
धूर्णयोग०	,,	तारायोग०	११२	पुनरपिपावनयोग०	११४	फलस्तुतियोग०	११६
धक्कारयोग०	,,	ताटंकयोग०	,,	पाटकयोग०	,,	वेजदंष्ट्रकयोग०	,,
धुर्यचारीयोग०	,,	तानीसयोग०	,,	पार्षद्योग०	,,	ब्रह्मयोग०	,,
धानुष्ययोग०	,,	तेजस्वीयोग०	,,	पिप्पलीयोग०	,,	वेतालयोग०	,,
धवलीयोग०	,,	तित्तिरयोग०	,,	पवनात्मजयोग०	,,		
निम्नुयोग०	११०	तोतायोग०	,,	पाखंडकयोग०	,,		
नैमावलीयोग०	,,	तोषकयोग०	,,	पश्चात्वयोग०	,,		
नांदीयोग०	,,	तिलंगीयोग०	,,	पणीयोग०	,,		

१ ककारादि शब्दानां पवर्गानुक्रमे पाठो अन्य योग क्रियासानुरोधेन । सच बवयोर भेदा ज्ञेयः ।

विषयाः ।	पत्राङ्काः ।	विषयाः ।	पत्राङ्काः ।	विषयाः ।	पत्राङ्काः ।	विषयाः ।	पत्राङ्काः ।
[illegible]योग०	१४२	[illegible]कयोग०	१४५	सोमकयोग०	१४७	[illegible]योग०	१५०
[illegible]		[illegible]योग०	,,	सोनाकरयोग०	,,	सुंकयोग०	,,
[illegible]प्रकरणम् ।		सूक्ष्मयोग०	,,	हस्तियोग०	१४८	सुंभयोग०	,,
[illegible]योग०	१४२	सौराष्ट्रीयोग०	,,	हिमाद्रियोग०	,,	सुतालकयोग०	१५१
[illegible]योग०	१४३	हस्तियोग०	,,	हालकायोग०	,,	सासरीयोग०	,,
[illegible]योग०	,,	हत्वायोग०	१४६	हायनयोग०	,,	सुंठयोग०	,,
[illegible]योग०	,,	होरायोग०	,,	हिंगुळजयोग०	,,	[illegible]योग०	,,
[illegible]योग०	,,	सानुमानयोग०	,,	हयानाम्नीयोग०	,,	सरठयोग०	,,
[illegible]योग०	१४४	सहस्रेयायोग०	,,	हृदययोग०	१४९	पुनः सरठयोग०	,,
[illegible]योग०	,,	सुरकार्यसाधकयोग०	,,	हुलांकयोग०	,,	सूचीमुखीयोग०	,,
[illegible]योग०	,,	शांभवीयोग०	,,	हाटकयोग०	,,	शीतलायोग०	१५१
[illegible]योग०	,,	सुरसेनयोग०	,,	हनुमुखयोग०	,,	शर्करीयोग०	,,
[illegible]योग०	,,	सौलयोग०	१४७	होमयोग०	,,	शाकयोग०	,,
[illegible]योग०	,,	शोभनयो०	,,	पुनर्होमयोग०	१५०	शिलार्जकयोग०	,,
[illegible]योग०	,,	स्वमन्तकयोग०	,,	हर्षिणीयोग०	,,	सरकीयोग०	,,
[illegible]योग०	,,	सुखार्कयोग०	,,	हर्म्यनीयोग०	,,	सोटूयोग०	,,
[illegible]योग०	१४५	सुखार्कयोग०	,,	हर्म्यनीयोग०	,,		
[illegible]योग०	,,	सूच्यायोग०	,,	होमावलियोग०	,,	सहस्रायोग०	,,

॥ इति श्रीभृगुसंहितायोगावल्यनुक्रमणिका समाप्ता ॥

...नमः॥प्रणम्यकेशवंशंभुंब्रह्माणंगणनायकम् ॥ पूर्वोक्तिमनसास्थायक्रियतेयोगसागरः ॥ १ ॥ त्रिंशद्वर्षसहस्राणिसप्त...
...॥ त्रेतायुगेगतेवर्षेयोगसागरसंभवः ॥ २ ॥ भृगुरुवाच ॥ युगेवेदाकृतिः संख्या जन्मतः प्रश्नतोपिवा ॥ ग्रहयोगप्रमाणेन...
...कृत ॥३॥ प्रथमाध्यायमध्येतुपंचाशद्योगकाःक्रमात् ॥ तेषुस्वेटप्रमाणेनज्ञातव्यःपुण्यसंग्रहः ॥ ४ ॥ अथयोगनामानि ॥ ॥ मनो...
...भवः सौम्योयातुधान्यश्चभीष्मकः ॥ जीमूतोविजयाऽऽनन्दौ पिंगलोविफलःसमः ॥५॥ महोदधिःपिशाचश्चदामिनीचक्रदामिनी ॥
...भवःश्रीसुखःक्रूरोगजश्चाऽद्भुतसागरः ॥६॥ ऊर्ध्वोद्भूतोनिपातश्चविलासःशक्रमाहिषौ ॥ देवेंद्रराजशूलाश्चभास्करास्तश्चविश्रुतः ॥ ७॥
...दारुणश्चंद्रश्चतुःसागरसागरौ ॥ भ्रातृहारिपुघातश्चच्छत्रोवज्रोजगत्पतिः ॥८॥ वैनाशिकःकलापश्चमानसोऽनुभवःशुभः ॥ वैजितो
...नंदजीवावितिक्रमात् ॥९॥ यस्याऽऽदौयादृशंकर्मप्रहतिश्चैवयादृशी ॥ तस्यतादृग्ग्रहैरेवभद्राऽभद्रफलस्थितिः ॥ १० ॥ सौरि
...स्तुंगेथतुर्येभवतिकुजयुतोमेषसंस्थश्चभानुः शुक्रोजीवोबुधोवाभवतियदियुतोराजमान्योधनाढ्यः ॥ स्थूलोदाताधनाढ्योवरकनकयुतो
भूरिरत्नादिपूर्णोभूपालैर्यातिसायंबहुसुतभृतकैर्दीर्घमायुर्मनोज्ञः ॥ ११ ॥ हरिगेहंकृतंपूर्वंतेनैतद्योगसंभवः ॥ येनाऽस्मिन्सुखमाप्नोति
...नाढ्योराजपूजितः ॥ १२ ॥ पुत्रपौत्रादियुक्तश्चजायतेनात्रसंशयः ॥ वृद्धकालेमहादुःखंपुत्रपौत्रादितोध्रुवम् ॥ १३ ॥ नक्तंच
...पुरातेनापिदुःखितः ॥ ॥ शुक्र उवाच ॥ ॥ किंजाप्यंकस्यपूजाचाकिंदानंचकिमौषधम् ॥ १४ ॥ भृगुरुवाच ॥ ॥ शनेः सप्ताक्षरं
...मन्त्रंषडक्षरम् ॥ प्रत्येकंद्विसहस्रंतुजप्त्वादेयंधनंततः ॥ १५ ॥ रजतंसप्तषट्कंचहाटकंचतथैवच ॥ त्रिंशत्पलंताम्रपात्रंघृतेन
...रितम् ॥ वृषभंवस्त्रगोधूमौप्रदद्याद्ब्राह्मणायच ॥ १६ ॥ देशंस्वंभूमिदानंचकारयेच्छ्रद्धयान्वितः ॥ एतद्दानोपचारेणनीरोगीच...

भवेत्॥ १७॥सप्तजन्मविनादानैरेतद्योगाद्दरिद्रता ॥ कविनाचकृतः प्रश्नोभृगुणापरिभाषितः ॥१८॥ इतिमनोज्ञयोगफलम्॥ १॥क्रूरक्षेत्रेय
दाजीवःसुतेशःक्रूरसंमतः ॥ कर्मेशोनाविलग्नेशःक्रूरःक्रूरगृहेयदा ॥१९॥ भौमार्किवीक्षितोऽधीशस्तदायोगोहिवैभवः ॥ पूर्वंतीर्थेकृतासेवा
ऋषीणांचपुनःपुनः ॥ २० ॥ तेनसौख्यं भवेत्तस्यधनाढ्योराजपूजितः ॥ गौरश्चचपलोवक्तागुणीचमृदुवाक्सुधीः॥२१॥ बहुस्थानेषुदा
ताचमित्रशत्रुसमोभवेत ॥ संतानोनभवेत्तस्य,जातोपिचनजीवति ॥२२॥सतीकलंकमाऽऽदायब्रह्मशापनिराहतः ॥ शुक्रउवाच॥किंजाप्यं
कस्यपूजाचकिंदानंचकिमौषधम् ॥२३॥ भृगुरुवाच॥ रीतिपात्रंपलान्पंचतन्मध्येतत्रमंडले ॥ सतीरूपंचकर्तव्यंतदग्रेकारयेज्जपम् ॥२४॥
अयुतंपद्मनाभस्यमंत्रंबीजाक्षरंजपेत् ॥ पुरोपरितनंकार्यंपूर्वोक्तविधिनासह ॥ २५ ॥ ततोदानंप्रकर्तव्यंनवषट्कंचहाटकम् ॥ रजतंभानुषट्कं
चदिव्यंवस्त्रंवरस्त्रियै॥२६॥एतदुक्तंमयापुत्रजपांतेतुविनिर्दिशेत ॥ ऋत्वंतेस्त्रीषुदातव्यमर्घ्यंसूर्यायदापयेत् ॥२७॥ सवत्सानांगवांपञ्चऋतौ
स्त्रीभ्यःप्रदापयेत् ॥ भौमेनक्तंचकर्तव्यंतदेवकथ्यतेध्रुवम् ॥ २८ ॥ भौमयंत्रंतुपार्श्वेचधारयेद्विधिनासह ॥ एतद्दानोपचारेणप्राप्यतेसंत
तिर्ध्रुवम् ॥२९॥ मृतवत्सत्वदोषघ्नंचिरंजीवीसुबालकः ॥ तस्माद्दानंप्रकर्तव्यंपूजायंत्रंचतत्त्वतः ॥३०॥ श्रुत्वात्वनुसर्वंकार्यंविलंबंनैवकार
येत् ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः॥३१॥इतिविभवयोगफलम्॥२॥लग्नेषष्ठाष्टमेचंद्रःक्रूरयुक्तोथवीक्षितः ॥ क्रूरक्षेत्रेचजीवश्चसौ
म्याःकेंद्रत्रिकोणगाः॥३२॥सौम्ययोगेकृतःपूर्वंमातुलान्याश्चसंगमः ॥ तेनपापानुसारेणशुक्रकुष्ठीप्रजायते ॥ ३३ ॥ नक्तांधोदीर्घरोगीवा
शुक्रहीनश्चजायते ॥ अल्पदाताभवेत्क्रोधीपुत्रस्त्रीमित्रदुःखदः ॥ ३४ ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ भृगुरु

वाच ॥ कांस्यपात्रेपलारुद्राःपंचकोणंतुमंडलम् ॥३५॥ स्त्रीरूपंचप्रकर्त्तव्यंतन्मध्येचंदनाक्षतान् ॥ तदग्रेचजपंकुर्याद्रुद्रमंत्रंनवाक्षरम् ३६॥
पंचसाहस्रमानेनपूर्वोक्तविधिनासह ॥ हाटकंचततोप्यष्टषट्कंतारंचशोभनम् ॥ ३७ ॥ माषार्कंचगुडंतैलंगाश्ववृषभसंयुताः ॥ एतद्दानंप्रक
र्त्तव्यंजपःकार्योनसंशयः ॥ ३८ ॥ ततस्तुश्रीफलंभव्यंमायामंत्रेणमंत्रयेत् ॥ ऋतौत्रिवारंदातव्यंभोजनंपायसंघृतम् ॥ ३९ ॥ एतद्दानो
पचारेणपुत्रोभवतिनान्यथा ॥ चिरंजीवीभवेत्सूनुर्दानकर्मप्रसादतः ॥ ४० ॥ शुक्रउवाच ॥ केनपुण्येनहेतोर्वारोगहीनः प्रजायते ॥
॥ भृगुरुवाच ॥ पूर्वोक्तपुण्यंकृत्वातुकृष्णकंबलसंयुतम ॥ ४१ ॥ चत्वारिंशत्पलंलोहपात्रंतैलेनसंभृतम् ॥ महाएकार्द्धषट्कंचसद्विप्रायतु
दापयेत् ॥ ४२ ॥ मृत्युंजयंमहामंत्रंविधिनासहलेखयेत् ॥ धारयित्वातुशीर्षेवैकारयेद्द्विजपूजनम् ॥ ४३ ॥ सोमवारैकभक्तंचकर्त्तव्यंच
विशेषतः ॥ तत्तद्दानोपचारेणरोगहीनःप्रजायते ॥ ४४ ॥ भौमेनक्तंचकर्त्तव्यंपुत्रार्थेविधिसंयुतम् ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषि
तः ॥ ४५ ॥ ॥ इतिसौम्ययोगफलम् ॥ ॥ ३ ॥ धर्मेक्रूरारिपुक्षेत्रेकर्मेपापाःपरेथवा ॥ छिद्रेवाभवनेपापाःक्रूरैर्भैर्युतंगृहम् ॥ ४६॥ यातु
धान्ये सदादोषःपूर्वंगोत्रवधःकृतः ॥ तेनपापानुसारेणसुतहीनःप्रजायते ॥ ४७ ॥ अथवाजायतेकुष्ठीराजरोगीतथाभवेत् ॥ कृपणोदुष्ट
वित्तश्चकृतघ्नोनिर्गुणःखलः ॥ ४८ ॥ गर्भोत्पत्तौभवेत्कष्टंस्त्रियोऽपिपुरुषस्यच ॥ गर्भस्रावोभवेत्तस्यजातोवापिनजीवति ॥ ४९ ॥
पापात्मादुष्टकर्माचएतच्चिह्नयुतोनरः ॥ ब्रह्महत्यादिपापानिचकारासौचगोत्रहा ॥ ५० ॥ सुरामांसाशनोद्वेषीरौरवंनरकंययौ ॥
क्षेत्रेषुतानांगोदानंकृतंतेनकुलोद्भव ॥ ५१ ॥ आदिमध्यावसानेतुसौख्यंसमदचित्तता ॥ ॥ शुक्रउवाच ॥ ॥ किंजाप्यंकस्यपूजा
चकिंदानंचकिमौषधम् ॥ ५२ ॥ ॥ भृगुरुवाच ॥ ॥ रीतिपात्रंतथाकांस्यंचतुर्दशपलैःकृतम् ॥ ५३ ॥ गोत्ररूपंचतन्मध्ये

चंदनेनचकारयेत् ॥ तदग्रेकारयेज्जाप्यमघोरंबीजसंयुतम् ॥ ५४ ॥ सहस्रंकारयेत्पश्चात्सुपुण्यदिवसेशुभे ॥ हाटकंदशषट्चरजतं
द्विगुणंतथा ॥ ५५ ॥ गांवाश्वंवापिसंयत्नाद्ब्राह्मणेभ्यःप्रदापयेत् ॥ पूर्णपात्रंघृतैःपूर्णंब्राह्मणेभ्यःप्रदापयेत् ॥ ५६ ॥ ॥ शुकउवाच ॥ ॥
एवंशक्तिर्यदानास्तितदाकिंक्रियतेप्रभो ॥ ॥ भृगुरुवाच ॥ तदर्द्धपुण्यतःकार्यंदानंदद्यात्स्वशक्तितः ॥ ५७ ॥ गर्भपातेश्रुतौवापि
पुण्यंकुर्याद्व्रतंव्रतः ॥ तदापुत्रधनंसम्यक्प्राप्यतेनात्रसंशयः ॥ ५८ ॥ दानांतेश्रीफलंभव्यंमायामंत्रेणमंत्रितम् ॥ अर्चयेद्धोमवारेतुकार्यंन
क्तंहिभोजनम् ॥ ५९ ॥ श्रुत्वानकुरुतेपुण्यंतदंतेदुःखमाप्नुयात् ॥ राजरोगोमहाचिंतापुत्रैरपिधनैरपि ॥ ६० ॥ कविनाचकृतःप्रश्नो
भृगुणापरिभाषितः ॥ ६१ ॥ इतियातुधान्ययोगफलम् ॥ ४ ॥ तुर्येशोवाष्टलग्नेशःक्रूरोवाक्रूरसंयुतः ॥ सूर्येषष्ठाष्टमेऽरिष्टेक्रूरक्षेत्रेचपाप
गाः ॥ ६२ ॥ केंद्रेत्रिकोणेउच्चेवास्वगृहस्थोगुरुर्यदा ॥ भीष्मकेसुखसंपत्तिर्जायतेनात्रसंशयः ॥ ६३ ॥ पूर्वंतीर्थंकृतासेवाऋषीणांचपुनः
पुनः ॥ देवार्चनंद्विजेभक्तिःकृतातेनात्रजन्मनि ॥ ६४ ॥ सुखीसुकर्मकृच्चैवधर्मिष्ठोबहुपुत्रवान् ॥ बहुस्त्रीभिःसमंभोगीबुद्धिमांश्चविचक्षणः
॥ ६५ ॥ मनःस्वस्थोभवेद्दाताधनाढ्योधनिनांपतिः ॥ त्रिंशद्वर्षेगतेनूनंमहासौख्यंप्रजायते ॥ ६६ ॥ राजावाराजमान्योवाकुबेरेणस
मोभवेत् ॥ चत्वारिंशद्गतेवर्षेततःपीडाप्रजायते ॥ ६७ ॥ रक्तवातोद्भवापीडाराजयोगःप्रवर्तते ॥ कासश्वासादिरोगाणांजायतेचमुहुर्मुहुः
॥ ६८ ॥ क्षणेकष्टंक्षणेसौख्यंक्षीणांगोजायतेनरः ॥ ॥ शुकउवाच ॥ ॥ केनकर्मविपाकेनएषरोगीप्रजायते ॥ ६९ ॥
[illegible]रुवाच ॥ ॥ पूर्वंगोत्रक्षयंकृत्वासाध्वीचस्त्रीकलंकिता ॥ इहजन्मनितैःपापैराजरोगीभवेन्नरः ॥ ७० ॥ ॥ शुकउवाच ॥ ॥ किंजा
[illegible]स्यपूजाचकिंदानंचकिमौषधम् ॥ ॥ भृगुरुवाच ॥ ॥ यंत्रंश्रीपद्मनाभस्यभूर्जपत्रेचलेखयेत् ॥ ७१ ॥ [illegible]

प्रपूजयेत् ॥ ऊर्णापट्टं हरिद्रर्णं तंडुलैः संपुटीकृतम् ॥ ७२ ॥ तस्योपरि समासीनमयुतं कारयेज्जपम् ॥ पद्मनाभस्य बीजस्य कारयेद्द्विविसं
...तेः ॥ ७३ ॥ पट्टवस्त्रं परीधाय पूर्वोक्तविधिना सह ॥ ततो दानं प्रकर्त्तव्यं पदं षोडशहाटकम् ॥ ७४ ॥ रजतं द्विगुणं देयं ...
...तम् ॥ ताम्रपात्राण्येककर्षप्रमितानि घृतेन च ॥ पूरयित्वा च चत्वारि ब्राह्मणेभ्यः प्रदापयेत् ॥ ७५ ॥ ततः प्रदद्यात्पूपान्नं गोधूमतण्डुलैर्युतम् ॥
...पात्रसंयुतं तात कर्षं विंशतिविंशति ॥ ७६ ॥ एतद्दानं तु कृत्वा च दक्षिणां च प्रदापयेत् ॥ एवं च विधिवद्दानं कारयेच्छ्रद्धयान्वितः ॥ ७७ ॥
नश्यंति व्याधयः सर्वे पूर्वं पापं च नश्यति ॥ पद्मनाभस्य यो मंत्रं बाहौ शिरसि धारयेत् ॥ ७८ ॥ एतद्दानेषु चीर्णेषु पीडामुक्तो नरो भवेत् ॥
कविना च कृतः प्रश्नो भृगुणा परिभाषितः ॥ ७९ ॥ ॥ इति भीष्मकयोगफलम् ॥ ५ ॥ व्यये वाचाष्टमे क्रूराः क्षेत्रेशो द्वादशो यदा ॥ कर्मे
सौम्या धने क्रूरा जीमूते च सुखं भवेत् ॥ ८० ॥ पूर्वं गंगातटे चैव रुद्रसेवा कृता बहु ॥ इह जन्मनि तेनाऽसौ पित्ताधिक्यो भवेन्नरः ॥ ८१ ॥ दाता चैव च
भोक्ता च राजमान्यो गुणाधिकः ॥ परोपकारी धर्मात्मा कीर्तिमान्धनवांस्तथा ॥ ८२ ॥ षोडशाब्दे तथा विंशे सौख्यमात्मबलैर्भवेत् ॥ गजवा
जिधनैर्युक्तो राजा वा राजमंत्रिकः ॥ ८३ ॥ रुद्रसेवानुसारेण एवंभूतो भवेन्नरः ॥ तपस्वी निंदितः पूर्वं तस्माद्दीनं फलं भवेत् ॥ ८४ ॥ चिंता च
जायते तस्य सौख्यं चाल्पधनात्मजाः ॥ सुमुखोऽपि ह्युदासीनस्त्वकस्माज्जायते ध्रुवम् ॥ ८५ ॥ षड्विंशद्वाऽपि चत्वारिंशद्वर्षे दीर्घवेदना ॥
उदरे वा करे पादे जायते नात्र संशयः ॥ ८६ ॥ शुक्र उवाच ॥ किं जाप्यं कस्य पूजा च किं दानं च किमौषधम् ॥ भृगुरुवाच ॥ रीतिं वा ताम्र
पात्रं चतुर्दशपलोद्भवम् ॥ ८७ ॥ कृत्वा तस्मिन्प्रकर्तव्यं चन्दनान्नवमंडलम् ॥ तपस्विरूपं तन्मध्ये कृत्वा पूजां च कारयेत् ॥ ८८ ॥ ऊर्णा
पट्टं सवर्णं तत्पुटं द्वादश कारयेत् ॥ तस्योपरि समासीनो रुद्रमंत्रं नवत्रिकम् ॥ ८९ ॥ द्विसहस्रं चरेज्जाप्यं ततः पुण्यं समाचरेत् ॥ भद्रान्न हाटकाः सप्त

तिलान्नस्यापिसततच ॥ ९० ॥ मुद्गुर्गोधूममाषान्नतंडुलंतैलसंयुतम् ॥ प्रस्थद्वयंप्रदातव्यंमुद्रामष्टोतरंशतम् ॥ ९१ ॥ एतद्दानानुसारेण
चिंताकष्टंविनश्यति ॥ दानाभावेमहाकष्टंपुत्रैरपिधनैरपि ॥ ९२ ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ ९३ ॥ इतिजीमूतयोग
फलम् ॥ ६ ॥ संतानेशोरिपुक्षेत्रेषष्ठाष्टद्वादशेऽपरे ॥ सुतेशःक्रूरसंयुक्तोऽथवाक्रूरेणवीक्षितः ॥ ९४ ॥ पूर्वसगर्भाहारिणीमारितामृगसंयुता ॥
एतद्विजययोगेनरक्षिताहरिणीसुता ॥ ९५ ॥ नभवंतिसुतास्तस्यजाताजीवंतिनैवच ॥ कन्याद्वयंत्रयंवापिजायतेनात्रसंशयः ॥ ९६ ॥
आदौपुत्रीततःपुत्रस्ततःपुत्रीप्रजायते ॥ शेषेगर्भेभवेत्तस्यागर्भस्रावोनसंशयः ॥ ९७ ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौ
षधम् ॥ भृगुरुवाच ॥ रीतिंवाताम्रपात्रंचपलंचैवचतुर्दशम् ॥ ९८ ॥ तन्मध्येचंदनैःकार्यंपद्ममष्टदलंतथा ॥ तदंतःकारयेज्जाप्यंपद्मनाभस्यबीज
कम् ॥ ९९ ॥ द्वेसहस्रेकृतायामोभक्तिश्रद्धासमन्वितः ॥ ततोदानंचकर्त्तव्यंषड्भाषोडशहाटकम् ॥ १०० ॥ श्वेतंवाप्यथवानीलंभव्याश्वंचमनोह
रम् ॥ मासादिवर्षपर्यंतमश्वस्याशनसंयुतम् ॥ १०१ ॥ सर्वोपस्करसंयुक्तंरूप्यंषट्कंचदापयेत् ॥ ऊर्णापट्टमथान्नंचतैलंगोधूमतंडुलम् ॥ १०२ ॥
प्रस्थद्वयंप्रदातव्यंताम्रपात्रेघृतैर्भृतम् ॥ ततोगोसारकंयंत्रंकारयेद्विधिसंयुतम् ॥ १०३ ॥ स्त्रीकंठेधारयेन्नित्यंभक्त्यातुरविवासरे ॥ एतद्दा
नोपचारेणचिरंतिष्ठतिसंततिः ॥ १०४ ॥ गर्भकालेतुकर्तव्यंदानंविप्राययत्नतः ॥ दानाभावेभवेच्चिंतापुत्रैरपिधनैरपि ॥ १०५ ॥ दानतः
प्राप्यतेपुत्रोबुद्धिमांश्चसमृद्धिमान् ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ १०६ ॥ इतिविजययोगफलम् ॥ ७ ॥ कर्मेशःक्रूरसंयुक्तः
क्रूरक्षेत्रेऽथवापरे ॥ तृतीयेष्टेरिपौवापिआनन्दोयोगउच्यते ॥ १०७ ॥ पूर्वंक्षेत्रशतंकृत्वागोशतंचसमर्पितम् ॥ तेनपुण्यप्रभावेणमहाराजो
भविष्यति ॥ १०८ ॥ धीमानथोविशालाक्षोबहुधान्ययुतोभवेत् ॥ गौरश्चचपलोवक्तादातादर्शीछलोत्कटः ॥ १०९ ॥ अकस्मात्तुभवे

त्क्रोधीपुनःशीघ्रोपशांतिमान् ॥पंचषष्ठाब्दतः सौख्यंराजमान्योरणेजयः ॥ ११०॥ धनंकीर्त्तिर्भवेत्तस्यबहुभृत्यादिसंवृतः॥अष्टादशेतुविंशे वामहाकीर्त्तिर्धनंतथा ॥ १११ ॥ दिनेदिनेमहासौख्यंवर्द्धतेनात्रसंशयः ॥ पूर्वंसतीकलंकाद्वाबालहत्याप्रभावतः ॥ ११२ ॥ राज रोगोभवेत्तस्यदुःखंसंतानतोध्रुवम् ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ ११३ ॥ भृगुरुवाच ॥ नवारमंडल स्याग्रेपद्मनाभत्रिबीजकम् ॥ द्विसहस्रंजपेज्जाप्यंततःपुण्यंसमाचरेत् ॥ ११४ ॥ सप्तविंशतितारंचषड्विंशतिचहाटकम् ॥ ताम्रपात्रं पलत्रिंशद्घृतेनपरिपूरितम् ॥ ११५ ॥ पंचाशत्करवस्त्रंचगांचसद्वत्ससंयुताम् ॥ सप्तान्नंप्रस्थप्रस्थंचविप्रेदानंसमाचरेत् ॥ ११६ ॥ त्रिपुरारेस्ततोमन्त्रैर्गोघृतंमंत्रयेत्सुधीः ॥ ऋत्वंतेत्रिदिनंदद्यादाचार्यायसुवर्णकम् ॥ ११७ ॥ एतद्दानोपचारेणसंतानंप्राप्यतेध्रुवम् ॥ सुंदरंत्रिपुरायंत्रंकांस्यपात्रेचलेखयेत् ॥ ११८ ॥ तन्मंत्रंक्षालयेद्वीजैर्जपंकृत्वाविशेषतः ॥ एतद्दानोपचारेणरोगहीनोभवेत्पुमान् ॥११९॥ अचिरेणैवकालेनपुत्रलाभादितःसुखम् ॥ दानाभावेमहाचिंतापुत्रैरपिधनैरपि ॥ १२० ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥१२१॥ इत्यानंदयोगफलम् ॥ ८ ॥ सौम्यालग्नेधनेकर्मेक्रूराद्यूनेसुतेयदा ॥ नीचोच्चेवाधनेलग्नेयोगोयंपिंगलोभवेत् ॥ १२२ ॥ तपस्वी निंदितःपूर्वंसाध्वीस्त्रीचकलंकिता ॥ पात्रेदानंतुकृत्वावैपश्चात्तापःकृतःपुरा ॥ १२३ ॥ प्राप्यतेचधनंधान्यंक्षणेवृद्धिःक्षणेक्षयः ॥ बा ल्येच्च(?)लभतेदुःखंपित्ताधिक्यंचजायते ॥ १२४ ॥ तस्यदुःखंसुतात्स्त्रीतःप्रभवेन्नसुखंक्वचित् ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजा ..किंदानंचकिमौषधम् ॥ १२५ ॥ भृगुरुवाच ॥ शनेस्त्रीणिशिखेःपंचसहस्रंजपमाचरेत् ॥ रीतिपात्रंपलंत्रिंशच्चंदनैर्नवमंडलम् ॥ १२६॥ ऊर्णापट्टंहरिद्वर्णंचतुर्विंशत्पुटीकृतम् ॥ तस्योपरिसमासीनःपूर्वोक्तंजपमाचरेत् ॥ १२७ ॥ जपांतेचकृतंपुण्यंषड्द्वादशहाटकम् ॥

रजतंद्विगुणंदेयंशय्याभव्याविचित्रिता ॥ १२८ ॥ सप्तान्नंप्रस्थप्रस्थंचवस्त्रंहस्तांश्चतुर्दश ॥ पंचरत्नसमायुक्तंदद्याच्चैवनसंशयः ॥ १२९ ॥ एतद्दानंप्रकर्त्तव्यंयदर्हः श्रूयतेध्रुवम् ॥ एतद्दानप्रभावेणसर्वसिद्धिर्नसंशयः ॥ १३० ॥ त्रिजन्मनिमहादुःखंदाना भावेपुनःपुनः ॥ जपाभावेमहत्कष्टंप्राणैरपिधनैरपि ॥ १३१ ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ १३२ ॥ इतिपिंगलयोगफलम् ॥ ९ ॥ सुतपेशत्रुक्षेत्रेचदुष्टेक्रूरेऽथवापिच ॥ शत्रुक्षेत्रेयदाजीवःसंततिर्म्रियतेध्रुवम् ॥ १३३ ॥ इत्येवंविफलोयोगोभवत्येवनसंशयः ॥ स्थाप्याहरणयोगेनब्राह्मणस्यचपूर्वतः ॥१३४॥ तेनपापेनवैपुत्रसंतानोपहतोभवेत् ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाच किंदानंचकिमौषधम् ॥ १३५ ॥ भृगुरुवाच ॥ रीतिपात्रेनवैपुत्रकारयेन्नवमंडलम् ॥ विप्रमूर्तिंचतन्मध्येकारयेच्चंदनेनच ॥ १३६ ॥ रक्तांबरंपरीधायद्विसहस्रंजपंचरेत् ॥ पद्मनाभत्रिबीजेनजपंकुर्यान्नसंशयः ॥१३७॥ ततःस्थापनिकादेयानवषट्पंचहाटकम् ॥ रजतंद्विगुणं देयंमुक्ताफलंचतुर्दश ॥ १३८ ॥ सप्तान्नंप्रस्थप्रस्थंचगुडेनैवघृतेनच ॥ स्त्रीपुंसयोर्वस्त्रयुग्मंदद्याद्ब्राह्मणएवच ॥ १३९ ॥ ततस्तुश्रीफलं भव्यंमायामंत्रेणमंत्रयेत् ॥ ऋत्वंतेस्त्रीषुदातव्यंभौमेनक्तंचकारयेत् ॥ १४० ॥ ततोगोदानकंयत्नात्पूर्वोक्तविधिनाचरेत् ॥ एतद्दानोपचारेणध्रुवंजीवतिसंततिः ॥ १४१ ॥ एतद्दानंविनाकृत्वापुत्रसौख्यंनजायते ॥ पुत्रीसौख्यंतथाचैवजायतेनचकस्यचित् ॥ १४२ ॥ शुभयोगानिसर्वाण्यदानेतुविफलंभवेत् ॥ यदानकुरुतेदानंतदंतेनिर्द्धनोभवेत् ॥ १४३ ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ १४४ ॥ इति विफलयोगफलम् ॥१०॥ मूर्तौसितेनीचधनेऽर्कजीवसौम्यार्किशुक्रारिव्ययेचपापाः ॥ सौम्यास्त्रिकोणेयदिजन्मकालेमहोदधिश्चक्रधरोनृपःस्यात ॥ १४५॥ इतिमहोदधियोगफलम् ॥ ११ ॥ रविक्षेत्रगतेजीवेजीवक्षेत्रेरविर्बुधः॥ पंचमेराहुचंद्रौद्वावदृष्टौगुरुणायदा ॥ १४६ ॥

सदापैशाचिकोयोगोभविष्यतिनसंशयः ॥ पूर्वंतुभगिनीपुत्रोघातितस्तेनपाधिना ॥ १४७ ॥ तेनयोगप्रभावेणसंतानोऽस्यनविद्यते ॥
शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ १४८ ॥ भृगुरुवाच ॥ राहुर्कजीवकेतूनांसप्तपंचनवत्रिकम् ॥ बीज
मंत्रंविशेषेणमंत्रंपंचशतंजपेत् ॥ १४९ ॥ पश्चाद्दानंचकर्तव्यंषट्‌षोडशहाटकम् ॥ सप्तान्नंप्रस्थप्रस्थंचरथंवृषभसंयुतम् ॥ १५० ॥
रजतंद्विगुणंवस्त्रंकरमष्टोत्तरंशतम् ॥ ताम्रपात्रपलांस्त्रिंशद्घृतेनपारिपूरयेत् ॥ १५१ ॥ भव्याश्वंवावृषंभव्यंजापकायप्रदापयेत् ॥ दत्त्वादा
नंद्विजेभ्यस्तुभागिनेयंप्रपूजयेत् ॥ १५२ ॥ पाद्यार्घ्यंदापयेन्नित्यंमासमेकंनसंशयः ॥ तत्करादक्षतंग्राह्यंपादप्रक्षालनंपिबेत् ॥ १५३ ॥
पूर्वमेतत्प्रकर्तव्यंपश्चादौषधमाचरेत् ॥ ततश्चैवद्विजस्त्रीभ्योदत्त्वाप्रसवसाहितीम् ॥ १५४ ॥ ऋत्वंतेस्त्रीषुदातव्यमौषधंप्राप्नुयात्सुतम् ॥
एतद्दानोपचारेणसंततिःप्राप्यतेध्रुवम् ॥ १५५ ॥ सप्तजन्मनिदारिद्र्यंदानाभावेननिश्चितम् ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥
॥ १५६ ॥ इतिपैशाचयोगफलम् ॥ १२ ॥ सुखेशोपिरिपुक्षेत्रेव्ययेतुर्येषडष्टके ॥ सुखेशःक्रूरसंयुक्तःसौम्याःकेंद्रत्रिकोणगाः ॥
॥ १५७ ॥ अखिलग्रहानुमानेनदामिनीयोगसंभवः ॥ मित्रद्रोहःकृतःपूर्वंतेनेहनरजन्मनि ॥ १५८ ॥ धनहीनोऽथवारोगीसुख
मध्येप्युदासति ॥ अथवासंततेर्श्चिंताजायतेनात्रसंशयः ॥ १५९ ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजावाकिंदानंचकिमौषधम् ॥
भृगुरुवाच ॥ ताम्रपात्रपलान्पंचतन्मध्येनवमंडलम् ॥ १६० ॥ चंदनेनचकर्त्तव्यंतदग्रेकारयेज्जपम् ॥ पंचबीजंनृसिंहस्यसमस्तंतुद्वयंजपेत् ॥
॥ १६१ ॥ ततोदानंप्रकर्त्तव्यंनवषट्‌चहाटकम् ॥ तस्यसेवाप्रकर्त्तव्यातस्यपूजाविशेषतः ॥ १६२ ॥ चंदनैर्धूपदीपैश्चगुडनैवेद्यकैस्तथा ॥
रजतंद्विगुणंवस्त्रंपंचाशत्करसंज्ञकम् ॥ १६३ ॥ सवत्सांगांप्रदद्यात्तुश्रद्धायुक्तश्चमानवः ॥ ततश्चपद्मनाभस्ययंत्रंपार्श्वेचधारयेत् ॥ १६४ ॥

अस्मिन्दानोपचारेचचिंताकष्टक्षयोभवेत् ॥ रामंचलक्ष्मणंनागंगोदुग्धेनसमन्वितम् ॥ १६५ ॥ ऋत्वंतेतुप्रदातव्यंभोजनंपयसाघृतम् ॥
संतानार्थंचदातव्यंदानानंतरमौषधम्॥ १६६॥यदानकुरुतेदानंतदादुःखीमहान्भवेत् ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥१६७॥
इतिदामिनीयोगफलम्॥ १३॥बुधक्षेत्रगतोजीवोजीवक्षेत्रेऽथवाभृगुः ॥ चतुर्ग्रहोभवेत्तत्रयोगोयंचक्रदामिनी॥ १६८॥ चातुर्यगुणसंपन्नःसका
मीवक्रलोचनः॥सुवक्तादीर्घजीवीचकिंचिद्दातामहासुखी॥ १६९॥इतिचक्रदामिनीयोगफलम्॥ १४ ॥ तुर्येसुतेव्ययेलाभेग्रहयुग्मंभवेद्यदि ॥
राजमान्योधनाढ्यश्चवागमीचपंडितःसुधीः ॥ १७० ॥ इतिवाग्भवयोगफलम् ॥ १५ ॥ भृगुर्वाचस्पतिक्षेत्रेशनियुक्तेभृगूदये॥कर्केजी
वज्ञसूर्याश्चश्रीमुखोयौवनेसुखम् ॥ १७१ ॥ विंशद्वर्षगतेनूनंराजमान्योमहाद्भुतः ॥ गोजाश्वधनसंयुक्तोमहायोगोभृगूदितः ॥ १७२ ॥
इतिश्रीमुखयोगफलम् ॥ १६ ॥ तुर्येवापंचमेराहुःसुतेशःक्रूरसंयुतः ॥ क्रूरक्षेत्रेत्रिकोणेज्ञःक्रूरयोगस्तदोच्यते ॥ १७३ ॥ क्रोधीस्थूलो
महामानीसलज्जोधनवांस्तथा ॥ सदातीर्थाभिलाषीचकुटिलोजायतेपुनः ॥ १७४ ॥ इतिक्रूरयोगफलम् ॥ १७ ॥ लग्नेजीवेऽथवाशुक्रे
उच्चेवाउदयेऽथवा॥केंद्रत्रिकोणगाःसौम्याःपापःषष्ठेव्ययेऽथवा॥ १७५॥गजयोगेभवेत्पुत्रोराजमान्योमहाबलः ॥ सोपिमानाधिकःक्रोधी
दीर्घायुर्बहुपुत्रकः ॥ १७६ ॥ इतिगजयोगफलम् ॥ १८ ॥ चतुष्केंद्रेयदासौम्याःषष्ठेलाभेचपापिनः ॥ उद्भूतःसागरेसौख्यंचक्रीवापि
समोहरेः ॥ १७७ ॥ इत्यद्भुतसागरयोगफलम् ॥ १९ ॥ मूर्त्तौक्रूरेंदुसंयुक्तस्तुर्यास्तेभेशुभाशुभाः ॥ ऊर्द्ध्वोद्भूतोभवेद्योगोराजमान्योभवे
द्ध्रुवम्॥ १७८॥क्षणेसौख्यंक्षणेचिंताधनीस्वल्पस्तुजायते॥महत्त्वंराजमान्यंचमानसौख्यंसदाभवेत् ॥ १७९॥एतद्योगप्रभावेणयावज्जीवंस
मृद्धिमान् ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ १८० ॥ इत्यूर्द्ध्वोद्भूतयोगफलम् ॥ २० ॥ मूर्त्तौचेष्टाष्टमेषष्ठेशनीराहुस्तथाकुजः ॥

तदायोगोनिपातः स्यात्परदेशेसदाव्रजेत् ॥ १८१ ॥ कृपणोदुष्टचित्तश्चधनहीनस्तथाभवेत् ॥ अथवासंततेश्चिंताभवेन्नैवात्रसंशयः ॥ १८२ ॥
शनेः पंचततस्त्रीणिद्विसहस्त्रंजपंजपेत् ॥ ततोदानंप्रकर्त्तव्यंभव्याश्वंगोयुगंतथा १८३ ॥ ततः सुवर्णषट्कंचरजतंद्विगुणंतथा ॥ ततोदानप्रभावेणनि
पातस्यक्षयोभवेत् ॥ १८४ ॥ इतिनिपातयोगफलम् ॥ २१ ॥ लग्नेशेचगतेतुर्येसौम्यक्षेत्रेशिवार्चकः ॥ विलासीचमहादंभीदाताभोक्तागुणाधिकः
॥ १८५ ॥ इतिविलासयोगफलम् ॥ २२ ॥ मेषमार्त्तण्डलाभस्थेककेंगुरुर्धनेस्थितः ॥ कर्मेशुक्रः सदासौम्याः शक्रयोगेचचक्रिणः ॥ १८६ ॥
इतिशक्रयोगफलम् ॥ २३ ॥ रिपौतुर्येऽष्टमेचान्त्येराहुभौमार्कतत्सुताः ॥ मूर्तौचंद्रेचकुरुतेमातुःकष्टमृतुत्रयम् ॥ १८७ ॥ असौ
महिषयोगोऽस्तिफलंशृण्वस्यपुत्रक ॥ गर्भपातः कृतः पूर्वंतेनात्रमृतपुत्रकः ॥ १८८ ॥ धर्मस्थानेस्थितोजीवः सुखंतेनप्रजायते ॥ शुक्र
उवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ १८९ ॥ भृगुरुवाच ॥ क्रूरग्रहजपंकुर्याद्विशेषाच्चन्द्रभौमयोः ॥ ततोदानंप्रकर्त
व्यंगुरुयोगात्सुखंभवेत् ॥ १९० ॥ इतिमहिषयोगफलम् ॥ २४ ॥ केंद्रेचतुष्केपिचउच्चखेटाजीवार्कभौमार्किशशांकिनोंऽगे ॥ नीचत्रिकोणे
पिचपापखेटादेवेंद्रयोगोऽखिलयोगमुख्यः ॥ १९१ ॥ इतिदेवेंद्रयोगफलम् ॥ २५ ॥ सौम्याः क्रूराधनेलग्नेनीचशत्रुगृहेगुरुः ॥ पितुःकष्टंमहा
सौख्यमन्तेदुःखीप्रजायते ॥ १९२ ॥ चतुर्ग्रहायदालग्नेधनेशुक्रोयदाभवेत् ॥ धर्मेसौरीरिपुक्षेत्रेराजयोगेमहासुखी ॥ १९३ ॥ इतिराजयोग
फलम् ॥ २६ ॥ छिद्रोदयेव्ययेक्रूरास्तत्रचंद्रः स्थितोयदि ॥ अथवापिग्रहाः सर्वेत्रिस्थानेषुयदास्थिताः ॥ १९४ ॥ शूलेपुराकृतंपापंशूलेनप्र
हतोवृषः ॥ तेनपापेनदुष्टात्मारोगीवाधनवर्जितः ॥ १९५ ॥ अथसंतानहेतोश्चबहुचिंताप्रजायते ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिं
दानंचकिमौषधम् ॥ १९६ ॥ ताम्रपात्रंपंचपलंतन्मध्येपंचमंडलम् ॥ चंदनेनचकर्त्तव्यंकारयेद्वृषभाकृतिम् ॥ १९७ ॥ तदग्रे

कारयेज्जाप्यंरुद्रमंत्रंत्रियंबकम् ॥ सहस्रपंचकंकार्यंततः पुण्यंसमाचरेत् ॥ १९८ ॥ चतुर्विंशतिषट्कंचहाटकंगांवृषंतथा ॥ एतद्दानप्रभावेणशू
लयोगक्षयोभवेत् ॥ १९९ ॥ यदानकुरुतेदानंतदाचपंचजन्मसु ॥ महाचिंताभवेत्तस्यपुत्रैरपिधनैरपि ॥२०० ॥ कविनाचकृतःप्रश्नोभृगु
णापरिभाषितः ॥ २०१ ॥ इतिशूलयोगफलम् ॥ २७ ॥ भाग्येचन्द्रः सुखेशुक्रोलाभेवात्रितयेगुरुः ॥ सुतेक्रूराश्चचत्वारोभास्करास्तो
महासुखम् ॥ २०२ ॥ चत्वारिंशत्परंषष्टितमेवर्षेसुखीभवेत् ॥ राजावाराजमान्यश्चकुबेरस्यसमोभवेत् ॥ २०३ ॥ तदनंतरंभवेच्चिंता
उद्वेगोवधबन्धनम् ॥ धनहानिर्महादुःखंपुत्रस्त्रीमित्रसंपदाम् ॥ २०४ ॥ नभवंतिसुतास्तस्यभवेदपिनजीवति ॥ ॥ शुक्रउवाच ॥ ॥
किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ २०५ ॥ ॥ भृगुरुवाच ॥ ॥ विप्रायदानंकर्त्तव्यंषष्टिषट्कंचहाटकम् ॥ भव्याश्वंरजतंवस्त्रं
पंचरत्नसमन्वितम् ॥ २०६ ॥ एतद्दानप्रभावेणयावज्जीवंसमृद्धिमान् ॥ पुत्रपौत्रादिसौभाग्यंवर्द्धतेऽहर्निशंततः ॥ २०७ ॥
पुत्रंपौत्रंचतत्पुत्रंलभतेचसुखंधनम् ॥ प्राप्यतेतेनपुण्येनतस्मात्पुण्यंसमाचरेत् ॥ २०८ ॥ यदानकुरुतेदानंतदादुःखीभवेद्ध्रु
वम् ॥ भ्रातृपुत्रैरपुत्रत्वंसदादुःखीधनैरपि ॥ २०९ ॥ तस्मात्कर्मतुकर्त्तव्यंश्रुतिमात्रेणसर्वतः ॥ कविनाचकृतःप्रश्नोभृगुणाप
रिभाषितः ॥ २१० ॥ इतिभास्करास्तयोगफलम् ॥ २८ ॥ लग्नेसौम्याः सुखेसौम्याः स्वायुर्धर्मेशुभाशुभाः ॥ भास्करे
सुखसम्पत्तिः क्षणेवृद्धिः क्षणेक्षयः ॥ २११ ॥ सूर्यपंचाक्षरंमन्त्रंसहस्रंकारयेज्जपम् ॥ ततोदानंप्रकर्त्तव्यंपंचषट्कंचहाटकम् ॥ २१२ ॥
रक्तवस्त्रंकरत्रिंशत्ताम्रपात्रंघृतैर्भृतम् ॥ रजतंभारषट्कंचदत्तंश्रीसूर्यसंनिधौ ॥ २१३ ॥ एतद्दानप्रभावेणअक्षयोजायतेध्रुवम् ॥ यदानकुरुते
दानंधनपुत्रैर्विवर्जितः ॥२१४॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥२१५॥ इतिप्रकारान्तरेण भास्करास्तयोगफलम् ॥२९॥ लग्ने

सुखेस्मरेधर्मेराहुश्चंद्रोशिखीशनिः ॥ क्रूराःसौम्याधनेलग्नेयोगश्चंद्रास्तसंज्ञकः॥२१६॥एतद्योगप्रभावेणस्वल्पायुर्जायतेनरः ॥ यदिजीव
तिबालोसौकुबेरस्यसमोभवेत् ॥२१७॥ नसौख्यंनहिपुत्राश्चदीर्घरोगीभवेन्नरः ॥ शुक्रउवाच ॥ किंदानंकस्यपूजाचकिंजाप्यंचकिमौषधम्
॥ २१८ ॥ भृगुरुवाच ॥ गंगामध्येकृतंदानंगुप्तंतेनमहासुखी ॥ गुरुर्निंदाततःपश्चाद्दीर्घरोगीभवेन्नरः ॥२१९ ॥ चंद्रमंत्रंत्रिबीजंचजपेत्स
हस्रसंख्यकम् ॥ ततोदानंप्रकर्तव्यंसप्तषट्कंचहाटकम् ॥ २२० ॥ रजतंद्विगुणंताम्रपात्रंरक्तंचतुर्दश ॥ घृतपूर्णगवांयुक्तंसप्तान्नंप्रस्थप्रस्थ
कम् ॥ २२१ ॥ एतद्दानानुसारेणरोगहीनस्तुजायते ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ २२२॥ इतिचंद्रास्तयोगफलम्॥३०॥
धर्मेशोवाथधीशोवाक्रूरोवाक्रूरसंयुतः ॥ दृष्टेभौमेनवाचंद्रेयोगोऽयंदारुणोमतः ॥ २२३ ॥ पूर्वव्याघ्रीसगर्भाचमारितासुतसंयुता ॥ तेन
पापानुसारेणपुत्रोजातोनजीवति ॥ २२४ ॥ कदाचिन्नमृताकन्याएकावापिद्वयंत्रयम् ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकि
मौषधम् ॥ २२५ ॥ भृगुरुवाच ॥ शनौपंचकुजेसप्तबीजमंत्राक्षरंजपेत् ॥ रूप्यपट्टोत्तरेकृत्वाव्याघ्ररूपंचचंदनैः ॥ २२६ ॥ नवास्रमंडलं
मध्येतदग्रेजपमाचरेत् ॥ द्विसहस्रंप्रकर्त्तव्यंततोदानंप्रकल्पयेत् ॥ २२७॥ रजतंदशषट्कंचतदर्द्धंचैवहाटकम् ॥ ताम्रपात्रपलान्रुद्रान्वस्त्रंषष्टि
करान्वितम् ॥ २२८ ॥ सवत्सागौःप्रदातव्याकंबलंरक्तकंबलम् ॥ सप्तान्नंप्रस्थप्रस्थंचदानकालेप्रदापयेत् ॥ २२९ ॥ गुप्तदानप्रभावेण
दारुणस्यक्षयोभवेत् ॥ ततोगोदानकंरत्नंपूर्वोक्तविधिनासह ॥ २३० ॥ भानुयंत्रंचकृत्वातुस्त्रीकटयांधारयेत्ततः ॥ ततस्तुश्रीफलंभव्यं
भानुमंत्रेणमंत्रयेत् ॥ २३१ ॥ तस्यपूजाप्रकर्तव्यावर्षमेकंहियत्नतः ॥ एतत्कृत्योपचारेणसुतोजीवतिनान्यथा ॥ २३२ ॥ रोगिणांरोग
हीनत्वंनिर्द्धनोऽपिधनीभवेत् ॥ दानाभावेमहाचिंतापुत्रैरपिधनैरपि ॥ २३३ ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः॥ २३४ ॥ इतिदा

रुणयोगफलम् ॥ ३१ ॥ तुर्यराशौयदाचंद्रस्तस्येशश्चंद्रवेश्मनि ॥ चंद्रयोगोभवेत्तस्मिन्मंत्रोवापिसुखीधनी ॥ २३५ ॥ इतिचन्द्रराजयोगफलम् ॥ ३२ ॥ चतुःकेंद्रेयदासौम्याउच्चैर्वैजीवसंग्रहे ॥ चतुःसागरयोगेतुमहाराजोमहाधनी ॥ २३६ ॥ किंचिच्चिंताभवेत्तस्यसंतानाद्व्याधितोध्रुवम् ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ २३७ ॥ ॥ भृगुरुवाच ॥ ॥ सुक्षेत्रेचसुपात्रेचमहादेवस्यसन्निधौ ॥ गुप्तदानंमहादानंकृतंतेनात्रजन्मनि ॥ २३८ ॥ महाराजोधनाढ्यश्चजायतेनात्रसंशयः ॥ तपस्वी निंदितः पूर्वंतेनचिंताप्रजायते ॥ २३९ ॥ ताम्रपात्रंपलान्रुद्रांस्तन्मध्येनवमंडलम् ॥ चंदनेनचकर्तव्यंरविरूपंचकारयेत् ॥ २४० ॥ तस्याग्रेकारयेज्जाप्यंरुद्रमंत्रंनवत्रयम् ॥ सहस्रपंचकंकार्यंततोदानंप्रदापयेत् ॥ २४१ ॥ हाटकंदशषट्कंचरूप्यंवाभारविंशतिम् ॥ भव्याश्वंवापिवृषभंयुग्मंगोधूमसंयुतम् ॥ २४२ ॥ सप्तान्नंचैववसनंकरमष्टोत्तरंशतम् ॥ एतद्दानप्रभावेणसर्वचिंताप्रलीयते ॥ २४३ ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ २४४ ॥ इतिचतुःसागरयोगफलम् ॥ ३३ ॥ धनलग्नेत्रिकर्मेशःक्रूराः सौम्याधनेत्रिके ॥ २४५ ॥ सर्वावलोकितश्चंद्रोयोगोऽयंसागरस्तदा ॥ सहस्रगास्तुविप्रेभ्योभोजनांतेधनायुतम् ॥ २४६ ॥ पूर्वंदत्तमिदंदानंतस्माज्जातश्चसागरे ॥ एतद्दानंचकृत्वाचपश्चात्तापंचकारसः ॥ २४७ ॥ पुनर्दानंपुनर्निंदाकृतातेनात्रजन्मनि ॥ जन्मतस्तृतीयेतुर्येतुषष्ठवर्षांतरेनरः ॥ २४८ ॥ उन्मत्तोजायतेपुत्रःसागरेनात्रसंशयः ॥ चतुर्दशादितःपश्चान्महाचिंताप्रवर्तते ॥ २४९ ॥ वर्णाद्बहिर्भवेत्सोऽपिअपांक्तेयोभवेन्नरः ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ २५० ॥ भृगुरुवाच ॥ चतुर्दशपलेताम्रपात्रेचवसुमंडलम् ॥ चंदने [illegible] ॥२५१॥ [illegible]शकरपत्रैःसमास्ततम ॥ तस्योपरिसमासीनःकुर्याज्जाप्यंनसंशयः ॥२५२॥

सप्तबीजाक्षरंमंत्रंरुद्रस्यचजपंचरेत् ॥ ततोदानंप्रकर्त्तव्यंरथंहययुतंतथा ॥ २५३ ॥ भव्यांधेनुंप्रदापयेद्यत्नाद्वस्त्रालंकारभूषितम् ॥ सुवर्णं
भारषट्कंचद्विगुणंरजतंतथा ॥ २५४ ॥ रीतिपात्रंतथाकांस्यपात्रंपलचतुर्दशम् ॥ सप्तान्नंप्रस्थप्रस्थंचपात्रंनवघृतेर्भृतम् ॥ २५५ ॥ अन्यैश्च
विविधैर्दानैःकार्यसिद्धिस्तुजायते ॥ एतद्दानप्रभावेणधनपुत्रयुतोभवेत् ॥ २५६ ॥ जापकायप्रदातव्यंराज्यभ्रष्टोपिभूपतिः ॥ दिनेदिनेलभे
त्सौख्यंपार्थिवोनात्रसंशयः ॥२५७॥ यदानकुरुतेदानंतदादुःखीनसंशयः ॥ महादानंनदद्याद्यस्तस्यक्लेशोधनैःसुतैः ॥ कविनाचकृतःप्रश्नो
भृगुणापरिभाषितः ॥ २५८ ॥ इतिसागरयोगफलम् ॥ ३४ ॥ धर्मस्थानेयदाक्रूरःसहजेतुविशेषतः ॥ कुजमंदैस्तदापुंसांभ्रातृहायोगउच्यते
॥२५९॥ पूर्वंबालवधंकृत्वासन्युवासस्वसद्मनि ॥ भ्रातृहीनोभवेद्बालोजन्मन्यत्रनसंशयः॥२६०॥शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिं
दानंचकिमौषधम्॥ भृगुरुवाच॥ताम्रपात्रंपंचपलंतन्मध्येपंचमंडलम्॥२६१॥चंदनेनप्रकर्त्तव्यंतदग्रेकारयेज्जपम्॥ शनौपंचकुजेत्रीणिबीज
मंत्राक्षरंजपेत् ॥ २६२ ॥ द्विसहस्रंप्रदातव्यमतोदानंप्रदापयेत् ॥ रजतंरुद्रषट्कंचनवषट्कंचहाटकम् ॥ २६३ ॥ शतपंचकरंवस्त्रंकंबलंरक्तकं
बलम् ॥ गौश्चभव्याप्रदातव्यासर्वोपस्करसंयुता ॥२६४॥ सप्तान्नंप्रस्थप्रस्थंचगुडलड्डुसमन्वितम् ॥ एतद्दानप्रभावेणभ्राताजीवत्यसंशयः
॥२६५॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ २६६ ॥ इतिभ्रातृहयोगफलम् ॥ ३५ ॥ राहौभौमस्यगेहेरविसदनगतेसूर्यपुत्रेऽथसूर्ये
मंदक्षेत्रस्थितेचप्रभवतिहितदासौत्रिषुख्यातनामा ॥ योगस्तस्मिन्प्रजातेनरिभवतिपितुर्मातुरस्यात्मनश्चनाशःस्याद्वंशनाशोभवतिशृणु
सुतात्यन्तगर्ह्योऽस्तियोगः ॥ २६७ ॥ अस्मिन्योगेयदाजातस्त्रिषुजातःसउच्यते ॥ पूर्वंगोत्रवधंकृत्वाग्रामदाहश्चकारितः ॥ २६८ ॥
अत्रजन्मनितेनेहत्रिषुजातोनरोभवेत् ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ २६९ ॥ भृगुरुवाच ॥ द्विसहस्रंजपं

कुर्याद्रुद्रमंत्रनवत्रयम् ॥ रविराहुकुजार्कीणांसप्तपंचनवाथषट् ॥ २७० ॥ सहस्रंचजपंकृत्वापश्चाद्दानंचदीयते ॥ रजतंसूर्यषट्कंचषट्कद्वा
दशहाटकम् ॥ २७१ ॥ ऊर्णापट्टंचबद्धर्वेवस्त्रंषष्टिकरंतथा ॥ सप्तान्नंप्रस्थप्रस्थंचगांचदद्यात्प्रयत्नतः ॥ २७२ ॥ शतदानंप्रक
र्त्तव्यंत्रिषुदोषविनाशनम् ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ २७३ ॥ इतित्रिषुयोगफलम् ॥ ३६ ॥ कर्मोदयेसुखेक्रूराः
सुतलग्नेपरेशुभाः ॥ छिद्रेशःसहजेस्थानेछत्रयोगःसदासुखम् ॥ २७४ ॥ पूर्वसेवाकृतातेनमहातीर्थेपुनःपुनः ॥ देवार्चनंद्विजेभक्तिस्तेन
चैवेहजन्मनि ॥ २७५ ॥ सुखीसुकर्मकश्चैवधर्मिष्ठोबहुपुत्रवान् ॥ बहुस्त्रीभिःसमंभोगीबुद्धिमांश्चविचक्षणः ॥ २७६ ॥ कुलमध्येप्रधानश्चगजवा
जियुतोनरः ॥ मनःस्वस्थोभवेद्दाताधनाढ्यःकुलशीलवान् ॥ २७७ ॥ षोडशाद्वर्षतःपश्चात्सौख्यमात्मबलैर्भवेत् ॥ त्रिंशद्वर्षेगतेनूनंमहासौ
ख्यंप्रजायते ॥ २७८ ॥ राजावाराजमान्योवाकुबेरस्यसमोभवेत् ॥ चतुस्त्रिंशाब्दतःपश्चात्ततःपीडाप्रवर्तते ॥ २७९ ॥ रक्तवाताद्भवेत्पीडा
राजरोगःप्रवर्तते ॥ कासश्वासादिरोगाणांप्रादुर्भावोमुहुर्मुहुः ॥ २८० ॥ क्षणेकष्टंक्षणेसौख्यंक्षीणांगोजायतेनरः ॥ शुक्रउवाच ॥ कर्मणा
केनरोगीस्यात्केनोपायेननश्यति ॥ २८१ ॥ भृगुरुवाच ॥ पूर्वेगोत्रवधंकृत्वासाध्वीस्त्रीचकलंकिता ॥ इहजन्मनितैःपापैराजरोगीभवेन्नरः ॥
॥ २८२ ॥ तस्यशांतिंप्रवक्ष्यामिविधिनाशृणुतत्सुत ॥ नृसिंहयंत्रराजंचभूर्जपत्रेचलेखयेत् ॥ २८३ ॥ यक्षकर्दमसंयुक्तंगंधपुष्पैःप्रपूजयेत् ॥
ऊर्णापट्टंबहुपर्णंचतुर्विंशपुटीकृतम् ॥ २८४ ॥ तस्योपरिसमासीनोविशुद्धोजपमाचरेत् ॥ नृसिंहमंत्रराजस्यकारयेद्विधिसंयुतम् ॥ २८५ ॥
[illegible]परीधायपूर्वोक्तविधिनासह ॥ ततोदानंप्रकर्त्तव्यंषट्कंषोडशहाटकम् ॥ २८६ ॥ रजतंद्विगुणंवस्त्रमष्टोत्तरकरंतथा ॥ ताम्रपात्रंचकर्ष
[illegible]रितम् ॥ २८७ ॥ आसनंविधिवद्दद्यात्सवत्सांगांविशषतः ॥ हेमश्चधेनुमेकांचरजतोपरिधारयेत् ॥ २८८ ॥ पद्मासनेजप[illegible]का

यौनवास्त्रमण्डलोपरि ॥ एवंचविधिवद्दानंकारयेच्छ्रद्धयान्वितः॥२८९॥ नश्यंतिव्याधयः सर्वे ततस्तुपुत्रवान्भवेत् ॥ राज्यभ्रष्टोभवेद्राजा निर्द्धनोधनमाप्नुयात् ॥ २९० ॥ नृसिंहमंत्रराजंचबाहौशिरसिधारयेत् ॥ एतद्दानस्यपुण्येनपीडामुक्तोभवेन्नरः ॥ २९१ ॥ श्रुत्वानकुरुते दानंमहादुःखीभवेद्ध्रुवम् ॥ रोगवृद्धिर्महाचिन्तापुत्रैरपिधनैरपि॥२९२॥कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ इतिच्छत्रयोगफलम् ॥ ॥ ३७ ॥ सुतस्थानगतःक्रूरःक्रूरैरपिविलोकितः॥२९३॥क्रूरस्थानगतश्चन्द्रःक्रूरयोगस्तदोच्यते ॥ सुतस्थस्तन्यपानार्थैंब्राह्मणीयोजितापुरा ॥२९४॥ स्तन्याभावात्सुतस्तस्याःस्तनंप्रत्यदशत्तदा ॥ तेनदष्टानुसारेणदीर्घरोग्यतिसारकः ॥२९५ ॥ नभवेत्संततिस्तस्यमहाक्रोधीभयान्वितः ॥ शुक्रउवाच ॥ उपायंवदमेतातमूलकर्मविनाशकम् ॥ २९६ ॥ भृगुरुवाच ॥ सुतक्रूरग्रहाणांचपंचायुतजपंचरेत् ॥ ब्राह्मणी बालकौकृत्वास्वर्णाद्धापलमानतः ॥ २९७ ॥ ताम्रपात्रेनिधायाथतदग्रेजपमाचरेत् ॥ शिवार्चावत्सरंयावद्यथाशक्तिविधानतः ॥ २९८॥ ततश्चश्रीफलंरम्यंमायामन्त्रेणमन्त्रयेत् ॥ लक्ष्मणामूलसंयुक्तमृत्वंतेदापयेन्निशि॥२९९॥कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥३००॥ इतिक्रूरयोगफलम् ॥ ३८ ॥ धीशःषष्ठाष्टमेवारिपुगृहपयुतःक्रूरगेहेऽथवातत्पुत्रस्थानंविपश्येद्रविरपितनयस्तस्यवापुत्रचिन्ता ॥ जातः पुत्रोमृतःस्याद्यदिखलुसुतषष्ठेऽष्टमेवत्सरेवाजीवेत्पुत्रीद्वयंवायुवतिरपिसदाकांक्षिणीपुत्रकस्य ॥ ३०१ ॥ रोगिणीगर्भसंयुक्ताभूवितानकसंयुता ॥ नरक्षितस्तत्सुतोस्माद्धत्रयोगेनसंशयः ॥ ३०२ ॥ तेनपापेनरोगीवापुत्रपापविहीनकः ॥ शुक्रउवाच ॥ किंजाप्यंकस्य पूजाचकिंदानंचकिमौषधम् ॥ ३०३ ॥ भृगुरुवाच ॥ ताम्रपात्ररुद्रपलंतन्मध्येचाष्टमंडलम् ॥ चंदनेनप्रकर्त्तव्यंतदग्रेजपमाचरेत् ॥ ॥ ३०४ ॥ जपंचपंचसाहस्रंशनिमन्त्रस्यकारयेत् ॥ ततोदानंप्रकर्त्तव्यंषष्टिभारंचहाटकम् ॥ ३०५ ॥ रजतंद्विगुणंवस्त्रंकरमष्टोत्तरंश

तम् ॥ सतान्नंप्रस्थप्रस्थंचसवत्सांगांसुदोहिनीम् ॥ ३०६ ॥ दानांतेनववात्रीणिदापयेत्सदलानिच ॥ गांसवत्सांचदुग्धेनपूर्णांविप्रायदापयेत् ॥
॥ ३०७ ॥ संतानंप्राप्यतेवश्यंमृतवत्सासुपुत्रिणी ॥ दानांतेचौषधंदद्याद्रोगिणीगर्भहेतवे ॥ ३०८ ॥ एतद्दानोपचारेणशनैःसिद्धिःप्रजायते ॥
रोगीभव्योभवेन्नूनंनात्रकार्याविचारणा ॥ ३०९ ॥ यदानकुरुतेदानंतदाचपंचजन्मसु ॥ अपुत्रोदीर्घरोगीचभवत्येवनसंशयः ॥ ३१० ॥
कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ ३११ ॥ इतिवज्रयोगफलम् ॥ ३९ ॥ लग्नेचंद्रःपरोराहुःसूर्यभानुसुतौबुधः ॥ सुरासुरार्चितपदो
देवता गुणवर्तितः ॥ ३१२ ॥ कामीयुद्धरतोनित्यंपुत्रपौत्रादिभिर्युतः ॥ महैश्वर्योमहाभाग्योभृत्यभृत्यादिसंयुतः ॥ ३१३ ॥ विनोदीचक्रवर्ती
चपरस्परविरोधकृत् ॥ जन्मांतेचभवेद्दुःखंमध्यभागेसुखीसदा ॥ ३१४ ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ ३१५ ॥ इतिजगत्य-
तियोगफलम् ॥ ४० ॥ सुतपःसद्महसंस्थःक्रूरग्रहसंमतोऽथवासौम्यः ॥ क्रूरक्षेत्रेजीवस्तदाविनाशोभवेद्योगः ॥ ३१६ ॥ पूर्वंपतिव्रतायांतुलोभा
त्स्थापनिकाकृता ॥ तेनपापानुसारेणसंततिर्म्रियतेध्रुवम् ॥ ३१७ ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ भृगुरुवा
च ॥ रीतिपात्रंताम्रपात्रंपलानिचचतुर्दश ॥ ३१८ ॥ रुद्रमंडलमस्याथसम्यङ्मध्येचकारयेत् ॥ ऊर्णापट्टोपरिस्थित्वातदग्रेकारयेज्जपम् ॥
॥ ३१९ ॥ त्रिसहस्रंचत्रिशतमघोरंसंपुटान्वितम् ॥ ततोदानंप्रकर्त्तव्यंसतषट्कंचहाटकम् ॥ ३२० ॥ रजतंद्विगुणंरक्तवस्त्रंषष्टिकराणिच ॥ गोधू
मतंडुलंमाषंप्रस्थपंचकपंचकम् ॥ ३२१ ॥ सवत्सांगांघृतंतैलंप्रस्थंप्रस्थंचसंयुतम् ॥ एतद्दानेकृतेपश्चात्संततिर्जीवतिध्रुवम् ॥ ३२२ ॥ कर्त्तव्यंजन्म
तः पश्चाद्बालकंठेचधारयेत् ॥ एतद्दानंप्रकर्त्तव्यंजापकायनसंशयः ॥ ३२३ ॥ रुद्रीमेकांततःकुर्याद्वृषभंदक्षिणायुतम् ॥ अंत्यजेष्वपिसंस्पृश्यं
कृत्वा [illegible] ॥ ३२४ ॥ [illegible]भोजनंधनसंयतम ॥ एतद्दानोपचारेणपूर्वपापक्षयोभवेत् ॥ ३२५ ॥ कविनाचकृतः

प्रश्नोभृगुणापरिभाषितः ॥ ३२६ ॥ इतिविनाशियोगफलम् ॥४१॥ संतानेशश्चतुर्थेस्यात्तत्पतिःषष्ठगेहगः ॥ रविःशनिःकुजःषष्ठसुतलाभ
व्ययेऽथवा ॥ ३२७ ॥ क्रूरक्षेत्रेयदिभवेत्पुत्रार्चिंतातदाभवेत् ॥ जातेपुत्रेमृतिस्तस्यजीवेत्पुत्रीद्वयंयदि ॥ ३२८ ॥ पूर्वंसंगर्भंहारिणीहारिणेन
हतासह ॥ एतद्योगप्रभावेणरक्षिताहारिणीसुताः॥३२९॥नभवंतितदापुत्राजीवंतिनभवंतिचेत्॥राजरोगोभवेद्देहेसप्तजन्मसुपुत्रक ॥३३०॥
शुक्रउवाच॥किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम्॥भृगुरुवाच ॥ ताम्रपात्रंपलत्रिंशत्तन्मध्येपंचमंडलम् ॥३३१॥ मृगरूपंचतन्मध्ये
कारयेच्छृंगसंयुतम्॥ऊर्णापट्टंदशकरंपटंचदशहस्तकम् ॥३३२॥तस्योपरिसमासीनोयुतंचकारयेज्जपम् ॥ शनिराहुकुजानांचजीवस्यचमन्त्र
जपेत् ॥ ३३३ ॥ ततोदानंप्रकर्तव्यंभारंषोडशहाटकम्॥रजतंद्विगुणंवस्त्रंपंचाशीतिंकरान्वितम् ॥३३४ ॥ सप्तान्नंप्रस्थप्रस्थंचपूर्णपात्रंघृते
नृतम् ॥ एतद्दानंप्रकर्त्तव्यंगांसवत्सांपयस्विनीम् ॥ ३३५ ॥ एतद्दानप्रभावेणचिरंजीवतिबालकः ॥ रोगीभव्योभवेन्नित्यंपुत्रवान्नात्र
संशयः॥३३६॥ श्रुत्वाशीघ्रंप्रकर्तव्यंविलंबंनैवकारयेत् ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ ३३७॥ इतिकलापयोगफलम्॥४२॥
कर्मेशोद्वादशेस्थानेचंद्रयुक्तेथवेक्षिते ॥ तथैवस्वामिनादृष्टास्त्रिकोणेचचतुर्ग्रहाः ॥ ३३८ ॥ तदाहिमानसोयोगःसदाचंचलकेलिवान् ॥
तदार्द्धराजसम्मानंधनाढ्योयशसान्वितः ॥ ३३९ ॥ मध्यभागेसुखंदुःखंजायतेसमताफलम् ॥ वृद्धकालेमहासौख्यंराजवंद्यःकुलेनृपः ॥
॥ ३४० ॥ संतानार्थेभवेच्चिन्ता अथवारोगतोभयम् ॥ वातरक्तकृतापीडाजायतेनात्रसंशयः ॥ ३४१ ॥ शुक्रउवाच ॥ किंजाप्यंकस्य
पूजाचकिंदानंचकिमौषधम् ॥ भृगुरुवाच ॥ ताम्रधातोश्चपात्रंवापलद्वादशकान्वितम्॥ ३४२ ॥ नवाक्षमंडलंमध्येसूर्याकारंचकारयेत् ॥
अर्कबीजंनवत्रीणिसप्तबीजाक्षरंशने: ॥ ३४३ ॥ सहस्राणिप्रजप्तव्यंजाप्यंपूर्वविधानतः ॥ ततोदानंप्रकर्तव्यमष्टषष्ठंचहाटकम् ॥ रजतं

रक्तवस्त्रंचकरविंशोत्तरंशतम् ॥ ३४४ ॥ सवत्सांगांचदद्यात्तुसप्तान्नंप्रस्थकद्वयम् ॥ सूर्यप्रतापयंत्रंचबाहौशिरसिधारयेत् ॥ ३४५ ॥
आमान्नंरविवारेचदेयंतेनचसर्वदा ॥ एतद्दानोपचारेणप्राप्यतेसुतसंपदौ ॥ ३४६ ॥ सर्वेरोगाःक्षयंयांतिसूर्यप्रतापहेतुना ॥ कविनाच
कृतःप्रश्नोभृगुणापरिभाषितः ॥ ३४७ ॥ इतिमानसयोगफलम् ॥ ४३ ॥ स्थानत्रयेयदासौम्याःस्थानत्रयेचपापकाः ॥ धनेतृतीयेचसौ
म्याःषष्ठेवाद्वादशेशुभाः ॥ ३४८ ॥ तदाचानुभवोयोगःषोडशाब्दाश्चयावता ॥ महाक्लेशीचरोगीचदुर्बलाचपलामतिः ॥ ३४९ ॥ पित्त
वाताधिकापीडाकिंचिच्छ्लेष्मान्वितोभवेत् ॥ नवमेदशमेवर्षेद्वादशेचविशेषतः ॥ ३५० ॥ अरिष्टंजायतेतस्यबंधुतोभृत्यतस्तथा ॥ अष्टा
दशेगतेवर्षेसौख्यमात्मबलैर्भवेत् ॥ ३५१ ॥ षड्विंशवर्षतःपश्चान्महासौख्यंप्रजायते ॥ वृद्धत्वेबहुधाचिंतारोगेणापिधनेनच ॥ ३५२ ॥
शुक्रउवाच ॥ एतच्चिन्तापुराजाताकेनोपायेननश्यति॥ भृगुरुवाच ॥ पूर्वंसपशुहन्तासीद्धर्विण्याश्चपशुस्त्रियः ॥३५३ ॥ तैःपापैश्चभवेद्रोगी
पुत्रादेर्दोषतोथवा ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥३५४॥ भृगुरुवाच ॥ छिद्रेशोवासुतेशोवापंचबीजनवत्र
यम् ॥ एकायुतजपःकार्यःपश्चादपिविशेषतः ॥३५५॥ ताम्रपात्रेसप्तपलेपशुरूपंचचंदनैः ॥ ततोदानंप्रकर्तव्यंषड्द्वादशहाटकम्॥३५६॥
द्वादशंरजतंवस्त्रंचतुरशीतिसहस्रकम्॥श्रीफलंपंचरत्नंचगांदद्यान्महिषींतथा ॥३५७॥ एतद्दानंप्रकर्तव्यंवर्षेषट्द्वादशेऽपिवा ॥ चतुर्विंशेचद्वा
विंशएतद्दानंसमाचरेत् ॥३५८॥ एतद्दानप्रभावेणसंतानफलमादिशेत् ॥ पुत्रपौत्रादिकंसम्यग्रोगमुक्तोभवेन्नरः॥३५९॥ कविनाचकृतःप्रश्नो
भृगुणापरिभाषितः॥३६०॥इत्यनुभवयोगफलम्॥४४॥लग्नेशःशुभसौम्यमंदसहितःकेंद्रत्रिकोणोपगःसूर्येणाथनिरीक्षितःसुरगुरुःसूर्येक्षितो
वाशनिः॥कष्टंतस्यपितुर्भवेन्नपसमःसग्रामदेशाधिपोराजावावरवैभवेनसहितःस्यात्सार्वभौमोनृपः॥३६१॥इतिशुभयोगफलम्॥४५॥ लग्ने

ताः शुभसौम्यक्रक्षसहितः स्वस्वोच्चकेंद्रस्थितोऽन्येवाचेत्शुभाः खगानिजगृहेधर्मेधनेवास्थिताः ॥ योगेऽस्मिन्शुभनाम्निराजसुमहामान्योधं
नीवैभवीराजावाप्रवरः सुखैकनिलयोऽसौराजमन्त्रीभवेत् ॥ ३६२ ॥ (इतिप्रकारांतरेणशुभयोगफलम् ॥) संतानेशोरिपुक्षेत्रेद्रव्येतुर्यौष्टपंचमे ॥
अथवाधिपतिः क्रूरोधीस्थानेचशुभेक्षितः ॥ ३६३ ॥ लग्नाच्चपंचमस्थानेराहुर्कोवथवाशनिः ॥ तदाहिवैजितोयोगः पूर्वस्थापनिकाहृताः ॥
॥ ३६४ ॥ तीर्थवासिद्विजस्यैवतैश्चपापैरपुत्रकः ॥ संतानंनभवेत्तस्यनजीवंतिभवंतिचेत् ॥ ३६५ ॥ प्रबलास्त्रीभवेत्तस्यम्रियतेक्वापितिष्ठति ॥
शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ ३६६ ॥ भृगुरुवाच ॥ ताम्रपात्रपलाष्टद्वांस्तन्मध्येनवमंडलम् ॥ द्विजरूपंचत
न्मध्येचंदनेनचकारयेत् ॥ ३६७ ॥ शनेश्चैवकुजस्याथबीजमंत्राक्षरंजपेत् ॥ पंचसहस्रसंख्याकंततोदानंप्रदापयेत् ॥ ३६८ ॥ रूप्यंद्वादश
भारंचभारविंशतिहाटकम् ॥ अष्टमुष्टिकरंवस्त्रंधेनुंसप्तान्नसंयुताम् ॥ ३६९ ॥ ततस्तुश्रीफलंमध्यंमायामंत्रेणमंत्रयेत् ॥ ऋत्वंतेस्त्रीषुदातव्यं
भौमेनक्तव्रतंचरेत् ॥ ३७० ॥ ततोगोसहस्रंवृक्षदानंचकारयेत्सुधीः ॥ एतद्दानप्रभावेणसंततिः प्राप्यतेध्रुवम् ॥ ३७१ ॥ यदानकुरुतेदानं
तदाचत्रिषुजन्मसु ॥ पुत्रादेश्चभवेन्मृत्यूराजरोगीभवेद्ध्रुवम् ॥ ३७२ ॥ श्रुत्वाचसर्वंकर्त्तव्यंविलंबंनैवकारयेत् ॥ कविनाचकृतः प्रश्नोभृगु
णापरिभाषितः ॥ ३७३ ॥ इतिवैजितयोगफलम् ॥ ४६ ॥ धर्मस्थानेयदासौम्याउच्चस्थानेथवाकुजः ॥ क्रूराश्चापचयेस्थानेयोगोद्भूतस्तदा
भवेत् ॥ ३७४ ॥ सुक्षेत्रेचजपंकृत्वाददावन्नंमुहुर्मुहुः ॥ तत्पुण्यस्यप्रभावेणधनाढ्यः ससुखीभवेत् ॥ ३७५ ॥ धनीमानीविशालाक्षोयशस्वी
बहुकार्यकृत् ॥ पितृमातृवियोगश्चजायतेचाष्टवर्षतः ॥ ३७६ ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ भृगुरुवाच ॥
ताम्रपात्रंपलान्सप्ततन्मध्येनवमंडलम् ॥ ३७७ ॥ चंदनेनचकर्त्तव्यंसूर्यमण्डलमुत्तमम् ॥ रुद्रमंत्रः प्रजप्तव्यः षष्टिषट्कंचहाटकम् ॥ ३७८ ॥

रजतंद्विगुणंवस्त्रंचतुःषष्टिकरंतथा ॥ गांसवत्सांचमाषान्नंगोधूमंप्रस्थप्रस्थकम् ॥ ३७९ ॥ एतद्दानप्रभावेणदुःखंनश्यतितत्क्षणात् ॥ महा
सौख्यंभवेत्तस्यसर्वदोषोविलीयते ॥ ३८० ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ ३८१ ॥ इत्यद्भुतयोगफलम् ॥४७॥लग्नेशश्च
शनिश्चैवकन्यास्थोवाऽष्टमेतथा ॥ कुजोज्ञराहूदुश्चिक्ये योगोऽयंशून्यनामकः ॥ ३८२ ॥ शून्येमतिभ्रमश्चिंतास्मृतंचविस्मृतंक्षणे ॥ शून्य
गतिःशून्यमतिःसदादासोभवेन्नरः ॥ ३८३ ॥ वर्षेत्रिंशेचषड्विंशेचतुश्चत्वारिंशेपिच ॥ तद्धनंविलयंयातिसर्वथैवनसंशयः ॥ ३८४ ॥ शुक्र
उवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ भृगुरुवाच ॥ कुजोराहुःशनिःसौम्यएषांबीजाक्षरंजपेत् ॥ ३८५ ॥ सहस्र
त्रितयंकुर्यात्केवलंचप्रयत्नतः ॥ दानादौचततोहोमःपंचामृतैर्विधीयते ॥ ३८६ ॥ देयंचवृषभंभव्यंगोधूमंतैलकंतथा ॥ लवणंसैंधवंचैव
प्रस्थंप्रस्थंप्रदापयेत् ॥३८७॥ गुडंघृतंचयत्नेनदद्याद्विप्रायभक्तितः ॥ रजतंरुद्रषट्कंचाप्यष्टषट्कंचहाटकम् ॥ ३८८॥ अष्टादशकरंवस्त्रंभोजन
दक्षिणायुतम् ॥ ताम्रपात्रंघृतैर्भृत्वाजापकायप्रदापयेत् ॥३८९॥ पूर्वंचनिंदितःसाधुर्ज्ञानस्यक्रयविक्रयम् ॥ अस्मिञ्जन्मनितेनेदंफलंनजायते
ध्रुवम् ॥३९०॥एतद्दानप्रभावेणशून्ययोगक्षयोभवेत्॥वृद्धकालेचवैकल्यान्म्रियतेसन्निपाततः॥३९१॥यदापुण्यंनकुरुतेतदादोषोभवेदयम् ॥
कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ ३९२ ॥ इतिशून्ययोगफलम् ॥४८॥ चंद्रक्षेत्रेयदासौरिःशनिक्षेत्रेसक्रूरयुक् ॥ केंद्रत्रिकोणगा
सौम्यानंदयोगःसुखावहः ॥ ३९३ ॥ षड्विंशाद्वर्षतोनूनंसौख्यंभवतिचोत्तमम् ॥ पंचाशद्वर्षतःपश्चान्महासौख्यंमहद्धनम् ॥३९४॥ लभते
राजमानंचकिंचित्पुण्यप्रभावतः ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ ३९५ ॥ प्रकारांतरंयथा ॥ अयुग्मेषुगृहेष्वेवमेकैकाश्चेद्ग्रहा
स्तु ॥ नंदयोगश्चविख्यातश्चिरायुर्नृपवल्लभः ॥ ३९६ ॥ इतिनंदयोगफलम् ॥ ४९ ॥ सुतेधनेयदासौम्याःपापाःषष्ठेपरेयदा ॥ केंद्रेसौ

स्याअगेपापाजीवयोगस्तदोच्यते॥२९७॥सुखीचकर्मकृच्चैवजीवीचबहुपुत्रकः॥राजमान्योधनाढ्यश्चकुबरस्यसमाभवत्॥२९८॥ इतजा
योगफलम्॥५०॥इतिश्रीयोगसागरेसभार्चितदेशेशुकभृगुसंवादेमनोज्ञयोगादिपंचाशद्योगाःसमाप्ताः॥५०॥ इतिप्रथमंयोगप्रकरणम्॥१॥
जनानांचहितार्थायकविपृष्टंभृगूदितम्॥येनयोगप्रभावेणकर्त्तव्यःपुण्यसंग्रहः॥१॥श्रीपुष्टःकार्मुकश्चैवउन्नतश्चोर्ध्वगस्तथा॥ आकृत्योविगड
कव्यंकर्बुरंचक्रमोदितम्॥२॥साधारणविनाशश्चश्रीवत्सोराक्षसोद्भवः॥भीषणश्चाथसौरोऽथनाहुषःकेंद्रकःकुलः॥३॥ मातंगःपंकजश्चैवपाव
कःशिवधूम्रकौ॥क्रमश्चचतुरश्चैवयोगउक्तस्तथैवच॥४॥वर्द्धमानस्तथावीरःप्रमादोहंसबर्बरौ॥मोहोध्वजोमणिश्चाथकुबेरश्चैवसिंहकः॥५॥
केदारकारकश्चैव गांधर्वोयोगउच्यते॥ तथाभृंगिरिटीचैवपद्मब्रह्मेश्वरास्तथा॥६॥ वज्रशुकाख्ययोगौचलोहिताख्योऽनलस्तथा॥विश्वानंदो
महानंदोगोलःपाशःप्रजापतिः ॥ ७ ॥ विनाशहानिखेटाक्षोमालश्चैवप्रमोदकः॥ सप्तपंचाशत्संख्याकाउक्तायोगाअनुक्रमात ॥ ८ ॥
इतियोगनामानि ॥ भृगौलग्नोदयेयातेगुरुःशुक्रेणसंयुतः॥ धर्मेचंद्रोचलाभास्ते श्रीपुष्टोयोगउच्यते ॥ ९ ॥ आदौचदशवर्षाणिसुखदुः
खसमोभवेत् ॥ ततश्चत्वारिवर्षाणिराजमान्योमहासुखी ॥ १० ॥ द्वात्रिंशद्वर्षतःसौख्यंधनधान्यसुतैर्युतः ॥ भृगूक्तेस्मिन्महायोगेवृद्धका
लेमहासुखी ॥ ११ ॥ इति श्रीपुष्टयोगफलम् ॥ १ ॥ तनौधनेगुरौशुक्रेबुधेवाचंद्रवीक्षिते ॥ स्वगृहेवाऽथमित्रस्थेहिबुकेकार्मुकेसु
खी ॥ १२ ॥ प्रकारांतरेण ॥ शनिक्षेत्रगतोभौमोभौमक्षेत्रेशनिस्तमः ॥ द्वितीयेवाचतुर्थेचखगःक्रूरोभवेद्यदा ॥ १३ ॥ तदाचकार्मुको
योगःसुखहीनोभवेन्नरः ॥ आदौकालेभवेद्रोगीह्यंतेदुःखप्रदोभवेत् ॥ १४ ॥ संतानस्यभवेच्चिंतादीर्घरोगीप्रजायते ॥ पूर्वंब्राह्मणकन्यायां
पापचित्तंकृतंततः ॥ १५ ॥ संतानेभ्यःसुखंनास्तिसत्यमेवंमयोच्यते ॥ शुकउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ भृगु

रुवाच ॥ शनिभौमतमःकेतुमंत्रबीजाक्षरंजपेत् ॥ १६ ॥ संख्यायुतंचकर्त्तव्यंततोदानंसमाचरेत् ॥ सवत्सागौःप्रदातव्यासुवर्णमाषविं
शतिः ॥ १७ ॥ ब्राह्मणान्भोजयित्वातुदक्षिणावस्त्रसंयुतम् ॥ आदौचमहिषींदत्त्वापश्चाद्दानंचदापयेत् ॥ १८ ॥ संतानंचभवेत्तस्यअंतेचैव
सुखीभवेत् ॥ नकरोतियदादानंतदाचपंचजन्मसु ॥ १९ ॥ निर्द्धनत्वमपुत्रत्वंभवत्येवहिनान्यथा ॥ कविनाचकृतःप्रश्नोभृगुणापरिभा
षितः ॥ २० ॥ इतिकार्मुकयोगफलम् ॥ २ ॥ लग्नेशःशत्रुक्षेत्रस्थोलग्नेषष्ठाष्टमेव्यये ॥ सुतस्थानेकुजैर्दृष्टेसौम्याःकेंद्रत्रिकोणगाः ॥ २१ ॥
उन्नताख्योभवेद्योगःसुखयुक्तोभवेन्नरः ॥ पूर्वजन्मनिसंतोषाद्धरालयश्चकारितः ॥ २२ ॥ पश्चात्तापःकृतस्तेनकृतंचहरिमंदिरम् ॥ तैश्चपुण्यैर्म
हायोगीधनाढ्यःप्रभुरीश्वरः ॥२३॥ पश्चात्तापानुसारेणसुतहीनोभवेन्नरः ॥अथवाराजयोगीचभवत्यत्रनसंशयः॥२४॥शुक्रउवाच ॥ किंजा
प्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ भृगुरुवाच ॥ ताम्रपात्रंरुद्रपलंतन्मध्येहरिमंदिरम् ॥ २५ ॥ चंदनेनचकर्त्तव्यंशालग्रामस्यसन्निधौ ॥
जपेत्पंचसहस्राणिरुद्रमंत्रंनवत्रयम् ॥ २६ ॥ एतत्कृत्वाततोदानंदद्यादश्वंमनोहरम् ॥ हाटकंदशषट्कंवाराजतंषट्कविंशतिः ॥२७॥ रक्तवस्त्रं
करत्रिंशत्सप्तान्नंप्रस्थप्रस्थकम् ॥ एतद्दानप्रभावेणपुत्रोभवतिजीवति ॥ २८ ॥ रोगाःसर्वेक्षयंयांतियावज्जीवंसमृद्धिमान् ॥ कविनाचकृतः
प्रश्नोभृगुणापरिभाषितः ॥२९॥ इत्युन्नतयोगफलम्॥३॥ केंद्रत्रिकोणगाःसौम्याउच्चस्थावास्ववर्गगाः॥ नित्यंभुनक्तितल्लक्ष्मीर्वरदासत्यवा
दिनी ॥३०॥ इतिपाठान्तरम् ॥ लग्नेसौम्याःशुभक्षेत्रेपापाःकर्मेसुखेयदा ॥ मित्रक्षेत्रेभवेज्जीवऊर्ध्वयोगेसुखीपुमान् ॥ ३१॥ ऋषिसेवाकृता
पूर्वेहरिभक्तिस्तथैवच ॥ अत्रजन्मनिसौख्यंचजायतेनात्रसंशयः ॥३२॥ श्रीमान्वक्तागुणीधर्मीविख्यातोराजमानवान् ॥ हर्म्यंवापिमठंकू
पंतटाकंवृक्षरोपणम्॥३३॥ततश्चजायतेचिंतासंतानार्थेविशेषतः॥अष्टादशाब्दतोनूनसौख्यमात्मबलैर्भवेत्॥३४॥द्वाविंशाद्वर्षतः पश्चाद्वद्दु

सौख्यंधनागमः ॥ द्वात्रिंशद्वापिषट्त्रिंशद्वर्षतः समताफलम् ॥३५॥क्रमशोजायतेसौख्यंषष्टिवर्षाणियावता ॥ततोवर्षद्वयंयुक्ताचिंताव्याकु
लमानसः ॥ ३६ ॥ तदग्रेसुखसंपत्तिर्धनधान्ययुतोभवेत् ॥ महादानात्सुखंमानंलभतेयावदायुषम् ॥३७॥ वैनाशेकथितंदानंकर्त्तव्यम
श्वसंयुतम् ॥ संतानंप्राप्यतेऽवश्यंभृगुणापरिभाषितम् ॥ ३८ ॥ इत्यूर्द्ध्वयोगफलम् ॥ ४ ॥ सुतपेचास्तगेखेटेपापेवापापवीक्षितेभवति ॥
केंद्रेधनेचसौम्याःक्रूरक्षेत्रेऽथवाजीवः ॥ ३९ ॥ आकृत्याख्यस्तदायोगःपूर्वंपुण्यंकृतंबहु ॥ दानंदत्तंचदीनेभ्योधर्मज्ञानपरेणच ॥ ४० ॥
तत्पुण्यस्यप्रभावेणप्राप्यंतेबहुसंपदः ॥ राजमानंधनंधान्यंभृत्यभृत्यादिसंयुतम् ॥ ४१ ॥ संतानस्यभवेच्चिंताभवतिवानजीवति ॥ विकी
तश्चसतीपुत्रस्तस्यपापानुसारतः ॥ ४२ ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ भृगुरुवाच ॥ ऊर्णापट्टंहरिद्रर्णंचतु
र्विंशत्पुटीकृतम् ॥ ४३ ॥ तस्योपरिसमासीनोजपंकुर्याद्विशेषतः ॥ पटगृहस्यमध्येचाथवादेवगृहेस्थितः ॥ ४४ ॥ सहस्रपंचकंजाप्यंकु
र्यान्मंत्रस्यवैशनेः॥ततोदानंप्रकर्त्तव्यंषट्त्राष्टादशहाटकम्॥४५॥द्विगुणंरजतंवस्त्रंधेनुंचवत्ससंयुताम् ॥ताम्रपात्रंपलत्रिंशद्घृतेनपरिपूरितम् ॥
॥ ४६ ॥ एतद्दानंप्रकर्त्तव्यंषड्गृहाण्यथवागृहम् ॥ एतद्दानप्रभावेणसन्तानंप्राप्यतेध्रुवम्॥४७॥ दीर्घायुर्जायतेबालोनीरोगश्चसुबुद्धिमान् ॥
श्रुत्वानकुरुतेदानंसोऽपुत्रःसप्तजन्मसु॥४८॥पुत्रहीनःसरोगश्चजायतेनात्रसंशयः॥कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥४९॥इत्याकृत्य
योगफलम् ॥५॥कर्मेकर्मेशयुक्तोऽन्यःपापःषष्ठेस्मरेसुते ॥ आयुर्धर्मेचतिष्ठेच्चयोगोऽयंविगतोभवेत्॥५०॥ पूर्वंतीर्थेतपस्वीचानिंदितश्चप्रयत्न
तः ॥ वृद्धकालेकृतासंध्याअत्रजन्मनितेनतु॥५१॥द्वात्रिंशद्वर्षपर्यंतंनसौख्यंधनवर्जितः ॥ तदूर्ध्वंकृषितःकिंचित्सौख्यंचजायतेतदा ॥५२॥
चत्वारिंशाब्दतःपश्चाद्गजवाजिधनान्वितः॥षष्टिवर्षगतेपूर्णेमहाराजामहासुखी॥५३॥ गजवाजिधनंसम्यक्सर्वदाधनदोभवेत्॥ अन्यदेशाधि

पाः सर्वेद्वारितिष्ठंतिकिंकराः ॥ ५४ ॥ शरीरेचमहापीडारूक्षशोकयुतोभवेत् ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् । ॥५५॥भृगुरुवाच॥पुण्याच्चप्राप्यतेसौख्यंविनापुण्यैःसुखंनहि॥चत्वारिंशत्पलंताम्रंतन्मध्येपंचमंडलम् ॥५६॥ चंदनेनचकर्त्तव्यंशालिग्रामस्यसन्निधौ॥ऊर्णापट्टंचतद्वर्णंकृत्वाद्वादशभिःपुटम्॥५७॥ तस्योपरिसमासीनस्त्वयुतंकारयेज्जपम्॥ रवौत्रीणितमःपंचबीजमंत्राक्षरंजपेत ॥ ५८ ॥ ततःपुण्यंप्रकर्त्तव्यंरथाश्वौभूषणान्वितौ ॥ सर्वोपस्करसंयुक्तंषट्कंभवतिहाटकम् ॥५९॥ द्विगुणंरजतंवस्त्रंविंशोत्तरशतंकरम्॥अष्टाविंशत्पलंकांस्यंताम्रपात्रंघृतैर्भृतम् ॥ ६० ॥ तंडुलंमाषयुक्तान्नंगोधूमंचविशेषतः॥चणकाश्चहविष्यान्नंप्रस्थंपंचचपंचच ॥६१॥जापकायप्रदातव्यंशनौवाकुजवासरे॥शुभेक्षणेशुभेचंद्रेपरगृहेऽयुतंचरेत् ॥ ६२॥ एतद्दानप्रभावेणमरणांतेसुखीभवेत् ॥ दानंकृत्वापुत्रसौख्यंविंशद्वर्षेविशेषतः ॥ ६३ ॥ सर्वत्रलभतेसौख्यंपुत्रपौत्रादिसंपदाम् ॥ पुत्रपौत्रंचतत्पुत्रंमहासौख्यंमहद्धनम् ॥ ६४ ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ ६५ ॥ इतिविगतयोगफलम् ॥ ६ ॥ पापालाभेसुतेलग्नेधीशषष्ठेरिपोर्गृहे ॥ पूर्वंमुनेःकृतानिंदागोमध्येतुविशेषतः॥६६॥ तेनपापवशेनास्यपुत्राभावान्नवैसुखम् ॥ भ्रातृभावेभवेद्दुःखंद्वाविंशात्परतःसुखम् ॥ ६७ ॥ नहिज्ञातेतिकृत्वाचद्विजस्थापनिकाकृता ॥ परदारागमस्तीर्थेतेनास्मिञ्जन्मनिध्रुवम् ॥ ६८ ॥ पुत्रचिंताथवारोगीजायतेनात्रसंशयः॥शुक्रउवाच॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥६९॥ भृगुरुवाच ॥ ताम्रपात्रंपलंत्रिंशत्तन्मध्येनवमंडलम् ॥ चंदनेनचकर्त्तव्यंषट्कंविंशतिहाटकम् ॥७०॥ रूप्यपट्टंचवस्त्रंचद्वाविंशत्करकंतथा ॥ गांसवत्सांचमुद्गान्नंतंडुलंतिलकंयवम् ॥ ७१ ॥ प्रस्थद्वादशकंदेयंभौमेनक्तंविशेषतः ॥ रामंचलक्ष्मणंनागंदद्याद्धेनुदुग्धसंयुतम् ॥७२॥ संततिर्जायतेनूनं मृतापत्यानसाध्रुवम् ॥ द्विजांयगोसुतंदद्यात्पूर्वोक्तविधिनासह ॥ ७३॥सापत्याचभवेत्पत्नीसर्वत्रैवविशेषतः ॥

तस्यरोगविनाशायदातव्यंतत्पुरस्कृतम् ॥७४॥ लोहपात्रेतिलंतैलंमहिषींच पयस्विनीम् ॥ जापकायप्रदातव्यंयथोक्तंवेदवादिने ॥ ७५ ॥
एतद्दानप्रभावेणसुतसौख्यंप्रजायते ॥ नीरोगीचभवेत्सद्यः पूर्वदोषक्षयोभवेत् ॥७६॥ श्रुत्वानकुरुतेपुण्यंतदाचसप्तजन्मसु ॥ अपुत्रिकोथवा
रोगीजायतेचमुहुर्मुहुः ॥७७॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ ७८ ॥ इतिकाव्ययोगफलम् ॥७ ॥ कर्मेशःसुखनाथश्चक्रूरयुक्तश्च
षडष्टमे ॥ जीवार्कीचधनेस्यातांतदायोगस्तुकर्बुरः॥७९॥ साध्व्यांकृतःकलंकश्चनदत्तंपूर्वजन्मनि ॥ तैःपापैश्चभवेत्कष्टंधनैर्धान्यैर्नसंशयः॥
॥८०॥ कदाचित्स्वल्पलाभस्तुजायतेचविनिर्णयः ॥ विंशद्वर्षसमासाद्यप्राप्यतेसुखमुत्तमम् ॥ ८१॥ द्वाविंशद्वर्षतोनूनंसौख्यमात्मबलैर्भ
वेत् ॥ अष्टाविंशत्तमेवर्षेप्राप्यंतेसुखसंपदः ॥८२॥ कर्णतुल्योभवेद्दातासर्वत्रैवप्रवेशकः ॥ स्वेच्छाचारीभवेद्द्रोक्तापितुर्नोहानिकृत्कचित् ॥
॥८३॥ लाभेकचिद्भवेद्विप्रःसौख्यंभवतिनिश्चितम् ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ ८४ ॥ भृगुरुवाच ॥
कांस्यपात्रेरुद्रपलंतन्मध्येनवमण्डलम् ॥ ऊर्णापट्टोपरिस्थित्वाशुचिः क्रोधादिवर्जितः ॥८५॥ सप्तबीजार्कसौर्योश्चद्विसहस्रंजपंचरेत् ॥
ततोऽश्वश्चप्रदातव्यःसप्तषट्कंचहाटकम्॥८६॥अष्टोत्तरशतकरंवस्त्रंविप्रायदापयेत्॥एकाग्रमनसानूनंमुद्रान्दद्याच्चतुर्गुणान् ॥८७ ॥ एतत्पुण्य
प्रभावेणदुष्टयोगफलंहरेत् ॥ अनेनप्राप्यतेसौख्यमन्यथाचेत्सुदुःखभाक् ॥ ८८ ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ ८९॥ इति
कर्बुरयोगफलम ॥ ८ ॥ व्ययेवाचाष्टमेक्रूराश्छिद्रेशोद्वादशेयदा ॥ कर्मेसौम्याधनेक्रूराश्चक्रयोगेमहत्सुखम् ॥९०॥ पूर्वंगंगातटेरुद्रस्तस्य
सेवाकृताबहु ॥ अस्मिञ्जन्मनितेनेहसौख्याधिक्योभवेन्नरः॥९१॥दाताचैवचभोक्ताचराजमान्योगुणाधिकः ॥ परोपकारीधर्मात्माकीर्ति
मांश्चबहुप्रजाः ॥ ९२ ॥ षोडशाब्देभवेत्सौख्यंपंचविंशात्स्वकैर्बलैः ॥ गजवाजिधनैर्युक्तोराजावाराजमंत्रिकः ॥९३॥ रुद्रसेवानुसारेणस

सुखीजायतेनरः ॥ गोत्रस्यपुरुषःकश्चिज्जठरेताडितस्ततः ॥ ९४ ॥ चिंताप्रजायतेतस्यसौख्यंचाल्पधनैःसदा ॥ सौख्यमध्येभवे
च्चिंतातिकस्माज्जायतेतदा ॥ ९५ ॥ षड्विंशेवाद्विचत्वारिंशेब्देस्यादीर्घवेदना ॥ उदरेवाकरेपादेजायतेनात्रसंशयः ॥ ९६ ॥ शुक्रउवाच ॥
किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ ॥ भृगुरुवाच ॥ ॥ रीतिपात्रंताम्रपात्रंपलंचैवचतुर्गुणम ॥ ९७ ॥ चंदनेनचकर्त्त
व्यंहाटकेनाष्टमंडलम् ॥ गोत्रिरूपंचतन्मध्येकृत्वाचबहुधार्चयेत् ॥ ९८ ॥ नवपट्टंपरीधायऊर्णापट्टोपरिस्थितः ॥ नवत्रयंरुद्रमंत्रंबी
जमंत्राक्षरंजपेत् ॥ ९९ ॥ द्विसहस्रंजपंकृत्वाततःपुण्यंसमाचरेत् ॥ भव्याश्वंहाटकंरौप्यंषट्टंविंशतिविंशति ॥ १०० ॥ अथवागां
सवत्सांचसप्तान्नंप्रस्थप्रस्थकम् ॥ अष्टोत्तरशतंमुद्रादातव्याःश्रद्धयान्वितैः ॥ १०१ ॥ एतद्दानप्रभावेणकष्टचिंताक्षयोभवेत् ॥ श्रुत्वानकु
र्यात्तेदानंतदाचत्रिषुजन्मसु ॥ १०२ ॥ देहेकष्टंधान्यधनसुतहीनस्तुजायते ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ १०३ ॥ इतिचक्र
योगफलम् ॥९॥ गुरुक्षेत्रेयदासूर्यःकुजक्षेत्रेथवागुरुः॥ केंद्रेवापिद्विकेवापिसुतेलग्नेशुभाशुभाः ॥१०४॥ मोदितेसुखसम्पत्तिर्गजवाजियुतः
सुखी ॥ महाराजामहामंत्रीधनाढ्योराजपूजितः ॥ १०५ ॥ बहुभृत्यसमृद्धिश्चनृपद्वारेषुकिंकरः ॥ पूर्वंबहुकृतंदानंहेमवाजिगजान्वितम् ॥
॥ १०६ ॥ तेनपुण्येनलोकेस्मिल्लँभतेनात्रसंशयः ॥ शुक्रउवाच ॥ एतत्फलंयदानास्तिकारणंकिंतपोधन ॥ १०७ ॥ भृगुरुवाच ॥ पूर्वे
जन्मनियत्स्थानंहृतंब्राह्मणवेश्मच ॥ एतत्पापानुसारेणफलहीनोभवेन्नरः ॥ १०८ ॥ वेदज्ञायचतद्दानंहेमवाजिधनान्वितम् ॥ पूर्वोक्तंतु
फलंयच्चतथाभवतिनिश्चितम्॥ १०९॥कविनाचकृतःप्रश्नोभृगुणापरिभाषितः॥११०॥इतिमोदितंयोगफलम्॥१०॥शनिक्षेत्रेपरेचंद्रःषष्ठेष्टे
भौमभार्गवौ॥शनिर्वाछिद्रसंस्थानेदृष्टाःकर्मेशुभाशुभैः॥१११॥तदासाधारणोयोगोजायंतेसर्वसम्पदः॥राजमानोधनंधान्यंक्षणेवृद्धिःक्षणेक्ष

यः ॥ ११२ ॥ नेत्रपीडाथवाकुब्जोराजरोगीभवेन्नरः ॥ पूर्वआसीत्प्रयागेतुमंत्रज्ञोबहुदर्शकः ॥११३॥अभिचारेणशत्रूणांनेत्रपीडाकृताबहु ॥
अतोबहुविधंदुःखंतस्यसंजायतेबहु॥११४॥शुक्रउवाच॥कस्मिन्नब्देभवेत्पीडाकेनोपायेननश्यति ॥ भृगुरुवाच॥द्वाविंशेथचषड्विंशेवर्षेस्या
न्नेत्रवेदना॥११५॥स्थीयतेंचवचःसत्यंतेजोहीनोदिनेदिने॥शुक्रउवाच॥किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम्॥११६॥ भृगुरुवाच ॥
नवास्त्रंमंडलंकार्यंवामेसव्यंचतंडुलैः॥शुक्रराहोःशनेश्चैवमनून्पंचाक्षराञ्जपेत्॥११७॥त्रीणित्रीणिसहस्राणिपूर्वोक्तविधिनासह ॥ हाटकंचा
ष्टषट्कंचरजतंद्विगुणंतथा ॥ ११८ ॥ ताम्रपात्रंरुद्रपलंघृतेनपरिपूरितम् ॥ तत्पात्रंचसवत्सांगांश्रद्धायुक्तःप्रदापयेत् ॥ ११९ ॥ एतद्दा
नप्रभावेणरोगहीनस्तुजायते ॥ नेत्रपीडाक्षयंयातिदेहेसौख्यंधनंभवेत् ॥ १२० ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः ॥ १२१ ॥
इतिसाधारणयोगफलम् ॥ ११ ॥ सुतपेभार्गवक्षेत्रेक्रूरखेटेनसंयुतः ॥ कुजेक्षितोयदाजीवःक्रूरक्षेत्रेचतिष्ठति ॥ १२२ ॥ तदासर्वक्षयकरो
विनाशोयोगउच्यते ॥ पूर्वंगोत्रजकामिन्यांतेनस्थापनिकाकृता ॥ १२३ ॥ एतत्पापानुसारेणजायतेसंततिर्नहि ॥ गौरश्चपलवक्त्रश्चहर्षाधि
क्योमहोत्कटः ॥ १२४ ॥ स्वेच्छाचारीकृतक्षौद्रईदृशोजायतेनरः ॥ संतानंनभवेत्तस्यभवेद्यदिनजीवति ॥ १२५ ॥ एकोद्वौतिष्ठतोदैवा
च्छेषंचम्रियतेध्रुवम् ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥ १२६ ॥ भृगुरुवाच ॥ ताम्रपात्रंसप्तपलंद्विमुखोपरि
धारयेत् ॥ पद्मनाभमहामंत्रंसप्तबीजसमन्वितम् ॥ अर्द्धायुतंचतत्कार्यंपट्टद्वादशहाटकम् ॥ १२७ ॥ रजतंद्विगुणंवस्त्रमष्टोत्तरशतंकरम् ॥
सवत्सागो प्रदानेननाशयेत्सर्वपातकम् ॥ स्त्रीकंठेधारयेद्यंत्रंभौमेनक्तंचकारयेत् ॥ १२८ ॥ कविनाचकृतःप्रश्नोभृगुणापरिभाषितः
क्षीणेपुण्येततोजातःपुनरागत्यभूतले॥८९॥परोपकरणेनिष्ठःसर्वदासत्यभाषकः॥१।३।६।९।११।१७।२३वर्षेचातिकष्टं॥४९अल्पमृत्युः॥
७० महामृत्युः॥आश्विनेधवलेपक्षेतस्यमृत्युर्भवेद्ध्रुवम् ॥९०॥ अथापंगुयोगः॥ अपंगुयोगेयोजातोद्विजोऽभूत्पूर्वजन्मनि॥देशेहिकीकटे[illegible]
[illegible]संयुतः॥[illegible]मोदरइतिख्यातःसर्वशास्त्रार्थपारगः॥९१॥नृपद्वाराकृताप्राप्तिर्द्रव्याणिविविधानिच॥सत्कर्मसु[illegible]कृत्वा[illegible]
[illegible]॥९२॥[illegible]तपश्चर्यांपरित्यक्त्वा[illegible]॥तत्रभाविबलात्पुत्रस्वैरिण्येकासमागता॥९३॥ तपश्चर्यांपरित्यक्त्वा[illegible]

[illegible] ॥ [illegible]लोके च भास्करे॥षष्टिवर्षसहस्रांतेपुनरागत्यभूतले॥गौरांगोदीर्घदेहश्चमनस्वीतेजसान्वितः ॥२।४।९।११॥
[illegible] ।२७ मृत्युसमंकष्टम् परमायुर्वर्षाणि ६३॥ भाद्रेमासिसितेपक्षेतृतीयायांचपंचता॥९४॥इति॥अथाऽनुमोदितः॥ आसीत्[illegible]
[illegible]जोऽनवानपि ॥ परमेश्वरइतिख्यातःकंकदेशेऽवसत्पुरा ॥ ९५॥ मद्यपानरतःसोऽपिक्रव्यभोजनसंयुतः॥कुंभीपाकेतथागत्वा[illegible]
[illegible]निसहस्रकम् ॥ ९६॥ समृतःसरयूतीरेतेनासौमानुषोऽभवत् ॥ प्रपंचाधिकरणेनिष्ठःइंद्रजालीचभ्रष्टकः ॥ ९७॥ परापवादनिरतो[illegible]
[illegible]त्कर्मरतस्सदा ॥ २।४।८। १२। मृत्युसमंकष्टम् ॥ २७॥ अल्पमृत्युर्यदिजीवतितदावर्षं ५१ परमायुः ॥ श्रावणेचाऽसितेपक्षेदश
[illegible]व्यांचैवपंचता ॥ ९८ ॥ इति ॥ अथाऽष्टकयोगः ॥ अष्टयोगेनरोजातःपूर्वजन्मनिमैथिले ॥ नामतोवासुदेवश्चमिथ्याजल्पतिनित्यशः॥
॥ ९९ ॥ एकस्मिन्समयेविप्रनृपद्रव्यंचचोरितम् ॥ तत्सकाशान्मृत्युरभूदश्वत्थद्रुमकेतटे ॥ गतोसाविन्द्रलोकेचपुनरागत्यभूतले ॥ मुखं
[illegible]चिह्नितंतस्यपरकार्य्यविनाशकम् ॥ वर्षेतुर्येऽष्टमेकष्टंषोडशेऽपिज्वराकुलः ॥१००॥ विंशद्वर्षांतरेविप्रह्यल्पमृत्युर्भविष्यति ॥ यदिजीव
तिबालोस्यषष्टिवर्षांतरेमृतिः ॥१०१॥ इति ॥ अथाऽम्बरेश्वरयोगः ॥ अम्बरेश्वरयोगेचयदिजन्मधरातले ॥ देवरूपीसात्त्विकश्चप्रज्ञायुक्तो
नरोभवेत् ॥ १०२॥ वैष्णवोदानशीलश्चपितृभक्तिपरायणः ॥ सुधीःसर्वेषुशास्त्रेषुकाव्याऽलंकारबोधकः ॥ १०३ ॥ सर्वश्रेष्ठोगुणाऽतीतः
प्रथमाऽब्देसकष्टितः॥४०।४९। १७ अल्पमृत्युः॥परमायुर्वर्षाणि॥६८॥आषाढेधवलेपक्षेसप्तम्यांनिधनंभवेत्॥१०४॥इति॥ अथाऽस्वनी
[illegible]योगेचास्वनिकेजातःपूर्वजन्मनिपादजः॥विपाशानिकटेचैवन्यवसत्पूर्वजन्मनि॥१०५॥सुंदरेतिसमाख्यातःपत्नीपुत्रसमन्वितः॥
[illegible]निरतोब्राह्मणानांचनिंदकः॥१०६॥एकस्मिन्समयेविप्रह्यनृतौचविमोहितः॥गोत्रजागमनंकृत्वापापमाचरितंत्विदम् १०७॥

सम्मृतः शस्त्रदोषेण पापक्लिन्नस्के गतः ॥ पुनरागत्य मेदिन्यां कष्टेनाऽतिप्रपीडितः ॥ १०८॥ १। २। ४। ८। १०। १३। १८
। २२। २७ एषु वर्षेष्वल्पमृत्युः ॥ यदि जीवति मानवस्तदायुरब्दाः पञ्चपञ्चाशत्प्रमाणाः प्रकीर्तिताः ॥ १०९ ॥ ज्येष्ठमासि तु धवले चाष्टम्यां
मरणं भवेत् ॥ ११० ॥ इति ॥ अथाऽश्वलोहितयोगः ॥ कश्चित्क्षात्रकुले पूर्वं तथा च नर्मदातटे ॥ दरीति च पुरी भव्या प्रकीर्णा गुणिनां गुणैः ॥
॥ १११ ॥ भीष्मश्येन इति ख्यातस्तत्र राजा तु धार्मिकः॥ पत्नी हारवती ख्याता पतिसेवापरायणा ॥११२॥ दम्पती तौ गतौ तीर्थे कृत्वा दानार्च
नं भृशम् ॥ चंद्राद्रिनिकटे चैव तपश्चर्य्यामथाऽकरोत्॥११३॥ आविर्बभूव भगवान्प्रत्यक्षो गरुडध्वजः ॥ दत्त्वा वरत्रयं तस्य अंतर्धानं गतो हरिः
॥११४॥ दम्पती तौ तु सहसा पुनरागत्य भूतले॥ तपस्वी तेजसाऽधिक्यो धेनुब्राह्मणपालकः॥११५॥ सर्वसौख्ये च निरतः नानाद्रव्यसमन्वितः
४। ९। ११। १४। १८। २१। २४। २९ महाकष्टम् ॥ ३८ अल्पमृत्युः ॥ परमायुर्वर्षाणि ७० ॥ कार्तिके शुक्लपक्षे तु पञ्चम्यां निधनं व
देत् ॥ ११६ ॥ अथ क्षेपकावलोहितयोगः ॥ अवलोहिते पियो जातः कश्चित्पादजके कुले ॥इंद्रप्रस्थस्य निकटे न्यवसत्पूर्वजन्मनि॥११७॥
देवराज इति ख्यातो ब्राह्मणानां च सेवकः ॥ द्रव्यं सुविपुलं कृत्वा तथा भूपानुकम्पया ॥ ११८ ॥ वापीकासारकूपाश्चारामा बहुविधाः कृताः ॥
जाह्नवीनिकटे मृत्युर्बभूव द्विजसत्तम ॥ ११९ ॥ पुनरप्युज्ज्वले देशे बभूव च द्विजस्तदा ॥ तत्र स्वर्गसमं भोगं भुक्त्वा स च निरंतरम् ॥ १२० ॥
तृतीये जन्मनि प्राप्तो ब्राह्मणस्य कलेवरम् ॥ धर्मशीलश्च मतिमाञ्श्लाघनीयगुणः प्रियः ॥ १२१ ॥ १। ५। ७। ११। १५। १९। २४
अल्पमृत्युः॥ परमायुर्वर्षाणि ६७॥ चैत्रमासि द्वितीयायां शुक्लपक्षे द्विजोत्तम॥ वक्तव्यं मरणं चास्य सर्वथाप्यनिवारितम् ॥१२२॥ अथौदुंबरयो
गः॥ पुरा कर्नाटनगरे ब्राह्मणः शास्त्रकोविदः॥ धर्माऽधर्मविवेकी च नृपद्वारे प्रतिष्ठितः १२३॥ एकदा त्वनृतौ विप्रस तु कामविमोहितः॥ सतीं गत्वा च

तेनाभिपापेननरकंगतः ॥ १२४ ॥ अशीत्यब्दसहस्रांतेपुनरागत्यभूतले ॥ तिर्यगाननवान्भूत्वात्तस्वाऽभूत्यापवर्जितः ॥ १२५ ॥ ३।४
९।१३।१८ कष्टं॥परमायुर्वर्षाणि ९० भाद्रेमासितुधवलेनवम्यांमरणंभवेत्॥१२६॥इति॥अथाऽपास्त्ययोगः ॥ अपास्त्ययोगेयोजातस्तप
स्वीपूर्वजन्मनि॥दशारण्येवसत्सोपिशिवस्यस्मरणेरतः ॥१२७॥ एकदाचन्द्रमोग्रस्तेतीर्थराजेसमागतः॥वेण्यांमनोबभूवास्यतेनयातोदि
वंप्रति॥१२८॥क्षीणेपुण्येसमागत्यब्राह्मणस्यकुलेऽधुना ॥ गौरांगोदीर्घनेत्रश्चधनधर्मसमन्वितः ॥१२९॥३।८।११ १६।२१ वर्षे कष्टम्
४६ वर्षे मृत्युः॥आश्विनेकृष्णपञ्चम्यांमरणंचभवेद्ध्रुवम्॥१३०॥अथाऽन्तारिक्षयोगः॥अंतारिक्षेचयोजातःपूर्वजन्मनिमागधे॥ इंद्रवर्मेतिवि
ख्यातःपत्नीतस्यप्रभाकरी॥१३१॥महाभिमाननिरतोद्रव्यस्योत्पादनेरतः॥एकस्मिन्समयेविप्रभाविनोर्थस्यवैबलात् ॥१३२॥ भगिनीपु
त्रस्यागतस्यचादरंकृतवान्भृशम्॥स्वगृहेस्थापयामासमासमेकंनिरंतरम्॥१३३॥तस्यद्रव्याणिसर्वाणिगृहीत्वाविविधैश्छलैः॥ नदत्तंतेनवि
प्रातःकृतंयुद्धंपरस्परम् ॥१३४॥ एवंस्वल्पतिथेकालेबाहुजःपंचतांगतः॥ततोनरकयोनिंतुनानाजन्मनिप्राप्तवान्॥१३५॥अस्यजन्मतृती
यंचविप्रवंशेसमुद्भवम्॥कापट्याऽऽचरणेमग्नोनानाकष्टसमन्वितः ॥ ३।६।९।११।१६।१९।२१।२७ वर्षेकष्टम्३६अल्पमृत्युः ॥ परमायुर्व
र्षाणि६७ आषाढेशुक्लपक्षेहित्रयोदश्यांचपंचता ॥१३६॥इति॥अथाऽनादियोगः ॥ योगेअनादिकेजातः प्रयागेन्यवसत्पुरा ॥ पापकर्मो
द्यमेमग्नश्चौरकर्मरतःसदा ॥ १३७ ॥ एकदादैवयोगेनतन्मार्गेचसमागता ॥ शूद्रस्यदुहिताशुभ्रागर्भभारसमन्विता ॥१३८॥ स्थूलेनल
कुटेनाऽथताडितामस्तकेहिंसा ॥ मृतातेनैवदुःखेनपापमाचरितंत्विदम् ॥ १३९ ॥ तेनपापानुसारेणनानाजन्माबभूवह ॥ कीटभृंगविहं
गादितिर्यग्योनिंपुनः पुनः ॥ प्राप्यमानुष्यमापन्नंकिंचिद्वित्तसमन्वितः ॥ १। ४। १०। १६। १९। २२। २५ वर्षेकष्टम् ॥ परमा

पूर्वर्षाणि ॥४९॥ कार्त्तिकेशुक्लपक्षेतुसप्तम्यांमरणंध्रुवम् ॥१४०॥इति ॥ अथाऽहर्गणयोगः ॥ अहर्गणेसमुत्पन्नआसीत्पूर्वंतुपादजः॥चंद्रसेन
इतिख्यातः पत्नीतस्यमनोरमा ॥ १४१॥यमुनादक्षिणेभागेन्यवसत्परिवारयुक् ॥ धनाढ्यश्चाऽतिभक्तश्चमुक्तामालीसुरूपकः ॥१४२॥
तस्मिन्ग्रामेवसत्येकोब्राह्मणोनीतिमानपि ॥कृतवांस्तत्प्रसंगेनतीर्थाऽटनमसौमुदा ॥ १४३॥ सत्पात्रेहिद्विजेदत्तागोभूम्यश्वहिरण्यकम् ॥
समृतोगोमतीतीरेपुनरागत्यभूतले ॥ १४४ ॥ गोलांकितोभव्यरूपश्चिह्नंदक्षिणवामयोः ॥ २ । ४ । ८ । ११ । १७ । १९
वर्षेकष्टम् २३ अल्पमृत्युः॥ परमायुर्वर्षाणि ७९ भाद्रेमासेशुक्लपक्षेतिथौषष्ठ्यांनजीवति ॥ १४५ ॥ अथाश्वरेखायोगः ॥ अश्वरे
खानाम्नियोगेजातःपूर्वंसब्राह्मणः ॥ विद्याधनयुतश्चाऽपिकार्पण्येनविमोहितः ॥ १४६ ॥ परद्रव्यापहारीचपरनिंदापरायणः ॥
पापिष्ठोहिंसकश्चैवपुत्रस्त्रीभ्रातृसंयुतः ॥ १४७ ॥ एकस्मिन्समयेविप्रब्राह्मणस्यप्रसंगतः ॥ कथांपौराणिकींश्रुत्वालब्धचित्तोहरौ
द्विजः ॥ १४८ ॥ किंचिद्दानार्चनंकृत्वातीर्थराजेतथाऽनघ ॥ समृतोजलमध्येहितेनयातोदिवंप्रति ॥ १४९ ॥ इंद्रलोकात्पारि
भ्रष्टश्चागतोधरणीतले ॥ नात्युच्चोनातिह्रस्वश्चचिह्नंदक्षिणवामयोः॥ १५० ॥ १।४।६।८।१२।१७ एतद्वर्षेमासेपीडा,२० वर्षेअल्पमृत्युः
परमायुर्वर्षाणि६७॥श्रावणेचासितेपक्षेदशम्यांचैवपंचता॥१५१॥इति॥अथाऽवनीशयोगः॥अवनीशेयदाजातःसर्वविद्याविशारदः॥ पूर्वज
न्मांतरेचैवराजाश्रेष्ठकुलेतदा ॥ १५२॥ सुंदरेतिसमाख्यातः पत्नीतस्यपतिव्रता ॥ नानाविलासविभवैः सुताऽऽनंदेनसंयुतः ॥ १५३ ॥
सत्पात्रायकुलीनायब्राह्मणायकुटुम्बिने ॥ गोभूम्यश्वहिरण्यानिदानंदत्त्वाविशेषतः ॥ १५४ ॥ एकस्मिन्समयेविप्रअरातिश्चसमागतः ॥
कृत्वा[illegible]युद्धंखड्गेनद्विजसत्तम ॥ १५५ ॥ समरेषुमृतःशूरोगतोसौनंदनेवने ॥ पुनरागत्यमेदिन्यांपूर्वपुण्यप्रभावतः ॥ १५६॥ ११।

कष्टम्॥२४ वर्षेअल्पमृत्युः ॥ परमायुर्वर्षाणि४७॥ज्येष्ठमासतृतीयायांशुक्लपक्षेऽपराह्णके॥पंचत्वंचभवेत्तस्यनात्रकार्य्योविचारणा॥१५७॥
अथाऽनात्मकयोगः ॥ अनात्मयोगेऽपिचजातजन्माप्रकोपवादीपरकार्य्यनाशकः ॥ आत्माऽर्थचिंताकुटिलः कुकर्माकुमार्गगामीपरवित्त
हारकः ॥ १५८ ॥ चिरंप्रशांतिः प्रकृतिः सनातनीसरोषवार्तोगुरुदेवनिंदकः ॥ पूर्वार्जितार्थस्यकरोतिनाशंसंतानहीनःसततंमनुष्यः ॥
॥ १५९ ॥ सोऽसौवैश्यकुलेपूर्वंनर्मदादक्षिणेतटे ॥ ईश्वरेतिप्रसिद्धश्चक्रयविक्रयणेरतः ॥ १६० ॥ तत्सकाशात्कृतंद्रव्यंभूमौस्थापित
वान्स्वयम् ॥ नित्यंकदन्नंभुंक्तेहिनदानंकृतवान्कचित् ॥१६१॥ गतोसौनरकेघोरेतिर्य्यग्योनिंपुनः पुनः ॥ पश्चात्प्राप्तोमनुष्यत्वंमर्त्यलोके
समागतः॥१६२॥गौरारुणोदीर्घदेहःप्रथमाऽब्देसकष्टितः॥४।८।११।१४।१८।२०कष्टम्॥परमायुर्वर्षाणि८७॥चैत्रेमासेसितेपक्षेनवम्यांचै
वपंचता॥१६३॥अथांऽगिरायोगः ॥ अथांऽगिरायोगभवंचजन्मयत्पूर्वद्विजेंद्रस्तपसिप्रवीणः ॥ वनाद्रिगेहश्छदनाम्बुभोजनःशिवस्यभ
क्तः सचपारलौकिकः ॥ परोपकारीसचदाननिष्ठः सत्यात्मकःशक्तियुतःपरार्थम् ॥ १६४ ॥ गोदावर्य्यांश्चनिकटेसमृतःकालचोदितः॥
पूर्वपुण्यप्रभावेणसजातोब्राह्मणोधुना ॥ १६५ ॥ वेदविद्याविवेकीचसर्वशास्त्रस्यपारगः ॥ उदारःपितृभक्तश्चसर्वपूज्योजनेश्वरः ॥१६६॥
धार्मिकःसत्यवादीचजितेंद्रियपराक्रमी ॥ ४ । ५ ।७ । १० ।१२ वर्षेकष्टम्॥२९ वर्षेअल्पमृत्युः॥परमायुर्वर्षाणि४८॥कार्त्तिकेचासितेपक्षे
ह्येकादश्यांचपंचता ॥ १६७ ॥ अथाऽष्टवार्तिकयोगः ॥ कश्चिद्दासकुलेपूर्वंगौडदेशेवसन्नपि ॥ कंकरेतिसमाख्यातःपरिचर्य्यापरायणः ॥
॥१६८॥नृपाऽनुकम्पयाविप्रद्रव्यंतुविपुलंकृतम्॥धर्ममार्गेव्ययंकृत्वाह्यारामाविविधाःकृताः ॥१६९॥ आयुषस्तुसमाप्तित्वात्समृतः काल
चोदितः ॥ पूर्वपुण्यानुसारेणजातोवैश्यकुलेऽधुना ॥ १७० ॥ गौरांगोदीर्घदेहश्चचंचलश्चधनान्वितः ॥ २ । ६ ।९।११।१४।१७ वर्षेकष्टं

२७अल्पमृत्युः ॥ परमायुर्वर्षाणि ७३ ॥ आश्विनस्यासितेपक्षेनवम्यांमरणंध्रुवम् ॥ १७१ ॥ अथाऽत्रदंडयोगः ॥ आसीत्पूर्वंद्विजश्रेष्ठः
पंपारण्यस्यसन्निधौ ॥ आश्रयेतिसमाख्यातोविद्यावेदविवर्जितः ॥ १७२ ॥ बाहुजस्यप्रसंगेनजीवाश्चबहुघातिताः ॥ वनेदावाग्निदाहे
ननितरांमांसभक्षणम्॥१७३॥अभक्ष्यंभक्षितंतेनह्यगम्यागमनंकृतम्॥ तेनपापानुसारेणपीड्यमानश्चव्याकुलः॥१७४॥३।६।८। ९।१३
१८पीडा॥परमायुर्वर्षाणि९७॥मार्गशीर्षेसितेपक्षेऽष्टम्यांतुनिधनंभवेत् ॥१७५॥ अथाऽश्रुपातयोगः ॥१॥ अश्रुपातेनरोजातःकीकटेपूर्व
जन्मनि ॥ उदयेतिप्रसिद्धोऽसौकाश्मीरंगतवान्द्विजः ॥ १७६ ॥ तत्रस्थित्वाद्विवर्षंहिविद्याभ्यासमथाऽकरोत् ॥ स्वदेशेपुनरागत्यहर्ष
गद्गदमानसः ॥ १७७ ॥इंद्रजालीबभूवाऽपिलोकानांवंचनेरतः ॥ एवंगतेतुवयसिवृद्धेसतिद्विजोत्तम ॥ १७८ ॥ चंद्रग्रस्तेप्रयागेचसमृतो
गदपीडितः ॥ पुनर्जन्मपुनर्मृत्युर्जन्ममृत्युशतैरपि ॥ पुनर्मानुषयोनौसमातृकुक्षेःसमुद्गतः ॥१।२।४।८।११।१६।१९ वर्षेषु पीडा ॥
परमायुर्वर्षाणि ९९॥ श्रावणेधवलेपक्षेपंचम्यांमरणंध्रुवम् ॥१७९॥ अथाऽनर्घयोगः ॥ योगेत्वनर्घकेजातःपूर्वजन्मनिपादजः ॥ परशुरा
मइतिख्यातःपत्नीपुत्रसमन्वितः ॥१८०॥ मध्यदेशेऽवसत्सोपिकृषिकर्मरतःसदा ॥ एकस्मिन्समयेविप्रकृतंकर्मजुगुप्सितम् ॥ १८१ ॥
सीमावादरतस्तत्रगोपुत्रोघातितस्तदा ॥ निशायांचौर्य्यकार्येणगोवित्तमहरद्द्विज ॥ १८२ ॥ एवंस्वल्पतिथेकालेगतेयातोमृतिंद्विजः ॥
दशजन्मोत्तरेविप्रपुनरागत्यभूतले ॥ १८३ ॥ श्यामारुणोदीर्घदेहश्चंचलश्चतुरःसुधीः ।१।४।८।१०।१३।१७।२०। २९ महा
कष्टम्॥परमायुर्वर्षाणि४८॥भाद्रेमासेशुक्लपक्षेचाष्टम्यांमरणंध्रुवम् ॥१८४॥अथांडयोगः ॥ अंडयोगेसमुत्पन्नस्तपस्वीपूर्वजन्मनि॥विंध्या
द्रिनिकटेचैवतपश्चर्य्यामथाकरोत् ॥ १८५॥ एकदादैवयोगेनस्वैरिण्येकासमागता ॥ दृष्ट्वापरस्परंचित्तेकामबाणेनमोहिते ॥ तप

श्रव्यांपरित्यज्यभक्ताद्यैर्व्यसनेरतः ॥ १८६ ॥ तेनपापानुसारेणतपस्वीनरकंगतः ॥ दशवर्षसहस्रांतेपुनरागत्यभूतले ॥ महोक्षेणसमंगर्वो
प्रथमाब्देसकष्टितः ॥ १ । ३ । ६ । ९ । १३ । १८ ॥ एतद्वर्षेकष्टम् ॥ परमायुर्वर्षाणि ९१ मार्गशीर्षेतुधवलेद्वादश्यांचैवपंचता ॥१८७॥
अथाऽल्कायोगः ॥ अल्कायोगेतुयोजातःसर्वपूज्यःपराक्रमी ॥ कंकदेशेऽवसत्पूर्वंहिरण्योनामब्राह्मणः ॥ १८८ ॥ ब्रह्मचर्य्यरतोमौनीपर
मार्थस्यशोधकः ॥ एकस्मिन्समयेविप्रभाविनोर्थस्यवैबलात् ॥ १८९ ॥ तन्मार्गेचसमायाताविप्रकन्यावरांगना ॥ सर्वाऽऽभरणभूषाढ्या
सुन्दरीनवयौवना ॥ १९० ॥ दूरादपिविलोक्याऽथधर्षितालोभहेतुना ॥ पश्चादेनांतुहत्वासभूषावस्त्राणिचाहरत् ॥१९१॥वयस्येवंगतेतेन
कृतःपापस्यसंग्रहः ॥ नरकेष्वनेकेषुस्थित्वानानाजन्मानिप्राप्तवान् ॥ १९२ ॥ नश्यामोनाऽतिगौरांगोनदीर्घोनातिह्रस्वकः ॥ ३ । ६ । ८
११ । १६ । १९ वर्षेकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥ भाद्रेमासेशुक्लपक्षेनवम्यांमरणंवदेत्॥१९३॥अथअल्कयोगः॥अल्केयोगेचयोजातः
पूर्वंगुर्जरदेशके ॥ वैखानसइतिख्यातःपत्नीतस्यातिकर्कशा॥१९४॥प्रत्यहंद्वंद्वकर्त्रीसापापमार्गपरायणा ॥ पापानिकृतवान्सम्यक्पत्नीसं
गात्तदानघ ॥ १९५ ॥ वार्द्धकेसमयेप्राप्तेकिंचित्पुण्याऽर्जनंकृतम् ॥ तद्गत्वायमलोकेचभुक्त्वाभोगांश्चशाश्वतान् ॥ १९६ ॥ पुनरागत्यमे
दिन्यांधनधान्यसमन्वितः ॥ पवित्रःपरमोदारःकिंचिद्विद्याविभाषकः ॥ १९७ ॥ १।३।४।८।११।१६।१९। २३ वर्षेकष्टम् ॥ परमायुर्व
र्षाणि ॥ ७६ ॥ माघेतुधवलेपक्षेचाष्टम्यांमरणंभवेत् ॥ १९८॥ अथागोचरयोगः ॥ अगोचरेजन्मनिपूर्वकालेहिडंबदेशेगुणिनांगुणज्ञः॥
सर्वार्थसौख्यंलभतेतदानींकृपाविशिष्टःसुरविप्रपूज्यः ॥ १९९ ॥ एकस्मिन्समयेविप्रभाविनोर्थस्यगौरवात्॥गुरुनिंदाकृतातेनगतोऽसौय
ममंदिरे ॥ २०० ॥ पुनरागत्यमेदिन्यांबाहुजस्यकुलोत्तमे ॥ इदंतृतीयंजन्माऽस्तिमातृकुक्षेःसमुद्गतम् ॥ २०१ ॥ ३ । ६ । ७ । ९ ।

१३ । १८ । कष्टम् ॥ ४१ अल्पमृत्युः ॥ परमायुर्वर्षाणि ६०॥ चैत्रेमासितुधवलेपंचम्यांनिधनंभवेत्॥२०२॥अथाऽऽरण्ययोगः॥ आर
ण्येजन्मयस्यासौपुरायोध्यांवसन्मुदा ॥ परमेश्वरइतिख्यातस्तदारोगैःप्रपीडितः ॥ २०३॥ राममंत्रंजपेन्नित्यंब्राह्मणानांचसेवकः॥तीर्थे
तीर्थेकृतासेवाऋषीणांचपुनःपुनः ॥ २०४ ॥ वयस्येवंगतेविप्रसत्कर्मनिरतस्यच ॥ स्वर्गाऽपवर्गभोगांश्चभुक्तवान्परलोकगः ॥ २०५ ॥
एवंवयसियातेचसत्कर्मसुपरायणः ॥ स्वर्गापवर्गभोग्यंचबभूवद्विजसत्तम ॥ पुनरागत्यमेदिन्यांसर्वसौख्येनसंयुतः ॥१।३।६ । ९ । १३ ।
१८ । २१ । २६ । २९ । ३१ । ३६ वर्षेकष्टम्॥परमायुर्वर्षाणि॥८७॥आश्विनेचासितेपक्षेचतुर्थ्यांचैवपंचता॥२०६॥अथांगभंगयोगः॥
अंगभंगेनरोजातःपूर्वजन्मवनांतरे ॥ चित्रकूटस्यनिकटेन्यवसत्पूर्वजन्मनि ॥२०७॥चौरकार्येचनिरतोमार्गाणामवरोधकः ॥ नानापापं
कृतंतत्रदैवाद्विप्रःसमागतः ॥ २०८ ॥ ब्राह्मणोपिविलोक्येमंमार्गेचौरंसुनिर्दयम् ॥ ब्रह्मज्ञानोपदेशंहिकृतवांश्चविशेषतः ॥ २०९ ॥ पूर्व
कर्मपरित्यक्त्वातीर्थाऽवगाहनेगतः ॥ द्वारकायांमृतःसोऽपिप्राप्तवान्यममंदिरम् ॥ २१० ॥ यमलोकात्परिभ्रष्टःपुनरागत्यभूतले ॥ २। ४।
८ । ११ । १७ । २१ । २५ । २९ ॥ कष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ माघेमासितुधवलैकादश्यांचपंचता ॥२११॥अथाऽजयायोगः॥
कश्चिद्द्विजकुलेपूर्वंब्रह्मपुत्रस्यसन्निधौ ॥ राजेंद्रइतिविख्यातःपत्नीतस्यवरांगना ॥ २१२ ॥ नस्वकर्माऽस्तिव्यापारेद्रव्यंसुविपुलंकृतम् ॥
कदन्नंभुक्तवान्नित्यंमलिनाम्बरधारकः ॥ २१३ ॥ पशुघातःकृतःसम्यक्कृतंचौर्यंचपुष्कलम् ॥ एकस्मिन्समयेविप्रददाहभवनंह्यसौ ॥
॥ २१४ ॥ ब्राह्मणस्यपरंरम्यंवैरभावेनभोःसुत ॥ तेनपापानुसारेणकुंभीपाकंतदागतः ॥ २१५॥ कृमियोनिशतेभूत्वामर्कटोभूद्वनान्तरे ॥
समुद्रःसरयूमध्येतेनाऽभूद्भूसुरोपिसः ॥ २१६ ॥ ३ । ४ । ८ । ११ । १६ । १८ । २२ । २७ । ३१ । ३७ । ३९ वर्षेकष्टम् ॥ परमायु

र्षाणि६८॥फाल्गुनेधवलेपक्षेषष्ठ्यांचैवतुपंचता॥२१७॥अथाऽर्कसंज्ञयोगः॥अर्कसंज्ञेचयोजातस्तपस्वीपूर्वजन्मनि ॥ गौडदेशेऽवसत्सो
पिसूर्य्यव्रतपरायणः॥२१८॥अभ्यागताःसेविताश्चचातुर्मास्यव्रतंकृतम्॥तेनपुण्यप्रभावेणबभूवक्षितिपाधिपः ॥२१९॥राज्यप्रभाववशगः
पापंबहुसमाचरत् ॥ चतुर्जन्मोत्तरेविप्रपुनरागत्यभूतले ॥ २२० ॥ पुत्रेकष्टंधनेकष्टंगदार्तोपिसदानघ ॥ ४।७।१०।१४।१९। मरणांत
कष्टम्॥परमायुर्वर्षाणि४८ज्येष्ठेमासिसितेपक्षेसप्तम्यांचैवपंचता॥२२१॥ अथअदांतयोगः॥अदांतयोगेयदिजन्मजातंसपुष्टगात्रःकृषिकर्म
कर्ता॥विज्ञःसशास्त्रेपरदारगामीधनार्जनंकृतवान्सर्वकाले ॥२२२॥ पूर्वजन्मनिविप्रोसौनर्मदानिकटेवसत् ॥ आत्मदेवइतिख्यातःपरमो
दारपावनः ॥ २२३ ॥ तीर्थाऽवगाहनंकृत्वादानंदत्त्वाद्विजायच ॥ एकदासमयेविप्रकामेनलुब्धचेतसा ॥२२४॥ भगिनीकन्यासुन्दरीचमृ
द्वंगीचारुलोचना॥ बलादाकर्षितातेनहठाच्चैवरतिःकृता॥२२५॥सामृतातेनदुःखेनपापमाऽऽचरितंत्विदम्॥पापात्पापफलंभुक्त्वायोनीर्भु
क्त्वासहस्रशः॥२२६॥इदंजन्मतृतीयंचमातृकुक्षेःसमुद्गतम् ॥३।५।८।११।१५।२०।२७।२९ वर्षेकष्टम्॥परमायुर्वर्षाणि७०॥आषाढेधवले
पक्षेनवम्यांचैवपंचता ॥ २२७ ॥ अथाऽन्नमेरुयोगः ॥ अन्नमेरौयदाजन्मपूर्वजन्मनियोषिता ॥ कुरुक्षेत्रस्यनिकटेसर्वसम्पद्युता
शुभा ॥ २२८ ॥ धर्मशीलामतिमतीबालरंडातपस्विनी॥कार्त्तिकेमाघवैशाखेव्रतंस्नानंसमाचरत् ॥२२९॥ प्रयागमगमत्सातुहरिद्वारेतथा
गता ॥ बद्रिकारण्यनिकटेनिराहाराचनिर्जला ॥२३०॥ शिवस्याऽऽराधनंकृत्वास्वगृहेपुनरागता ॥ वापीकासारनिर्माणमारामंचतथाकरो
त ॥ २३१॥ आयुषस्तुसमाप्तित्वात्सामृतादिविवैगता ॥ देवलोकात्परिभ्रष्टाचागताधरणीतले ॥२३२॥ पूर्वपुण्यप्रभावेणपुंस्त्वंहिजायतेऽ
धुना ॥१।३।७।११।१५।२२।२७ महाकष्टम् ॥ परमायुर्वर्षाणि७६॥आश्विनेधवलेपक्षेऽष्टम्यांहिमरणंभवेत्॥२३३॥अथाध्यापकयोगः॥

अध्यापकेनरःशूरःसर्वशास्त्रस्यपारगः ॥ महेश्वरस्यनिकटेजर्जरोनामब्राह्मणः ॥ २३४ ॥ परमैश्वर्य्यमतुलंशिवस्यस्मरणात्कृतम् ॥ महा
भिमाननिरतः शाक्तधर्मेसदारतः ॥२३५॥ एकदाचम्पकारण्येपुण्यंबहुचकारसः ॥ तेनपुण्यप्रभावेणपुनर्वैब्राह्मणोधुना ॥ कन्याश्चबहवो
जाताःपुत्रेचिंतातथाधने ॥२३६॥ ४।७।१०।१५।१९।२२ वर्षेकष्टम् ॥ परमायुर्वर्षाणि ९१ इति॥अथाऽऽधानयोगः॥आधानजन्मापरमो
दरिद्रः काठिन्यदेहश्चलचित्तवृत्तिः॥परोक्षनिंदागुरुदेवकस्यआत्मार्थकेयुक्तिविशेषशोधकः ॥२३७॥ पूर्वजन्मनिचाभीरोवृंदाऽऽरण्यस्यस
न्निधौ॥गोधनंधनधान्यानिपुष्कलानिगृहेतदा॥२३८॥गावःपापात्मनातेनजलपानान्निवारिताः॥तेनपापानुसारेणश्रियस्तस्यक्षयंगताः॥
॥ २३९ ॥ पुनरागत्यमेदिन्यांकिंचिद्धनसमन्वितः ॥ २।४।६।९।१३।१९।२१।२८।३२।३८ वर्षेकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ अथाऽऽ
हुतियोगः ॥ योगेआहुतिकेजातः पूर्वजन्मनिबाहुजः ॥ अंधकोनामांऽगदेशेन्यवसत्पूर्वजन्मनि ॥ २४० ॥ महाभिमाननिरतःप्रजानांता
डनेरतः ॥ ब्रह्मस्वंभक्षितंसम्यक्परस्त्रीरमणेरतः ॥ २४१ ॥ चित्रगुप्तान्तिकेगत्वाविचचारपुंनःपुनः ॥ असिपत्रवनेघोरेबहुकालेऽ
वसत्तदा ॥ पुनरागत्यमेदिन्यामभूत्पापपरायणः ॥ २४२ ॥ १ । ३ । ६ । ७ । ९ । १४ । २४ । ३० कष्टम् ॥ परमायुः ७३ ॥
भाद्रेमास्यसितेपक्षेसप्तम्यांमरणंवदेत् ॥ अथाऽर्घयोगः ॥ अर्घयोगेचयोजातो दीर्घजीवीगुणाऽन्वितः ॥ महोदारःप्रवक्ताच
देवब्राह्मणपूजकः ॥ २४३ ॥ पूर्वजन्मेंदिरादेशेबाहुजः शास्त्रपाठकः ॥ एकस्मिन्समयेविप्रसूर्यग्रस्तेचपर्वणि २४४ ॥
सर्वंदत्त्वाब्राह्मणायसत्पात्रायकुटुम्बिने ॥ तेनपुण्यप्रभावेणपुनरागत्यभूतले ॥ २४५ ॥ ३ । ८ । ११ । १९ । वर्षेकष्टम् ॥
परमायुर्वर्षाणि ॥ ६७ ॥ अथांदोलीयोगः॥ आसीत्पूर्वंजगन्नाथेब्राह्मणोदेवपूजकः ॥ प्रसन्नइतिविख्यातः पत्नीपुत्रसमन्वितः ॥२४६॥

देव्याश्चपूजनेमग्नश्चातिथीनांप्रपूजकः ॥ एकदाद्रव्यलोभेनकृतंकर्मजुगुप्सितम् ॥ २४७ ॥ चोरितंभूषणंवस्त्रंब्राह्मणस्यतदानघं ॥ समृतः
कुष्ठरोगेणनरकेषुस्थितस्तदा ॥ २४८ ॥ पुनर्जन्मपुनर्मृत्युर्जन्ममृत्युःपुनःपुनः ॥ इदंतुदशमंजन्मगौरांगोदीर्घलोचनः॥२ । ४ । ६ । ९
१३ । १९ । २१ । २५ वर्षेकष्टम् ॥ परमायुर्वर्षाणि ७२ ॥ माघेमासिसितेपक्षेत्रयोदश्यांचपंचता ॥ २४९ ॥ इति॥अथाऽऽरुचियोगः ॥
योगेह्यारुचिकेजातःपूर्वजन्मनिपादजः ॥ नृपांनुकम्पयातत्रद्रव्याणिकृतवान्भृशम्॥एकस्मिन्समयेविप्रकथांश्रुत्वाहरेरिमाम् ॥२५०॥लग्नं
चहृदयंतस्यांपुण्यमार्गेरतोदृढः ॥ तीर्थेतीर्थेकृतासेवाऋषीणांचपुनःपुनः ॥ गोदानमश्वदानंचरौप्यस्वर्णकदम्बकम् ॥ २५१ ॥ स्वदेशे
पुनरागत्यहर्षगद्गदमानसः ॥ आयुषस्तुसमाप्तित्वात्सशूद्रःपंचतांगतः ॥ भार्य्यातस्यसतीभूत्वास्वर्गलोकमुभौगतौ ॥ २५२ ॥ ततः
पुण्यक्षयेजातेपुनरागत्यभूतले ॥ ० । ० । ० । १० । १४ । १७ । २४ । २८ वर्षेकष्टम ॥ परमायुर्वर्षाणि ६४ ॥ इति ॥ अथाऽ
म्बरीषयोगः ॥ अम्बरीषेचयोजातःपूर्वजन्मनिद्राविडे॥जातःक्षात्रकुलेचैवसर्वसम्पद्युतोधनी ॥२५३॥ कार्पण्येमधुरालापीपरद्रव्याऽपहा
रकः ॥ भगिनीपुत्रस्तदाऽऽयातःस्वर्णभारसमन्वितः ॥ तस्यद्रव्याणिसर्वाणिगृहीत्वाविविधैश्छलैः ॥ २५४ ॥ नदत्तंतेनतद्द्रव्यंलोभो
पहतचेतसा ॥ समृतोद्रव्यशोकेनपापमुग्रमुपार्जितम् ॥ भागिनेयवधेनाऽसौनिरयंगतवान्मृतः ॥ २५५ ॥ विंशतिजन्मोत्तरेविप्र
त्विदानींदुःखभाग्भवेत् ॥ ३ । ६ । ९।१३ वर्षेकष्टम्॥परमायुर्वर्षाणि४१॥अथाऽम्बरीषद्वितीययोगः॥ अम्बरीषेचयोजातोगुणज्ञःपंडितः
सुधीः ॥ दर्शनीयोऽतिचतुरस्तथाचदीर्घलोचनः ॥ २५६ ॥ दयार्द्रोभक्तिसंयुक्तःपरकार्य्यस्यसाधकः ॥ आसीज्जन्मांतरेचैवकीकटे
ह्विसन्नसौ ॥ शत्रुघ्नेतिसमाख्यातःपत्नीपुत्रसमन्वितः ॥ २५७ ॥ एकस्मिन्समयेविप्रसवैश्योलोभसंयुतः ॥ ब्राह्मणेनतस्यगेहेस्वर्णं

मुद्रासहस्रकम् ॥ स्थापितंतुपुनःकार्येजातेयाचितवान्स्वयम् ॥ २५८ ॥ नदत्तवाँछोभयुतःपलायनपरायणः ॥ सवेश्यःपंचतांप्राप्तः
पापाच्चनरकेगतः ॥ पुनरागत्यमेदिन्यांसुताऽऽनंदेनसंयुतः॥२५९॥३ ।९।१२ । १८ वर्षेपीडा ॥ परमायुर्वर्षाणि ४९ ॥ अथाऽमोघा
योगः॥कश्चित्क्षात्रकुलेपूर्वंज्वालामुख्याश्चसन्निधौ।कर्मदासइतिख्यातःक्षात्रधर्मपरायणः॥सत्यवादीमहोग्रश्चमहाशूरोऽतिविक्रमी॥२६०॥
नानायुद्धंकृतंतेनजितंशत्रुबलंबलात् ॥ आरोपिताःसर्ववृक्षाःपथिकूपाश्चनिर्मिताः ॥ जलोत्सर्गंवृषोत्सर्गंकृत्वासतुविधानतः ॥ २६१ ॥
आयुषस्तुसमाप्तित्वान्ममारपथिबाहुजः ॥ वैश्यगेहेसमुत्पन्नः काश्यांचैवोत्तरेदिशि ॥ इदंजन्मतृतीयंस्याद्बुद्धिमांश्चविचक्षणः ॥ २६२॥
३ । ६ । ८ । १२ । १९ । २३ । ३६ । ३८ ॥ वर्षेकष्टम् ॥ परमायुर्वर्षाणि ॥ ७३ ॥ अथाऽऽत्मबीजयोगः ॥ कश्चिद्वैश्यकुले
पूर्वंकेरलेहिवसत्यसौ ॥ रुक्मदइतिविख्यातःसपत्नीकः सपुत्रकः ॥ क्रयविक्रयकर्ताचवाणिज्येचपरायणः ॥ २६३ ॥ धर्ममार्गेचकुश
लोब्राह्मणानांचसेवकः ॥ तस्यभार्य्यामहादुष्टाकर्कशाकटुभाषिणी ॥ प्रत्यहंद्रोहकुशलासदानिष्ठुरभाषिणी ॥ २६४ ॥ एकस्मिन्समये
विप्रवैश्येनापिचक्रोधतः ॥ स्थूलेनलकुटेनैवताडिताबहुधातदा ॥ २६५ ॥ साम्प्रतातेनदुःखेनपापमाचरितंत्विदम् ॥ वैश्योपिपंचतां
प्राप्तःसगत्वायमशासनम् ॥ २६६ ॥ गर्भभ्रष्टेतदाभूत्वामाहिषोमर्कटोपिच ॥ मर्कटोमकरेमाघेकृष्णानद्यांचवैमृतः ॥२६७॥ तेनपुण्या
वशेषेणमानुषेहिभवेधुना ॥ १ । ४ । ८ । ११ ।१६।कष्टम् ॥परमायुर्वर्षाणि९३ । अथअकलयोगः॥अकलयोगेपियोजातःपूर्वजन्मनिब्रा
ह्मणः ॥ दंडकारण्यनिकटेनिवसन्परिवारयुक् ॥ २६८॥केशवेतिसमाख्यातःपत्नीतस्याऽतिदुर्भगा॥एकस्मिन्समयेविप्रपुरुषोऽन्यः समा
गतः ॥ २६९॥ पर्य्यंकेस्थाप्यस्वस्थानेरतिंकृतवतीतदा ॥ ब्राह्मणोथविलोक्येमांचातिक्रोधेनकंपितः ॥ २७०॥कुंतेनतीक्ष्णधारेणघाति

तौतौद्विजोत्तम ॥ द्वौमृतौतत्रभोविप्रप्रायश्चित्तंनकारितम् ॥ २७१ ॥ तेनपापानुसारेणकष्टंजातंमुहुर्मुहुः ॥ ४ । ७ । ११ । १७ ॥ १९ ।
२४ । २८ ॥ मासेवर्षेप्रपीडितः ॥ परमायुर्वर्षेप्रपीडितंः परमायुर्वर्षाणि ७५ ॥ अथअकलात्मकयोगः ॥ अकलात्मकेयदाजन्मवेज
नाथेतदाऽवसत् ॥ वासुदेवइतिख्यातोब्राह्मणोदेवपूजकः ॥ २७२ ॥ प्रतिग्रहंचगृह्णातिनिर्माल्यंचतदाऽनघ ॥ एकस्मिन्समयेविप्रभिक्षुको
द्वारमागतः ॥ २७३ ॥ नदत्तंतस्यवैकिंचित्तिरस्कारमथाऽकरोत् ॥ तेनपापानुसारेणश्रियस्तस्यक्षयंगताः ॥ २७४ ॥ समृतश्चातिकष्टेन
पुनरागत्यभूतले ॥ नात्युच्चोनाऽतिह्रस्वश्चविद्वेषीकलहात्मकः ॥ २७५ ॥ पाखंडाऽऽचरणेमग्नोमिथ्याजल्पतिनित्यशः ॥ ३ । ५ । ९ ।
१२ । २४ । ३१ । ३४ । ४७ । ५५ अल्पमृत्युः ॥ परमायुर्वर्षाणि ८० ॥ अथअपर्णायोगः ॥ कश्चिच्छूद्रकुलेपूर्वंब्रह्मपुत्रस्यसन्निधौ ॥
कृषिवाणिज्यनिरतःसर्वसम्पद्युतोधनी॥२७६॥वारेश्वरइतिख्यातःपुण्यमार्गेसदारतः ॥ पूजकोव्रत्यतिथीनांचपरमोदारमानसः ॥२७७॥
समृत्वासागरेतीरेबभूवहवणिग्गृहे ॥ शोणभद्रस्यनिकटेपत्नीपुत्रविवर्जितः॥२७८॥तीर्थाऽवगाहनेमग्नोवृन्दारण्येतदामृतः ॥ हंसोभूत्वामा
नसरसिमनुष्यत्वंगतोऽधुना ॥ ४ । ५ । ७ । १४ । २१ । २७ वर्षेकष्टम् ॥परमायुर्वर्षाणि ७७ । अथअवर्णयोगः ॥ अवर्णयोगेसमुत्पत्तिः
पूर्वजन्मनिसंकरः ॥ सारस्वतइतिख्यातोवाणिज्येचपरायणः ॥ २७९ ॥ एकदाककुभेदेशेसगत्वावृषभान्वितः ॥ विक्रयेद्विगुणंद्रव्यं
लब्ध्वास्वगृहमागतः ॥ २८० ॥ तस्यभ्रात्राकनिष्ठेनभागार्द्धंयाचितंतदा ॥ नदत्तंतस्यवैकिंचित्कृत्वायुद्धंपरस्परम् ॥२८१॥ तंहिखड्गेन
हतवान्कालप्राप्तेमृतःस्वयम् ॥ नानानरकेषुसस्थित्वानानाजन्मानिचाप्तवान् ॥ २८२ ॥ पुनरागत्यमेदिन्यांकिंचित्पुण्यप्रभावतः ॥
श्यामारुणोमध्यकायश्चंचलोऽतिदुरासदः ॥२८३ ॥ ५ । ८ । ११ । १७ ॥ मासेवर्षेचकष्टितः ॥ परमायुर्वर्षाणि ॥ ७९ ॥

अथअनर्कयोगः ॥ पूर्वजन्मनिचांडालःकीकटेनिवसन्पुरा ॥ मानधातासमाख्यातोह्यसत्कर्मपरायणः ॥२८४ ॥ जीवांश्चाघातयामास क्रव्यभोजीसदाऽनघ ॥ एकदासमयेविप्रभाविनोऽर्थस्यगौरवात् ॥ २८५ ॥ गङ्गास्नानायसर्वेहितस्यग्रामनिवासिनः ॥ गतवन्तश्चतैस्सार्द्धंगतोऽसौजाह्नवीतटे ॥ २८६ ॥ तत्रसन्नानमात्रेणचांडालःपंचतांगतः ॥ आरुरोहविमानाग्र्यमप्सरोभिस्सहैवच ॥ २८७ ॥ इंद्रलोकेऽथगत्वाऽसौस्थित्वावर्षसहस्रकम् ॥ पुनरागत्यमेदिन्यांधनीमानीचसाम्प्रतम् ॥ २८८ ॥ १ । ४ । ६ । ७ । ९ । १९ वर्षेकष्टम् ॥ परमायुर्वर्षाणि ७६ ॥ अथअच्युतयोगः ॥ अच्युतेपिनरोजातःपूर्वजन्मनिबाहुजः ॥ प्रजाःपालयितासम्यक्पुत्रवत्सतदाऽनघ॥२८९॥ पुत्रकन्यासमानश्चपरोपकरणेरतः ॥ दम्पतीतौगतौतीर्थंदानंदत्त्वाद्विजायच ॥ २९० ॥ एकस्मिन्समयेविप्रकृत्वाविश्वासघातकम् ॥ तेन पापाऽनुसारेणस्थित्वातुनरकेचिरम् ॥ २९१ ॥ इदंजन्मतुरीयंचप्राप्तंवैदैवयोगतः ॥ ७ । ४ । ९ । १३ । १८ । २१ वर्षेकष्टम् ॥ परमायुर्वर्षाणि ॥ ६९ ॥ अथाक्षियोगः ॥ अक्षियोगेनरोजातोदरिद्रः पूर्वजन्मनि ॥ नैष्ठिकःसत्यवक्ताचयशस्वीवागभीरकः ॥ २९२ ॥ वीष्टलेतिसमाख्यातः पत्नीतस्यपतिव्रता ॥ एकस्मिन्समयेविप्रहठाद्वर्षतिवासवे ॥ २९३ ॥ निराहारस्यतस्यैवगताऽह्नांविप्रविंशतिः ॥ पर्जन्येहिनिवृत्तेतुकश्चिद्धितण्डुलान्ददौ ॥ २९४ ॥ पाकेजातेतण्डुलानांभिक्षुकोद्वारमागतः ॥ २९५ ॥ तस्मैनिवेदितंसर्वंमुपोष्यपरिवारयुक्॥२९६॥गरुडोपरिस्थितंविष्णुंशंखचक्रगदाधरम् ॥ दृष्ट्वादरिद्रोऽसौविप्रपपातधरणीतले ॥ २९७ ॥ गरुडोपरितुसंस्थाप्यवैकुण्ठंप्रापितस्तदा ॥ दिव्यवर्षसहस्रांतेपुनरागत्यभूतले॥२९८॥५ । ९ । १३ । १९ । २२ कष्टम् ॥ परमायुर्वर्षं १०० अथाक्षियोगः ॥ अक्षियोगेपियोजातः सपुमान्बहुभार्य्यकः ॥ लक्ष्मींभुक्त्वामहींभुक्त्वाकथांश्रुत्वाविशेषतः ॥ २९९ ॥ पूर्वजन्मनिम

हाराष्ट्रेनगरेन्यवसत्तदा ॥ देवरामइतिख्यातोबहुतीर्थाटनंकृतम् ॥ ३०० ॥ सप्तजन्मोत्तरेविप्रपुनरागत्यभूतले ॥ ३।६।९।१७।२९। ३१
वर्षेपीडा॥परमायुर्वर्षाणि ८३॥अथईक्षितयोगः ॥ ईक्षितेयोगेयोजातःसपूर्वंबाहुजःस्मृतः॥कर्णाटकेऽवसत्सोऽपिदानवेन्द्रोमहाबलः३०१
यज्ञांश्चविविधान्कृत्वाब्राह्मणास्तोषिताःपुरा ॥ एवंभुंक्तेऽमवैराज्यंनिर्विघ्नंतुतदानघ ॥ ३०२ ॥ एकस्मिन्समयेविप्रब्राह्मणश्चतपोधनः ॥
बुभुक्षितोतिकृपणोमलिनाम्बरधारकः ॥ ३०३ ॥ देहिदेह्यवदद्वाक्यंनदत्तंतस्यवैक्वचित् ॥ अतिक्रोधेनतेनैवदत्तश्शापश्चदुष्करः ॥
॥ ३०४ ॥ म्लेच्छोभूत्वागतस्तस्मात्पर्वताऽरण्यसन्निधौ ॥ बहुवर्षसहस्रांतेमानुषत्वंभवेत्पुनः ॥ २।७।११।१७। १९।वर्षे कष्टम्॥
परमायुर्वर्षाणि ७० ॥ अथेन्द्रयोगः ॥ इन्द्रयोगेचयोजातःपूर्वजन्मनिब्राह्मणः॥३०५॥ अंगदेशेवसत्सोपिभीष्मदेवेतिविश्रुतः॥३०५सर्व
शास्त्रस्यवेत्ताचपरमोदारपावनः ॥ प्रयागेमकरेमाघेसस्नातोमृगगेरवौ ॥ ३०६ ॥ एकस्मिन्समयेविप्रसहशिष्येणब्राह्मणः॥देशेहिककुभे
चैवराजद्वारेसमाऽऽस्थितः ॥ ३०७ ॥ तेनभूपेनविप्रायद्रव्यंदत्तंचपुष्कलम् ॥ स्वदेशेहिसमायातोहर्षगद्गदमानसः॥३०८॥सन्मार्गेचव्य
यंकृत्वाबहुवर्षगताऽऽगतैः ॥ आयुषस्तुसमाप्तित्वात्सृतःकालचोदितः ॥३०९॥ देवलोकेऽभवत्प्राप्तस्तत्रस्थित्वाविशेषतः॥ पुनरागत्य
मेदिन्यांब्राह्मणस्यकुलेधुना ॥ ३१० ॥ गौरांगोह्रस्वदेहश्चविद्याविनयसंयुतः ॥ १।३।८।११। १४। १७।२४।२९ ॥कष्टम् ॥
परमायुर्वर्षाणि ७९ ॥ अथउग्रकयोगः ॥ उग्रकेचनरोजातोधर्मिष्ठःप्रियवाङ्मयः ॥ गुणशीलोयाचकश्चस्वप्रतापीजनेश्वरः ॥ ३११ ॥
बहुस्त्रीनायकोभूत्वाबहुग्रामाऽन्वितःसदा ॥ आसीज्जन्मान्तरेचैववैश्योनाम्नासुदर्शनः ॥३१२॥ व्यापारेषुरतोधीमान्द्रव्यंतुविपुलंकृतम् ॥
तीर्थावगाहनंकृत्वादानंदत्त्वाद्विजायच ॥३१३॥ प्रतिष्ठार्थंददौस्वर्णंस्वगृहेपुनरागतः ॥ गंगासागरकेगत्वामृत्वाचसदिवंगतः ॥ ततःपुण्य

क्षयेजातेमर्त्यलोकंसमागतः ॥ ३१४ ॥१ । ४ । ७ । ११ । १९ । २४ वर्षेपीडा ॥ परमायुर्वर्षाणि ॥ ७२ ॥ अथइलावर्तयोगः ॥
इलावर्तेपियोजातःसपुमान्गुणसागरः ॥ कंदर्पकेलिनिरतोद्रव्यस्योत्पादनेरतः ॥ आसीत्पूर्वेभवेसोऽपिबाहुजोमैथिलेवसन् ॥ ३१५ ॥
शिवदासइतिख्यातः सर्वसम्पद्युतोधनी ॥ सूर्य्यस्याऽऽराधनेनिष्ठोव्रततीर्थानुपालकः ॥ एकदाविपिनेरम्येकृतआखेटकोभृशम् ॥
॥ ३१६ ॥ हरिणीचसगर्भातुहताबाणेनवैतदा ॥ बाहुजोऽपिहतः सिंहैर्गतोऽसौयमलोकके ॥ ३१७॥ पुनराऽऽगत्यमेदिन्यांकिंचित्पुण्य
प्रभावतः ॥२।३।६।७।९। मासेवर्षेप्रपीडनम् ॥ परमायुर्वर्षाणि ६६ ॥ अथांऽशुमानयोगः ॥ अंशुमानेनरोजातः सर्वपापपरायणः ॥
ब्रह्मभक्तश्चनिपुणोमद्यमांसाऽदनेरतः॥३१८॥एकस्मिन्समयेविप्रविप्रोद्वाहश्चकारितः॥व्याधिग्रस्तस्यदीनस्यपरिचर्य्यामथाऽकरोत्३१९॥
एकदाचंद्रमोग्रासेसर्वस्वंविधिनाददौ ॥ समृतःसरयूतीरेपत्नीजातासतीतदा ॥३२०॥ उभयोःकर्मणोहेतोःस्वर्गेस्थित्वाविशेषतः॥ क्षीणे
पुण्येतुवैजातेचागतोधरणीतले॥३२१॥३।४।७।१०।१४।१९।२६।२९।३३ ॥ कष्टम् ॥ परमायुर्वर्षाणि ८५ ॥ माघेमासितुधवलेनवम्यां
चैवपंचता ॥इति॥ अथऊर्द्ध्वलिंगयोगः ॥ ऊर्द्ध्वलिंगेचबलवान्साहसीयुद्धविक्रमी॥क्रोधाऽनलसमःकीर्त्यानिश्छलः शुद्धमानसः ॥३२२॥
पूर्वजन्मनिकाम्पिल्येयमुनानिकटेवसन् ॥ससौदासोनामराजाबभूवक्षितिमंडले ॥३२३॥ सम्राट्सहस्रसैन्येनपापकर्मोद्यमेरतः॥अदंड्यो
दंडितस्तेनचागम्यागमनंकृतम् ॥ ३२४ ॥ श्राद्धंहोमस्तथावेदःपुराणंचनिवारितम् ॥ सकलेष्वपिलोकेषुव्यभिचाररतेनवै ॥३२५॥ एक
स्मिन्समयेविप्रश्चेकाकीगहनंवनम् ॥ सराजाचाश्वमारुह्यजगाममृगयांप्रति ॥३२६॥ दृष्ट्वास्त्रीःपूर्वबहवः संतिगंगातटेचयाः ॥ हवनंमार्जनं
गाप्यंकृत्यंःशम्भुव्रतंखलु ॥ ३२७ ॥ सराजाविस्मितोभूत्वाप्रोचिवान्किंकृतंत्विदम् ॥ शिवव्रतंचराजेंद्रवाञ्छितार्थफलप्रदम् ॥ ३२८ ॥

[illegible]चिंतयामासमानसंपूजनंकृतम्॥एवंत्वल्पेगतेकालेपंचत्वंहिगतोनृपः ॥३२९॥यमदूताआगताश्चपाशैराजादृढीकृतः॥पश्चाद्रुद्रगणैः
प्राप्तैर्ह्यमद्राजामोचितः॥३३०॥ अयंशिवस्यभक्तोहिकैलासशिखरेगतः॥दिव्यवर्षसहस्रांतेपुनरागत्यभूतले ॥३३१॥१५।७।१२॥वर्षे
कष्टम्॥परमायुर्वर्षाणि७०॥अथाऽगोचरयोगः॥अगोचरेचयोजातःपुष्करेपूर्वजन्मनि॥ गन्धर्वेतिसमाख्यातःपशुहिंसापरायणः॥३३२ व
नाद्रिनिकटेभूमौविचरंश्चसदाद्विज॥जीवान्संघातयामासनिर्दयःपापभाक्पुरा॥३३३एकस्मिन्समयेविप्रक्षुत्तृड्भ्यांव्याकुलेंद्रियः॥इतस्तत
श्वविचरन्कालवश्योबभूवह॥३३४॥स्थित्वाबिल्वतरोःशाखांनिशायांदैवयोगतः॥समृतस्तेनभोविप्रशिवलोकंसमागतः३३५॥बहुवर्षसह
स्रांतेपुनरागत्यभूतले।३।८।१३।१९।२२।२९।३२।३५वर्षेकष्टम्॥परमायुर्वर्षाणि ८४॥ अथएरंडयोगः ॥ कश्चित्पूर्वंकुलालोपिभांडमृन्मय
कारकः॥ विक्रीतेप्रतिमासांतेप्राप्तिस्तस्यविशेषतः॥द्रव्यंतुविपुलंकृत्वाह्यारामंचतथाऽकरोत् ॥३३६॥ वापीकासारनिर्माणेधर्ममार्गेसदार
तः ॥ देवलोकंचसप्राप्यपुनरागत्यभूतले॥वैश्यगेहंचसंप्राप्यबाहुजोपिपुनर्भवेत् ॥ इदंजन्मतृतीयंहिमातृकुक्षेःसमुद्भतम्॥३३७॥३।८।१४
कष्टम्परमायुर्वर्षाणि ५७ ॥ अथअत्रिपालिन्ययोगः ॥ अत्रिपालिन्यसंजातेपूर्वजन्मनिपादजः ॥ उज्जैननगरेचैवन्यवसत्परिवारयुक् ॥
॥३३८॥सत्संगेतस्यवैचित्तंकथांश्रुत्वामनोरमाम् ॥ तीर्थाटनंकृतंसम्यग्द्वारकायांतथाऽऽस्थितः ॥३३९॥ तत्रभाविबलात्पुत्रसमृत्वाचदि
वंगतः ॥ बभूवक्षितिपाधीशोविंशतिकोशाधिपस्तदा ॥३४०॥ नानापापंकृतंसम्यक्प्रसंगाच्चतदानघ ॥ तिर्यग्योनिसमुत्पन्नःशतधाचम
हीतले ॥ ३४१ ॥ ५ । ९ । १५ । १९ । २५ । ३१ । वर्षेकष्टम्॥परमायुर्वर्षाणि ६८ ॥ अथउंछयोगः ॥ उंछयोगेचयोजातो बाहुजःपूर्व
जन्मनि ॥ नृसिंहइतिविख्यातो वानप्रस्थोबभूवह ॥ ३४२ ॥ नानावनाद्रिनिकटेऽभ्रमत्सोपिद्विजोत्तम ॥ मध्येपापंकृतंदैवात्परस्त्रीरति

लम्पटः ॥ ३४३ ॥ आयुषस्तुसमाप्तित्वात्सम्मृतः कालचोदितः ॥ कीटयोनिर्विहंगश्चसारसोनकुलोभवत ॥ मर्कटस्तामसीतीरेसमृतः
स्वर्धुनीतटे ॥ तेनपुण्याऽवशेषेणमानुषोभवतिध्रुवम् ॥ ३४४ ॥ १ । ४ । ६ । ९ । १३ । १९ वर्षेकष्टम् ॥ परमायुर्वर्षाणि ८३ ॥ अथ
उग्रयोगः॥उग्रयोगेयदाजन्मविदर्भेपूर्वजन्मनि ॥३४५॥ ब्राह्मणोबलदेवश्चशास्त्रज्ञोधनवर्जितः॥देशाटनंकृतंसम्यग्द्रव्यस्योत्पादनंकृतम् ॥
स्वदेशेपुनरागत्यहर्षगद्गदमानसः ॥ ३४६ ॥ कन्योद्वाहःकृतःसम्यग्ब्राह्मणाअन्नतोषिताः॥एकस्मिन्समयेपत्नीदुर्वाक्यमवदत्तदा॥३४७॥
क्रोधयुक्तेनविप्रेणस्वशरीरंचघातितम् ॥ पापेनानेनात्मघातीनिरयंचगतोहिसः ॥ ३४८ ॥ नानाजन्मानिभुक्त्वासौमर्त्यलोकेतथाऽऽ
गतः ॥ ३ । ६ । ९ । १२ । १५ । १९ कष्टम्॥परमायुर्वर्षाणि५९॥अथउदासीनयोगः॥विरक्तोजन्मनिपुरारंगकारोद्विजोत्तम ॥ गौडदेशे
वसन्सोऽपिपत्नींत्यक्त्वातथाधनम् ॥ ३४९ ॥ वनाऽद्रिनिकटेऽवात्सीत्प्रत्यहंचहरिंस्मरन्॥बभूवबाहुजःसोपिकेरलेस्वल्पकालतः ॥३५०॥
पुनर्जन्मपुनर्मृत्युर्जन्ममृत्युःपुनः पुनः ॥ ८ । १३ । १७ । २१ । २५ कष्टम् ॥ परमायुर्वर्षाणि ॥६७॥ अथऐरावतयोगः ॥ योगऐराव
तेजातःपूर्वजन्मनिभूमिपः ॥ सरय्वाश्चोत्तरेभागेपूर्वजन्मनिपादजः ॥ ३५१ ॥ राजाशूद्रकुलेभूत्वाधनधान्यसमन्वितः ॥ पर्वस्वपिचते
नैवाऽध्यापिताऽब्राह्मणाः शुभाः ॥ ३५२ ॥ एकस्मिन्समयेविप्राजालोभविमोहितः ॥ तस्मिन्ग्रामेऽवसत्त्वेकोब्राह्मणोधनगर्वितः ॥
॥ ३५३ ॥ तस्यद्रव्याणिसर्वाणिगृहीत्वाविविधैश्छलैः ॥ आयुषस्तुसमाप्तित्वात्सराजापंचतांगतः ॥ ३५४ ॥ पुनर्जन्मपुनर्मृत्यु
र्जन्ममृत्युः पुनःपुनः ॥ पश्चान्मनुष्यतांप्राप्तःकिंचित्पुण्यप्रभावतः ॥ ३५५ ॥ १ । ५ । ९ । १३ । १८ । २३ । २९ । ४०
३२ । ३७ वर्षेकष्टम् ॥ परमायुर्वर्षाणि ७८ ॥ अथेन्दिरायोगः ॥ आसीज्जन्मांतरेचैवविह्वलोनामसंकरः ॥ खशदेशेऽवसत्सोपिन्नृपस्यप

रीचारकः ॥ ३५६ ॥ नृपानुकम्पयातत्रद्रव्यंतुविपुलीकृतम् ॥ तीर्थाटनेगतोदैवात्समृतोयमुनातटे ॥ ३५७ ॥ गंधर्वेनगरंगत्वा
पितृलोकंततःपरम् ॥ पितृलोकात्परिभ्रष्टश्चागतोभूमिमंडले ॥ ३५८ ॥ नात्युच्चोमध्यदेहश्चपुंश्चलीसुखसंयुतः ॥ ३ । ४ । ८ । १२ ।
१७।२१।२७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५९ ॥ अथइनयोगः ॥ इनयोगेचयोजातःपूर्वजन्मनियोषिता ॥ कुशदेवीतिविख्यातापुंश्च
ल्यऽतिमनोहरा ॥ ३५९ ॥ पतिंत्यक्त्वाचसानारीपरपुंसिरतासदा ॥ परदेशेचकाराऽसौभ्रमणंयत्रतत्रच ॥ ३६० ॥ एवंकालेव्यतीतेंते
पुष्करेहिसमागता ॥ चातुर्मासव्रतंकृत्वानिराहारंचनिर्जलम् ॥ ३६१ ॥ तेनपुण्यप्रभावेणसाजाताचपुमान्द्विज ॥ ५ । ९ । १२ । १८
२५ । ३३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७३ ॥ अथएकावर्तयोगः ॥ एकावर्तेगुणश्रेष्ठःविद्ययाचसमन्वितः ॥ धर्माधर्मविवेकीचकुशलः
सर्वकर्मणि ॥३६२॥ कन्योद्वाहंतथाकृत्वागृहदानंतथाऽकरोत ॥ कालंजरगिरौरम्येन्यवसत्पूर्वजन्मनि ॥ ३६३ ॥ कोंकणेतिसमाख्यातो
ब्राह्मणःसर्वपूजकः ॥ पठनेपाठनेसुज्ञोनृपपूज्योजनेश्वरः ॥ ३६४ ॥ स्वर्गापवर्गभोग्यश्चबभूवद्विजसत्तम ॥ इदंजन्मतृतीयंतुसर्वसौख्येन
संयुतम् ॥ ३६५ ॥ १ । ४ । ९ । १३ । १८ । २४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७४ ॥ अथइक्षुयोगः ॥ इक्षुयोगेनरःपूर्वंधर्मिष्ठोगुणव
त्सलः ॥ तस्यभार्य्यासुशीलाचमृद्वंगीचारुलोचना ॥ ३६६ ॥ एकस्मिन्समयेविप्रभाविनोर्थस्यवैबलात् ॥ तस्मिन्ग्रामेऽवसत्त्वेकोवैश्यः
परमधार्मिकः ॥ ३६७ ॥ तस्यपुत्रोपिभव्यश्चकुमारःपंचवार्षिकः ॥ स्वर्णाऽलंकृतसर्वांगोब्राह्मणस्यगृहंगतः ॥ ३६८ ॥ दृष्ट्वातंब्राह्मणंस
म्यग्गृह्यदेशंप्रणीयवै ॥ सर्वमाभरणंतस्यबालकस्यहृतंतया ॥३६९॥ खड्गेनहत्वातंपश्चाद्भूमिंखात्वाधृतस्तदा ॥ तयेत्थंगोपितंविप्रपापमुग्र
मुपार्जितम् ॥३७०॥ साध्वीपुत्रःपतिश्चवव्ययंकृत्वादिनेदिने ॥ यमलोकेगताःसर्वेनानानरकयातनाः ॥३७१॥ नानाजन्मानिभूत्वाऽथ

पुनरागत्यभूतले ॥ २ । ६ । ९ । १४ । २१ । २९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ ६१ ॥ अथेश्वरयोगः ॥ योगईश्वरकेजातः पूर्वज
न्मनिबाहुजः॥अतुलःपरमोदारःसहसैन्येनराजते॥३७२॥पंचवट्याश्चनिकटेविश्वनाथेतिविश्रुतः॥देवतागुरुभक्तश्चधनाढ्योवेदपारगः ॥
॥ ३७३ ॥ दंडकारण्यनिकटेतपश्चर्य्यामथाऽकरोत् ॥ देव्याश्चपूजनंभक्त्याकृत्वाजाप्यंनिरंतरम् ॥ ३७४ ॥ आविर्बभूवसहसादेवीसिंहो
परिस्थिता ॥ वरंवरयहेविप्रप्रसन्नाहंनसंशयः ॥ ३७५ ॥ पुत्रंमेदेहिगिरिजेसर्वलक्षणसंयुतम् ॥ पुत्रस्तेभवितविप्रसुंदरःप्रियवाङ्मयः ॥
॥ ३७६॥एवंब्रुवाणासादेवीह्यंतर्धानंतदागता ॥ किंचित्कालांतरेचैवतनयःसुन्दरोऽभवत्॥३७७॥सविप्रःपंचतांप्राप्यशिवलोकेगतस्तदा ॥
अशीत्यब्दसहस्रांतेचागतोधरणीतले॥३७८॥२।४।८।१२।१८।२०।२६।वर्षेषुकष्टम्॥परमायुर्वर्षाणि७७॥अथअंदोलीयोगः॥ कर्णाटनग
रेपूर्वंचंद्रभागानदीतटे ॥ शिवरामइतिख्यातःसपत्नीकःसपुत्रकः ॥३७९॥ तीर्थावगाहनंकृत्वागयाश्राद्धमथाऽकरोत्॥गाश्चप्राधानिकास्त
त्रदत्त्वाबहुविधानतः ॥ ६८० ॥ स्वगृहेपुनरागत्यहर्षगद्गदमानसः॥मन्त्रवेत्ताह्यथोभूत्वाभूपस्याऽग्रेतदाऽनघ ॥ ३८१ ॥ द्रव्यलोभेनसततं
प्रजानांलुंठनेरतः ॥ तत्सकाशाद्बहुद्रव्यंनृपेणलुंठितंद्विज ॥ ३८२॥ द्रव्यशोकेनविकलोमृत्युमापससत्वरम् ॥ तिर्य्यग्योनिंगतःसोऽथबि
डालोपिबभूवह ॥३८३॥ भल्लूकोऽथसृगालश्चनानायोनीःपुनःपुनः ॥ गत्वाऽऽगत्यचमेदिन्यांमानुष्यत्वमुपागतः ॥३८४॥३ ।८।१० ।
१६ । १८ । २० । २७ ।वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९०॥ अथइन्द्रवज्राख्ययोगः॥इन्द्रवज्रेचयोजातःसपुमान्रोगसंकुलः ॥ कश्चिद्वै
श्यकुलेपूर्वंकर्मनाशानदीतटे ॥३८५॥ भोजराजइतिख्यातःपत्नीतस्यकलेवरी॥गीतेनृत्येसदानिष्ठाधर्मेकर्मणिनैवच ॥३८६॥ वेश्यायाः
प्रीतिवशतःकुटुम्बघ्नीबभूवह॥ आयुषस्तुसमाप्तत्वात्सागत्वायमशासनम् ॥ ३८७॥ कुंभीपाकेमहाघोरेयमदूतायमाज्ञया ॥ तांहिवर्षसह

साविशिस्वातत्रद्विजोत्तम ॥ ३८८ ॥ तिर्य्यग्योनिशतंगत्वामनुजत्वमिहागतः ॥ बह्वाहारोह्यनर्थीचपशुहिंसापरायणः ॥३८९॥ ४।८। १२
१।८।२३ वर्षेषुकष्टम्॥परमायुर्वर्षाणि१००अथआंडम्बरयोगः॥पूर्वजन्मनिभोविप्ररंडाऽऽदेशेऽवसन्मुदा॥धैर्य्यदासइतिख्यातः किंचिद्भूमिप
तिस्तदा ॥ ३९० ॥ महाऽभिमाननिरतस्तृणवन्मन्यतेजगत्॥एकस्मिन्समयेविप्रकृतंकर्माऽतिदारुणम् ॥३९१॥ गुप्तस्थलेसद्द्रोहेणनृपघा
तंतथाऽकरोत् ॥ तेनपापानुसारेणकुष्ठरोगीबभूवह ॥ ३९२ ॥ मृतेतुयमदूतैर्हिनानाकष्टैःप्रपीडितः ॥ असिपत्रवनेघोरेकुकलासोबभूवह ॥
॥ ३९३ ॥ दिव्यवर्षसहस्रांतेमानुषोभवतिध्रुवम् ॥ ३।५।७॥१२।१८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि६३ ॥ अथअनर्थकयोगः॥कर्णधारोऽ
भवत्पूर्वंनौकायांवंगदेशके ॥ कर्कशः कटुवादीचनिर्दयःपापसंचयी ॥ ३९४ ॥ कस्मिंश्चित्समयेविप्रब्राह्मणोऽतिबुभुक्षितः ॥ आगतस्तस्य
निकटेदृष्ट्वातंक्षुधयायुतः॥३९५॥भोजनाच्छादनेदत्त्वातथाचद्विजशंबलम् ॥ तेनपुण्यप्रभावेणस्वर्गंगत्वाचकेवटः॥३९६ ॥ पुनरागत्यमे
दिन्यांपादजस्यकुलेऽधुना॥१।४।८।१०।१३।१५ वर्षेषुकष्टम्॥परमायुर्वर्षाणि६१॥अथआजन्मयोगः॥आसीज्जन्मांतरेनद्याः कौशिक्या
श्चतटेतदा॥विक्रमोनामशूद्रस्तुकृषिकर्मरतश्चसः॥३९७॥पत्नीत्यागंततःकृत्वाजगामगिरिगह्वरे॥तपश्चर्य्यांतुकृतवान्बहुवर्षंतथाऽनघ ॥
॥ ३९८ ॥ एकदाविपिनेरम्येमहाभीतिमुपागतः ॥ उन्मत्तोपिबभूवाऽथपर्य्यटंश्चचतुर्दिशम् ॥ ३९९ ॥ आयुषस्तुसमाप्तत्वान्ममारपथि
पादजः॥ जन्ममृत्युशतंभुक्त्वापुनरागत्यभूतले ॥ गोधूमाऽऽकारवद्देहोऽतीवक्रोधीविचक्षणः ॥ ४०० ॥ २।३।५।८।९।१७।२२।३१ वर्षेषु
कष्टम्॥परमायुर्वर्षाणि ७२॥ अथांऽजनाधारीयोगः ॥ कश्चिद्विप्रकुलेपूर्वमांध्रदेशेवसन्नसौ ॥ नारदेतिप्रसिद्धश्चविद्यावेदविवर्जितः ॥४०१॥
असत्कर्माऽनुरक्तश्चनाटकेचेटकेरतः ॥ लोकानांवंचनेव्यग्रोद्रव्यस्योत्पादनेरतः ॥ ४०२ ॥ परस्त्रीरमणेधूर्तःकापट्याचरणेरतः ॥

एकंगतेषुवर्षेषुतस्यमृत्युर्बभूवह ॥ ४०३ ॥ प्रक्षिप्तोयमदूतैर्हिप्रतप्ताङ्गारनारके ॥ गर्दभःसूकरोभूत्वागृध्रयोनिशतंगतः ॥ ४०४ ॥ हंसः
सरसिभूत्वाऽथमानुषत्वमुपागतः॥१।३।१६।२८।३३।३७वर्षेषुकष्टम्॥परमायुर्वर्षाणि६९॥अथअसत्ययोगः ॥ पूर्वजन्मनिविप्रोसौसर्ववि
द्याविशारदः ॥ खंडदेवेतिविख्यातःपत्नीपुत्रसमन्वितः ॥ ४०५ ॥ सरस्वत्याश्चनिकटेपरिवारेणसंयुतः ॥ तस्यगेहेसमाऽऽयातोब्राह्मणो
द्रव्यसंयुतः ॥ ४०६ ॥ आदरंकृतवान्सम्यक्स्वगृहेस्थापितःपुरा ॥ तस्यद्रव्यंहिसर्वंतुचोरितंद्विजसत्तम ॥ ४०७॥ सविप्रोद्रव्यशोकेनस्व
शरीरंजहौतदा॥एवंस्वल्पेगतेकालेतस्यमृत्युरभूत्पुरा॥४०८॥सआत्महापिशाचोऽभूत्तमसायास्तटेद्विज ॥ मानुषोह्यधुनाजातोमिथ्यावादे
सदारतः ॥ ४०९ ॥ ३।३।९।१२।२९ वर्षेषुकष्टम्॥महामृत्युः ८१ ॥ अथआतुरिकयोगः ॥ योगआतुरिकेजातः पूर्वजन्मनितैलिकः ॥
धनाढ्यश्चातिशूरश्चदानधर्मपरायणः ॥४१०॥ जलोत्सर्गंवनोत्सर्गंकृत्वासतुविधानतः॥ सत्पात्रेहिद्विजेदत्त्वास्वर्णमुद्रासहस्रकम्॥४११॥
गोशतंचाऽन्नमेरुश्चदत्तस्तेनविधानतः ॥ एवंनिवसतातत्रबहुवर्षगताऽऽगतैः ॥ ४१२ ॥ दैवयोगेनमरणंबभूवद्विजसत्तम॥देवलोकंतुसंप्राप्य
नंदनेचवनेगतः ॥ ४१३ ॥ ततःपुण्यक्षयेजातेमर्त्यलोकंसमागतः ॥ ३।४।९।१३। १८।२५। २९। ३५। ४० वर्षेषुकष्टम् ॥ परमायुर्व
र्षाणि ६४ ॥ अथाऽर्जकयोगः ॥ अर्जकेचनरोजातःपूर्वजन्मनिचोत्कले ॥ इंद्रसेनइतिख्यातःपत्नीतस्यपतिव्रता ॥ ४१४ ॥ कन्यापुत्र
विहीनश्चधनधान्येनसंयुतः ॥ तीर्थाऽवगाहनंकृत्वादम्पतीचतदानघ ॥ ४१५ ॥ हरिद्वारेतथागत्वागंगास्नानमथाऽकरोत्॥ वैद्यनाथार्चं
नंकृत्वामार्गेमृत्युमुपागतः ॥ ४१६ ॥ पत्नीतस्यसतीजातास्वर्गलोकमुभौगतौ । बहुवर्षसहस्रांतेपुनरागत्यभूतले ॥ ४१७ ॥ ३।९। १६
२ ३वर्षेषुकष्टम्॥परमायुर्वर्षाणि६७॥ अथान्धकारयोगः॥अन्धकारेनरोजातः पूर्वंवैहस्तिनापुरे॥ जन्मांधोपिबभूवाऽथविष्णुभक्तोनिरामयः

॥ ४१८॥ गीतवाद्यरतःसोपिभक्तश्चैवांतरात्मनि ॥प्राप्तेवार्द्धक्यएवासौनैमिषारण्यमागतः॥४१९॥ सम्मृतःकालसर्पेणदष्टोहिद्विजसत्तम ॥
आगतोहिपुनर्भूम्यांपूर्वपुण्यप्रभावतः ॥ ४२०॥ ३ । ४।७।८।१०।१६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७६॥अथेंद्रियाययोगः ॥ इंद्रियाये
समुत्पन्नाकुलटापूर्वजन्मनि ॥ परपुंसिरताभ्रष्टास्वैरिणीद्रव्यकांक्षिणी ॥४२१॥ नानाद्रव्यंसमुत्पाद्यकृत्वाऽऽरामंचशोभनम्॥ पथिकूपांश्च
निर्मायह्यन्नदानंददौभृशम्॥४२२॥सामृतागदंसंसक्तापापात्पापफलंभृशम्॥साजाताऽत्रवणिग्गेहेसर्वसम्पद्युतातथा॥४२३॥ सर्वाऽभरणसं
पन्नासर्वसौख्यसमन्विता॥सुन्दरीचातिशोभाढ्यादानभक्तिपरायणा ॥४२४॥१।४।६।९।१२ । १९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥
(पुनरपीन्द्रियाययोगः) आसीज्जन्मांतरेचैवब्रह्मचारीजितेंद्रियः॥विंध्याद्रिनिकटेचैवतपश्चर्य्यापरायणः॥४२५॥सत्यवार्तानुरक्तश्चभव्य
कांतिर्गुणाकरः ॥ एकस्मिन्समयेविप्रकृतंकर्मातिदारुणम्॥४२६॥ब्राह्मणीचागतात्वेकासुंदरीनवयौवना ॥ बलादाकर्षितातस्याःकृत्वातु
रतिसंगमम्॥४२७॥सगर्भासाबभूवाथतस्मिन्नहनिवत्सल॥मृत्वातुब्रह्मचारीसदारुणंनरकंगतः॥ षष्टिवर्षसहस्रांतेह्यागतोभूमिमंडले ४२८
॥३॥५ । ८ । ११ । १७ । २३ । २६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८३। अथइमाद्रियोगः ॥इमाद्रियोगेयोजातःयोषित्सापूर्वजन्मनि॥
बाहुजस्यसुताशुभ्राचार्वंगीचशुभानना ॥ ४२९॥ परमोदारतायुक्तापुण्यमार्गेसदारता॥सपत्नीभावदोषेणकृतंकर्माऽतिदारुणम्॥४३०॥
सपत्न्यैचविषंदत्त्वासामृताद्विजसत्तम॥पापात्पापफलंभुक्त्वायोनिंभुक्त्वाकथंचन॥४३१॥मेदिन्यामागतापश्चात्पूर्वपुण्यप्रभावतः ॥१।१०।
२१।२८वर्षेषुकष्टम्॥परमायुर्वर्षाणि८४अथोष्ट्रहायोगः॥पर्वतारण्यनिकटेतपस्वीपूर्वजन्मनि॥शिवरामइतिख्यातःशिवस्यस्मरणेरतः४३२
पंचवर्षाणितेनैवमम्बुपर्णाशनंकृतम् ॥ त्यक्त्वातदपिपश्चात्तुनिराहारोबभूवह ॥ ४३३ ॥ आयुषस्तुसमाप्तत्वात्सम्मृतोगिरिगह्वरे ॥ इन्द्र

लोकेतथागत्वाचंद्रलोकेततःपरम् ॥ बहुवर्षसहस्रांतेचागतोभूमिमंडले॥३।८।१३।१८।२३।२१।३७वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७९ ॥
अथांडपालयोगः ॥ अंडपालेनरोजातःकायस्थःकीकटेवसन् ॥ कंदर्पइतिचाख्यातःशाक्तधर्मेसदारतः ॥४३४॥चतुरोदानशीलश्चपितृभ
क्तिपरायणः ॥ सुज्ञश्चसर्वशास्त्रेषुकाव्याऽलंकारबोधकः ॥४३५॥ पोष्टाचनिजवर्णानांब्राह्मणानांविशेषतः ॥ आयुषस्तुसमाप्तत्वात्समृतो
व्याघ्रखादितः ॥ ४३६॥ पुनर्जन्मपुनर्मृत्युर्जन्ममृत्युःपुनःपुनः॥इदंतुदशमंजन्मचागतोधरणीतले॥१।५।८।१३।१९।२५वर्षेषुपीडा ॥
परमायुर्वर्षाणि ७१॥ अथअगोचरीयोगः ॥ आसीज्जन्मांतरेचैवचर्मकारोमहाधमः ॥ देशेमरुस्थलेचैवनिवसन्परिवारयुक् ॥ ४३७ ॥
एकस्मिन्समयेविप्रकृतंकर्मदृढंबहु ॥ दैवयोगात्साधुजनास्तन्मार्गेहिसमागताः॥४३८॥स्वगेहेतांश्चसंस्थाप्यसत्कारंकृतवान्भृशम्॥उच्छि
ष्टभोजनंभुक्त्वामासमेकंनिरंतरम् ॥ ४३९ ॥ पूर्वाज्ञानंपरित्यक्त्वासत्संगेषुमनःकृतम् ॥ कृत्वास्वदेशत्यागंसतीर्थानांगाहनेरतः ॥४४० ॥
नानातीर्थाटनंकृत्वानानाव्रतपरायणः ॥ तीर्थभूमौमृतःसोस्यपुनर्जन्मबभूवह ॥४४१॥ पादजस्यकुलेजातःसरय्वाउत्तरेतटे॥विष्णुभक्ति
रतोधीमान्सत्यव्रतपरायणः ॥ ४४२॥ धर्ममार्गेचकुशलोविरक्तोपिबभूवह ॥ समृत्वासागरतटेबभूवबाहुजस्तदा ॥४४३॥ इदंजन्मतृती
यंतुशृणुपुत्रयथातथम् ॥ सर्वसौख्येचनिरतः शिवभक्तौनिरंतरम् ॥ ४४४ ॥१।३। ४।८।१३।१८।२२वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि७७॥
अथोन्मुनीयोगः ॥ उन्मुनीयोगकेजातःसपुमान्दृढकामुकः ॥ आसीत्पूर्वभवेकश्चिद्विदर्भोनामब्राह्मणः ॥ ४४५ ॥ देशेहिगौडकेजातो
विद्याविनयसंयुतः ॥ ब्रह्मकर्मपरिभ्रष्टोमदयुक्तश्चकामुकः॥४४६॥परस्त्रीःसेवतेनित्यंमिथ्याजल्पतिनित्यशः॥ एवंहिन्यवसत्तत्रबहुवर्षगता
न्तैः ॥ ४४७ ॥ आयुषस्तुसमाप्तत्वात्समृतःकालचोदितः ॥ पापात्पापफलंभुक्त्वायोनिंभुक्त्वाकथंचन ॥ ४४८ ॥ स्वर्गादौसर्वभोगंतुभु

कृत्वाचार्द्धनिशंद्विज ॥ षष्ठिंवर्षसहस्रांतेचागतोभूमिमंडले ॥ ४४९ ॥ ३ । ६ । ९ । १२ । १५ । १९ । २० । २७ ॥ २९ । ३५ वर्षेषु
पीडा विशेषतः । परमायुर्वर्षाणि ॥ ८८ ॥ अथअंपर्वाणयोगः ॥ १ ॥ अपर्वाणेनरोजातःपूर्वजन्मनिभूपतिः ॥ प्रचंडइतिविख्यातः
पत्नीतस्यवरांगना ॥ ४५० ॥ कामरूपोऽभवत्सोऽपिचोग्रदण्डःप्रतापवान् ॥ प्रपंचकरणेनिष्ठोलोलुपःकाममोहितः ॥ ४५१॥ नानापा
पार्जनंकृत्वाह्याजन्मद्विजसत्तम ॥ समरेषुमृतःसोपिसगत्वायमशासनम् ॥ ४५२ ॥ तिर्यग्योनिंसमुत्पन्नोवारंवारंधरातले ॥ मानुषश्चा
भवत्पश्चात्किंचित्पुण्यप्रभावतः ॥ ४५३॥३ । ५।८।११।१५।१८।२३।२८।३३वर्षेषुकष्टम्॥परमायुर्वर्षाणि६७॥अथइनाश्चर्य्ययोगः॥ आ
सीज्जन्मांतरेचैवगंधर्वःपुरुषोत्तमः ॥ इंद्रस्याऽग्रेप्रविष्टश्चवाद्यविद्यापरायणः ॥ ४५४ ॥ एकस्मिन्समयेविप्रस्वानंदेनसमावृतः ॥ काम
कौतूहलेमग्नःस्वस्त्रीरमणलालसः ॥ ४५५ ॥ नायातोहियदाचिन्तामघोनाचकृताभृशम् ॥ चिरंप्रतीक्ष्यचपुनःशापोदत्तःसुदुस्तरः४५६
भोभोधृष्टह्यहंकारिन्यदाज्ञापालितानमे॥राक्षसोथभवभ्रष्टोनान्यथावचनंमम॥४५७॥अतःशापवशात्सोऽपिबभूवराक्षसाऽधमः ॥ दिव्यवर्ष
सहस्राणिपर्वतारण्यसन्निधौ ॥ पश्चान्मानुष्यमापन्नःसर्वसौऽभाग्यसंयुतः ॥ ४५८ ॥ ३ । ८ । ११ । १७ । २१ । ३६ वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि १०० अथैलायोगः ॥ एलायोगेपियोजातःइलावर्तेऽवसत्पुरा ॥ बाहुजोयुद्धसंसक्तःसहसैन्येनराजते ॥ ४५९ ॥
एकस्मिन्समयेविप्रह्यरातिश्चसमागतः ॥ सहसैन्येनवैसोऽपिकृत्वायुद्धंपरस्परम् ॥ ४६०॥घातितःसोपिबहुभिःप्रहारैरतिदारुणैः॥ सत्तवा
सरपर्य्यंतंजित्वाशत्रुबलंबलात् ॥ ४६१ ॥ नृपेणह्यादरंकृत्वाबहुग्रामाइहार्पिताः॥तथापुण्यार्जनंकृत्वातीर्थेतीर्थेविशेषतः ॥४६२॥ जीर्णो
द्धारःकृतस्तेनब्राह्मणाश्चापितोषिताः॥ एवंनिवसतिस्माऽसौबहुवर्षगतागतैः॥४६३॥ मृत्वाहित्रिदिवंगत्वारमणंनंदनेऽकरोत् ॥ ततःपुण्य

क्षयेजातेपुनरागत्यभूतले ॥ हृष्टःपुष्टःसविज्ञश्चप्रतापीचजनेश्वरः ॥ ४६४ ॥ १ । ३ । ६ । ८ । ९ । ११ । १४ । १७।२४।२८।३३ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ ७९ ॥ अथेष्टयोगः ॥ इष्टयोगेतुयोजातःपूर्वजन्मनिदेववित् ॥ ज्योतिर्वेत्तासभामान्यश्चंचलश्चतुरः सुधीः ॥ ४६५ ॥ एकस्मिन्समयेविप्रःपरदेशेतदागतः ॥ देशेहिककुभेचैवस्थितोवर्षचतुष्टयम् ॥ ४६६ ॥ नृपस्याऽग्रेप्रविष्टश्चदेवताऽऽराधनेरतः ॥ एकस्मिन्समयेविप्रोविद्वांश्चात्रसमागतः ॥ ४६७ ॥ विद्याविलासेनतदापराजयमचीकरत ॥ तेनभूपेनविप्रायद्रव्यंदत्तंचपुष्कलम् ॥ ४६८ ॥ स्वदेशेचलितःसोपिमार्गेचौरेणलुंठितः ॥ द्रव्यशोकेनविकलःपर्यटन्गांचतुर्दिशम् ॥ ४६९॥ इतस्ततश्चविचरन्नुन्मत्तइवचाकुलः ॥ आयुषस्तुसमाप्तत्वान्ममारपथिभूसुरः ४७० ॥ पापात्पापफलंभुक्त्वापुण्यात्पुण्यफलंतथा ॥ सप्तवर्षसहस्रांतेचागतोभूमिमंडले ॥ ४७१॥ सर्वसामर्थ्यसंपन्नोविप्रभक्तिसमन्वितः॥कुष्ठेनचिह्नितस्तातमुखेपार्श्वेऽथचोदरे॥४७२॥ तीव्रःक्रोधीप्रवक्ताचतृणवन्मन्यतेजगत् ॥ १ । १७ । २६ । २८ । ३४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९० ॥ अथअदंडयोगः ॥ योगेऽदंडेनरःपूर्वंब्राह्मणोवेदवर्जितः ॥ शुष्कदेवइतिख्यातःसपत्नीकःसपुत्रकः॥४७३॥जीवत्यसौनान्यवृत्त्याप्रतिग्राहंसदाऽग्रहीत् ॥ एकस्मिन्समयेविप्रप्रयागमगमत्तदा ॥ ४७४ ॥ वसतिस्मनृपस्त्वेकःसुज्ञोधर्मपरायणः ॥ तेनदत्ताहिविप्रायसवत्सागौरलंकृता ॥ ४७५ ॥ ततोविप्रोपितांतातगृहीत्वाहर्षतश्वसः॥विक्रीतवान्हिलोभेनसुद्राणांतुशतेनच॥४७६॥स्वदेशेपुनरागत्यहर्षगद्गदमानसः॥ वेश्यायामनयद्द्रव्यमसन्मार्गेव्ययःकृतः ॥४७७॥एवंस्वल्पेगतेकालेविप्रःपंचत्वमागतः॥रौरवेनरकेनीत्वायमदूतैस्सुताडितः॥ बहुवर्षसहस्रांतेपुनरागत्यभूतले ४७८॥७।११।१४। १७।२०।२८।२९ एषुवर्षेषुकष्टम्॥परमायुर्वर्षाणि ७७॥ अथअंसकयोगः ॥ योगेंसकेनरः पूर्वंमौनवृत्तौसदारतः॥ माहिष्मत्यांनगर्यांवै

न्यवसत्पूर्वजन्मनि ॥४७९॥ कोलाहलइतिख्यातोविश्वनाथार्चनेरतः ॥ एकस्मिन्समयेविप्रकृतंकर्मसुदारुणम्॥४८०॥परस्त्रीगमनंकृत्वा
परद्रव्यंहृतंपुनः ॥ एवंस्वल्पेगतेकालेसविप्रःपंचतांगतः ॥ ४८१ ॥ सतेनकर्मणायुक्तःप्राप्तस्तुयमसादनम् ॥ कीटोभृंगोविहंगश्चबभूवच
पुनःपुनः ॥ समृतोगोमतीतीरेतेनाऽसौभुविब्राह्मणः ॥४८२॥ ३।५।८।१२।२२।२८। ३२ वर्षेषुकष्टम्॥परमायुर्वर्षाणि८५॥ अथ
असद्भावीयोगः ॥ आसीज्जन्मांतरेचैवमर्कटोनामपादजः ॥ मथुरानिकटेचैवन्यवसद्द्विजसत्तम ॥ ४८३ ॥ महिषीगोधनैश्चैवसंकुलंतस्यवे
श्मवै॥एकदाविपिनेरम्येगोवर्द्धनगिरेस्तटे॥४८४ भव्यांमुनिकुटींनूत्नांदृष्ट्वाचन्दनचर्चिताम्॥तेनदुष्टेनमुक्तासौगौरुत्खातवतीबलात्४८५
मुनिःक्रोधपरोभूत्वाशापंचेमंहिदत्तवान् ॥ भोभोदुष्टमनोधृष्टद्यावंशंपतितोभव॥४८६॥गच्छगच्छत्वितोदूरेपलायनपरायणः ॥ एवंस्वल्प
तिथेकालेगतोऽसौयमलोककम् ॥ ४८७ ॥ मानुष्यमागतः पश्चान्मर्त्यलोकेद्विजोत्तम ॥ पुत्रकन्याविहीनश्चसर्वदापीडितस्ततः ॥
॥ २।४।६।८।१२।२५ वर्षेषुकष्टम् ॥ भाद्रेमासिसितेपक्षेपंचम्यांमरणंध्रुवम् ॥ ४। ६।७।१२।१६।२२।२७। वर्षेषुकष्टम्॥
परमायुर्वर्षाणि ५८ ॥ अथअचंभाख्ययोगः ॥ कश्चिद्वैश्यकुलेपूर्वंकृष्णानद्याश्चसन्निधौ॥प्रसेनइतिविख्यातोव्यापारेचसदारतः ॥४८८॥
द्रव्यस्यसंग्रहंकृत्वारजतंस्वर्णमौक्तिकम् ॥ कार्पण्यान्मधुरालापीह्यदातापापभागसौ ॥४८९॥ तस्मिन्ग्रामेऽवसत्त्वेकोवैश्यःपरमधार्मिकः॥
तेनस्वेनैवन्यासःसार्थेस्थापितंपुष्कलंधनम् ॥ ४९० ॥ घटेताप्रमयेस्थाप्यबहुकालगताऽऽगतैः ॥ नदत्तंयाचितेतेनलोभोपहतचेतसा ॥
॥ ४९१ ॥ परस्परंकृतंयुद्धं पापमाचरितंत्विदम् ॥ समृतःपापराशींश्चभुक्त्वाभोगांश्चशाश्वतान्॥४९२॥ दशजन्मोत्तरेविप्रमानुषस्त्वभवत्पु
नः ॥ १।४।८।१३।१७।२२।२४।२८।३५।३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि९३ ॥ अथ अंशुपानयोगः ॥ अंशुपानेननरो

जातःसत्कर्मीपूर्वजन्मनि॥ देशेचोलेचन्यवसत्सर्वसौख्येनसंयुतः॥४९३॥बाहुजःपरमोदारोमधुराऽमृतभाषकः ॥ पर्वस्वपिचतेनैवब्राह्मणा भोजिताःशतम् ॥४९४॥ गोभूम्यश्वहिरण्यानिसत्पात्रेभ्योमुदाददौ ॥ जीर्णोद्धारःकृतस्तीर्थेदेवालयमथाऽकरोत् ॥४९५॥ समृतोगंडकीतीरेगांधर्वेनगरेगतः ॥ चन्द्रलोकेततोगत्वाबहुवर्षाणिसंस्थितः ॥ ४९६॥ पुनरागत्यमेदिन्यांपूर्वपुण्यप्रभावतः ॥ सुशीलश्चाऽतिभक्तश्चप्रतापीचजनेश्वरः ॥ ४९७ ॥ प्रथमेपंचमेवर्षेतथाषष्ठाऽष्टमेऽपिवा ॥ द्वादशेपंचदशकेपीडाचोक्ताविशेषतः ॥ ४९८ ॥ परमायुर्वर्षाणि ८१ ॥ अथअमोघरयोगः ॥ अमोघरेयदाजन्मह्यात्मज्ञानीविचक्षणः ॥ परोपकर्तासुज्ञश्चधनपुत्रसमन्वितः ॥ ४९९ ॥ देशेहिरण्यकेचैवनिवसन्पूर्वजन्मनि ॥ सर्वेश्वरइतिख्यातःसपत्नीकःसपुत्रकः ॥ ५००॥ सर्वकलाऽनुरक्तश्चसर्वदादेवचिंतकः ॥ एकस्मिन्समयेविप्रसाधूनांचप्रसंगतः ॥५०१॥ अन्नदानंतथाकृत्वाभिक्षुकेभ्योददौतदा ॥ प्राप्तेवार्द्धक्यसमयेसमृतोजाह्नवीतटे ॥५०२॥ पुनरागत्यमेदिन्यांपूर्वपुण्यप्रभावतः॥१।१०।१५। १८।२६। ३१। ३६। ३९। ४०। ४४ वर्षेषुकष्टम् ॥ परमायुषःशतसमाःकथिताःपूर्वसूरिभिः ॥ ५०३ ॥ अथअष्टसिद्धियोगः ॥ अष्टसिद्धौनरोजातः पूर्वजन्मनिसद्द्विजः ॥ शिवरामइतिख्यातःसपत्नीकः सपुत्रकः ॥५०४॥ दारिद्र्येणसदाऽऽक्रुष्टःपीड्यमानोमनोरथैः ॥ तस्यभार्य्यामहाशीलापातिव्रत्यपरायणा ॥ ५०५ ॥ तयाचोक्तंप्रभोस्वामिन्कष्टंसोढुन्नशक्यते ॥ श्रुत्वावचःस्वप्रियायाजगामगिरिगह्वरे ॥ ५०६ ॥ तत्रपातञ्जलिर्नामब्राह्मणस्तपसाऽऽवृतः॥आगतोदैवयोगेनपतित्वाऽसौननामतम् ॥५०७॥ स्वगाथाःकथितास्तेनश्रुत्वाविप्रस्तुवैतदा ॥ लक्ष्मीमंत्रंददौतस्यस्वगेहंपुनरागतः॥ ५०८॥ पुनर्गत्वाऽद्रिनिकटेतपश्चर्य्यामथाऽकरोत् ॥ आयुषस्तुसमाप्तित्वात्सविप्रःपंचतांगतः ॥ ५०९॥ पुनर्वैमानुषींयोनिंचाऽऽगतोधरणीतले ॥ सर्वसम्पद्युतोधीमान्स्वेच्छयाफलमाप्नुयात् ॥

॥ ५१० ॥ १।८।१२।१६।९। वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०५ ॥ अथअनाश्रीयोगः ॥ अनाश्रीयोगेनरः पूर्वंविष्णुकांचींवसन्पुरा ॥
जनेश्वरइतिख्यातोब्रह्मचर्य्यरतःसदा ॥५११॥ विकुंडलइतिख्यातोब्राह्मणोविधृतव्रतः॥वेदवेदांगपाठीचह्यग्निहोत्रपरायणः॥५१२॥कामा
तुरोयौवनेचवेश्यासंगमथाऽकरोत्॥समृतःकालवशतः पुनरागत्यभूतले ॥५१३॥ १।३।८।१७।२७ ॥ वर्षेषुकष्टम्॥परमायुर्वर्षाणि ८३ ॥
अथअर्बुकयोगः ॥ कश्चिद्वैश्यकुलेपूर्वंविंध्यपर्वतसन्निधौ ॥ विजयेतिसमाख्यातोव्यापारेषुसदारतः ॥५१४॥ द्रव्यस्यसंग्रहंकृत्वापुण्यमा
र्गेव्ययःकृतः ॥ तस्मिन्ग्रामेशुभामेकांपादजांचशुभाननाम् ॥५१५॥ दृष्ट्वापरस्परंचित्तेकामबाणेनमोहिते ॥ बलादाकृष्यतांविप्रकृतवान्र
तिसंगमम् ॥ ५१६ ॥ ज्येष्ठांत्यक्त्वासुशीलांच सुंदरींधर्मपालिनीम् ॥ गत्वाऽसौयमलोकेचनानानरकसंस्थितः ॥ पश्चान्मानुष्यमापन्नः किं
चिद्धनसमन्वितः ॥ ५१७ ॥ ३।५।८।११।१४।२०।२८।३२। ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥ अथअनामयीयोगः ॥ पूर्वंब्र
ह्मकुलेश्रेष्ठोयवनोपिबभूवह॥म्लेच्छासनेसमासीनोऽकरोन्म्लेच्छान्नभक्षणम्॥५१८॥अकर्मनिरतःसोपिदुष्टबुद्धिरसत्क्रियः॥ पापात्पापफ
लंभुक्त्वापुण्यात्पुण्यफलंतथा ॥५१९॥ पुनर्जन्मपुनर्मृत्युर्जन्ममृत्युःपुनःपुनः॥इदंतुदशमंजन्मकिंचिद्वित्तसमन्वितम् ॥५२०॥२।४।७॥
११।१९।२०।२६।२८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८४ ॥ अथईश्वरयोगः ॥ ईश्वरेयोगेयोजातःसतुपूर्वंधनाधिपः ॥ बहुयज्ञव्रतंकृ
त्वानानातीर्थाटनेरतः ॥ ५२१ ॥ एकस्मिन्समयेविप्रकृतंकर्मसुदारुणम् ॥ ब्राह्मणस्यहृताकन्यासुंदरीनवयौवना ॥ ५२२ ॥
तस्याःपतिर्मृतःशोकेपापमाऽऽचरितंत्विदम् ॥अस्यांजनोधनाढ्यश्चसर्वसौख्यसमन्वितः ॥५२३॥ पुत्रकन्याविहीनश्चचिंतयामासनित्य
शः ॥ ३।८।१२।१८।२२।२७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९१ ॥ अथ इज्यसेवायोगः ॥इज्ययोगेचयोजातः सराजापूर्वंजन्मनि ॥

सुज्ञश्चसर्वशास्त्रेषुबहुस्त्रीपरिवेष्टितः ॥ ५२४ ॥ एकस्मिन्समयेविप्रक्षिप्रानद्याश्चसन्निधौ॥स्त्रीसमूहोहतस्तेनाऽदःपापंदारुणंकृतम् ॥५२५॥
तेनपापानुसारेणपीड्यमानोमुहुर्मुहुः ॥ श्रमदोषैश्चविकलोवातव्याधिप्रकोपवान् ॥ १ । ४ । ८ । १२ । १९ । २५ । २७ । ३१ । ३८
३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०६ ॥ अथअसन्मार्गीयोगः आसीज्जन्मांतरेचैवब्राह्मणःशाक्तधार्मिकः ॥ देव्याश्चपूजने
निष्ठःपरमोदारमानसः ॥ ५२६ ॥ एकस्मिन्समयेविप्रकृतंकर्मतुदारुणम् ॥ ब्राह्मणस्यसुतःश्रेष्ठोगौरांगोभव्यलोचनः ॥५२७॥ देव्यैतस्य
बलिंदत्त्वाकृत्वातुविविधांश्छलान् ॥ तस्यतुमातापितरौपुत्रशोकेनवैमृतौ ॥ २२८॥ तेनपापानुसारेणयमलोकंह्यसौगतः ॥ नानानरके
षुसस्थित्वापुनर्वैमानुषोभवत्॥५२९॥दुर्दशःसर्वरोगार्तःपुत्रकन्याविवर्जितः । ३ । ४।८।१७।२२।२९। वर्षेषुकष्टम्॥परमायुर्वर्षाणि ६७॥
॥ १०८ । इतिअवर्गोदयः॥इति श्रीयोगसागरेसभार्चितदेशेशुक्रभृगुसंवादेअवर्गाद्यष्टोत्तरशतयोगकथनंनामतृतीयंप्रकरणंसमाप्तम् ॥३॥
अथकवर्गयोगः॥बभूवबाहुजःकश्चित्कवर्गेचविराटके।दत्तानितेनदानानिगोभूम्यश्वादिकानिच॥१॥ ब्राह्मणेषुगृहस्थेषुसत्पात्रेषुविशेषतः ॥
अथान्यग्रामवास्तव्यक्षत्रियस्यमहात्मनः ॥ २ ॥ एकपुत्रस्यपुत्रोवैभुजमूलेपुरानघ ॥ घातितस्तेनखड्गेननिशायांचौरकर्मणि॥३॥समृत
स्तेनदुःखेनभाविनोर्थस्यगौरवात् ॥ तन्मातापुत्रदुःखेनमृतादुःखप्रपीडिता ॥ ४ ॥ वैरभावरतेनैवकृतंकर्मातिदारुणम्॥ एवंबहुतिथेकाले
गतेसौयमसादनम् ॥ ५ ॥ गत्वाभुक्त्वाचनरकंपुण्यात्स्वर्गफलंतथा॥पूर्वपुण्यप्रभावेणसजातोब्राह्मणोऽधुना ॥६॥ शतद्रुनिकटेदेशेमेषकेशे
तिविश्रुतः ॥ पितृमातृसुखैर्हीनोभृत्यस्त्रीबंधुसंयुतः॥७॥ पूर्वंबालवधात्पापादिहजन्मनिभार्गव॥द्विवेदमितवर्षांतेजातःपुत्रविनाशकः ॥८॥
[illegible]मान्बाहुजवधाद्वामबाहुविवर्जितः ॥ लक्षणैर्लक्षयेदंगेपृच्छकश्चात्रजन्मनि॥९॥निष्कृतिंतस्यवक्ष्यामिपूर्वपापविशोधिनीम् ॥ पुत्रवृद्धि

करोत्यन्याः सर्वारिष्टनिषूदिनीम् ॥ १० ॥ पलपंचमितंकुर्य्यात्सुवर्णस्यतुबाहुजम् ॥ पूर्वोक्तेनविधानेनसंकल्प्यब्राह्मणार्पणम् ॥ ११ ॥
ततः श्रेयोभवेत्तस्यपुत्रोजीवतिनिश्चितम् ॥ धनार्थीलभतेद्रव्यंछिन्नायुर्म्रियतेनच ॥ १२ ॥ एकाशीतिमितायुःस्याच्चैत्रादौघटभेमृतिः ॥
अथकर्तृयोगः ॥ कीटदेशेसमुत्पन्नःकश्चित्क्षात्रकुलेसुधीः ॥ १३ ॥ विप्रसंगगतस्तत्रप्रयागेमकरेवसन् ॥ कृतवान्विधिवत्स्नानं
दानंस्वल्पविधानतः ॥ १४ ॥ दैवयोगाद्गृहंप्राप्यकृतवान्कर्मदारुणम् ॥ कामलोभेनसततंशूद्रागमनकार्य्यसौ ॥ १५ ॥ स्त्रीहाव
भावयुक्तेनपापमाऽऽचरितंतथा ॥ विविधैरौषधैस्तस्यागर्भपातःकृतःपुरा ॥ १६ ॥ एवंसर्वंमिलित्वातुपातकंबहुधाकृतम् ॥ ततो
बहुतिथेकालेप्राप्तस्तुयमसादनम् ॥ १७ ॥ भुक्त्वापापफलंपापात्पुण्यात्पुण्यफलंतथा ॥ तीर्थराजप्रभावेणसजातोब्राह्मणोऽधुना ॥
॥ १८ ॥ परदाराऽभिगमनात्पूर्वपापस्यसंचयात् ॥ भूत्वापिम्रियतेबालःसर्वकालेप्रपीडितः ॥ १९ ॥ द्वि २ षष्टि ६० मितवर्षाणि
कथितंप्राणधारणम् ॥ २ ॥ अथकर्तारयोगः ॥ भृगुरुवाच ॥ आसीद्राजकुलोत्पन्नःपूर्वजन्मनियामुने ॥ २० ॥ धनधान्यसमायुक्तो
रुद्रभक्तिपरायणः ॥ दत्तानितत्रदानानिपर्वस्वपिचशक्तितः ॥ २१ ॥ अथभाविबलात्पुत्रब्राह्मणेनतपस्विना ॥ तद्गृहेस्थापितंद्रव्यं
पुनर्दत्तंनतेनच ॥ २२ ॥ साहसेनचतेनाऽथब्रह्मस्वंभक्षितंपुरा ॥ सचकालवशंप्राप्यभुक्त्वापापफलंतथा ॥ २३ ॥ पापेपुण्येसमेजा
तेमानुषत्वमिहाऽऽगतः ॥ ब्रह्मस्वहरणात्पापात्पुत्रकन्याविवर्जितः ॥ २४ ॥ प्रायस्तुतन्मृतेविप्रदेशवृद्धिर्भविष्यति ॥ चतुःषष्टिमिताब्दां
तंकथितंप्राणधारणम् ॥ २५ ॥ ३ ॥ अथकरंकयोगः॥आसीत्पूर्वंविदर्भेषुमुख्यजोवेदपाठकः ॥ कालिंजरस्यनिकटेनिवसन्परिवारयुक् ॥
॥ २६ ॥ कंदर्पइतिविख्यातःपत्नीतस्यपतिव्रता॥पठनेपाठनेमग्नोनृपद्वारेप्रतिष्ठितः॥२७॥नानाद्रव्याण्युपार्जित्वापापमार्गेव्ययःकृतः ॥

॥ २८ ॥ एकस्मिन्समयेविप्रकृतंकर्मसुदारुणम् ॥ ब्राह्मणस्यहृतावृत्तिःपापमाऽऽचरितंत्विदम् ॥२९॥ आयुषस्तुसमाप्तित्वात्सविप्रःपंच
तांगतः ॥ पापात्पापफलंभुक्त्वायोनिंभुक्त्वाकथंचन ॥ ३० ॥ पुनरागत्यमेदिन्यांपूर्वपुण्यप्रभावतः ॥ बाल्येदुःखेनपीडास्याद्यौवनेहृष्टमा
नसः ॥ ३१ ॥ चतुःषष्टिमिताब्दांतंकथितंप्राणधारणम् ॥ ४ ॥ अथकर्णधारयोगः ॥ पूर्वजन्मनिकावेर्यांन्यवसत्परिवारयुक् ॥ ३२ ॥
वासुदेवःसमाख्यातोबाहुजोबलविक्रमी ॥ परिचर्य्याकृतातेनशिवस्यबहुकालतः ॥ ३३ ॥ नृपानुकम्पयातत्रग्रामःप्राप्तस्तथाधनम् ॥ एक
दाचंद्रमोग्रस्तेकुरुक्षेत्रेतदाऽनघ ॥ ३४ ॥ ब्राह्मणोऽतिदरिद्रश्चतत्रप्राप्तःसुव्याकुलः ॥ अनादरःकृतस्तस्यकटुवाक्यंचश्रावितम् ॥ ३५ ॥
विमुखोऽसौगतोविप्रःपापमाचरितंत्त्विदम् ॥ पापाच्चनरकेगत्वापुण्यात्पुण्यफलंभृशम् ॥ ३६ ॥ ततःपुण्यक्षयेजातेपुनरागत्यभूतले ॥
ईषद्गौरोप्युदारश्चव्रणांकितकलेवरः॥३७॥१।४।८।१७।२८। ३३ वर्षेषुकष्टम् ॥ परमायुःशताब्दांतंकथितंदेहधारणम् ॥ १०० ॥ ३८ ॥
॥ ५ ॥ अथकर्पटीयोगः ॥ कश्चिद्वैश्यकुलेपूर्वंकांचीनगरेऽप्यथ॥संतदासइतिख्यातोधनधान्येनसंयुतः॥३९॥अतुलःपरमोदारोदानधर्म
परायणः ॥ एकस्मिन्समयेविप्रभ्रात्रासहकृतश्छलः॥४०॥नदत्तस्तस्यवैभागःकृत्वायुद्धंपरस्परम्॥ तेनपापानुसारेणप्राप्तोऽसौयमसादनम्
॥ ४१ ॥ गुप्तपापरतोधूर्तआत्मकार्य्यस्यसाधकः ॥ प्रथमेषष्ठाष्टमेवर्षेपीड्यमानकलेवरः॥४२॥ आविंशतिवर्षांतेहिचाल्पमृत्युर्भविष्यति॥
द्विषष्टितमवर्षेहिमृत्युस्तस्यतथाध्रुवः॥४३॥६॥अथकरुणागारः ॥ कश्चिद्वैश्यकुलेपूर्वंनदीचर्मण्वतीतटे॥किशोरइतिविख्यातःसर्वसम्पद्युतो
धनी ॥ ४४ ॥ पुत्रकन्याविहीनश्चक्रंदितःसर्वदावसः ॥ एकदाहिकृतंकर्मदुष्टंतेनचदारुणम् ॥ अज्ञेननिहतस्तेनमार्जारस्यसुतश्चवै ॥
तेनपापानुसारेणकन्यापुत्रविवर्जितः ॥ ४६ ॥ पुत्रार्थीचिंतितंतेनसवैश्यःपंचतांगतः ॥ पापात्पापफलंभुक्त्वापुण्यात्पुण्यफलंतथा ॥ इदं

जन्मद्वितीयंतुविद्धितंकरपृष्ठके॥४७॥१। ३ । ६ । ९ । १५ । २१ । २६ । वर्षेषुकष्टम्॥परमायुर्वर्षाणि॥८१।७अथकस्तूरीयोगः॥कस्तू
रीकेजातयोगेपूर्वजन्मनिब्राह्मणः ॥नैपालेनगरेचैवनिवसन्पूर्वजन्मनि॥४८॥धनीदेवइतिख्यातोमहोद्यमउपार्जकः ॥ साधुसेवारतस्तत्रपर्व
स्वपिचशक्तितः ॥४९ ॥ सत्पात्रेचद्विजेदत्त्वास्वर्णधातुकदम्बकम्॥तीर्थेतीर्थेकृतासेवाब्राह्मणानांविशेषतः ॥५०॥ पुनरागत्यमेदिन्यांचंद्र
लोकाद्द्विजोत्तमः ॥ गौरोऽरुणोदीर्घदेहोविद्याविनयसंयुतः॥ ५१॥१।४।८।१२।१७।२७। वर्षेषुकष्टम्॥परमायुर्वर्षाणि७१।८॥ अथकेशपा
शयोगः॥केशपाशेनरोजातःपूर्वजन्मनिमहाधमः॥कौटिल्योभीषणाऽऽकारोजीवहिंसापरायणः॥५२॥लोलुपःपरदारेषुचौरकर्मरतःसदा ॥
आजन्मसर्वकालेहिकृत्वापापंनिरंतरम्॥५३॥एकस्मिन्समयेविप्रब्राह्मणस्यप्रसंगतः॥ प्रयागमगमत्सोपितत्रस्थित्वाद्विवार्षिकम् ॥ ५४ ॥
वेण्यामस्यपादजस्यमृत्युःप्राप्तश्चकालतः ॥ गतोऽतइंद्रलोकेऽसौस्थित्वावर्षसहस्रकम् ॥ ततःपुण्यक्षयेजातेचागतोभूमिमंडले ॥५५॥३।६।
१७।२२।२९।४६॥वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि॥७५।९॥अथकेवलीयोगः॥केवलीयोगेयोजातःपूर्वजन्मनिब्राह्मणी॥ कर्कशाकटुजल्पाच
प्रत्यहंद्वंद्वकारिणी ॥ ५६ ॥ पतिंमत्वातुतृणवच्छ्वशुरद्रोहकारिणी ॥ महाभिमाननिरताद्वितीयाराक्षसीवच ॥५७॥ पतिंत्यक्त्वागताविप्र
बद्रिकारण्यसन्निधौ॥तत्रभाविबलात्पुत्रहिमदोषान्मृतातदा५८॥शिवलोकेगतासातुतत्रस्थित्वाविशेषतः॥ जन्मन्यस्मिंस्तृतीयेचसैवजातः
पुमांस्त्वसौ ॥५९॥३।९।१३।१७।२३।वर्षेषुकष्टम्॥परमायुर्वर्षाणि ६८॥१०॥अथकलिकायोगः॥ कलिकायोगेयोजातःपूर्वजन्मनिबाहु
जः ॥हिडम्बदेशेवसत्सोपिकिंचिद्भूमिपतिस्तदा ॥६०॥ युद्धाकांक्षीमहोत्साहीकुटुम्बस्यतुपालकः॥ एकदासमरेविप्रजित्वाशत्रुबलंबलात्
॥६१॥स्वगेहेपुनरागत्यहर्षगद्गदमानसः ॥ यौवनस्यमदेनाऽथकृतंकर्मजुगुप्सितम् ॥६२॥ नृपघातःकृतस्तेननिशायांचौरकर्मणि॥ संमृतः

शिवालिंगस्थोभैरवलोकंसमागतः ॥ पुनरागत्यमेदिन्यांकिंचित्पुण्यप्रभावतः ॥ ६३ ॥ १ । ४ ॥ ७ । १२ । १७।२१।२८वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि १०० ॥११॥ अथकामयोगः ॥ कामयोगेनरोजातःपूर्वजन्मनिब्राह्मणः ॥ विद्याभ्यासंनकृतवान्देवंकंचनमन्यते६४ ॥
नानापापेषुनिरतोवनेदावाग्निकारकः ॥ चौरवृत्तिश्चचपलोऽसत्कर्मणिसदारतः ॥ ६५ ॥ एकदाविपिनेरम्येमार्गावरोधनेरतः ॥ तत्रभा
विबलात्पुत्रब्राह्मणःपंडितःसुधीः ॥ ६६ ॥ तन्मार्गेहिसमायातोदृष्ट्वातंचातिहर्षितः ॥ परस्परंहूचतुर्द्वौवाक्यानांरचनांचतौ ॥ ६७ ॥
दुष्टस्यहृदयेलग्नंरामनामनिरामयम् ॥ चौरकर्मपरित्यक्त्वातीर्थयात्रांव्रजत्यसौ ॥ ६८ ॥ आयुषस्तुसमाप्तित्वात्समृतःकुरुजांगले ॥
भुक्त्वापापफलंपापात्पुण्यात्पुण्यफलंतथा ॥ ६९ ॥ मर्त्यलोकेसमागत्यलोहितांगः शुभाननः ॥ प्रथमेद्वितीयेवर्षेचदशमेकादशेपिवा ॥
कष्टेनाऽतिप्रपीडचश्चतथाद्वाविंशतातथा ॥ ७० ॥ १२ ॥ अथकर्णसूत्रयोगः ॥ कर्णसूत्रेनरोजातोबुद्धिमांश्चतुरोघृणी ॥ धनधान्ययुतः
सम्यक्पुत्रस्त्रीपरिवारयुक् ॥७१॥कश्चित्तुबाहुजःपूर्वंचाङ्गदेशेवसत्यसौ॥प्रसेनइतिविख्यातःशिवस्याऽऽराधनेरतः ॥७२ ॥ एकस्मिन्समये
विप्रःशिवप्रसादमिच्छता ॥ आरूपब्राह्मणाःसर्वेद्याद्दताबहुशोमुदा ॥७३॥ भोजनाच्छादनेदत्त्वादक्षिणांचततोद्विज ॥एवंनिवसतस्तस्यबहुव
र्षगताऽऽगतैः ॥ ७४ ॥ आयुषस्तुसमाप्तित्वात्समृतःसरयूतटे ॥ पुनराऽऽगत्यमेदिन्यांपूर्वपुण्यप्रभावतः ॥ गौरोऽरुणःसुभव्यश्चदक्षिणांगे
प्रचिह्नितः॥७५॥३ । ८ । १३ । १९ । २२ । २७ वर्षेषुकष्टम्॥परमायुर्वर्षाणि८९॥१३॥अथकपालिकयोगः॥ काश्मीरेनगरेपूर्वंब्राह्मणः
शाखवर्जितः ॥ मद्यविचारतोनित्यंशौचकर्मविवर्जितः ॥ ७६ ॥ अभक्ष्यंभक्षितंतेनाऽपेयंपीतंद्विजोत्तम॥अगम्यागमनंकृत्वाब हुवर्षगता
गतैः॥७७॥आयुषस्तुसमाप्तित्वात्कीटयोनिं[illegible]गतः ॥ पश्चान्मानुष्यमापन्नःकिंचित्पुण्यप्रभावतः॥७८॥ गौराङ्गश्चंचलश्चैवसव्ययीच

यथाक्रमं ॥ १ ।१०।१७।२२।२९ । ३९ वर्षेषुकष्टम्॥परमायुर्वर्षाणि६६ ॥ १४ ॥ अथकौमोदकीयोगः ॥ आसीज्जन्मांतरेचैवनापितः
शुभकर्मणि ॥ शुद्धबुद्धिःसभामान्योनृपसेवारतःसदा ॥ ७९ ॥ केशवेतिसमाख्यातोद्रव्यस्योत्पादनेरतः ॥ नानामनोरथैस्तेनशिवस्य
स्थापनंकृतम् ॥ ८० ॥ आरामान्विविधान्कृत्वापथिकूपाश्चनिर्मिताः ॥ एवंकालेगतेविप्रपुण्यानांसंग्रहःकृतः ॥ ८१ ॥ पत्नीतस्यसती
जातास्वर्गलोकमुभौगतौ॥बभूवबाहुजःसोपिमध्यदेशेतदाऽनघ॥८२॥किंचिद्भूमिपतिस्तत्रचोग्रदंडःप्रतापवान् ॥धर्ममार्गेचकुशलःपरोप
करणेरतः॥८३॥कृतंपापार्जनंतेन दुष्टसंगात्तदाऽनघ॥तेनपापानुसारेणनाशोजातश्चसंततेः ॥८४॥ इदंजन्मतृतीयंवैचेषद्गौरोगुणान्वितः ॥
॥ ८५ ॥ ३ । ६ । ११ । १७ । २५ । २८ । ३३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ ६३ ॥ १५ अथकीटसंज्ञयोगः ॥ कीटसंज्ञेच
योजातः पूर्वजन्मनिभूमिपः ॥ उज्जयिन्यांनगर्य्यांवैनिवसन्पूर्वजन्मनि ॥ ८६ ॥ उग्रदंडःप्रतापीचसदसज्ज्ञोविवेकवान् ॥ बहुस्त्रीभि
रन्वितश्चपुत्रकन्याविवर्जितः ॥ ८७ ॥ एकस्मिन्समयेविप्रभगवदाराधनंकृतम् ॥ आहूयब्राह्मणाः सर्वेपूजिताश्चविशेषतः ॥८८॥ तोषि
ताब्राह्मणाःसर्वे दानंदत्त्वाचहर्षितः ॥ बभूवपुत्रोभव्यश्चसर्वलक्षणसंयुतः ॥८९॥ राज्यंदत्त्वास्वपुत्रायजगाममगिरिकाननम् ॥ तपश्चर्य्यां
तथाकृत्वाविपिनेगह्वरेशुभे ॥ मृतोऽसौकालेसंप्राप्तेपुनर्यातोहिभूतले ॥९०॥ १ । ९ । १७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ।७७ । १६
अथकेशरीयोगः ॥ आसीज्जन्मनिवानारीब्रह्मपुत्रस्यसन्निधौ ॥ रूपदेवीतिविख्यातासुंदरीचोर्वशीयथा ॥ ९१ ॥ लावण्यामधुरालापा
चारुकिंजल्कशोभना ॥ पतिप्रीतिरताचोग्रव्रततिथ्यनुपालिका ॥ ९२ ॥ एकस्मिन्समयेविप्रभाविनोर्थस्यगौरवात् ॥ एकस्तुपुरुषोभव्यो
यथाकामःस्वरूपधृक् ॥९३॥ लग्नंपरस्परंचित्तंकामबाणैर्विमोहितम् ॥ पतित्यागाद्धिपापात्सागताहिनरकेभृशम् ॥ ९४ ॥ नानाजन्म

वतीजातामर्त्यंलोकेपुनःपुनः ॥ पश्चान्मानुष्यमापन्नासुंदरीक्रोधतत्परा ॥ ९५ ॥ ३ । ८ । १३ । १७ । २९वर्षेषुकष्टम्॥परमायुर्वर्षाणि
७३ ॥ १७ ॥ अथकोलयोगः ॥ कोलयोगेनरःपूर्वमांध्रदेशेतदावसत् ॥ चित्रसेनइतिख्यातोबाहुजःपुण्यवानपि ॥ ९६ ॥ पत्नीपुत्र
समायुक्तआखेटकरतःसदा ॥ मृगयायांगतोदैवाच्चंपकारण्यसन्निधौ ॥९७॥ वनेहिगह्वरेगत्वाहत्वाबहुविधान्मृगान् ॥ एकातुहरिणीविप्र
सगर्भापिप्रताडिता ॥९८॥ तेनपापानुसारेणजातःपुत्रोविनश्यति ॥ गर्भस्यपातनाज्जातंपीडयमानंकलेवरम् ॥ पुत्रार्थेचिंतितंसम्यक्सर्वं
कालंद्विजोत्तम ॥ ९९ ॥ १ । ३ । ८ । १२ । २३ । २९ । ३१ । ३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥१८॥ अथकामिनीयोगः॥
आसीज्जन्मांतरेचैववंगदेशेतदावसन्॥शूद्रोनामप्रभुःसोऽयंद्रव्यवान्धर्मवानपि ॥१००॥ तीर्थेतीर्थेव्रतंकृत्वातथादेवाश्चतर्पिताः॥गंगासागर
केगत्वातत्रमृत्युर्बभूवह ॥१०१॥ स्वर्गापवर्गभोगश्चबभूवबहुवार्षिकः ॥ ततःपुण्यक्षयेजातेमानुष्यंचगतोऽधुना ॥१०२॥ गौरसरुणोऽतिह्र
स्वश्चतिलंमाषश्चलांछनम्॥सुशीलश्चातिभक्तश्चधनधान्यसमन्वितः॥१०३॥३।५।१२।१७।२०।२४ वर्षेषुकष्टम्॥परमायुर्वर्षाणि६५॥१९
अथकमलायोगः॥कमलायांनरोजातःपूर्वजन्मनिभूमिपः ॥ सिंहकेतुरितिख्यातः पत्नीगुणवतीशुभा ॥१०४॥ यज्ञधर्मरतःसोसावग्निहोत्र
स्यसाधकः॥पर्वस्वपिचतेनैवब्राह्मणाःसत्कृताःशतम्॥१०५॥एकस्मिन्समयेविप्रकृतंकर्माऽतिदारुणम् ॥ ब्राह्मणस्यकृतानिंदासाध्वीचस्त्री
कलंकिता ॥१०६॥ तेनपापानुसारेणश्रियस्तस्यक्षयंगताः ॥ यदारातिःसमाऽऽयातस्तदाराजापलायितः ॥ १०७ ॥ अटन्वनेवनेसोऽपि
दुर्बलश्चबभूवह ॥ समृतोदंडकारण्येदेवलोकेतथागतः ॥ १०८॥ बहुवर्षसहस्रांतेपुनरागत्यभूतले ॥ अतसीपुष्पवद्देहःसर्वांगेषुसचिह्नितः॥
॥१०९॥३।९।१३।१५।२०।२५।२८।३३।३६।४०। वर्षेषुकष्टम ॥ परमायुषश्च ... ंचपरिकीर्तिताः॥१००॥२०॥अथकमलिनीयो

गः ॥अभूद्वैश्यकुलोत्पन्नोधनधान्यसमन्वितः॥सरस्वत्याश्चनिकटेविष्णुधर्मरतःक्वचित्॥ ११०॥ दत्तानितेनदानानिपर्वस्वापचशक्तितः ॥
सर्वेष्वपिचतेनैवश्रद्धाहीनेनचेतसा ॥ १११ ॥ दैवाद्विजस्यवैकस्यचित्प्राप्तांगर्भसंयुताम्॥ वैरभावात्प्राक्तनाच्चहत्वाऽऽनृण्यमवापसः ११२
तद्गर्भगामृताकन्यापापमाऽऽचरितंत्विदम् ॥ धर्माऽधर्मफलंभुक्तंगत्वातत्रयमालयम् ॥ ११३ ॥ पूर्वपुण्यवशाद्विप्रसजातःपादजोऽधुना ॥
सरक्तकृष्णच्छिन्नांगोविष्णुभक्तिसमन्वितः ॥ ११४ ॥ चिंताऽधिकःस्वल्पधनीस्त्रीभ्रातृसुखसंयुतः ॥ पुण्यादिदंतथापापाज्जातःपुत्रविव
र्जितः ॥ ११५ ॥ ॥ ३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९७ ॥ २१ ॥ अथकांतियोगः ॥ कश्चिद्विप्रोऽभवत्पूर्ववंगदेशेचग्रामपः ॥ धर्म
शास्त्रक्रियाहीनःपितृमातृसुखाऽन्वितः ॥ ११६ ॥ दत्तानितेनदानानिब्राह्मणेषुचशक्तितः ॥ सत्पात्रेषुसहस्रेषुश्रद्धायुक्तेनचेतसा ॥
॥ ११७ ॥ मृगयायांगतोविप्रकदाचिद्दैवयोगतः ॥ घोरंकर्मकृतंतेनह्यारंभेयौवनस्यच ॥ ११८ ॥ लुंठितोब्राह्मणस्तत्रप्रहारैर्दुःखि
तोभृशम् ॥ हतोप्यातुर्बलेनैवसमृत्योश्चवशंगतः ॥ ११९ ॥ ब्रह्मस्वंतदितिज्ञात्वानभुक्तंकेनचिद्गृहे ॥ तेनैवभक्षितंविप्रयेनविप्रः
प्रपीडितः ॥ १२० ॥ सगत्वायमलोकेतुभुक्तातुयमशासनम् ॥ सगौरोदर्शनीयश्चमृतवत्सोभविष्यति ॥ १२१ ॥१।४।९।१४ ।२९।२९
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ ७१ ॥ २२ ॥ अथकायेरायोगः ॥ कायेरायोगेयोजातःकश्चिद्द्विजकुलेतदा॥ दामोदरइतिख्यातःपत्नीत
स्यप्रभावती ॥ १२२ ॥ कामरूपोऽवसत्सोपिसर्वसम्पद्युतोधनी ॥ धर्माधर्मविवेकीचनृपद्वारेप्रतिष्ठितः ॥ १२३ ॥ एकस्मिन्समयेवि
प्रद्रव्यलोभेनब्राह्मणः ॥ अयोग्यंकृतवान्सोपिब्राह्मणस्यहृतंधनम् ॥ १२४ ॥ एवंगतेस्वल्पकालेतस्यमृत्युरभूत्पुरा ॥ नानानरकेषुसस्थि
त्वाजन्ममृत्युशतैरपि ॥ १२५॥१।१३।२१।२७। ३५। ३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ ९३ ॥ २३ ॥ अथकम्बलयोगः ॥ कम्ब

लेचनरः पूर्ववैजनाथस्थलेऽवसत् ॥ अच्युताऽऽनंदनामाख्यः परसंतापदायकः ॥ १२६ ॥ क्रोधातुरः सदाभ्रष्टः परद्रव्याऽपहारकः ॥ प्रपंच
निरतः सोपिपर्य्यटंश्चचतुर्दिशः ॥ १२७ ॥ विपाशानिकटेमृत्युर्बभूवद्विजसत्तम ॥ पापाच्चनरकान्भुक्त्वापुण्यैर्भोगांश्चशाश्वतान् ॥ १२८॥
नानाजन्मान्यभूवन्वैततोजन्मधरातले॥ महाभिमाननिरतः स्वल्पवित्तसमन्वितः॥ १२९॥ पूर्वपापाऽनुसारेणपुत्रस्त्रीसुखवर्जितः॥ गोविश्वन
खवर्षेषुकष्टेनातिप्रपीडितः॥ १३०॥ ९। १३। २०। परमायुर्वर्षाणि॥ ६४। २४ अथकेयूरयोगः॥ योगेकेयूरकेजातः पूर्वजन्मनिभिक्षुकः॥ पंपाख्ये
नगरेचैवन्यवसत्पूर्वजन्मनि ॥ १३१॥ क्षुत्तृड्भ्यांचातिविकलोभ्रमन्देशेप्रदेशके॥ एकदाकोकिलाऽरण्येदैवयोगात्समागतः॥ १३२॥ तत्रविप्रा
ऽऽश्रमंभव्यंदृष्ट्वातत्रतुचेष्टितम् ॥ ब्राह्मणेनविलोक्याथजलंदत्त्वासुशीतलम्॥ १३३॥ गव्याऽन्नंभोजयामासमासमेकंतदाऽऽस्थितः॥ ज्ञानोपदे
शोमंत्रश्चदत्तस्तेनदयालुना ॥ १३४॥ किंचित्कालेगतेतातभिक्षुकः सतदामृतः ॥ ततश्चमानुषींयोनिंचाऽऽगतोधरणीतले ॥ १३५ ॥ धन
धान्यसमृद्धस्तुसर्वसौख्यसमन्वितः। ४। १२। १८। २४। वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ ७० ॥ १३६। २५ अथकारनाटीयोगः ॥
आसीत्पूर्वंहिवैश्योसौमगधेचाऽवसत्पुरा ॥ धनमैश्वर्य्यमतुलंकृपणोऽतिदुरासदः ॥ १३७ ॥ एकस्मिन्समयेविप्रकृतंकर्मसुदारुणम् ॥
निवारिताऽतितृषितागौर्मृतादुःखपीडिता ॥ १३८ ॥ गोपितंचस्मरंतेनकष्टमाचरितंत्विदम् ॥ पापाच्चनरकंगत्वादिव्यवर्षशतैरपि ॥
॥ १३९ ॥ आगतश्चपुनर्भूम्यांकिंचित्पुण्यप्रभावतः॥ धनमैश्वर्य्यमतुलंपुत्रदारविवर्जितः ॥ १४०॥ १। ३। ६। ७। ९। १४। २९।
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ १०७ इति ॥ २६ ॥ अथकपर्दियोगः ॥ आसीत्पूर्वभवेकश्चि... ऽोवेषधारकः॥ ताम्रपर्ण्याश्चनिकटेन्य
वसत्पूर्वजन्मनि ॥ १४१ ॥ इन्द्रजालीचभूत्वापिचेटकेनाटकेरतः ॥ परभार्य्याविघातार्थंसंधानंचकृतंतदा ॥ १४२ ॥ परद्रव्यापहरणंकृतं

तेनतदाऽनघ ॥ एवंनिवसतस्तत्रबहुवर्षगतागतैः ॥ १४३ ॥ आयुषस्तुसमाप्तित्वान्मृतोहिपापंभागसौ ॥ प्रक्षितोनरकेदूतैर्बहुकालंयमा
ऽऽज्ञया ॥ १४४ ॥ षष्टिवर्षसहस्रांतेभूतलंपुनरप्यगात् ॥ ३ । ५ । ९ । १५ । २७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ १२० ॥ २७ अथकं
चुकीयोगः॥वैश्यःपूर्वभवेविप्रव्यापारकुशलःसदा ॥ दानयज्ञरतोनित्यंब्राह्मणाऽतिथिपूजकः ॥ १४५ ॥ तद्गृहेधान्यराशिंतुब्रह्मभक्षयत्क्षुधा
र्दिता ॥ आसन्नप्रसवाविप्रसुरभिःकालमोहिता ॥ १४६ ॥ भृशंतेनहताकुक्षौलोभोपहतचेतसा॥बालोवत्सोमृतस्तत्रगर्भस्थश्चातिताडनात्
॥१४७॥ तद्दुःखेनमृतासातुबहुचाक्रंदितंपुरा॥एवंनिवसतातत्रमृतःसयमशासनम्॥१४८॥प्राप्यस्वर्गतथाभोगान्भुक्त्वापापफलंतथा॥ पुन
रागत्यमेदिन्यांकिंचित्पुण्यप्रभावतः ॥१४९॥ कुलाग्रणीःकार्य्यकरोगुणीपित्तकफान्वितः ॥ मध्यरूपयुतःश्रीमान्द्विभार्य्योज्ञातिसंयुतः
॥१५०॥गोबालवत्सकवधःकृतोऽनेनचपुत्रक ॥ प्रायश्चित्तेकृतेतत्रकनिष्ठायाःसुतोभवत् ॥१५१॥ एकहीनेथपंचाशन्मृत्युरब्देज्वरेणवै ॥
प्रायश्चित्तेकृतेह्यायुःषष्टिकाब्दसमन्वितम्॥कन्यागतेरवौचंद्रेमीनस्थेमरणंध्रुवम्॥१५२॥२८॥अथकीरयोगः॥ आसीत्पूर्वभवेविप्रोगिरिवा
सीजितेंद्रियः॥विद्याभ्यासरतोनित्यंसत्यधर्मपरायणः॥१५३॥दत्तानितत्रदानानिब्राह्मणेभ्यःस्वशक्तितः ॥ पर्वस्वपिचतेनैवाऽध्यापिताब्रा
ह्मणाद्विज॥१५४॥अथभाविबलात्पुत्रब्राह्मणेनतपस्विना॥स्थापितंतद्गृहेस्वर्णंलोभेननहिदत्तवान् ॥१५५॥ ततोबहुगतेकालेकालधर्ममुपे
यिवान् ॥ स्वर्णाऽपहारीसततंगतोऽसौयमसादनम् ॥ १५६ ॥ पापात्पापफलंभुक्त्वापुण्यात्पुण्यफलंतथा ॥ पूर्वपुण्यप्रभावेणजातोऽयंब्राह्म
णोधुना ॥ १५७ ॥ धर्मकर्मक्रियायुक्तोलोभदुःखसमन्वितः ॥ यौवनेस्त्रीसुखंत्वत्रद्विपंचाशन्मितेब्दके ॥१५८॥ भृशंपुत्रसुखंप्राप्तंपूर्वब्राह्म
णपूजनात् ॥ सुवर्णहरणादोषात्पूर्वजन्मनिमानद ॥ १५९ ॥ कुनखीह्यत्रविज्ञेयःशरीरेलक्षणैरिह ॥ सप्तसप्ततिवर्षाणिसपुत्रोजीवतिध्रु

वम् ॥ १६० ॥ कार्त्तिकेकृष्णपंचम्यांशशिनिह्यागतेद्विज ॥ वृषलग्नेचनिधनंभविष्यतिनसंशयः ॥ १६१ ॥ इति ॥ २९ अथकामियोगः॥
पूर्वजन्मन्यभूत्कश्चिद्वैश्योधर्मपरायणः ॥ मथुरायांमहाभागन्यवसत्पूर्वजन्मनि ॥ १६२ ॥ भिक्षाटनंकृतंनित्यंप्रतिग्राहेणजीवति ॥ दत्ता
नितत्रदानानिपर्वस्वपिचशक्तितः ॥ १६३ ॥ पापमाचरितंतेनकामलुब्धेनचेतसा ॥ स्वजातिवनितायांवैव्यभिचारंचकारसः ॥ १६४ ॥
तस्यास्तत्राभवद्गर्भःपातनंकृतवानसौ ॥ महौषधैश्छेदनकैःपरिवादात्तथाद्विज ॥ १६५ ॥ साम्रृतातेनदुःखेनगर्भपातेननिश्चितम् ॥ ततो
यमपुरंप्राप्तःससहायोद्विजोत्तम ॥ १६६ ॥ पापात्पापफलंभुक्त्वायोनिंभुक्त्वाकथंचन ॥ नात्युच्चःश्यामलोभव्यःस्वल्पवित्तसमन्वितः ॥
॥ १६७ ॥ व्यापारनिरतःक्रोधीबलबुद्धियुतश्चलः ॥ भ्रातृयुक्तःपितृसुखाद्धीनःस्त्रीप्रियसंयुतः ॥१६८॥ गर्भपातनकात्पापात्प्रागत्रसुतव
र्जितः॥पंचसप्तत्यायुःस्यात्तीर्थभूमौचपंचता॥१६९॥३०॥अथकावेरीयोगः ॥ राजपुत्रोऽभवत्पूर्वंक्रूरकर्माप्रतापवान् ॥ धनधान्यसमृद्धो
पिवंगदेशेऽवसत्तदा ॥ १७० ॥ वाचकेभ्यःप्रदत्तानिगोभूम्यश्वहिरण्यकम् ॥ अथभाविबलाद्विप्रलोभोपहतचेतसा ॥ १७१ ॥ सीमावादे
हृतंद्रव्यंब्राह्मणानामधर्मतः ॥ १७२ ॥ द्विजेकेनसहायेनकृतंकर्मातिदारुणम् ॥ भूमिवादेमृतस्तत्रसंग्रामेकालनोदितः ॥१७३॥ भूमिपालो
बभूवाग्रेमध्यदेशेशुभस्थले ॥ गौरःसूरिर्महोग्रस्तुबहुकन्यःकृतीशुभः ॥ १७४ ॥ ददातिशक्तितोधीमानत्युच्चोबंधुसंयुतः ॥ बहुन्यायरतो
धीमान्पैत्तिकःप्रियवाग्घृणी ॥ १७५ ॥ बहुभार्य्योयशस्वीचभृत्यवाहनसंयुतः ॥ अष्टाविंशमितेवर्षेस्वल्पपुत्रसुखान्वितः ॥१७६॥ ब्रह्म
स्वहरणात्पापात्पुत्रहीनःप्रदृश्यते ॥ खवेदाब्दगतेविप्रस्वल्पमृत्युर्भविष्यति ॥ १७७ ॥ प्रायश्चित्तेकृतेविप्रजीवेद्वर्षाऽष्टसप्ततिम् ॥
॥ १७८ ॥३१॥ अथकश्यपयोगः ॥ पृच्छकोयमयोध्यायामभूच्छूद्रश्चधार्मिकः ॥ धनधान्यसमृद्धस्तुयशस्वीपितृवल्लभः ॥ १७९ ॥

गयायांद्वादशेवर्षेयातोमातृसहायकः ॥ सानुजश्चसपत्नीकःसहायत्रयसंयुतः ॥ १८० ॥ कृतवांश्चगयाश्राद्धंनानाविभवविस्तरैः ॥
काम्यश्राद्धानितत्रैवकृत्वाचंद्विजसत्तम ॥ १८१ ॥ पितरस्तस्यवैदत्त्वाधनंधान्यंदिवंगताः ॥ अथाऽऽगत्यगृहंवर्षेचत्वारिंशन्मितेसच ॥
प्रायश्चित्तेकृतेविप्रअशीत्यब्दान्प्रजीवितः ॥१८२॥ ३२ अथकौशिकीयोगः॥आसीज्जन्मांतरेचैवबाहुजोगिरिसन्निधौ॥ सभार्यांचतुरोदक्षो
बहुबंधुसमन्वितः ॥ १८३ ॥ सहोदरविहीनस्तुबहुपुत्रोबहुप्रियः ॥ बहुभार्य्योयशस्वीचक्षयवृद्धिधनान्वितः ॥ १८४ ॥ पादजस्यत्वधा
त्पूर्वंपापाऽदत्रचपृच्छक ॥ ऊरूदरव्यथायुक्तोयौवनेजायतेध्रुवम् ॥ १८५ ॥ ३३ अथकपिलायोगः ॥ आसीत्पूर्वभवेकश्चिद्ब्राह्मणःशास्त्रव
र्जितः । विद्याभ्यासविहीनश्चकृषिकर्मरतः सदा ॥ १८६ ॥ स्वल्पवित्तयुतस्त्यागीबंधुमान्योतिमानसः ॥ स्ववर्णधर्मरहितोऽतिथीनांपू
जनेरतः ॥ १८७ ॥ अथतस्यगृहेकश्चिद्द्विजःस्थापितवान्धनम्॥तस्मैद्विजायलोभाद्वैपुनर्दत्तंनतद्धनम्॥ १८८॥दम्पतिभ्यांमिलित्वातुब्रह्म
स्वंभक्षितंपुरा॥गत्वाधर्मपुरंदेवाच्छुभंवायदिवाशुभम्॥ १८९॥फलंभुक्त्वाऽधुनाजातोमातृकुक्षौर्द्विजोत्तमः ॥ मध्यमोरक्तगौरश्चपूर्वपापसहो
दरैः॥१९०॥७२वर्षेमृत्युः॥इति॥३४अथकंदयोगः॥कंदयोगेचयोजातःपूर्वजन्मनिपादजः॥ धनधान्यसमृद्धस्तुवाममार्गेपरायणः १९१
एकस्मिन्समयेविप्रतीर्थाऽवगाहनंकृतम् ॥ संप्राप्यभवनेपश्चात्कृतवान्कर्मदारुणम् ॥ १९२ ॥ ददाहभवनंगोत्रिणश्चसोऽयंतदाद्विज ॥
तन्मध्येवत्सरीत्वेकाभस्मीभूताचदारुवत् ॥१९३॥ तेनपापानुसारेणधनपुत्रविवर्जितः ॥ शिवस्याऽऽराधनात्पुण्यात्पुत्रवृद्धिर्भविष्यति ॥
॥१९४॥विंशतिप्रमितेवर्षेचाऽल्पमृत्युर्भविष्यति ॥ प्रायश्चित्तेकृतेविप्रजीवेद्वर्षाऽष्टषष्टिकम् ॥१९५॥६८॥ ३५ अथकंदादियोगः ॥ कंदा
दियोगेयोजातःपूर्वजन्मनिब्राह्मणः ॥ सर्वसिद्धांतवेत्ताचपरभार्य्यारतःसदा ॥ परदाररतात्पापात्सुतवित्तविवर्जितः॥बाहुजोऽयं चभोविप्र

मध्यदेशेसमुद्भवः ॥ १९६ ॥ परापवादनिरतो यौवनेदुःखसंयुतः ॥ पुत्रहीनस्तथादीनोदारिद्र्येणप्रपीडितः ॥ १९७ ॥ १।४।७। ९।
१२। १६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ ६० ॥ ३६ अथकोपरयोगः॥कोपरेचनरःपूर्वंकेदारेहितदाऽवसत्॥भीमसेनइतिख्यातःपत्नी
तस्यवरांगना ॥ १९८ ॥ सुंदरीचाऽतिलावण्यंमुखंपद्मदलाकृति ॥ एकस्मिन्समयेविप्रसाबालाचनदीतटे ॥ १९९ ॥ स्नानार्थे
पिगतातत्रसखीभिःपरिवेष्टिता ॥ तत्रभाविबलात्पुत्रनृपस्तत्रसमागतः ॥ २०० ॥ दृष्ट्वाकामातुरोभूत्वाहृत्वातांचबलाज्जलात् ॥
आनीतास्वगृहेनूनंरमणंचतथाऽकरोत् ॥ २०१ ॥ तस्याःपतिर्मृतःशोकेह्यात्मघातेनपुत्रक ॥ आत्मघाताच्चसततंव्रजन्तियममं
दिरे ॥ २०२ ॥ तिर्य्यग्योनिसमुत्पन्नःशतधाचमहीतले ॥ पुनर्वैमानुषींयोनिंमध्यदेशेप्यजायत ॥ सरक्तगौरोमति
मान्द्वादशाब्देप्रपीडितः ॥ १२। २०। २७। ३२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ ८१ ॥ २०३ ॥ ३७ अथकृ
ष्णायोगः ॥ पूर्वजन्मनिसानारीकुरुदेशेऽवसद्द्विज ॥ नृपस्यदुहिताशुभ्रामदगर्वेणगर्विता ॥ २०४ ॥ तस्याश्चमातापितरौदिवंयातौ
तदाऽनघ ॥ जामात्रेचददूराज्यंसर्वेहिपुरवासिनः ॥२०५॥ सानारीचाऽतिगर्वेणमन्यतेतृणवत्पतिम् ॥ एकस्मिन्समयेविप्रकटुवाक्यंचसाऽ
वदत् ॥२०६॥ तस्याःपतिस्तुक्रोधेनाविषंपीत्वामृतस्तदा ॥ एवंस्वल्पतिथेकालेगतेस्त्रीपंचतांगता ॥२०७॥ सानानानरकान्भुक्त्वाकीट
योनिशतेरपि ॥ पुनरागत्यमेदिन्यांसर्वसौख्यसमन्विता ॥ २०८ ॥ षोडशाऽब्दंतुविधवासाजाताऽत्रद्विजोत्तम ॥ त्रिंशद्वर्षांतरेकष्टंह्यायु
[illegible]षष्टिकम् ॥ २०९ ॥ माघेमासेभवेन्मृत्युःपंचम्यांधवलेजले ॥२१० ॥ ३८अथकालीयोगः॥कालीयोगेचयोजातःपूर्वजन्मनिवैष्ण
[illegible] ॥ [illegible]पुरे[illegible]न्यवसत्पूर्वजन्मनि ॥ २११ ॥ विरक्तः सोपिभक्तश्चसहशिष्येणराजते ॥ एकस्मिन्समयेविप्रकुलंकर्मज[illegible]

सितम्॥२१२॥ब्राह्मणस्यकृतानिंदातथावेदस्यवतदा॥तेनदोषेणभोविप्रकुष्ठरोग्यधुनाभवेत् ॥ २१३ ॥ २।५।९।१५।२३।२७।३५।३९
वर्षेषुकष्टम्॥परमायुर्वर्षाणि १०९॥३९अथकलायोगः॥कश्चिद्द्विजकुलेपूर्वंशोणभद्रस्यपश्चिमे ॥ जयाजयइतिख्यातःपत्नीपुत्रविवर्जितः ॥
॥२१४॥नानाकलाऽभिनिरतः पशुहिंसापरायणः॥नृपाऽनुकंपयाविप्रद्रव्यंलब्धंसुपुष्कलम् ॥ २१५ ॥ एकस्मिन्समयेविप्रब्राह्मणस्यप्र
संगतः ॥ तीर्थाऽवगाहनंकृत्वातथापुण्याऽर्जनंकृतम् ॥२१६॥आयुषस्तुसमाप्तित्वात्सविप्रः पंचतांगतः॥ पापात्पापफलंभुक्त्वापुण्यात्पुण्य
फलंतथा ॥ २१७ ॥ बहुवर्षसहस्रांतेपुनरागत्यभूतले ॥ ईषद्गौरोमध्यमश्चदक्षिणांगेहिचिह्नितः ॥ २१८ ॥ १। ४।८।११।१७
२०।२७।३०।३६ वर्षेषुकष्टम्॥परमायुर्वर्षाणि ७४॥ ४० अथकालयोगः ॥ आसीत्पूर्वभवेकश्चिद्वैश्यःपरमधार्मिकः ॥ देशेपांचाल
केचैवन्यवसत्पूर्वजन्मनि॥ २१९ ॥ धनमैश्वर्य्यमतुलंपरकार्य्यस्यसाधकः ॥ कृपणस्यदरिद्रस्ययथेच्छन्तुददौपुरा॥ २२० ॥ एकस्मिन्स
मयेविप्रसमर्थेषुतदाऽनघ ॥ अन्नमेरुंददौप्रातःप्रत्यहंचद्विजोत्तम ॥२२१॥ तेनपुण्यप्रभावेणस्वर्गेगत्वासभार्यकः॥अधुनाऽगत्यमेदिन्यांसर्व
सौख्येनसंयुतः॥२२२॥१।३।५।९।१७।२१।३२वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि६६॥४१अथकुमारयोगः॥कुमारयोगेसंजातःपूर्व
जन्मनिपादजः ॥ देशेकारूषकेचैवन्यवसत्पूर्वजन्मनि ॥ २२३ ॥ हरिदासइतिख्यातः सर्वसम्पद्युतोधनी ॥ राजमान्यश्चचतुरःसुज्ञोद्रव्य
समन्वितः ॥ २२४ ॥ दत्तानितेनदानानिपर्वस्वपिचशक्तितः ॥ अध्यापिताब्राह्मणाश्च गोदानंचतथाकरोत् ॥ २२५ ॥ एकस्मिन्समये
विप्रह्यनृतौचविमोहितः ॥ विनापराधंसाध्वीवैस्वभार्य्याहिप्रताडिता ॥२२६॥ साम्प्रतातेनदुःखेनपापमाऽऽचरितंत्विदम्॥गतोसौपादजः
शीघ्रंयमलोकंततःपरम् ॥ २०७ ॥ षष्टिवर्षसहस्रांतेपुनरागत्यभूतले ॥ खवेदाब्दगतेचैवह्यल्पमृत्युर्भविष्यति ॥२२८॥ चतुःपंचाशदब्दां

तंकथितंप्राणधारणम् ॥ २२९ ॥ ४२ अथकरपीटयोगः ॥ करपीटेनरोजातःपूर्वजन्मनिब्राह्मणः ॥ गौडदेशेऽवसत्सोपिधनीमानीजने
श्वरः ॥ २३० ॥ दत्तानितेनदानानिब्राह्मणेभ्यःस्वशक्तितः ॥ सूर्य्यग्रस्तेतथाकाश्यांतुलादानंतथाऽकरोत् ॥ २३१ ॥ प्रयागेचत्रिवेण्या
हिमाघेस्नातोमृगेरवौ ॥ संप्राप्यभवनंशीघ्रंहर्षगद्गदमानसः ॥ २३२ ॥ बभूवाऽचिरतःसोपिनृपस्याऽग्रेप्रतिष्ठितः ॥ नानाविलासविभवै
र्भोगसंपूर्णतांगतः ॥ २३३ ॥एकस्मिन्समयेविप्रभाविनोर्थस्यवैबलात् ॥ याचकेभ्यःप्रदत्तश्चग्रामस्त्वेकस्तदाऽनघ ॥२३४ ॥ पुनर्गृहीत्वा
मोहेनपापमाचरितंत्विदम् ॥ पापात्पापफलंभुक्त्वापुण्यात्स्वर्गंतथाभृशम् ॥ २३५ ॥ पुनर्वैमानुषीयोनौमातृकुक्षेःसमुद्भवः ॥ ३ ॥ ८ ।
१२ । १७ । २३ । २७ । ३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७६ ॥ २३६ ॥ ४३ अथकमंधयोगः ॥ कश्चित्क्षात्रकुलेपूर्वंनैमिषारण्य
सन्निधौ ॥ उग्रदंडःप्रतापीचकुशलःसर्वकर्मणि ॥ २३७ ॥ किंचिद्धर्मार्जनेनिष्ठः शिवभक्तिपरायणः ॥ एकस्मिन्समयेविप्रसहसैन्येन
बाहुजः ॥ २३८ ॥ गतस्त्वरिपुरंतेनकृतंयुद्धंपरस्परम् ॥ समरेषुमृतःशूरोगतश्चेंद्रपुरंप्रति ॥२३९॥ बहुवर्षसहस्राणिभुक्त्वास्वर्गभवंफलम् ॥
ततः पुण्यक्षयेजातेपुनरागत्यभूतले ॥ २४० ॥ १ ॥ २ । ३ । ८ । १२ । १५ । २० । २९ । ३३ । ३७ वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ६८॥४४ अथकल्पयोगः ॥ कल्पयोगेचयोजातोगंधर्वः पूर्वजन्मनि ॥ प्रसेनइतिविख्यातइन्द्रस्याऽग्रेप्रतिष्ठितः ॥ २४१॥
एकस्मिन्समयेविप्रह्याज्ञाकारीमरुत्वतः ॥ महाकोपेनतेनैवशापोदत्तःसुदुष्करः ॥ २४२ ॥ विडौजाश्चोक्तवान्कोपाद्भोभवतुराक्षसः ॥
बभूवराक्षसः सोपितथावर्षसहस्रकम् ॥ २४३ ॥ पुनर्जन्मपुनर्मृत्युर्जन्ममृत्युः पुनःपुनः ॥ पुनः प्राप्यमनुष्यत्वंगौरांगः प्रियदर्शनः ॥
॥ २४४ ॥ प्रथमेद्वितीयेवर्षेज्वरविस्फोटकादयः ॥ सप्ताऽष्टमेचविकलोद्वादशेषोडशेतथा ॥ २४५ ॥ विंशवर्षान्तरेकष्टंसौख्यंतस्यततः

परम् ॥ सप्तसप्ततिवर्षांतंह्यायुस्तस्यद्विजोत्तम ॥ २४६ ॥ ४५ अथकारेडयोगः ॥ कारेडेचनरःपूर्वंचेंद्रप्रस्थेवसन्नसौ ॥ सर्वेश्वरइति
ख्यातोब्राह्मणः शास्त्रकोविदः ॥२४७॥ विद्याविभवसंयुक्तःकापथ्याऽऽचरणेरतः ॥ तस्यमित्रंद्विजस्त्वेकस्तस्मिन्ग्रामेऽवसत्तदा ॥२४८॥
तस्यद्रव्याणिसर्वाणिगृहीत्वाविविधैश्छलैः ॥ नदत्तंतेनतत्तस्मैलोभोपहतचेतसा ॥ २४९ ॥ किंचित्कालांतरेचैवसविप्रःपंचतांगतः॥तेन
कर्मानुसारेणप्राप्तस्तुयमसादनम् ॥ २५०॥ तिर्य्यग्योनौसमुत्पत्यपश्चाज्जातोऽधुनानरः ॥ गोधूमाकारवद्देहोदक्षिणांगेप्रचिह्नितः॥२५१॥
१ । ३ । ९ । १३ । २४ । ३५ । ३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९२ ॥ ४६ अथकणकयोगः ॥ आसीज्जन्मांतरेचैवस्वर्णकारःसु
शोभनः ॥ देशेहिकीकटेचैवभार्गवोनामविश्रुतः ॥ २५२ ॥ तस्मिन्ग्रामेऽवसत्त्वेकोब्राह्मणःशास्त्रकोविदः ॥ तेनविप्रेणहर्षेणस्वर्णंदत्त्वा
चपुष्कलम् ॥ २५३ ॥ मालार्थेहिददौतंचस्वर्णकारोगृहीतवान्॥पित्तलस्यददौमालांकिंचित्स्वर्णाऽऽवृतांकृताम्॥२५४ ॥ किंचित्कालांतरे
चैवस्वर्णकारोमृतःपुरा॥कृतांतनरकंगत्वायमदूतैःसपापकृत् ॥२५५॥ बहुवर्षसहस्रांतेमर्कटोपिबभूवह ॥ सम्भूतःकौशिकीतीरेतेनजातोहि
मानुषः ॥ श्यामाऽरुणोदीर्घदेहश्चंचलश्चप्रतापवान् ॥ २५६॥ १ । ३ । ५ । ९ । १३ । २८ वर्षेषुकष्टम्॥परमायुर्वर्षाणि ५७ ॥
४७ अथकिरीटयोगः ॥ किरीटयोगेयोजातःपूर्वजन्मनिबाहुजः ॥ वागडेसचसंजातोनिष्ठुरःकृपणःशठः ॥ २५७ ॥ नृपस्याग्रेप्रतिष्ठश्च
शूरकर्मचमत्कृतिः ॥ एकस्मिन्समयेविप्रनृपकन्यावरांगना ॥ २५८ ॥ यास्तितांप्रतिकृतामैत्रीकौटिल्याच्चतदानघ॥ राजकन्याऽऽहृता
त्पापान्नरकेदारुणेचिरम् ॥ २५९ ॥ स्थित्वावर्षसहस्रंचमृत्युजन्मशतैरपि ॥पश्चाच्चमानुषीयोनौमातृकुक्षेःसमुद्भवः ॥ दंतुरः परमोदारो
वेश्यायांप्रीतिमुद्वहन् ॥ २६० ॥ १ । ४ । ७ । १५ । २२ । २८ । ३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ ७९ ॥ ४८ अथकर्द

मयोगः ॥ कर्दमयोगेयोजातःपूर्वजन्मनिपादजः ॥ कीटदेशेऽवसत्सोपिगौरवेणसमन्वितः॥२६१॥ मनोहरइतिख्यातोनृपसेवापरायणः॥
दत्तानितेनदानानिश्रद्धायुक्तेनचेतसा ॥ २६२ ॥ पर्वस्वपिचतेनैवाऽध्यापिताब्राह्मणाद्विज ॥ यौवनेमृत्युवशगोबभूवपादजस्तदा
॥ २६३ ॥ तत्रदानार्चनंकृत्वाकथांश्रुत्वाविशेषतः ॥ इदंजन्मतृतीयंतुधनधान्यसमन्वितम्॥२६४॥ १ । ३॥ ८ । १४ । २० ।
२६ । २९ । ३६ । ३७ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ४९ अथकलापयोगः ॥ पूर्वजन्मनिचाभीरोमथुरायांवसन्नसौ ॥ हरि
कल्लइतिख्यातःपत्नीपुत्रसमन्वितः ॥ २६५ ॥ गोमहिष्यादिभिस्तस्यसंकुलंतत्रवेश्मच ॥ एकस्मिन्समयेविप्रसाधवःपरमार्थिनः २६६
आगतास्तत्प्रसंगेनवैष्णवोऽभूद्द्विजोत्तम ॥ तैरेवसाकमाभीरोगंगायांगतवांस्तदा ॥ २६७ ॥ गंगामध्येपुरामृत्युर्बभूवद्विजसत्तम ॥
तेनपुण्याऽवशेषेणस्वर्गेगत्वातदाऽनघ ॥ षष्टिवर्षसहस्रांतेपुनरागत्यभूतले ॥ २६८॥ ७ । ९ । २३ । २४ । ३४ ।३८वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ॥ ६१ ॥ ५० अथकनायोगः ॥ कश्चिद्द्विजकुलेपूर्वंबर्बरेदेशकेवसन् ॥ भवानाइतिविख्यातोधर्मशास्त्रविनोदकः ॥२६९॥
पत्नीतस्यमहाभ्रष्टापरपुरुषरताऽधमा ॥ एकस्मिन्समयेविप्रदृष्ट्वास्वीयांसकोपतः ॥ २७० ॥ स्थूलेनलकुटेनैवताडयामासतांद्विज ॥
सानारीतुविषंपीत्वामृताऽसौलौकिकाद्भयात् ॥ २७१ ॥ ब्राह्मणःपंचतांप्राप्तोगतश्चयमशासनम् ॥ पुनःप्राप्तोमनुष्यत्वंगौरांगोदीर्घलोचनः
॥ २७२ ॥ १ । ३ । ८ । १२ । २५ । ३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १२० ॥ ५१ अथकुंडलयोगः ॥कुंडलेचनरोजातोबाहुजः सुख
संयुतः॥कावेरीनिकटेपूर्वमवसत्परिवारयुक् ॥ २७३ ॥ हरिवंशेतिविख्यातःशिवस्याऽऽराधनेरतः॥ एकदाविपिनेघोरेहत्वापिचमृगान्बहून्
॥ २७४ ॥ न्यवसत्तापसस्तत्रबाणोलग्नस्तुतद्धृदि ॥ तेनपापाऽनुसारेणबाहुजोनरकंगतः ॥ पुनर्जन्मधरापृष्ठेपुत्रदारविवर्जितः ॥ २७५॥

१।१६।२२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि॥६३॥८२॥अथकुंतलयोगः ॥ कुंतलेनगरेपूर्वंकुंतदासोपिपादजः ॥ पत्नीपुत्रभ्रातृयुक्तःसेवकैश्च
समन्वितः ॥२७६॥ कृषिवाणिज्यनिरतोधान्यंचविविधंकृतम ॥ दानंदत्त्वाद्विजानांवैमासिमासिचद्व्ययने ॥२७७॥ तस्यस्त्रियाकृतंपापं
द्रव्यार्थमारिताऽङ्गना॥तस्याद्रव्याणिसर्वाणिव्ययंकृत्वादिनेदिने ॥ सर्वैर्मिलित्वातद्भुक्तंपापमाचरितंत्विदम् ॥२७८॥ दैवान्मृत्युवशंप्राप्तः
सगत्वायमशासनम् । कतिवर्षसहस्रांतेपुनरागंत्यभूतले ॥२७९॥ २ । ८ । ९ । १६ । २१ । ३१ । ३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥
९३ । ८३अथकचारियोगः ॥ पूर्वजन्मनिमनुजोमालवेनगरेवसन् ॥ मान्धाताइतिसंज्ञश्चप्रतापीचजनेश्वरः ॥ २८० ॥ निर्विघ्नंतत्रराज्यं
हिकृतंतेनतदाऽनघ ॥ एकस्मिन्समयेविप्रसोमयज्ञंतथाऽकरोत् ॥ २८१ ॥ आहूयब्राह्मणानामाऽऽदरंचकृतवान्भृशम् ॥ एकस्तुस्थविरो
विप्रःसभामध्येसमागतः ॥२८२॥ याचितंपुष्कलंद्रव्यंनदत्तंलोभकारणात् ॥ ब्राह्मणश्चातिक्रोधेनह्यग्निकुंडंसमाऽऽविशत् ॥ २८३ ॥ हा
हाकारःकृतःसर्वैर्भस्मीभूतश्चतत्क्षणात् ॥ तेनपापेनसहसाश्रियस्तस्यक्षयंगताः ॥२८४ ॥ राज्यभ्रष्टोबभूवाऽसौदारिद्र्येणप्रपीडितः ॥ एवं
हियातेवयसिदम्पतीविपिनेमृतौ ॥ इदानींपुत्ररहितोरोगार्त्तोजायतेसदा ॥ २८५ ॥ १ । ३ । ५ । ८ । १३ । २१ ।२९।३२।३९। वर्षेषु
कष्टम् ॥ परमायुर्वर्षाणि ॥ ६६ ॥ ९४ ॥ अथकचमाख्ययोगः ॥ कचमाख्येसमुत्पत्तिः पूर्वजन्मनिब्राह्मणी ॥ उज्जयिन्यांनगर्य्यांवैक्षि
प्रानद्याश्चसन्निधौ ॥ २८६ ॥ पतिपुत्रविहीनासातपश्चर्य्यारतासदा ॥ एकादशीव्रतेरक्ताज्वरशीतेनकंपिता ॥ २८७ ॥ विनष्टासानदी
तीरेगताइन्द्रपुरंप्रति ॥ ततःपुण्यक्षयेजातेचागताधरणीतले ॥ २८८ ॥ भव्यकांतिःसुखासीनानानाद्रव्यसमन्विता ॥ १ । ४ । ८ । १४
१७ । २१ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ २८९ ॥ ७३ । ९९ अथकच्छपयोगः ॥ कच्छपेयोगेयोजातः पूर्वजन्मनिभूपतिः ॥ संतो

षइतिविख्यातोबहुस्त्रीपुत्रसंयुतः ॥ २९० ॥ कृत्वादानार्चनंसम्यक्ततस्तीर्थाटनंकृतम् ॥ तीर्थेषुचददौदानंसत्पात्रायद्विजायच ॥२९१॥
एकस्मिन्समयेविप्रब्राह्मणस्यहृतंधनम् ॥ दत्त्वाराज्यंस्वपुत्रायजगामगिरिगह्वरे ॥२९२॥ तत्रभाविबलात्पुत्रदृष्ट्वाऽरण्येचशोभना ॥ मृदंगी
चारुशोभाढ्यायथैंद्रस्योर्वशीद्विज ॥२९३॥ बलादाकृष्यतांतस्यांकृत्वाशुरतिसंगमम् ॥ स्वराज्येपुनरागत्यपुत्रायद्रुह्यतिस्मसः॥२९४॥
परस्परंकृतंयुद्धंपुत्रश्चैवविपादितः ॥ सराजामरणंप्राप्तोगतोऽसौयमशासनम् ॥२९५॥ नानानरकेषुसस्थित्वाबहुवर्षसहस्रकम् ॥ पुनर्वैमा
नुषींयोनिंप्रायात्पुण्यप्रभावतः ॥२९६॥ १।४।६।१०।१५।२७। वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ ६१ ॥ ५६ अथकल्पलोचनयोगः ॥
कश्चिद्वैश्यकुलेपूर्वं रेवानद्याश्चसन्निधौ ॥ दिवाकरइतिख्यातःपत्नीतस्यमनोरमा ॥ २९७ ॥ कार्त्तिकेमाघेवैशाखेस्नातोविमलेजले ॥
तुलसीवृंदावलिंकृत्वादीपावलिंतथाददत् ॥२९८॥ गीतैर्वाद्यैश्चसततंविष्णवीशस्मरणेरतः ॥ आयुषस्तुसमाप्तित्वात्सवैश्यःपंचतांगतः ॥
॥२९९॥ बभूवबाहुजःसोऽथसमस्तक्षितिमंडले ॥ दत्तानितेनदानानिमलमासेचहायने ॥३००॥ मध्येपापंभृशंचक्रेकृतंतेनद्विजोत्तम ॥
मरणंगोमतीतीरेबभूवद्विजसत्तमः ॥ गोधूमाकारवद्देहोदक्षिणांगेप्रचिह्नितः ॥३०१॥ ४।८।१३।२१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि
८१ ॥५७ अथकंदर्पयोगः ॥ कंदर्पयोगेयोजातःपूर्वजन्मनिबाहुजः ॥ द्वारकायांसमुत्पन्नःप्रद्युम्नोनामविश्रुतः ॥३०२॥ महाशोभाधि
काराढ्योगम्भीरःशूरविक्रमी ॥ कृत्वापुण्यार्जनंसम्यग्ब्रह्मज्ञानरतःसदा ॥ ३०३ ॥ एवंनिवसतातत्रबह्वब्दाआगतागताः ॥ आयुषस्तुस
माप्तित्वात्समृतःकालचोदितः ॥३०४॥ स्वर्गोऽपवर्गभोगश्चबभूवबहुवार्षिकः ॥ ततोजातेक्षीणपुण्येपुनरागत्यभूतले ॥३०५॥ गौरोरुणो
मध्यदेहःकामवत्कांतिसुन्दरः ॥ अस्मिञ्जन्मनिभवेत्कष्टमेषुवर्षेषुपुत्रक ॥ ३०६ ॥ १।१२।१८।२५।३१।३७ वर्षेषुकष्टम्॥ परमा

युर्वर्षाणि ९७ ॥ ९८ अथकंतयोगः ॥ कंतयोगेसमुत्पन्नः पूर्वजन्मनिसंकरः ॥ कूर्मवंशेपुराविप्रामक्षेत्रस्यसन्निभा ॥ २०७ ॥ रघुदेवः
समास्यातोराज्यकार्य्यपरायणः ॥ कृत्वादानार्चनंतेनब्राह्मणाश्चप्रतोषिताः॥३०८॥प्रजानांलुंठनंकृत्वाद्यदंव्यादंडिताभृशम्॥ एकस्मिन्स
मयेविप्रप्रजानांदंडनेरतः ॥ ३०९ ॥ सर्वाःप्रजाश्वविमुखाबभूवुर्द्विजसत्तम ॥ नृपंचघातयामाससंकरोनरकंगतः ॥३१०॥ पुनरागत्यमेदि
दिन्यांपूर्वपुण्यप्रभावतः १।४।८।१३।२४।२९ वर्षेषुकष्टम्॥परमायुर्वर्षाणि १०३ ॥ ३११ ॥९९ अथकांतिम्रयोगः॥ आसीज्जन्मनियाना
रीपुष्करेदेशकेतदा ॥ सुंदरीचाऽतिशोभाढ्याचारुकिंजल्कशोभना ॥३१२॥ श्यामापद्ममुखीभव्यापरपूरुषरतासदा ॥ प्रत्यहंपापभागीच
पतिवंचनतत्परा ॥ ३१३ ॥ एकस्मिन्समयेविप्रस्वपतिंचविषंददौ ॥ सम्मृतस्तेनदुःखेनपापमाचरितंत्विदम् ॥३१४ ॥ साम्प्रतासर्पदंशेन
गतासानरकंतदा ॥ असिपत्रवनंचोरंकृमियोनिशतैरपि ॥ ३१५ ॥ इमांतुमानुषींयोनिंचागत्यभूमिमंडले॥ १।३।८।२८ वर्षेषुकष्टम्॥पर
मायुर्वर्षाणि ७० ॥ ३१६ ॥ ६० अथकंजाननयोगः ॥ कंजाननेपूर्वजनौमोरभंजेतदावसन् ॥ कृष्णदासइतिख्यातः पत्नीतस्यशुभानना
॥ ३१७ ॥ पातिव्रत्यरताचोग्रादानपुण्यपरायणा ॥ पतिस्तस्यामहालोभीकामग्रस्तोपिचंचलः ॥ ३१८ ॥ परापवादनिरतोवेश्यायांप्री
तिमुद्वहन् ॥ सम्मृतःकालसंदष्टःपत्नीजातासतीतदा ॥ पुनर्जन्मपुनर्मृत्युर्जन्ममृत्युःपुनःपुनः ॥३१९॥ १ । ६ । १० । १३ । १७ । २२
२९ ॥ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि६७॥६१अथकामारियोगः॥पूर्वजन्मनिगयाक्षेत्रेब्राह्मणोग्रामयाचकः ॥ भिक्षाटनेसदामग्नःपरिवार
स्यपोषणे ॥३२०॥ एकस्मिन्समयेविप्रस्वगेहेह्यागतोद्विजः ॥ परदेशात्समानीयद्रव्याणिविविधानिच ॥ ३२१ ॥ तेनविप्रगृहस्थेच
द्रव्यंदत्तंसुपुष्कलम् ॥ तस्यद्रव्याणिसर्वाणिव्ययंकृत्वादिनेदिने ॥ ३२२ ॥ आयुषस्तुसमाप्तित्वात्सम्मृतःकालचोदितः ॥ नानानरकेषु

स्थित्वानानाजन्मानिचाभवन् ॥ किंचित्पुण्यवशात्पुत्रपुनरागत्यभूतले ॥ ३२३ ॥ १० । २२ । ३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६५।६२ अथमर्गयोगः ॥ कश्चिद्वैश्यकुलेपूर्वंगोमत्याश्चशुभेतटे ॥ देवराजइतिख्यातोभार्य्यातस्यपतिव्रता ॥३२४ ॥ सुरसेनेतिविख्याता नानाद्रव्यसमन्विता॥व्यापारेकुशलःसोपिपरदेशेसदारतः॥३२५॥एकस्मिन्समयेविप्रक्रीत्वावस्त्राणिभूरिशः॥ नौकायांस्थाप्यसम्यक्सदेशेहिककुभेंगतः॥३२६॥विक्रीयद्विगुणंकृत्वाहर्षगद्गदमानसः॥ आगत्यकृतवान्पापंदारुणंहिद्विजोत्तम॥३२७॥ तस्मिन्ग्रामेऽवसत्त्वेकोवैश्यःपरमधार्मिकः ॥ तस्यकन्यामहाशुभ्राबलादाऽऽकर्षितातदा॥३२८॥भयभीतश्चवैश्योऽसौपलायनपरायणः॥ ज्येष्ठांत्यक्त्वाऋतुप्राप्तांकनिष्ठांचरतिंददौ ॥ ३२९ ॥ एवंस्वल्पेगतेवर्षेसवैश्यःपंचतांगतः ॥ पापाच्चनरकंभुक्त्वापुण्यात्पुण्यफलंतथा॥३३०॥ बहुवर्षसहस्रांतेपुनरागत्यभूतले ॥ ईषद्गौरोदीर्घदेहश्चिह्नंदक्षिणवामयोः ॥ ३३१ ॥ ४ । ६ । ७ । १२ । १७ । २२ । २७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७४ ॥ ६३ अथकेदलीयोगः ॥ आसीज्जन्मांतरेचैवकाकुत्स्थेनगरेवसन् ॥ ब्राह्मणःशास्त्रविज्ञश्चशिवस्यस्मरणेरतः ॥३३२॥ पाखंडाचरणेधूर्तश्चात्मार्थेविनियोगिकः ॥ दत्तानितेनदानानिगोभूम्यश्वहिरण्यकम् ॥३३३॥ एकस्मिन्समयेविप्रमिथ्यावादंतथाऽकरोत्॥ चातुर्य्येणतदाविप्रजितंतस्यधनंबलात् ॥ ३३४ ॥ धूर्तविप्रहृतंद्रव्यंबहुवर्षगतागतैः ॥ पापाच्चनरकेगत्वातिर्यग्योनिंतथोत्तरे ॥ पश्चाच्चमानुषीयोनौमात्कुक्षेःसमुद्भवः ॥ ३३५ ॥ २ । ५ । ७ । १२ । १७ । २३ । २९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि॥६९॥६४अथकमनीययोगः॥ कश्चिद्राजकुलेपूर्वंसागरस्याऽतिसन्निधौ ॥ सर्वसौंदर्य्ययुक्तस्तुलावण्योऽमृतभाषकः ॥३३६॥ यौवनेचतदाविप्रदानंदत्त्वाद्विजायच॥प्रजापीडांकृत्वापापमाचरितंत्विदम् ॥३३७॥ कालसर्पेणनिहतोनृपपुत्रोमृतस्तदा ॥ मतोऽसौभास्करंलोकंभुक्त्वाभोगांश्चशाश्वतान्॥३३८॥

पुनरागत्यमेदिन्यांकिंचित्पुण्यप्रभावतः ॥ ३ । ६ । ७ । १५ । २१ । २८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५५ ॥ ६५ अथकांची
योगः ॥ कांचीयोगेनरोजातोविष्णुकांचीवसन्पुरा ॥ शिवसमइतिख्यातोबाहुजःकृषिकर्मकृत ॥३३९॥ एकस्मिन्समयेविप्रसीमावादरत
स्तदा ॥ घातितोऽयोत्रपुत्रश्चकुंतलेपादघाततः ॥ समृतस्तेनदुःखेनदैवात्सोपिमृतस्तदा ॥३४०॥ पुनरागत्यमेदिन्यांबहुकष्टसमन्वितः ॥
१ । ४ । १२ । १७ । २५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ १०० ॥ ६६ अथकांतियोगः ॥ कश्चित्तुबाहुजश्चाथमैथिलेनगरेवसन् ॥
किंचिद्भूमिपतिस्तत्रचोग्रदंडःप्रतापवान् ॥ ३४१ ॥ विमोहेनतदाविप्रकृतंकर्मजुगुप्सितम् ॥ मार्गाऽवरोधनंकृत्वाचौरकर्मणितत्परः ॥
परनिंदाऽपवादश्चपरहिंसारतःसदा ॥ ३४२ ॥ एकस्मिन्समयेविप्रसाधवस्तत्रचागताः ॥ साधूनांचप्रसंगेनकथांश्रुत्वाविशेषतः ॥
पूर्वकर्मपरित्यक्त्वासत्कर्मसुतथारतः ॥ ३४३ ॥ गंगामध्येमृतःसोपिगंधर्वेनगरेगतः ॥ कतिवर्षसहस्रांतेपुनरागत्यभूतले ॥ (२४३)॥
१ । ३ । ९ । १३ । १८ । २१ । २७ । २६ ॥ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ६७ अथकुमारिकायोगः ॥ पूर्वजन्मनिशूद्रस्तु
विप्रभक्तिपरोदृढः ॥ देशेहिकौंकणेचैवनिवसन्परिवारयुक् ॥ ३४४ ॥ महोद्यमीकार्य्यकर्तासत्यव्रतपरायणः ॥ तीर्थाऽवगाहनंकृत्वाशिव
स्योद्यापनंतथा॥ ३४५ ॥एकस्मिन्समयेविप्रसर्वस्वंविधिनाऽददात् ॥ सत्पात्रायगृहस्थायब्राह्मणायकुटुम्बिने ॥ ३४६ ॥ तेनपुण्यप्रभावेण
स्वर्गंगत्वाचपादजः ॥ दिव्यवर्षसहस्रांतेपुनरागत्यभूतले ॥ प्रशस्तमधुराऽऽलापीधनधान्यसमृद्धिमान् ॥ ३४७ ॥ १।४।९।१६।२१।२८
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९७॥ ६८ अथकल्लोलयोगः ॥ कल्लोलयोगेयोजातोबंदीचपूर्वजन्मनि ॥ काव्यकर्ताचमत्कारीयाचनाःकृ
तवान्भृशम् ॥३४८॥ देशेगुर्जरकेचैकन्यवसत्पूर्वजन्मनि॥तत्कन्यायौवनवतीवरयोग्याबभूवह ॥३४९॥ उद्वाहश्चकृतस्तस्यामहितेनविमो

इतः ॥ बालाचैवविषंपीत्वामृतासाकामपीडिता ॥ सवंदीनरकंगत्वाबहुजन्मानिचाऽभवात् ॥ ३५० ॥ ३ । ८ । १२ । १७ । २७ वर्षेषुकष्टम्
परमायुर्वर्षाणि ६५ ॥ ६९ अथकामाख्ययोगः ॥ आसीज्जन्मांतरेचैवब्राह्मणःशास्त्रनिंदकः ॥ वेदानांब्राह्मणानांचाभक्तःस्त्रीष्वतिलम्पटः ॥
॥ ३५१ ॥ असत्कर्मसमर्थःस्यात्कुमार्गीपापराशिकृत् ॥ एकस्मिन्समयेविप्रब्राह्मणस्यप्रसंगतः ॥ ३५२ ॥ एकादशीव्रतंकृत्वादैवयोगेन
वैमृतः ॥ तेनपुण्यप्रभावेणस्वर्गंगत्वाचब्राह्मणः ॥ ३५३ ॥ चंद्रलोकेनंदनेचवनेस्थित्वाविशेषतः ॥ ततःपुण्यक्षयेजातेपुनरागत्यभूतले
॥ ३५४ ॥ ७ । १२ । २१ । २७ । वर्षेषुअल्पमृत्युः ॥ परमायुर्वर्षाणि ६२ ॥ ७० अथकामरूपयोगः ॥ आसीज्जन्मांतरेचैवबाहुजोद्रा
विडेऽवसत् ॥ केवलेतिसमाख्यातोधनधान्यसमृद्धिमान् ॥ ३५५ ॥ कृत्वापुण्यार्जनंदानंतीर्थयात्रांतथानघ ॥ एकस्मिन्समयेविप्रकृतं
कर्माऽतिदारुणम् ॥ ३५६ ॥ अण्डंदत्तवतीचटिकातस्यहर्म्येद्विजोत्तम ॥ उद्घाटितंहठात्तेनविलयंचतथाकरोत् ॥ ३५७ ॥ आयुषस्तुस
मस्तित्वाद्बाहुजःपंचतांगतः ॥ पुनरागत्यमेदिन्यांपुत्रसंततिवर्जितः ॥ ३५८ ॥ १ । २ । ४ । ७ । ९ । १९ । २५ वर्षेषुकष्टम् ॥ परमा
युर्वर्षाणि ६८ ॥ ७१ अथकोमलायोगः ॥ चोलदेशेवसत्येकःशूद्रःपरमधार्मिकः ॥ शिवालयोविप्रगेहास्तथाशालागवामपि ॥३५९ ॥
आरामाश्चसरःकूपाःकारिताःस्वर्गहेतवे ॥ तेनपुण्यप्रभावेणस्वर्गंगत्वाचपादजः ॥ ३६० ॥ षष्टिवर्षसहस्राणिभुक्त्वास्वर्गभवंफलम् ॥ ततः
पुण्यक्षयेजातेमर्त्यलोकेसमागतः ॥ ३६१ ॥ सुन्दरःकमनीयश्चभव्यमूर्तिर्दयार्द्रकः ॥ सर्वसम्पद्युतोमानीशास्त्राऽभ्यासीकृपापरः ॥३६२॥
[illegible]मेवर्षेचतुर्थेद्वाष्टमेपिवा ॥ द्वादशेषोडशेवर्षेपीडाभवतिदारुणा ॥ चतुःषष्टिश्चवर्षाणिकथितंप्राणधारणम् ॥ ३६३ ॥ ७२
[illegible]यीयोगः ॥ कात्यायन्यांनरोजातःपूर्वजन्मनिबाहुजः ॥ विपाशानिकटेचैवन्यवसत्पूर्वजन्मनि ॥३६४॥ साहसीशूरकर्माच

[illegible]नपि ॥ सभामान्योगुणग्राहीसंतोषेणसदावृतः ॥ ३६५ ॥ एकस्मिन्समयेविप्रह्यरण्येचतदागतः ॥ मृगोचरतिसंसक्तोबा
[illegible]ताडितौ ॥ ३६६ ॥ द्वौमृतौतत्रभोविप्रपापंमाचरितंत्विदम् ॥ समृत्वाबाहुजोविप्रगतोऽसौयमशासनम् ॥ कतिवर्षसहस्रांतेचा
गतोधरणीतले ॥ ३६७ ॥ १ । २ । ४ । ६ । ९ । ११ । १७ । २२।२७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६३॥७३ अथकर्कटाख्ययोगः ॥
कर्कटाख्येनरोजातःपूर्वजन्मनिगुर्जरः ॥ शतद्रूनिकटेचैवपरिवारेणसंयुतः॥३६८॥ पितातस्यमहाराजशूद्रकर्मक्रियान्वितः॥दत्तानितेनदा
नानिपर्वस्वपिचशक्तितः ॥३६९॥ एकस्मिन्समयेविप्रराज्यलुब्धेनतेनच ॥ खड्गेननिहतोविप्रजनकश्चतदाऽनघ ॥३७०॥ बहुवर्षेष्वतीते
भुक्त्वाराज्यंनिरंतरम् ॥ मृतोनरकमापन्नःशतजन्मविहंगमः ॥ पश्चान्मानुष्यमापन्नःकन्यापुत्रविवर्जितः॥ ३७१॥१ । ४।८।१० । १३ ।
१७ । २० । २५ । २९ । ३२ । ३६ वर्षेषुकष्टम् ॥ ज्वरादिवैमनस्यार्शोरोगाः ॥ परमायुर्वर्षाणि ६५ ॥ ७४॥ अथकोदंडयोगः ॥
कश्चिद्द्विजकुलेपूर्वमिक्षुकारण्यसन्निधौ ॥ आश्रयेतिसमाख्यातःपत्नीपुत्रविवर्जितः ॥ ३७२ ॥ तपश्चर्य्यारतोनित्यंब्रह्मचर्य्यरतःसदा ॥
परब्रह्मसमभ्यर्च्ययोगाभ्यासेचतत्परः ॥ ३७३ ॥ एकदाविपिनेरम्येकौतुकीचविचेष्टितः ॥ एकातुस्वैरिणीभव्यायथाकामंतुचागता
॥ ३७४ ॥ शोषणोन्मादनंकृत्वाकटाक्षैश्चप्रताडिता ॥ निशम्यब्राह्मणस्तस्यांकामलोभेननिश्चितः ॥ ३७५ ॥ तपश्चर्य्यांपरित्यज्यभ
[illegible]चैर्व्यसनेरतः ॥ समृत्वातत्रभोविप्रबभूवमर्कटस्तदा ॥ हंसोभूत्वामानसेचमानुषत्वमिहागतः॥३७६॥३ । ६ । ९।१७ । २७ । ३७ ॥
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५८॥ ७५ अथकुलपाशकयोगः ॥ कुलपाशकेनरोजातःपर्वतेपूर्वजन्मनि ॥ दयाकरःसमाख्यातःपत्नीपुत्रस
मन्वितः ॥ ३७७ ॥ कृषिवाणिज्यनिरतःपशुहिंसापरायणः ॥ एकदामकरेमाघेसस्नातोहिद्विजोत्तमः॥३७८॥तेनपुण्यप्रभावेणस्वर्गंगत्वा

तवनच ॥ पुनरागत्यमेदिन्यांपूर्वपुण्यप्रभावतः ॥ ३७९ ॥ १ । ३ । ६।१०।१३।१६।२०।२५।२७।३०।३५।३९॥वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ७७ ॥ ७६ अथकदम्बयोगः ॥ पूर्वजन्मनिविप्रोसौजालंधरेवसन्नपि ॥ चिंतदेवइतिख्यातःसर्वविद्याविशारदः ॥ ३८० ॥
दंभद्वेषणवैतेनच्छात्राअध्यापिताश्चिरम् ॥ सुतर्काणामास्वादीचतर्कशास्त्रपरायणः ॥३८१ ॥ एकस्मिन्समयेविप्रकृतंकर्मजुगुप्सितम् ॥
चंद्रग्रस्तेमहादानंगृहीतंलोभहेतुना ॥ ३८२ ॥ तेनपापानुसारेणनरकंभुक्त्वासुदारुणम्॥अशीतिवर्षसहस्रांतेचागतोधरणीतले ॥३८३॥
४ । १५ ।२० । २७ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ । ७७ अथकोकनादयोगः ॥कोकनादेनरःकश्चिदांध्रदेशेवसन्नपि ॥ जनेश्वरइति
ख्यातोबाहुजोबलविक्रमी ॥३८४॥ कपालिकात्कृताप्रीतिर्बहुवर्षगतागतैः ॥ नानाविलासविभवैःसुखानंदेनसंयुतः॥३८५॥ अगम्याग
मनंकृत्वाह्यभक्ष्यंभक्षितंतदा ॥ अमेध्यंस्वीकृतंविप्राऽपेयंपीतंतथाभृशम् ॥३८६॥ एवंनिवसतस्तत्रबहुवर्षगतागतैः॥ आयुषस्तुसमाप्तित्वा
त्सगत्वायममंदिरम् ॥ पुनरागत्यमेदिन्यांकिंचित्पुण्यप्रभावतः ॥ ३८७ ॥ १ । २ । ४ । ६ । ११ । १५।२१।२७वर्षेषुकष्टम् ॥ परमा
युर्वर्षाणि १०७ ॥ ७८ अथकूपायोगः ॥ आसीत्पूर्वंमहाभागविदर्भेषुतदावसन् ॥ माधवेतिसमाख्यातःपत्नीतस्यवरांगना ॥ ३८८ ॥
राजकार्यात्ययंकृत्वास्वभार्य्यावशगःसदा ॥ दैवयोगेनभोविप्रपत्नीतस्यमृतापुरा ॥३८९॥ तस्याःशोकेनविकलःसर्वस्वंब्राह्मणेददौ ॥
राज्यंत्यक्त्वाश्रियंत्यक्त्वागतोऽसौगहनेवने ॥ ३९० ॥ हाप्रियेइतिमंत्रेणजपंवाहुत्वादिवानिशम् ॥ समृत्वाचातिशोकेनगतश्चेंद्रपुरंतदा॥
ततःपुण्यवशात्वेजातेपुनरागत्यभूतले ॥ ३९१ ॥ १ । ३। ८। ११। १७ । २२ । ३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७३ ॥ ७९ ५८
अथकेशयोगः ॥ कालिंजरेगिरौरम्येवपस्वीपूर्वजन्मनि ॥ निर्धूतःसत्यवादीचयशस्वीचजितेंद्रियः ॥ ३९२ ॥ एकस्मिन्समये

विषमयोगेमकरेगतः ॥ संस्नातोनियतोभानौमासमेकंनिरंतरम् ॥ ३९३ ॥ तत्रभाविबलात्पुत्रदृष्टातेनवरांगना ॥ बलाद्दाऽऽकर्षिता
तस्याःकृत्वासुरतिसंगमम् ॥ ३९४ ॥ तस्याःपतिर्ददौतस्मैतापसायमुहर्षितः ॥ एवंस्वल्पेगतेवर्षेतापसोमरणंगतः ॥३९५॥ पतत्रधोधः
पातालंसर्पयोनिर्बभूवह ॥ पुनरागत्यमेदिन्यांमानुषींयोनिमागतः ॥ ३९६ ॥ १ । १० । १६ । २२ । २६ । वर्षेषुकष्टम् ॥ परमायुर्व
र्षाणि ॥ ७७ ॥ ८० अथकुमंत्रयोगः ॥कश्चिद्द्विजकुलेपूर्ववाराणस्याश्चदक्षिणे ॥ शिवनेतिसमाख्यातःपत्नीतस्यगुणाऽऽकरी ॥३९७॥
समंत्रविदऽथोभूत्वाकुमंत्रोपदेशनेरतः ॥ पर्वस्वपिचतेनैवाऽध्यापिताब्राह्मणाःशुभाः ॥३९८॥ पितृश्राद्धाऽनुरक्तश्चमासिमासिचहायने ॥
एवंहिनिवसंस्तत्रबहुकालगतागतेः ॥ ३९९ ॥ आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः ॥ पापात्पापफलंभुक्त्वापुण्यात्पुण्यफलंतथा॥
पुनरागत्यमेदिन्यांसर्वांगेव्रणपीडितः ॥ ४०० ॥ १ । ४ । ८ । १२ । १८ । २३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०९ ॥ ८१ अथकट
कयोगः ॥ आसीज्जन्मांतरेचैवपादजस्यकुलेतदा ॥ आरोहणःसमाख्यातःपत्नीपुत्रसमन्वितः ॥ ४०१ ॥ देशेकारूषकेचैवन्यवसत्सर्व
सेवकः ॥ एकस्मिन्समयेविप्रतत्रभाविबलादपि ॥ ४०२ ॥ समागतानांसाधूनांपरिचर्य्यांतथाकरोत् ॥ साधूनांचप्रसंगेनतीर्थावगाहने
रतः ॥ ४०३ ॥ हरिद्वारेमृतःसोपिगन्धर्वनगरेगतः ॥ पुनरागत्यमेदिन्यांपूर्वपुण्यप्रभावतः ॥४०४ ॥ शुक्लांगश्चशुक्लमनाविष्णुभक्तिपरा
यणः ॥ ४०५ ॥ १ । ४ । ६ । १७ । २७ । ३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८३ ॥ ८२ अथकर्बूरयोगः ॥ कर्बूरयोगेनरःकश्चिद्वंग
देशेवसत्सुधीः ॥ पार्वत्याःपूजनेनिष्ठोगुरुदेवार्चनेतथा ॥ ४०६ ॥ तीर्थाटनंकृतंसम्यक्छ्राद्धदानमथाऽकरोत् ॥ एकस्मिन्समयेविप्रकृत
स्तेनमहोत्सवः ॥ ४०७ ॥ ब्राह्मणाःपूजिताःसम्यग्गोदानंचतथाऽकरोत् ॥ पितृसेवांपरित्यज्यभक्त्वाचैर्व्यसनेरतः ॥ ४०८ ॥ तेनपापा

ऽनुसारेणश्रियस्तस्यक्षयंगताः ॥पापाच्चनरकंगत्वापुण्यात्स्वर्गंतथाऽनघ ॥ बहुवर्षसहस्रांतेपुनरागत्यभूतले ॥४०९॥ १ । २ । ८ । ११
२० । २८ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ ६९ ॥ ८३ अथकोटयोगः ॥ कोटयोगेनरोजातःपूर्वचन्मनिपादजः ॥ वनाद्रिनि
कटेवासोमृगमांसेनजीवति ॥ ४१० ॥ प्ररोहणःसमाख्यातःपशुहिंसनतत्परः ॥ एकदाविपिनेरम्येदावाग्निर्ज्वलितोह्यभूत् ॥ ४११ ॥
ऋषीणांभव्यगेहाश्चभस्मीभूतास्तदानघ ॥ आयुषस्तुसमाप्तित्वान्ममारपादजोवने ॥४१२॥ महाघोरेचनरकेयमदूतायमाऽऽज्ञया ॥ क्षिप्त
वन्तोबहूनब्दांस्ततोजातःसमर्कटः ॥४१३ ॥ पशुयोनिशतंभुक्त्वामानुषत्वंगतोधुना ॥ वंशवृद्धिर्नजायेतपूर्वपापानुसारतः ॥ ४१४ ॥
१ । २० । ३१ वर्षेषुमहाकष्टम् ॥ परमायुर्वर्षाणि ॥ ९१ ॥ ८४ अथकंसयोगः ॥ कंसयोगेचयोजातःपूर्वजन्मनिदशारणे ॥ धन
धान्यसमृद्धस्तुपापकर्मपरायणः ॥४१५॥ भ्रातृपत्नीसुशीलाचसुन्दरीचाऽतिशोभना ॥ बलादाकर्षितातस्याःकृतःसुरतिसंगमः ४१६॥
पापमाचरितंतेनबहुवर्षगतागतैः ॥ आयुषस्तुसमाप्तित्वात्समृतःकालनोदितः ॥ ४१७ ॥ सतेनकर्मणायुक्तःप्राप्तस्तुयमशासनम् ॥ ना
नायोनिषुचोत्पत्यभूतलंपुनरागतः ॥ ४१८ ॥ १ । ३ । ५ । ८ । १२ । १६ । २० । २३ । २७ । ३२ । ३७ वर्षेषुकष्टम् ॥ परमा
युर्वर्षाणि ७१ ॥ ८५ अथकलापिकयोगः ॥ योगेकलापिकेजातोनरःपूर्वंहिब्राह्मणः ॥ देशेकलिंगेन्यवसद्धनधान्यसमन्वितः ॥ ४१९ ॥
विद्याभ्यासस्तथाऽथदेवतानांचपूजकः ॥ लुब्धेनत्वेकदाविप्रकृतंकर्माऽतिदारुणम् ॥ ४२० ॥ देवद्रव्यंहृतंतेनतथाचभूषणानिवै ॥
कालेनकालेगतेविप्रोमृत्वायातोयमालयम् ॥ ४२१ ॥ तत्रभुक्त्वापुण्यफलंतथाहिदुष्कृतस्यवै ॥ यातोऽधुनामर्त्यलोकंपुत्रदारादि
संयुतः ॥ ४२२ ॥ ६ । ९ । ११ । १५ । २५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ ७५ ॥ ८६ ॥ अथकोपरीयोगः ॥ कोपरीयोगे

जातोयोगौडदेशेऽवसत्पुरा ॥ बाहुजोभीमसेनश्चविख्यातःसर्वदाभुवि ॥ ४२३ ॥ एकस्मिन्समयेराजामृगयार्थवनंगतः ॥ हतातत्रसगर्भा
हिरणीनिर्दयालुना ॥ ४२४ ॥ महतातेनपापेनशीघ्रंयातोमृतिंततः ॥ यमालयेतुतत्पापंभुक्त्वाजातोऽधुनाभुवि ॥ ४२५ ॥ तत्पापेन
मृतातस्ययोषाचापिसगर्भिणी ॥ हाटकस्यमृगींदत्त्वासुखंचापिभविष्यति ॥ ४२६ ॥ १० । २० । २५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि
८० ॥ ८७ अथकुण्डनयोगः ॥ कुंडनयोगेचयोजातः पूर्वजन्मनिकिरातकः ॥ कौशलेशइतिख्यातःपत्नीतस्यसुधाकरी ॥४२७॥पिता
तस्यमहाराजश्चक्रवर्तीदयाकरः ॥ कौशलेशोभ्रष्टमतिःपरस्त्रीरतिलम्पटः ॥ ४२८ ॥ प्रजाश्चव्याकुलीकृत्वाददौदंडंदिनेदिने ॥ महाराजे
नपुत्रःसभवनान्निष्कासितोझटिति ॥ ४२९ ॥ वनाऽद्रिनिकटेविप्रसमृतःपापभाक्खलः ॥ यमलोकेऽभवत्प्राप्तस्ततश्चनरकेगतः ॥ पश्चा
न्मानुष्यमापन्नःकुत्सितःपुत्रवर्जितः ॥ ४३० ॥ १ । ८ । १४ । २० । २७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ ६१ ॥ ८८ अथकंसारि
योगः ॥ कंसारियोगेजातोयोवङ्गदेशेऽवसत्पुरा ॥ कृष्णदत्तइतिख्यातोदयालुः शास्त्रकोविदः ॥ काव्यकर्ताधनीमानीचंचलश्चतुरः
सुधीः ॥ शिवस्यस्थापनंकृत्वातथारामस्यकारितम् ॥ ४३१ ॥ वृषोत्सर्गंजलोत्सर्गंकृत्वासचविधानतः ॥ एवंहिन्यवसत्तत्रबहुवर्षगता
गतेः ॥ ४३२ ॥ आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः ॥ पत्नीतस्यसतीजातास्वर्गलोकमुभौगतौ ॥ ततःपुण्यक्षयेजातेपुनरागत्य
भूतले ॥ ४३३ ॥ १ । ३ । ७ । ९ । १३ । १७ । २० । २३ । २८ । ३२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥८९॥ अथकैरातयोगः॥
कैरातयोगेयोजातःपूर्वजन्मनिपादजः ॥ प्रभुदासइतिख्यातःपत्नीतस्यमहेश्वरी ॥४३४॥ कृषिकर्मोद्यमेमग्नोधान्यंचबहुसंचितम् ॥ एक
स्मिन्समयेविप्रसाधवस्तत्रचागताः ॥ ४३५ ॥ प्रावृट्कालेचतेनैवबहुशोह्याहृताश्चते ॥ स्वगृहेस्थापयित्वाचपरिचर्य्यामथाकरोत् ॥

॥ ४३६ ॥ आमतायांचशरदिदत्त्वातेनप्रहर्षिताः ॥ वस्त्राणिचाथपात्राणिपुस्तकानिबहून्यपि ॥ ४३७ ॥ एवंहिन्यवसत्तत्रबहुवर्षगता
गतेः ॥ आयुषस्तुसमाप्तित्वात्समृतः कालचोदितः ॥ ४३८ ॥ पुण्यात्स्वर्गंगतःसोथपुनरागत्यभूतले ॥ सर्वसौख्ययुतोनित्यंत्रिंशद्वर्षे
तिकष्टितः ॥ सप्तत्यब्दोत्तरेविप्रजीवनंतस्यदुर्लभम् ॥ ४३९ ॥ ९० अथकरजाम्बुकयोगः ॥ कश्चित्तुबाहुजःपूर्वंकर्मनाशानदीतटे॥धन
धान्यसमृद्धस्तुबहुग्रामाधिपस्तदा ॥ ४४० ॥ नानापुण्यार्जनंकृत्वादेवीचपूजिताभृशम् ॥ एकस्मिन्समयेविप्रमदालीढोबभूवह॥४४१॥
भ्रातृकन्याकिशोरीचसुन्दरीचाऽतिशोभना ॥ बलादाकर्षितातेनपुनश्चरमणंकृतम् ॥४४२ ॥ साचहालाहलंपीत्वामृताचलोकशंकया ॥
एवंकालेव्यतीतेतुबाहुजः पंचतांगतः ॥४४३॥ सतेनकर्मणायुक्तः प्राप्तस्तुयमशासनम् ॥ तिर्य्यग्योनिशतंभुक्त्वामानुषत्वंगतोऽधुना ॥
॥४४४॥३।८।१५।२१।३१।३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०५ ॥९१ अथकमालयोगः ॥ आसीज्जन्मांतरेचैवपैठनेनगरेवसन् ॥
गांभीर्य्येतिसमाख्यातःपत्नीपुत्रविवर्जितः ॥४४५॥ शूरत्वेचसदामग्नोगीतवाद्यपरायणः ॥ एकस्मिन्समयेविप्रभाविनोर्थस्यवैबलात् ॥
॥४४६॥नृपानुकम्पयाविप्रगतस्त्वरिपुरांतिके ॥ कृत्वायुद्धंविशेषेणसंग्रामेचतदामृतः॥४४७॥ इंद्रलोकंतदागत्वानंदनेचवनेशुभे ॥ षष्टि
वर्षसहस्रांतेपुनरागत्यभूतले ॥ सर्वसम्पद्युतोमानीपत्नीपुत्रसमन्वितः ॥४४८ ॥ १।४।८।१३।१९।२५।३०। ३७ वर्षेषुकष्टम् ॥ परमायु
र्वर्षाणि ॥ ९२ ॥ ९२ अथकालयोगः ॥ कालयोगेनरोजातः कर्णाटेपूर्वजन्मनि ॥ गंधर्वेतिसमाख्यातोब्राह्मणः शास्त्रवर्जितः ॥४४९॥
श्रद्धाद्यानार्चनंकृत्वागयाश्राद्धमथाऽकरोत ॥ काम्यश्राद्धंचकृतवांस्तत्रैवाल्पविधानतः ॥ ४५० ॥ संप्राप्यभवनंस्वीयंकृतवान्कर्म
दारुणम ॥ हत्वापत्नींस्वयंततत्रब्राह्मणस्यच ॥ ४५१ ॥ वैरभावेनभोविप्रकृतंकर्मजुगुप्सितम् ॥ एवंचन्यवसत्तत्रबहुवर्षगता

गतेः ॥ ४५२ ॥ आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः ॥ सतेनकर्मणायुक्तःप्राप्तस्तुयमशासनम् ॥ बहुवर्षसहस्रांतेपुनराग
त्यभूतले ॥ ४५३ ॥ १ । ४ । ६ । १२ । १७ । २२ । २६ । ३६ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७३ । ९२ अथकंकयोगः ॥ कंक
योगेनरोजातःसर्वपूज्योधनाधिपः ॥ ब्राह्मणःकौंकणेदेशेशिवभक्तिपरायणः ॥ ४५४ ॥ एकस्मिन्समयेविप्रगुरुस्तस्यसमागतः ॥ कृतवा
न्नाऽऽदरंतस्यपापिष्ठःपशुबुद्धिकः ॥ ४५५ ॥ गुरुश्वविमुखोयातःशापंदत्त्वासुदारुणम् ॥ आसप्तजन्मत्वंदुष्टस्ववंशपतितोभव ॥४५६॥ एवं
हिन्यवसत्तत्रबहुवर्षगतागतेः ॥ पुनःसपंचतांप्राप्तोगतोहियमशासनम् ॥४५७॥ पुनर्जन्मपुनर्मृत्युर्जन्ममृत्युःपुनःपुनः ॥ इदंतुसप्तमंजन्म
पुत्रदारविवार्जितम् ॥ ४५८ ॥ द्वितीयेसप्तमेवर्षेदशमेकादशेतथा ॥ षोडशेसप्तविंशेचवर्षेकष्टेनकष्टितः ॥ चतुःषष्टिस्तुवर्षाणिजीवनंप्रा
णिनस्त्विह ॥ ४५९ ॥ ९४ अथकादन्नयोगः ॥ क्षात्रेकुलेसमुत्पन्नःपूर्वजन्मनिमानद ॥ धनधान्यसमृद्धोऽपिदेशेसौराजकेद्विज ॥४६०॥
मेहादिपीडितोऽत्यंतंकृशांगःपांडुरद्युतिः ॥ ऊर्द्धवातादिजापीडाबाल्येस्याद्ग्रहणीगदः ॥४६१॥ तस्यभार्यासदाचारासुस्नेहाभर्तृभक्तितः ॥
रक्तस्रावादिनापीडाजायतेचोदराऽनिलः ॥ ४६२ ॥ तस्याश्चोदरतोगर्भपातंकुर्य्याच्चवैतदा ॥ द्वितीयेतुर्येमासेचपंचमेसप्तमेतथा ॥४६३॥
केनकर्मविपाकेनगर्भोनस्थिरतांव्रजेत् ॥ भृगुरुवाच ॥ शृणुशुक्रप्रवक्ष्यामिपूर्वजन्मनियत्कृतम् ॥४६४॥ व्यभिचारभयाद्धापितयागर्भश्चपा
तितः ॥ अपरंचकृतंकर्मव्यभिचारोयतस्ततः ॥४६५॥ नानाद्रव्याऽपहर्त्रीचकुलेवाक्यप्रलंघनात् ॥ भर्तुश्चचौर्यवृत्तिःस्यात्सत्संगस्यतुवर्ज
नात् ॥ ४६६ ॥ तेनदिष्टेनयद्द्रव्यंहृतंतस्करबुद्धिना ॥ भुक्तंताभ्यांद्विजश्रेष्ठब्राह्मणस्यहृतंधनम् ॥ ४६७ ॥ कालेनतद्धनंभुक्त्वापीडितोदा
रुणग्रहैः ॥ याचनाबहुधाप्राप्तापश्चान्मानुष्यमाप्नुयात् ॥ ४६८ ॥ किंचित्पुण्यप्रभावेणचाऽत्रेदंजन्मवैभुवि ॥ अस्मिञ्जन्मनितृतीयेचगर्भ

पातोऽभिजायते ॥ उभाभ्यांचकृतंकर्मभुज्यतेजन्मजन्मनि॥४६९॥१।६।११।१८।२२।२७।३६वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९२ ॥
९५ अथकोडनयोगः ॥ शुक्रउवाच ॥ भगवन्देवदेवेशश्रुतमेतन्महाद्भुतम् ॥ सहानुगामिन्यानार्य्यागतिंमेब्रूहिचेश्वर॥४७०॥भृगुरुवाच॥
मृतंयदाहिभर्त्तारंयाविशेच्चहुताशनम् ॥ तेनसार्द्धंतुसानारीमुख्यत्वेसहगामिनी॥४७१॥धर्मात्पतिव्रतापूर्वंभवेन्मोक्षगतिर्द्वयोः ॥ अथैषाभू
न्महासाध्वीजाताब्रह्मकुलेधुना ॥ ४७२ ॥ ब्राह्मणीतपसायुक्तासदाभक्तिपरायणा ॥ दानशीलरताचापिपुण्यकर्मान्वितासती॥ ४७३ ॥
दृष्टापत्यौमृतेयातुदिव्याभरणभूषिता ॥ प्राप्ताऽग्नौविधिनाविप्रकृत्वापूजांहरेर्भृशम् ॥ ४७४ ॥ सागतायमराजस्यस्कंधेदत्त्वापदाम्बुजे ॥
वैकुंठेयोगतःश्रेष्ठभूयोऽसौननिवर्तते ॥ ४७५ ॥ १।८।१०।२०।२५। वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७७ ॥९६अथकर्कन्धुयोगः॥
कर्कंधुयोगेयोजातोयशस्वीपूर्वजन्मनि॥काश्याहिचोत्तरेभागेब्राह्मणस्यकुलेतदा॥४७६ ॥कृषिकर्मानुरक्तश्चभव्यकांतिर्दयापरः ॥ पत्नी
तस्यमहाभ्रष्टापापकर्मरतासदा ॥ ४७७ ॥ एकस्मिन्समयेविप्रभाविनोर्थस्यवैबलात् ॥ सविप्रस्तीर्थकेगत्वापरिवारेणसंयुतः ॥ ४७८ ॥
व्यभिचारःकृतस्तत्रप्रयागेद्विजसत्तम ॥ एवंनिवसतस्तत्रबहुवर्षगतागतैः ॥ ४७९ ॥ पत्नीत्यागस्तुनकृतोगोपितंचस्मरंद्विज ॥ सविप्रः
पंचत्वंप्राप्तोभुक्त्वाभोगांश्चशाश्वतान् ॥ मर्त्यलोकेसमागत्यनानादुःखसमन्वितः ॥ ४८० ॥ १ । ३ । ८।१३। १६॥ २०॥
२७।३०।३४।४०। वर्षेषुकष्टम् । परमायुर्वर्षाणि ॥ ६९ । ९७ अथकंजकारूषयोगः॥ दशार्णवेबाहुजःपूर्वजन्मनृसिंहदेवाख्यइतिप्र
सिद्धः ॥ सत्साहसीधर्मकृपाविवेकीप्रपंचत्यागीगुणिनांगुणज्ञः ॥ ४८१ ॥ परोपकर्त्ताप्रचुरंधनाढ्योनिर्द्वेषविद्यापरमःपवित्रः॥४८२ ॥
बहुधःपंचत्वंप्राप्तोऽथयोचतदाऽनघ ॥ ४८३ ॥ दिव्यवर्षसहस्राणिस्वर्गभोगीबभूवह ॥ संजातोब्राह्मणःसोऽपिअंतर्वेद्यांद्विजालये ॥

॥४८४॥१।३।८।१२।१५।२०।२७।३१।३२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०५ ॥ ९८ अथक्रोपयोगः ॥ कश्चिद्वैश्यकुलेपूर्वदेशेहिकु
कुटेऽपिच ॥ गोपतिश्चेतिविख्यातोवैश्यवृत्तिपरायणः ॥ ४८५ ॥ एकस्मिन्समयेविप्रकृतंपापार्जनंभृशम् ॥ ब्राह्मणस्यहृतंद्रव्यंनदत्तंलो
भहेतुना ॥ ४८६ ॥ ततोयमपुरंगत्वाससहायोद्विजोत्तम ॥ भुक्त्वानानाविधान्भोगान्बहुवर्षसहस्रकम् ॥ ४८७ ॥ पुनर्जन्मपुनर्मृत्युर्जे
न्ममृत्यूधरातले ॥ गर्भपातःप्रजायेतपुत्रहीनंस्तथानघ ॥ ४८८ ॥ १।४।१०।१५।२०।२५।२९। ३५ ॥ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि
९८ ॥ ९९ अथकलिसंज्ञकयोगः ॥ सीमावादरतःकश्चिद्ब्राह्मणःपूर्वजन्मनि ॥ तेनतत्रद्विजःकश्चिद्घातितोभूमिलोभतः ॥ ४८९ ॥
सहायपंचयुक्तेनकृतंकर्माऽतिदारुणम् ॥ तत्पापजान्महाघोरान्नरकान्प्राप्यदारुणान् ॥ ४९० ॥ बहुकालांतरेचैवमातृकुक्षेःपुनर्भवः ॥
कापटचाचरणोभ्रष्टःपुत्रसंततिवर्जितः ॥ ४९१ ॥ रोगेणमहताग्रस्तश्चोद्वेगोमानसीव्यथा ॥ प्रथमेद्वितीयेकष्टंचतुर्थेसप्तमेपिच ॥४९२ ॥
द्वादशेविंशकेवर्षेपीडाभवतिदारुणा ॥ परमायुषोऽब्दाश्चशतं१०० कथिताःप्राणधारणे ॥ ४९३ ॥ अथकुलेखायोगः ॥ राजपुत्रोऽभवत्क
श्चिद्धर्मशास्त्रार्थकोविदः ॥ गत्वाशत्रुपुरंविप्रकदाचिन्मदसंयुतः ॥ ४९४ ॥ ददाहतत्पुरंशत्रोस्तत्क्षणेपंडितःपुनः ॥ तत्रैकोब्राह्मणोदग्धो
वृद्धोविद्याविशारदः ॥ ४९५ ॥ पापमाचरितंतेनचाऽज्ञानाद्ब्रह्मघातनम् ॥ अथोयमाज्ञयासर्वान्भुक्त्वानरकांश्चशाश्वतान् ॥ ४९६ ॥आसी
ज्जन्मनियानारीचम्पकारण्यसन्निधौ ॥ रूपमञ्जरीनाम्नावैधनधान्यसमन्विता ॥ ४९७ ॥ भ्रातृपत्नींप्रतिद्वेषंकृतवत्यतिदारुणम् ॥ पतिं
प्रतिचविद्वेषाद्बहुकालगतागतैः ॥ ४९८ ॥ रूपमंजरीपापात्मापरपुरुषरताऽधमा ॥ साम्प्रतानरकंभुक्त्वाह्यपिवर्षसहस्रकम् ॥४९९॥ पुनरा
गत्यमेदिन्यांजातायाताचयौवनम् ॥ पूर्वपापानुसारेणपतिर्लब्धोनयाधुना ॥५००॥३।६।९।१५।२०।२६।२९।३१वर्षेषुकष्टम्॥परमायुर्व

र्षाणि ७१।१०१ अथकर्पलशयोगः ॥ कलिंगदेशेप्राग्विप्रदासश्चधनसंयुतः ॥ स्वर्णहंब्राह्मणेदत्त्वाश्रद्धावित्तसमन्वितः ॥ ५०१ ॥ जगा
मनैमिषारण्येतत्रजाप्यमथाकरोत ॥ तत्रभाविबलात्पुत्रनृपश्चैकः समागतः ॥ ५०२॥ दृष्ट्वाशूद्रंतपश्चर्य्यांकुर्वंतंद्विजसत्तम ॥ खड्गेनघातितो
राज्ञागतोऽसौचेंद्रलोककम् ॥ ५०३ ॥ बहुवर्षसहस्रांतेचागतोधरणीतले ॥ सर्वसम्पद्युतोमानीयुवभावेगदार्तिकः ॥५०४ ॥ १।४।८।
१२।२२।२७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८० ॥ १०२ अथकज्जराननयोगः ॥ बभूवबाहुजःकश्चिद्देशेपंचनदेपुरा ॥ धनधान्यस
मायुक्तःपापकर्मामहोद्यमी ॥ ५०५॥ विप्रसंगगतः सोपिप्रयागेचतदानघ॥स्नातश्चमृगगेभानौधूर्तःकर्मक्रियोज्झितः॥५०६॥संप्राप्यस्व
गृहंशीघ्रंकृतवान्कर्मदारुणम् ॥ ग्रामेनिवसतस्तस्यक्षत्रियस्यद्विजोत्तम ॥ ५०७ ॥ ददाहभवनंरम्यंवैरभावात्पुराऽनघ ॥ तत्रैकावत्सरीद
ग्धाजीवाश्चापिविशेषतः ॥ ५०८ ॥ कालयोगेनमृत्वावैसंगत्वायमशासनम्॥ कीटयोनिर्विहंगश्चकुक्कुटोवृकतांगतः॥५०९॥पश्चाच्चमानु
षीयोर्निचागतोधरणीतले ॥ मुखेपार्श्वेतथापृष्ठेलक्षणैर्लक्षितोऽधुना ॥५१०॥१।३।८।१२।१७।२३। २७।२९ वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ४९॥ १०३ अथकीलकयोगः ॥ कश्चिद्विप्रकुलेयश्चधर्मिष्ठोवित्तसंयुतः ॥ उदरेवातजारोगागुल्माद्याश्चार्द्धहृद्व्यथा५११॥
मेहाद्याःस्वल्पवीर्याश्चह्यक्षिपांडूदरामयः ॥ जायतेशीर्षजापीडाबाल्येस्याद्ग्रहणीगदः ॥ ५१२ ॥ शरीरेजायतेवह्निरूपघातोव्रणादिक
म् ॥ वामांगेदक्षिणेभागेलांछनंतिलमाषयोः ॥ ५१३ ॥ २।४।६। १२।१५।२०॥ २७।३१। ३८ वर्षेषुकष्टम् ॥ परमायुर्व
र्षाणि ॥ ७० ॥ १०४ अथकलातीतयोगः ॥ कलातीतयोगेयोजातः सपूर्वंब्राह्मणोऽभूत् ॥ धनधान्यसमृद्धश्चशास्त्रवेत्ताजितेन्द्रियः ॥
॥५१४॥ गौर्मृतातस्यहस्तेनदैवयोगात्कथंचन॥ तेनपापेनमृत्वासगतश्चयममंदिरम् ॥५१५॥ नरकान्भुक्त्वाबहूनब्दाँश्चागतोधरणीतले॥

करेचहुंटहृपंहिपापश्चिह्नंमहस्वते ॥ ५१६ ॥ ८ । १५ । २० । २३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८५ । १०५ अथकमेन्दुयोगः ॥
कमेन्दुयोगेयोजातः पूर्वजन्मनिब्राह्मणः ॥ पौराणिकींगुणातीतांकथांकृत्वातदाऽनघ ॥५१७॥ तस्यस्थलेसमायातासुन्दरीनवयौवना॥
बलादाकर्षितातेनसगर्भापितदाद्विज ॥ ५१८ ॥ हठाच्चरतिकरणेनगर्भस्रावोबभूवह ॥ तेनपापानुसारेणगतोऽसौयमशासनम् ॥
॥ ५१९ ॥ बहुवर्षसहस्रांतेपुनरागत्यभूतले ॥ विचित्रकाव्यरचनोद्रव्यभारसमन्वितः ॥ ५२० ॥ १ । ७ । १० । १५ । १८ । २१
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ नंदतेवर्द्धतेनित्यंसर्वसौख्येनसंयुतः ॥ ५२१ ॥ १०६ अथकश्यपारुणयोगः ॥ कश्यपारुणके
जातः पूर्वजन्मनिसंकरः ॥ ब्रह्मकर्मरतोनित्यंशौचाऽऽचारसमन्वितः ॥ ५२२ ॥ योगाभ्यासरतोधीमान्सर्वदाधर्मसाधकः ॥ एकस्मि
न्समयेविप्रगौरेकाचसमागता ॥ ५२३ ॥ व्याघ्रेणखेदितातस्यसमीपेधावतीभृशम् ॥ तेनभक्तेनक्रोधेनव्याघ्रोपरिधावनंकृतम् ॥५२४ ॥
व्याघ्रेणत्रोटितश्चासौसंकरःपंचतांगतः ॥ स्वर्गवासीबभूवाऽपिदिव्यवर्षसहस्रकम् ॥ ५२५ ॥ ततःपृथ्व्यांसमागत्यधनधान्यसमन्वितः॥
परमोदारोभक्तश्चप्रतापीचजनेश्वरः ॥५२६॥ १ । २ । ६ । ७ । ९ । १३ । १८ । २४ । २९ । ३३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १००॥
॥१०७ अथकुन्दमर्दकयोगः ॥ कुंदमर्दकयोगेचयोजातोऽत्रद्विजोत्तम ॥ पशुवज्ज्ञानभ्रष्टश्चह्यज्ञातःसुखदुःखयोः ॥५२७॥आसीज्जन्मांत
रेचैवब्राह्मणोवेदपाठकः ॥ विद्यादानंकृतंनैवब्राह्मणाभोजितानहि॥५२८॥१०८अथकुमुदयोगः॥नाऽतिथिभ्योददावन्नंश्राद्धंचापिकदाच
न ॥तेनपापानुसारेणमूकत्वंजायतेपुना॥५२९॥१।२।४।८।१३।१९।२१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १००॥ इतिकवर्गादियोगाः ॥
इतिश्रीयोगसागरेसमार्चितदेशेभृगुकभृगुसंवादेककाराद्यष्टोत्तरशतयोगकथनंनामचतुर्थप्रकरणम् ॥ ४ ॥ १ अथचक्रपाणियोगः ॥

कश्चिद्विप्रोमहासाधुश्चारुवर्णःप्रतापवान् ॥ आचारकुलधर्मज्ञोदेवाग्निद्विजवत्सलः ॥ १ ॥ संयुतोवातपित्ताभ्यांकिंचिद्वित्तसमन्वितः॥
तस्यभार्य्यासदाऽऽचारापतिप्रीतिपरायणा ॥ २ ॥ एकस्मिन्समयेविप्रब्राह्मणेनतदाद्विज ॥ ब्राह्मणस्यसुतःश्रेष्ठःसर्वालंकरणैर्युतः ॥ ३ ॥
स्वगृहेचागतःशीघ्रंघातितोनिर्दयालुना ॥ गोपितोधस्मरस्तेनपापमुग्रमुपार्जितम् ॥ ४ ॥ एकदाचन्द्रमोग्रस्तेमहापर्वणिशक्तितः ॥
सत्पात्रेचद्विजेदत्तागौस्तथापिधनंबहु ॥ ५ ॥ तेनपुण्यावशेषेणसजातोत्रधनेश्वरः ॥ पुत्रकन्याविहीनश्चभूत्वापिम्रियतेखलु ॥ ६ ॥ १ ।
३ । ८ । ११ । १६ । २२ । २७ । ३२ । ३६ । ४० एतद्वर्षेभवेत्पीडाराजरोगस्तथानघ ॥ शतमब्दाआयुषश्चप्रायश्चित्तेकृतेसति ॥७॥
२ अथचक्रधरयोगः ॥ पूर्वजन्मनिराजेंद्रः प्रतापादधिकस्तदा ॥ शोणभद्रनदीतीरेन्यवसत्पूर्वजन्मनि ॥ ८ ॥ प्रतापलंकनामाचह्युग्र
दंडःप्रतापवान् ॥ सराजाखेटकेगत्वासहसैन्येनवैतदा ॥ ९ ॥ व्याघ्राद्याघातितास्तेनसूकराःशशकाअपि ॥ वनेकोलाहलंकृत्वा
निवृत्तःसहसैनिकैः ॥ १० ॥ स्वगृहेपुनरागत्यहर्षगद्गदमानसः ॥ एकस्मिन्समयेविप्रक्षुत्तृड्भ्यांव्याकुलश्चसः ॥ ११ ॥ इतस्ततश्चव्यच
रत्पर्यटन्निर्जनेवने ॥ कुलाद्रिनिकटेविप्रसराजापंचतांगतः ॥ १२ ॥ पापात्पापफलंभुक्त्वायोनिंभुक्त्वाकथंचन ॥ अशीतिवर्षसहस्रांतेचा
गतोधरणीतले ॥१३॥ नश्यामोनाऽतिगौरश्चदीर्घनेत्रोविशालकः ॥ दक्षिणांगेभवेच्चिह्नंव्यापारकुशलःसुधीः ॥ १४ ॥ जन्मतःप्रथमेमा
सेवर्षेपीडाप्रजायते ॥ अष्टमेमनुवर्षेवाषोडशेर्विंशकेपिवा ॥१५॥ कष्टेनातिभवेत्पीडामासिमासिचहायने ॥ प्राप्तेषष्टितमेवर्षेजीवनंतस्यदु
र्लभम् ॥१६॥३ अथचिंतामणियोगः ॥ भृगुरुवाच ॥ चिंतानणोचजातायापूर्वजन्मनिचांगना ॥ ब्राह्मणस्यगृहंप्राप्यनकिंचित्सुकृतंकृतम्॥
॥१७॥ नाऽन्नंदत्तंचाऽतिथिभ्यःकुक्कुरायापिनैवच ॥ एकदाचकृतंकर्मदारुणंचातिनिंदितम् ॥ १८ ॥ सगर्भाखलुमार्जारीप्रक्षितातत

ल्पमिव ॥ मृतासातेनपापेनवैधव्यंभजतिद्विज ॥ १९ ॥ तेनैवदुष्कृतेनाऽथपुत्रहीनाद्विजोत्तम ॥ इदंजन्मतृतीयंतुब्रह्मवंशेसमुद्भृतम् ॥
॥ २० ॥ १ । ४ । १० । १३ । २१ । २८ । ३१ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७८ ॥ ४ अथचांद्रिकयोगः ॥ चांद्रिकेच
नरोजातःपूर्वजन्मनिबाहुजः ॥ धनधान्यसमृद्धस्तुभक्तिमान्साहसीक्षमी ॥ २१ ॥ दत्तानितेनदानानिब्राह्मणेभ्युत्तभक्तितः ॥ इंद्रप्र
स्थस्यनिकटेतपश्चर्य्यामथाऽकरोत् ॥ २२ ॥ एकस्मिन्समयेविप्रब्राह्मणःशास्त्रकोविदः ॥ आमतस्तस्यनिकटेविवादमकरोदसौ
॥ २३ ॥ परस्परमभूद्युद्धंशास्त्रवादेनवादकृत् ॥ बाहुजेनप्रकोपाद्वैब्राह्मणःसप्रताडितः ॥ २४ ॥ यातेबहुतिथेकालेबाहुजः पंचतां
गतः ॥ सतेनकर्मणायुक्तःप्रातस्तुयमशासनम् ॥ २५ ॥ यमलोकात्परिभ्रष्टश्चागतोभूमिमंडले ॥ बाल्येदुःखसमासक्तोयुवत्वेचाथजाय
ते ॥२६॥ कम्पंतेसर्वगात्राणिब्राह्मणस्यप्रताडनात् ॥ षट्षष्टितमवर्षेचपंचत्वंचभविष्यति ॥२७॥ इति ॥ ५ अथचेतयोगः ॥ चेतयोगेचयोजातः
पूर्वजन्मनिपादजः ॥ कौशलेनगरेचैवन्यवसत्पूर्वजन्मनि ॥२८॥ दयालइतिविख्यातःपत्नीपुत्रसमन्वितः ॥ दासकर्मणिसदानिष्ठोब्राह्मण
स्यतदानघ ॥२९॥ कृत्वास्वल्पांतदापूजांपार्थिवस्यद्विजोत्तम ॥ धनंगृहीतंविपुलंदत्तवांस्तच्चपर्वणि ॥३०॥ तीर्थाऽवगाहनंकृत्वास्वगृहे
पुनरागतः ॥ भगिनीपुत्रःसमायातोद्रव्यभारसमन्वितः ॥३१॥ स्वगृहेस्थापयामासमासमेकंतदाऽनघ ॥ तस्यद्रव्याणिसर्वाणिगृहीत्वाछ
लसंयुतः ॥ ३२ ॥ भवनान्निष्कासितःसोऽथपापमाऽऽचरितंत्विदम् ॥ पापात्पापफलंभुक्त्वापुनरागत्यभूतले ॥३३॥ १।३।९।१५।२१
।२७। ३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥५५॥ ६ अथचर्पटयोगः ॥ चर्पटेचनरोजातःपूर्वजन्मनियामुने ॥ प्रवर्षणइतिख्यातोबाहुजश्चप
राक्रमी ॥ ३४ ॥ धनमैश्वर्य्यमतुलंसहसैन्येनराजते ॥ चौरविद्यासुनिपुणोमार्गावरोधनेरतः ॥ ३५ ॥ द्रव्यलोभेनसततंहिंसाकर्मपरा

यणः ॥ आयुषस्तुसमाप्तित्वाद्द्विजः पंचतांगतः ॥ ३६ ॥ सतेनकर्मणायुक्तः प्राप्तस्तुयमशासनम ॥ षष्टिवर्षसहस्रांतेचागतोधर
णीतले ॥ ३७ ॥ १ । ४ । ८ । १६ । २० एतद्वर्षेपीडाकष्टम् ॥ नानाउपद्रवः ॥ परमायुर्वर्षाणि १०२॥७ अथचांडालयोगः ॥ आसी
त्पूर्वंमहाभागचर्मकारोगुणाकरः ॥शतद्रुनिकटेचैवन्यवसत्पूर्वजन्मनि॥३८॥द्रव्यंतुविपुलंकृत्वापथिकूपाश्चनिर्मिताः ॥ कासारवाप्योनि
र्माप्यतथातीर्थाटनंकृतम् ॥ ३९ ॥ आयुषस्तुसमाप्तित्वात्समृतोगदपीडितः ॥ बभूवपादजः सोपिपुनर्भूत्वाचवैश्यजः ॥ इदंजन्मतृतीयं
चगौरांगोमतिमान्सुधीः ॥ ४० ॥ १।३ । ७ । १२ ।१४।१९।२९ वर्षेषुकष्टम् ॥अल्पमृत्युः ॥ परमायुर्वर्षाणि ६२ ॥ ८ अथचंचलयो
गः ॥ चंचलेचनरोजातःपूर्वजन्मनिब्राह्मणः ॥ शास्त्राभ्यासीगुणज्ञश्चचंचलश्चातिविक्रमी ॥४१॥एकस्मिन्समयेविप्रदेशेचदक्षिणेगतः॥
तत्रविप्राश्चबहवोविद्वांसोधर्मवित्तमाः॥४२॥ विद्याविलासेतेषांहिराजकीयमचीकरत् ॥ तेनभूपेनविप्रायद्रव्यंदत्तंसुपुष्कलम् ॥४३॥ स्व
गृहंधनमादायासन्मार्गेव्याकरोद्व्ययम्॥वेश्यायाश्चददौ द्रव्यंनृत्यगीतमनोरथः ॥४४॥ एवंचापिगतेकालेतस्यमृत्युरभूत्पुरा ॥ पापात्पाप
फलंभुक्त्वाबहुवर्षसहस्रकम् ॥ पुनरागत्यमेदिन्यांकिंचित्पुण्यप्रभावतः ॥ ४५ ॥ १।३।६।१०।११।१७।२०।२६ वर्षेषुकष्टम् ॥ पर
मायुर्वर्षाणि ८५॥९अथचपलाचलयोगः॥चपलाचलेनरःपूर्वंगुर्जरेहितदावसत्॥दामोदरइतिख्यातःसपत्नीकःसपुत्रकः॥४६॥ शिवस्या
ऽऽराधनेनिष्ठोविरक्तःसत्यवागसौ ॥ अहर्निशंजपान्कुर्वन्स्वदेवाग्रेस्थितःसदा॥४७॥एकस्मिन्समयेविप्रपूजांतेह्यातुरागतः ॥ फलंपत्रंघृतं
मिष्टंखादितंतेनचातुना ॥ ४८ ॥ क्रोधेनमहताविप्रघातितश्चमृतःखलु ॥ गतेस्वल्पतिथेकालेसविप्रःपंचतांगतः ॥४९॥ १।८।१६।२४
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ४६ ॥ १० अथचित्ररेखायोगः ॥ आसीत्पूर्वंगयाक्षेत्रेब्राह्मणोग्रामयाजकः॥ प्रतिग्रहेणसततंपरिवारस्यपो

मकः ॥ ५० ॥ एकस्मिन्समयेविप्रभाविना वैश्यवैबलात् ॥ सचविप्रोतिहर्षेणगयाश्राद्धमथाऽकरोत् ॥५१॥ पत्नीतस्यमहादुष्टाकृत्वाद्वंद्वं
विशेषतः ॥ स्वपतिंव्याकुलंविप्रंनिष्कासितवतीततः ॥ ५२ ॥ वैद्यनाथस्यानिकटेस्थित्वावर्षद्वयंतदा ॥ समृतःस्वर्गकेगत्वापुनरागत्यभूत
लम् ॥ ५३ ॥ राज्याचसुखसम्पत्तिःपुत्रपौत्रसमन्वितः ॥ ५४ ॥ १।३।७।१०।१५।२२।२६।३०।३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९६ ॥
११ अथचित्तसंज्ञकयोगः ॥ द्विजःपूर्वभवेकश्चिद्दासकर्मपरायणः॥ सभार्य्योनर्मदातीरेधनसौख्यसमन्वितः ॥५५ ॥ कृतानितेनदानानि
नानापर्वसुशक्तितः ॥ वेदयुक्तेषुविप्रेषुसत्पात्रेषुविधानतः ॥ ५६ ॥ तथापापंभृशंचक्रेव्यभिचारसमुद्भवम् ॥ ज्येष्ठांत्यक्त्वाऋतुप्राप्तांधर्म
शीलयुतांप्रियाम् ॥ ५७ ॥ रतिंददौकनिष्ठायामनृतौचविमोहितः ॥ ततोयमपुरेप्राप्तःससहायोद्विजोत्तम ॥ ५८॥ भुक्त्वापापफलंपापात्पु
ण्यात्पुण्यफलंतथा॥श्रद्धादानवशात्सोऽत्रगंगायाःपूर्वभागके॥५९॥जातोऽवन्त्यांशास्त्रवेत्ताद्विजवंशेसुशोभने॥ सर्वमेतत्फलंदानात्स्त्रीत्या
गान्मृतपुत्रकः ॥ ६० ॥ प्राप्तेपंचाशत्तमेब्देचाल्पमृत्युर्भविष्यति ॥ प्रायश्चित्तेकृतेविप्रवर्षेसप्ततितमेमृतिः ॥ ६१ ॥ भाद्रेमासितुधवलेनव
म्यांविमलेजले ॥ प्रहरार्द्धेगतेरात्रौपंचत्वंचभविष्यति॥दशजन्मोत्तरेविप्रमुक्तिर्भवतिनान्यथा॥६२॥१२अथचंद्रमोयोगः॥देशेपंचनदेजा
ताबाहुजापूर्वजन्मनि ॥ सान्यजन्मनिवैविप्राजाताप्राग्विप्रपूजनात् ॥ ६३ ॥ प्राग्यत्तयाकृतंकर्मशृणुतच्चद्विजोत्तम ॥ ब्राह्मणेनमहद्द्रव्यंत
द्गृहेस्थापितंचयत् ॥ ६४ ॥ नदत्तंतत्पुनस्तस्मैभुक्तंसर्वमशेषतः ॥ मृतोद्विजश्चतद्दुःखाद्बहुकालगतागतैः ॥ ६५ ॥ पंचत्वंचसवैप्राप्तो
भुक्त्वाचयमशासनम् ॥ पुत्रसंततिहीनोत्रपूर्वपापसमन्वितः ॥ ६६ ॥ निष्कृतिंपरमांतस्यवक्ष्येहंपापनाशिनीम् ॥ पलमानेनब्रह्ममूर्तिःका
र्य्यास्वर्णमयीशुभा ॥६७॥ कदलीपत्रसंयुक्तादेयाविप्रायधीमते॥दानेनाऽनेनसुप्रीताब्रह्मविष्णुमहेश्वराः ॥ पापनाशकराःसर्वेभविष्यंत्यत्र

जन्मनि ॥६८॥ इति ॥ १३ अथचारुयोगः ॥ पूर्वजन्मनिभोविप्रचोच्छिष्टंभक्षितंसदा ॥ रात्र्यंधोजायतेसोऽपिचान्यजन्मनिमानवः ॥ ॥ ६९ ॥ भोजयेद्ब्राह्मणाञ्छत्त्यागोमूत्रंप्राशयेत्तथा ॥ मुच्यतेसचरात्र्यंधात्सर्वसौख्यसमन्वितः॥७०॥ इति ॥ १४अथचामिकयोगः ॥ भूमिदेवकुलोत्पन्नोधर्मिष्ठोधर्मवत्सलः ॥ सत्यनिष्ठःसदाचारःसाधुसेवकसंयुतः ॥ ७१ ॥ तस्यदेहेभवेच्चिह्नंपापजंचात्रजन्मनि ॥ तस्योदरे व्यथानित्यंरुधिरंस्रवतिद्विज ॥ निर्धनोधनसंयुक्तःक्षणेवृद्धिःक्षणेक्षयः ॥ ७२ ॥ १ । २ । ५ । ८।११।१६।२०।२७।३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०५ ॥ १५ अथचिताधरयोगः ॥ पूर्वजन्मनिक्षात्रस्तुविपाशानिकटेवसन् ॥ सेवदासइतिख्यातःशिवस्याराधनेरतः॥ ॥ ७३ ॥ एकस्मिन्समयेविप्रस्वस्त्रीघातमथाऽकरोत्॥तेनपापानुसारेणत्विदानींकष्टसंयुतः॥गणेशायकृतेदानेसर्वाबाधाप्रणश्यति॥७४॥ १६ अथचर्मनीशयोगः ॥ चर्मनीशेचयोजातश्चम्पकारण्यसन्निधौ ॥ भारद्वाजइतिख्यातःपत्नीतस्यपतिव्रता ॥ ७५॥धनमैश्वर्य्यमतुलं व्यापारेनिरतः सदा ॥ कार्पण्येनविमोहाढ्यःकदन्नंकृतवान्सदा॥७६॥मलिनाम्बरधरश्चैवदेहेरूक्षश्चसर्वदा ॥नविप्रेभ्योददौदानंसुकृतंनक दाचन ॥ ७७ ॥ प्राप्तेवार्द्धक्यसमयेद्रव्यशोकेनवैमृतः ॥ सर्पयोनिश्चनकुलोबभूवद्विजसत्तम ॥ ७८ ॥ १ । ४ । ७ । ९ । १२ । २० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९२. ॥ १६ अथपुनरपिचर्मनीशयोगः॥कश्चित्तुबाहुजोजातोवंगदेशेमहाधनी ॥ नानापु ण्यार्चनंकृत्वाब्राह्मणायददौकिल ॥ ७९ ॥ द्रव्यस्वर्णाऽश्वमहिषंभूमिदानंतदाभृशम् ॥ एवंहिन्यवसत्तत्रबहुवर्षप्रमाणकम् ॥ ८० ॥ पुन रागत्यमेदिन्यांसुखसौभाग्यसंयुतः ॥ राजरोगेणविकलोजायतेसचसर्वदा ॥ ८१ ॥ वर्षेद्वादशकेविप्रह्यल्पमृत्युर्भविष्यति ॥ गोशत स्यतुदानेनचाल्पमृत्युर्नबाधते ॥ ८२ ॥ यदिमृत्युर्निवर्तेततदायुःपंचषष्टिकम् ॥ माधवेधवलेपक्षेह्यष्टम्यांनिधनंभवेत् ॥ ८३ ॥

॥ १७ अथछत्रधारीयोगः ॥ छत्रधारिणिनरः पूर्वंसोरठेनगरेवसत् ॥ नानाविलासविभवैःससम्राट्सहसौनकः ॥ ८४ ॥ तस्यभा
र्य्यादुराचाराश्वशुरद्रोहकारिणी ॥ वंचयेत्स्वपतिंनित्यंशौचाचारविवर्जिता ॥ ८५ ॥ एकस्मिन्समयेविप्रप्रयागेमकरेवसन् ॥ कल्पवासं
तदाकृत्वामासमेकंनिरंतरम् ॥ ८६ ॥ तत्रभाविबलात्पुत्रविप्रकन्यांवरांगनाम् ॥ दृष्ट्वाकामातुरोभूत्वाबलादाकर्षितातदा ॥ ८७ ॥
साम्रतारतिसमयेपापमाचरितंत्विदम् ॥ भुक्त्वापापफलंपापात्पुण्यात्पुण्यफलंभृशम् ॥ पुनरागत्यमेदिन्यांपुत्रदारविवर्जितः ॥ ८८ ॥
१ । ८ । ९ । १५ । २० । २४ । २८ । वर्षेषुकष्टम् ॥ व्रणादिज्वरवायुरुधिरजनितपीडा ॥ परमायुर्वर्षाणि १०५ ॥ १८ अथ छमाक
रयोगः ॥ छमाकरेपियोजातस्तपस्वीपूर्वजन्मनि ॥ पत्नीपुत्रविहीनश्चब्रह्मचर्य्यपरायणः ॥ ८९ ॥ एकस्मिन्समयेविप्रलोभाकृष्टेनचेत
सा ॥ परनारीरतंतत्रकृत्वापापंनिरंतरम् ॥ ९० ॥ तदर्थेचोरितंद्रव्यंतदातेनद्विजोत्तमः ॥ समृतोगिरिमध्येचगतोसौयमशासनम् ॥
बहुवर्षसहस्रांतेपुनरागत्यभूतले ॥ ९१ ॥ १ । ५ । ११ । १७ । २१ । ३६ वर्षेषुकष्टम् विशेषतः । परमायुर्वर्षाणि ८७ ॥ १९
अथजयजीतयोगः ॥ जयजीतेनरोजातः कीकटेहिवसन्पुरा ॥ शक्तिवर्मेतिविख्यातः सर्वसौख्येनसंयुतः ॥ ९२ ॥ ब्राह्मणस्यप्रसंगेनक
थांश्रुत्वाविशेषतः ॥ पर्वस्वपिचतेनैवब्राह्मणाभोजिताभृशम् ॥ ९३ ॥ तीर्थेतीर्थेकृतासेवाऋषीणांचपुनःपुनः ॥ एकस्मिन्समयेविप्रक्रु
तंकर्माऽतिदारुणम् ॥ ९४ ॥ दासपुत्रस्ताडितश्चस्थूलेनलकुटेनवा ॥ ९५ तेनपापानुसारेणभुक्त्वानरकयातनाम् ॥ ९५ ॥ नरकाद्विप्रनिः
सृत्यचागतोधरणीतले ॥ उग्रबुद्धिर्विलासीचधनधान्यसमन्वितः ॥ ९६ ॥ १ । ६ । ९ । १५ । २३ । २९ । ३५ । ४० वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि७४॥२०अथजवापांगीयोगः ॥ उज्जयिन्यांपुरिपूर्वंबाहुजश्चप्रतापवान् ॥ महाशूरोऽतिमतिमान्पुत्रदारसमन्वितः ॥९७ ॥

एकस्मिन्समयेविप्रपरदेशेतदागतः ॥ नृपस्यपरिचर्य्यायांकृत्वाप्राप्तिंनिरंतरम् ॥ ९८ ॥ तेनभूपेनक्षत्रायकन्यादत्ताविधानतः ॥
तस्यराज्येप्रधानत्वंबभूवद्विजसत्तम ॥ ९९ ॥ नृपकन्ययाकदाचिद्वैकटुवाक्यंप्रभाषितम् ॥ बाहुजेनातिक्रोधेनभार्य्याचापिविपादिता ॥
तेनासौपुत्रहीनश्चक्रंदतेसर्वदाखलः ॥ १०० ॥ १ । १० । २० । ३१ । ४० । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६६ ॥ २१ अथझर्झरी
योगः ॥ आसीज्जन्मांतरेचैवपादजःशरयूतटे ॥ भौमदासइतिख्यातःपुत्रस्त्रीधनसंयुतः ॥ १०१ ॥ तस्यकन्यायौवनेनवरयोग्याबभूवह ॥
कृतवान्विधिनातस्याउद्वाहंचतदानघ ॥ १०२ ॥ धनलोभेनशूद्रःसदत्त्वावृद्धवरायताम् ॥ जामाताचमृतस्तत्रपापमाचरितंत्विदम् ॥
॥ १०३ ॥ तेनपापानुसारेणभुक्तानरकजंफलम् ॥ पुनरागत्यमेदिन्यांधनधान्यसमन्वितः ॥ कन्याश्चबहवोजातापुत्रोनैवद्विजोत्तम ॥
॥ १०४ ॥ १ । ५ । ८ । १३ । १८ । २४ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५७ ॥ २२ अथझामरीयोगः ॥ झामरीयोगेयोजातःपूर्वज
न्मनिब्राह्मणः ॥ कन्योद्वाहःकृतस्तेनसम्बन्धीनिहतस्तदा ॥ १०५ ॥ द्रव्यार्थंचभाविबलात्कृत्वायुद्धंविशेषतः ॥ पापाच्चनरकंगत्वाकुंभी
पाकंचभोद्विज ॥ १०६ ॥ षष्टिवर्षसहस्राणिकृमियोनौबभूवह ॥ किंचित्पुण्यवशात्पुत्रपुनर्वैमानुषोऽभवत् ॥ १०७ ॥ १ । ४ । ६ ।
९ । १२ । १८ । २१ । २७ । ३१ । ३६ । ४० । ४५ । वर्षेषुकष्टम् ॥ ज्वरवमनगुल्मवातपित्तशुक्रदोषप्रमेहनेत्रांध्यजातम् ॥ परमायुर्व
र्षाणि ७७ ॥ १०८ । २३ अथचेतायोगः ॥ धर्मसेनिर्नृपस्त्वेकःपूर्वजन्मनिगुर्जरे ॥ पत्नीहारवतीतस्यपातिव्रत्यपरायणा ॥ १०९ ॥
सोपिराजावलीश्रेष्ठःपापिष्ठश्चदुरासदः ॥ प्रजानांदंडनेरक्तोद्रव्यलोभेनचेतसा ॥ ११० ॥ परदाराभिगमनःपरनिंदापरायणः ॥ विनाऽप
राधंभोविप्रप्रजाश्चबहुघातिताः ॥ १११ ॥ ददाहनगराण्याहोसमृतोविषदोषतः ॥ सतेनकर्मणायुक्तःप्राप्तस्तुयमशासनम् ॥ षष्टिवर्षसहस्रांते

पुनरागत्यभूतले ॥ ११२॥ १ । ३ । ९ । १५ । २० । २६ । २९ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ १०७ ॥ २४ अथचामीकरयो
गः ॥ पूर्वजन्मनियानारीखशदेशेसदाऽवसत् ॥ चिंतामणिरितिख्यातापतिस्तस्याहताशुभः ॥ ११३ ॥ दम्पतीप्रीतिवशगौतीर्थावगा
हनेगतौ ॥ मार्गेवैश्यसुतोभव्योद्रव्यंदत्त्वाचपुष्कलम् ॥ ११४ ॥ हृतवान्स्त्रींतयाचापिपतिस्त्यक्तोद्विजोत्तम ॥ तस्याःपतिर्मृतःशोकेहाकां
तेविलपन्निति ॥ ११५ ॥ सानारीचमृतापश्चात्सागताचयमालयम् ॥ यमलोकात्समागत्यपतिसौख्यविवर्जिता ॥ ११६ ॥ प्रथमेचतुर्थे
नवमेद्वादशेविंशवर्षके ॥ कष्टंतस्यशरीरेचषष्टिवर्षांतरेमृतिः ॥ ११७ ॥ इति ॥ २५अथचारुलोचनयोगः ॥ १ ॥ चारुलोचनकेजातः
पूर्वजन्मनिबाहुजः ॥ कंकदेशेऽवसत्पूर्वंकिंचिद्भूमिपतिस्तदा ॥ ११८॥ भीमसेनिरितिख्यातश्चोग्रदंडःप्रतापवान् ॥ धनार्जनस्यहेतो
र्वैदक्षिणेचतदागतः ॥११९॥ नृपेणसहकृतामैत्रीबहुकालगतागतैः ॥ नृपश्चसादरंदत्त्वाद्रव्याणिविविधानिच ॥ १२०॥ स्वगृहेपुनरागत्य
रत्नभारसमन्वितः ॥ तस्यभ्रात्राकनिष्ठेनभागार्द्धंयाचितंधनम् ॥ १२१ ॥ नदत्तंतस्यवैकिंचित्कृत्वायुद्धंपरस्परम् ॥ कालान्तरेमृतश्चा
ऽथप्राप्तस्तुयमसादनम् ॥ १२२ ॥ तत्रभुक्त्वातुनरकानागत्यधरणीतलम् ॥ भुक्त्वायमपुरेदुःखंबहुवर्षप्रमाणतः ॥ पुत्रकन्याविहीनश्चपीड्य
मानकलेवरः ॥१२३॥ इति ॥ २६अथचामरयोगः ॥ चामरेचनरोजातःपूर्वजन्मनिब्राह्मणः ॥ श्रौतस्मार्तयोर्निरतोयज्ञकर्मपरायणः॥
॥ १२४ ॥ नानायज्ञान्कारयित्वासंचितंविपुलंधनम् ॥ पर्वण्यपिकस्मिंश्चिद्वैनदत्तंभूसुरेषुच ॥ १२५ ॥ अरातिनाकेनचिद्वैतत्पुरंलुंठितं
भृशम् ॥ द्रव्यशोकेनविकलोबभूवद्विजसत्तमः ॥१२६॥ उन्मत्तइवधावंस्सयत्रतत्रद्विजोत्तमः ॥ आयुषस्तुसमाप्तित्वान्ममारपथिभूसुरः ॥
वेदाध्ययनजन्यंतुफलंब्राह्मणवंशगः ॥ १२७ ॥ ४५ ॥ वर्षेषुकष्टम् ॥ यदिजीवतितदायुर्वर्षाणि ६५ ॥ २७ अथचिंतायोगः ॥ आसी

जन्मांतरेचैवब्रह्मदंडीविशारदः ॥ सारस्वतइतिख्यातःसरस्वत्यास्तटेवसन् ॥ १२८ ॥ शिवस्याऽऽराधनेनिष्ठोजपकर्मरतः सदा ॥ कृताः
शिष्यास्तुबहवस्तेनभूपास्तदानघ ॥ १२९ ॥ द्रव्यसंपादनंकृत्वाभूमौनिक्षिप्तवांस्ततः ॥ आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः ॥
॥ १३० ॥ पापात्पापफलंभुक्त्वायोनिंभुक्त्वाकथंचन ॥ पुनरागत्यमेदिन्यांपूर्वपुण्यप्रभावतः ॥ १३१ ॥ १ । ५ । ८ । १२ । १९ । २७
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८६ ॥ २८ अथचंचुकयोगः ॥ चिंतापुरइतिख्यातेवसंतिबहवोजनाः ॥ नीलकंठध्वजोनामतत्रराजातु
बाहुजः ॥ १३२ ॥ तस्यपुत्र्यभवत्पद्माचेंद्रस्यैवयथांगना ॥ वरयोग्याबभूवाऽपिनाकरोत्पतिचिंतनम् ॥ १३३ ॥ शालग्रामार्चनेनिष्ठा
अन्यत्कार्यमजानती ॥ चक्रपाणिंरमाकान्तंपतिंस्वीयमचिंतयत् ॥१३४॥ भक्त्यंतरसमाविष्टावैष्णवीदानवत्सला ॥ कुमारीसामृताविप्र
गतिर्लब्धानचस्त्रियाः ॥ १३५ ॥ इदंजन्मांत्रवेद्येचधर्मकर्मसमन्वितम् ॥ प्रथमेतृतीयेवर्षेषोडशेचैकविंशके ॥ चाल्पमृत्युर्भवेत्तस्याःषष्टि
वर्षाणिचायुषः ॥ १३६ ॥ २९ अथचापाख्ययोगः ॥ कश्चिद्वैश्यकुलेपूर्वंकुकुरेदेशकेतदा ॥ धनधान्ययुतस्तत्रव्यापारकुशलः सदा ॥
॥ १३७॥ तस्मिन्ग्रामेऽवसद्वैश्योधनवान्धर्मसाहसी ॥ आत्मजोद्वाहप्रारम्भमकृत्वाद्विजसत्तम ॥ १३८ ॥ तेनवैश्येनभोविप्रयज्ञविध्वं
सनंकृतम् ॥ तेनपापानुसारेणश्रियस्तस्यक्षयंगताः ॥ १३९ ॥ दरिद्रोपिबभूवाऽथव्याकुलश्चमनोरथैः ॥ विघ्नकारीचसततंगतोहिनरके
द्विज ॥ सप्तसुजन्मसुपशुर्भूत्वायातोमनुष्यताम् ॥ १४० ॥ १ । २ । १५ । २० । २५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥ ३० अथ
चंननयोगः ॥ चंननेचनरोजातःपूर्वजन्मनिब्राह्मणः ॥ काव्येषुनिपुणःसोऽपिगुर्जरेहितदाऽवसत् ॥ १४१ ॥ वासुदेवइतिख्यातः
परस्त्रीरतिलम्पटः ॥ परापवादनिरतोमिथ्याजल्पतिनित्यशः ॥ १४२ ॥ एकस्मिन्समयेविप्रकाश्यांगत्वासहर्षितः ॥ तत्रभाविबला

त्पुत्रब्राह्मण्यांगमनंकृतम् ॥ १४३ ॥ भयभीतश्चभोविप्रपलायनपरायणः ॥ जगामपर्वतारण्येभक्षितोवनगोचरैः ॥ १४४ ॥
...त्पापफलंभुक्त्वायोनीर्भुक्त्वाकथंचन ॥ शतवर्षसहस्रांतेचागतोभूमिमंडले ॥ १४५ ॥ हीनश्चधनपुत्राभ्यांतथांगैश्चद्विजोत्तम ॥
नानाविघ्नंभवेत्तस्यपूर्वपापफलादपि ॥ १४६ ॥ १ । १० । १६ । २२ । २७ । ३५ ॥ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९५
॥ २१ अथचोपयोगः ॥ चोपयोगेनरःपूर्वमांत्रवेद्येचबाहुजः ॥ प्रवर्तनइतिख्यातःशास्त्रवेत्तागुणान्वितः ॥ १४७ ॥ तस्यपत्नी
शोभनाऽऽस्यामालिनीनामविश्रुता ॥ पतिप्रीतिरताचोग्रादानपुण्यपरायणा ॥ १४८ ॥ प्रवर्तनश्चभूपालंमित्रंकृत्वाविशेषतः ॥
नृपानुकम्पयाद्रव्यंप्रचुरंलब्धवानसौ ॥ १४९ ॥ एकस्मिन्समयेविप्रद्यरातिस्तत्रचागतः ॥ कृत्वापरस्परंयुद्धंचतुर्वासरतस्तदा ॥ १५० ॥
प्रवर्तनस्तुविमुखःपलायनपरायणः ॥ खड्गेननिधनंप्राप्यगतश्चयमसादनम् ॥ १५१ ॥ भुक्त्वावर्षसहस्राणिनरकेभृशदारुणे ॥ पुनराग
त्यमेदिन्यांकिंचित्पुण्यप्रभावतः ॥ १५२ ॥ ३ । ६ । १२ । १६ । २७ । ३३ । ३५ । ३९ । ४० एतद्वर्षेषुपीडाकष्टम्॥ परमायुर्वर्षाणि
६७ ॥ २२ अथचोद्धतयोगः ॥ चोद्धतेचनरोजातः पूर्वजन्मनिब्राह्मणः ॥ हरिद्वारस्यनिकटेनिवसन्परिवारयुक् ॥ १५३ ॥ पठनेपाठ
नेमग्नोदयार्द्रःशिवपूजकः ॥ एकस्मिन्समयेविप्रनृपस्त्वेकःसमागतः ॥ १५४ ॥ तेनभूपेनहर्षेणशिवस्याऽऽराधनंकृतम् ॥ ब्राह्मणेनगृहे
लिंगंप्राणवत्पूज्यतेसदा ॥ १५५ ॥ अतस्तुष्टःसभूपालोमुद्रालक्षद्वयंददौ ॥ लोभयुक्तश्चविप्रोऽसौनिर्माल्यंतद्गृहीतवान् ॥ १५६ ॥
एवंहिनिवसंस्तत्रबहुवर्षगतागतैः ॥ आयुषस्तुसमाप्तित्वान्ममारपथिभूसुरः॥१५७॥पुनरागत्यमेदिन्यांधनधान्यसमन्वितः ॥ पुत्रकन्या
विहीनश्चकष्टंतस्ययदाकदा ॥ षोडशेविंशकेवर्षेचतुर्विंशेप्रपीडितः ॥ १५८ ॥ परमायुर्वर्षाणि १०० ॥ २३ अथचर्माम्बरयोगः ॥

आसीज्जन्मांतरेचैवसंन्यासीविपिनेवसत्॥जटिलोनखभूत्यङ्गश्चर्माम्बरधरोविभुः॥१५९॥ मिथ्याऽपवादनिरतोधूर्तत्वेचसदारतः।परद्रव्या
पहारीचमधुरप्रियभाषकः ॥ १६० ॥ एवंहिनिवसंस्तत्रबहुवर्षगतागते ॥ अनृताच्चविमोहेनकृतंकर्मजुगुप्सितम् ॥१६१ ॥ वैश्यस्यतुधनं
हृत्वातस्यव्यापादनंकृतम् ॥ तेनपापानुसारेणह्यतिथिः सहशिष्यकः ॥ नरकेरौरवेक्षिप्तोयमदूतैर्यमाज्ञया ॥ १६२ ॥ असिपत्रवनंघोरंभु
क्त्वापश्चाद्द्विजोत्तम॥किंचित्पुण्यवशादत्रपुनरागत्यभूतले ॥ १६३ ॥ १ । ८ । ७ । १३ । २१ । २७ । ३२ ।३७।३९ ॥ एतद्वर्षेषुमृत्यु
प्रायः ॥ परमायुर्वर्षाणि १०३॥३४अथचरायोगः ॥ कश्चिच्छूद्रकुलेपूर्वंज्वालामुख्याश्चसन्निधौ ॥ शेषकेतिसमाख्यातःकन्यापुत्र
विवर्जितः ॥१६४ ॥कृषिवाणिज्यनिरतोविप्रभक्तिपरोरतः॥दत्तानितेनदानानिपर्वस्वपिचशक्तितः॥१६५॥प्राप्यवार्द्धक्यसमयंसर्वस्वंब्रा
ह्मणेददौ ॥ तेनपुण्यावसानेनस्वर्गेगत्वाचपादजः ॥ अधुनासंततियुक्तःसुखाऽऽनंदेनसंयुतः ॥ १६६ ॥ १ । ४ । ६ । ९ । १२ । १९
२० । २६ । ३७ । ४० एतद्वर्षेषुपीडा ॥ परमायुर्वर्षाणि ७४ ॥ ३५ अथचारुयोगः ॥ पूर्वजन्मनिमहाभ्रष्टोब्राह्मणोब्रह्मनिंदकः ॥ परदारा
मिगमनःपरकष्टप्रदायकः ॥ १६७ ॥ मध्यदेशेऽवसत्सोपिसमृतोयमुनातटे ॥ यमुनामृत्युवशात्पुत्रगंधर्वनगरेस्थितः॥पुनरागत्यमेदिन्या
माधिव्याधिसमन्वितः ॥ १६८ ॥ ९ । १२ । १६ । १७ । २० । २७ । ३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६८ ॥ ३६अथवृतयोगः ॥
पूर्वजन्मनिकावेरीनिकटेब्राह्मणोवसन्॥शिवदासइतिख्यातःपरिवारेणसंयुतः ॥ १६९ ॥ कृत्वादानार्चनंजाप्यंबहुवर्षगतागते ॥ एक
स्मिन्समयेविप्रयजमानगृहेगतः ॥ १७० ॥ यजमानोददौतस्यस्वर्णमुद्रासहस्रकम्॥स्वगृहेचागतःसोथस्वर्णमुद्रासहस्रकम् ॥ १७१ ॥
वेश्यांदत्त्वाधनंसर्वमसत्कर्मव्ययःकृतः ॥ ब्रह्मकर्मपरित्यक्त्वाकामलोभेचनिश्चितः ॥ १७२॥ एवंस्वल्पतिथेकालेसविप्रोनरकंगतः ॥षष्टि

र्षसहस्रांतेपुनरागत्यभूतले ॥ १७३ ॥ १ । ३ । ५ । ८ । ९ । १३ । २० । २८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥ ३७ अथ
चम्पाख्ययोगः ॥ पूर्वजन्मनियानारीकीकटेहितदाऽवसत् ॥ द्रव्यलोभेनसाबालापुत्रस्यतुविषंददौ ॥१७४॥ पुत्रस्यतुविषंदत्त्वापूर्वजन्म
निमानद ॥ छर्दीरोगेणसात्रैवबाध्यतेपीडयामहत् ॥ १७५ ॥ साचाऽत्रयवनीदेशेशुभेपश्चनदेद्विज ॥ साजातात्रमहापापैर्दुःखितासर्वदा
खलु ॥१७६॥ तस्मात्सायवनीजातापुत्रसंततिवर्जिता ॥ नानाधनयुतादानात्कुरुक्षेत्रेपुरानघ ॥ १७७ ॥ शिवभक्तिपरातस्मात्सुखैश्व
र्य्यसमन्विता ॥ अत्रजन्मनिसालक्षरुद्रपूजनजाद्व्रतात् ॥ १७८ ॥ पुत्रपौत्रयुतानारीभवत्यत्रनसंशयः ॥ अथवाहरिवंशस्यशतव्रतविधा
नतः ॥ श्रवणात्पूर्वजात्पापान्मुच्यतेनाऽत्रसंशयः ॥१७९॥ इति ॥ ३८ अथ चंचुकयोगः ॥ चंचुकेयोगेयोजातःसवैश्यःपूर्वजन्मनि ।
दानवेंद्रइतिख्यातोबाहुजोधर्मवानपि ॥ १८० ॥ लाटाभिधेपुरेविप्रचोग्रदंडःप्रतापवान् ॥ चंद्रग्रस्तेतथाकाश्यांदानंदत्त्वास्वशक्तितः ॥
॥ १८१ ॥ पर्वस्वपिचतेनैवब्राह्मणाभोजिताःखलु ॥ पारायणसंहितासुश्रीमद्भागवतंश्रुतम् ॥ १८२ ॥ मध्येपापंकृतंतेनभ्रूणहत्यातदा
नघ ॥ पापात्पापफलंभुक्त्वायोनिंभुक्त्वाकथंचन ॥ पुनर्वैमानुषींयोनिंचागतोधरणीतले ॥ १८३ ॥ १ । ३ । ८ । १३ । १७ । २२ ।
२७ । ३५ । ३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६० ॥ ३९अथचमरीयोगः ॥ काचिद्वेश्याकुलेजातापूर्वजन्मनिकीकटे ॥ बहुद्रव्यार्जनं
कृत्वापुण्यमार्गेव्ययःकृतः ॥ १८४ ॥ आतिथ्येचद्विजेदत्तंवस्त्रभूषणपात्रकम् ॥ शीतकालेददौवस्त्रंग्रीष्मकालेजलान्नकम् ॥ १८५ ॥
प्रावृषिच्छत्रदानंचतथातीर्थाटनंकृतम् ॥ एवंनिवसतीसातुबहुवर्षगतागतैः ॥ १८६ ॥ मृत्वाचेंद्रपुरेप्राप्तापुनरागत्यभूतले ॥ सुंदरी
चातिलावण्यापतिप्रीतिपरायणा ॥ १८७ ॥ ५५ वर्षेमृत्युः ॥ ४० अथजयधायोगः ॥ कश्चित्तुबाहुजश्चैवशतद्रुनिकटेवसन् ॥ विंशको

शाधिपस्तत्रचोग्रदंडःप्रतापिकः ॥ १८८ ॥ एकस्मिन्समयेविप्रभाविनोर्थस्यवैबलात् ॥ उन्मत्तश्चबभूवाऽपिखङ्गमुद्यम्यवेगतः ॥
॥ १८९ ॥ मार्जारींचशुनींगांचवृषभाऽश्वगर्दभादिकान् ॥ नरांश्चैवतुनारीश्चहन्यमानोविशेषतः ॥ १९० ॥ जीवांश्चहतवान्सर्वान्सोऽयं
कालाभिधःक्रमात ॥ प्राप्तेवार्द्धक्यसमयेहरगेहंतदाकृतम् ॥ १९१ ॥ नांगीकृतंयदाविप्रैःसर्वस्वंमंदिरेऽक्षिपत् ॥ सराजापंचतांप्राप्तोगतो
सौयमशासनम् ॥ अस्मिञ्जन्मनिकुष्ठीस्यात्पुत्रकन्याविवर्जितः ॥ १९२ ॥ ५६ वर्षेमृत्युः ॥ ४१ ॥ अथ छेमयोगः ॥
छेमयोगेनरोजातः पूर्वजन्मनिवैश्यजः ॥ रामक्षेत्रस्यनिकटेनिवसन्पूर्वजन्मनि ॥ १९३ ॥ देवदासइतिख्यातोभार्य्याऽस्यप्रिय
वादिनी ॥ एकस्मिन्समयेविप्रकृत्वाश्राद्धंसहर्षितः ॥ १९४ ॥ ब्राह्मणाश्चसमायाताः स्वगृहेस्थापिताद्विज ॥ पत्न्याद्वंद्वंकृतंसम्यग्गुत्थि
ताब्राह्मणास्तदा ॥ १९५ ॥ यज्ञोभ्रष्टोबभूवाऽथनिराशाःपितरोगताः ॥ तेनपापानुसारेणवंशवृद्धिर्नजायते ॥ १९६ ॥ गयाश्राद्धेकृते
विप्रपुत्रोभवतिनाऽन्यथा ॥ इति ॥ ४२ अथ छात्रकयोगः ॥ आसीज्जन्मांतरेचैवजैद्रथोनामभूपतिः ॥ १९७ ॥ चोलदेशेऽवसत्सोपि
परिवारेणसंयुतः ॥ नानाविलासविभवैःसंयुतोगुणिनांगणैः ॥ १९८ ॥ छलबुद्धिवशात्पुत्रजित्वाशत्रून्विशेषतः ॥ एकस्मिन्समयेविप्र
कृतंकर्मचदारुणम् ॥ केनचिद्ग्रामपतिनासहसंधिःकृतश्छलैः ॥ १९९ ॥ विश्वासाच्चहतश्चासौकृतंकर्मदुरासदम् ॥ सराजापंचतांप्राप्तो
गतश्चयमशासनम् ॥ किंचित्पुण्यवशात्पुत्रसजातोबाहुजोऽधुना ॥ २०० ॥ १ । ३ । ८ । ९ । १३ । २० । २५ वर्षेषुकष्टम् ॥ परमा
युर्वर्षाणि ७२ ॥ ४३ अथ छोभकायोगः ॥ कांतिकानगरीश्रेष्ठाप्रकीर्णागुणिनांगणैः ॥ तत्रभीष्मवरोराजाविष्णुभक्तिपरोदृढः ॥
॥ २०१ ॥ हरनिंदापरोनित्यंह्यात्मज्ञानेसधूर्तकः ॥ वाचामधुरयायुक्तोनिर्दयश्छलसंयुतः ॥ २०२ ॥ एकस्मिन्समयेविप्रब्राह्मणश्चप्रता

डितः॥तेनविप्रेणक्रोधेनस्वंशरीरंचघातितम् ॥ २०३ ॥ तस्यपापप्रभावेणश्रियस्तस्यक्षयंगताः ॥ पापाचनरकेप्राप्तःषष्टिवर्षसहस्रकम् ॥
॥ २०४ ॥ इदंतुमानुषंजन्मवंशवृद्धिर्नजायते ॥ तुलादानाद्भवेत्पुत्रोनान्यथाद्विजसत्तम ॥२०५॥ ४० वर्षेअल्पमृत्युःपरमायुर्वर्षाणि ८४
४४ अथजीमूतयोगः ॥ आसीत्पूर्वंपैठनेचनगरेबाहुजोवसन् ॥ महाशूरोऽतिभव्यश्चधनधर्मरतःसदा ॥ २०६ ॥ लोकपर्यटनेगत्वासह
सैन्येनबाहुजः ॥ तत्रभीष्मवतींभव्यांनगरींत्रिदिवोपमाम् ॥ २०७ ॥ वैनतेयेनवैपुत्रभक्षितामनुजादयः ॥ गृहेगृहेप्रतिद्वारेचैकःसोऽभक्षय
त्तदा ॥ २०८ ॥ तस्मिन्दिनेब्राह्मणस्यगृहेवासःकृतःखलु ॥ गरुडाग्रेगतोराज्ञाकृतंयुद्धंपरस्परम् ॥ २०९ ॥ गरुडोहर्षसंयुक्तस्त्यक्त्वाग्रा
मंगतोऽनघ ॥ सराजाचंद्रलोकेचपितृलोकेततोगतः ॥ चंद्रलोकात्परिभ्रष्टश्चागतोधरणीतले॥२१०॥१।५।९।१४।१९ वर्षेषुकष्ट
म् ॥ परमायुर्वर्षाणि ९७ ॥ ४५ अथजगत्पालयोगः ॥ जगत्पालेनरोऽस्त्युग्रोदानवत्सलधार्मिकः ॥ जगदानंदनामाचगुर्जरेनगरेवसन् ॥
॥ २११ ॥ देव्याअग्रेविधानेनजपकरणान्निरंतरम् ॥ आविर्बभूवसहसाजगन्मातात्रिलोचना ॥ २१२ ॥ वरंवरयराजेंद्रप्रसन्नाहंतवव्रतात् ॥
दत्त्वेप्सितंवरंदेवीह्यन्तर्धानंगतापुनः ॥ २१३ ॥ सहस्रमितवर्षाणिकृत्वाराज्यंनिरंतरम् ॥ पुनर्वैमानुषोभूत्वासर्वसौख्यसमन्वितः॥२१४॥
प्रथमेपंचमेवर्षेद्वादशेषोडशेपिवा ॥ वर्षेपीडाभवेत्तस्यप्रायश्चित्तेकृतेसुखम् ॥ २१५ ॥ आयुःपंचाशद्वर्षांतंकथितंप्राणधारणम् ॥ आश्वि
नेधवलेपक्षेह्यष्टम्यांनिधनंभवेत् ॥ २१६ ॥ ४६ अथजेवरीयोगः ॥ जेवरीयोगेयोजातःसर्वपूज्योधनाधिपः ॥ मुखाग्रेतिलकंचिह्नंभव्यकां
तिर्दयायुतः ॥ २१७ ॥ वंशवृद्धिर्नजायेतपूर्वपापानुसारतः ॥ शुक्रउवाच ॥ कोस्तिपूर्वंमहाभागकिंकृतंपापपुण्ययोः ॥ २१८ ॥ श्रोतु
मिच्छामितत्त्वज्ञवदविस्तरतोऽधुना ॥ भृगुरुवाच ॥ शृणुपुत्रप्रवक्ष्यामिविस्तरेणसमासतः ॥ २१९ ॥ बाहुजःपूर्वजननेवैराटेनगरेऽवसत् ॥

दत्तानितेनदानानिब्राह्मणेषुस्वशक्तितः ॥ २२० ॥ मातृस्वसुश्चगमनात्पुत्रकन्याविवर्जितः ॥ अस्मिञ्जन्मनितृतीयेतुगौरांगःप्रियदर्शनः
॥ २२१॥१।६।१०।१६।२०। वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०६ ॥ ४७ अथजोरयोगः ॥ आसीत्पूर्वभवेशूद्रोगंगायादक्षिणेतटे ॥ भूप
तिश्चसमाख्यातःपत्नीपुत्रसमन्वितः ॥ २२२ ॥ परदाराऽभिगमनंकृतंतेननिरंतरम् ॥ एकस्मिन्समयेविप्रप्रयागेमकरेवसन् ॥ २२३ ॥ अ
र्द्धोदयंसमासाद्यमहापर्वणिकेतदा ॥ ब्राह्मणेभ्योददौदानंहर्षगद्गदमानसः ॥ २२४ ॥ स्वगृहेपुनरागत्यदम्पतीचतदाऽनघ ॥किंचित्कालव
शंयातःस्वर्गंयातश्चपादजः ॥ पत्नीतस्यसतीजातापुनरागत्यभूतले ॥ २२५ ॥१।८।१३।१७।२२।३१।३६। वर्षेषुकष्टम्॥ परमायुर्वर्षाणि
६७॥४८ अथजोषितायोगः ॥ आसीज्जन्मान्तरेनारीवंगदेशेवसत्यसौ ॥ सुधाकरीतिविख्यातापतिस्तस्याधनेश्वरः ॥ २२६ ॥ काक
घातातदानारीकाकवंध्याऽधुनाभवेत् ॥ तीर्थेतीर्थेददौदानंसत्पात्रायद्विजायच ॥ २२७ ॥ तेनपुण्यावशेषेणसाजातात्रसुखान्विता ॥ स्व
र्णकाकस्यप्रतिमापलपंचप्रमाणिका ॥ ब्राह्मणायप्रदातव्याबहुपुत्रान्वितातततः ॥२२८ ॥ १।४।८।१०।१३।१९ वर्षेषुकष्टम्॥ परमायुर्वर्षा
णि३९॥४९अथझंडावलीयोगः ॥ झंडावल्यांनरोजातःकाकुत्स्थेह्यवसत्तदा ॥ मनोहरइतिख्यातोबाहुजःसर्वशास्त्रवित् ॥२२९॥ सम्यग
ध्यापिताविप्राश्चान्नदानमथोददौ ॥ सीमावादेहतस्तत्रबाहुजस्यसुतस्तदा ॥ २३० ॥ निशायांचोरकार्येहिबहुवर्षांतरेमृतः ॥ पापाच्चनर
केगत्वासजातोऽत्रद्विजालये ॥ २३१ ॥ ८।९।१३।२१।२७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६१।५० अथझटितियोगः ॥ पूर्वजन्मनिनैपा
लेस्वशश्चचतुरःसुधीः ॥ पशुपतिश्चविख्यातःपत्नीपुत्रसमन्वितः ॥२३२॥ बहुवत्सरपर्य्यंतंजीवाश्चघातिताभृशम् ॥ प्राप्तेवार्द्धक्यसमयेस
र्वस्वंविधिनाददौ ॥ २३३ ॥ तेनपुण्यप्रभावेणधनधान्ययुतोऽधुना ॥ गृहदानात्पयोदानात्पुत्रवृद्धिर्भविष्यति॥२३४॥ १।१०।२०। ३६

र्वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९८ ॥ ५१ अथउग्रदंडयोगः ॥ उग्रदंडेनरोजातःपृथ्वीपालनतत्परः ॥ पुत्रकन्यासमायुक्तःसहसैन्येनराज
ते ॥ २३५ ॥ आसीत्पूर्वेविप्रःकश्चिच्छरय्वाश्चोत्तरेतटे ॥ महीपालइतिख्यातःपादजोधर्मवानपि ॥ २३६ ॥ नानातीर्थाटनंकृत्वाह्यारामं
चजलाशयम् ॥ तेनपुण्यावशेषेणसजातोबाहुजोधुना ॥२३७॥१।६।९।१३।१७।२०।२३।३८। ४० एतद्वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि
८१॥५२ अथचलाचलयोगः ॥ चलाचलेऽभवत्पूर्वंधर्मशास्त्रविनोदकः ॥ कौशल्यायांनगर्यांचतपस्वीचजितेन्द्रियः ॥ २३८॥ चेतन्य
इतिविख्यातोनृपद्वारेप्रतिष्ठितः ॥ एकस्मिन्समयेविप्रपापमाचरितंभृशम् ॥ २३९ ॥ नृपकन्याचयुवतिःसुन्दरीषोडशाब्दिका॥कुमारी
गमनात्तस्यसगर्भाचाभवत्पुरा ॥ २४० ॥ नाशितस्तेनगर्भोहिविविधैरौषधैरपि ॥ विप्रोयमपुरंप्राप्यभुक्त्वाक्लेशांश्चशाश्वतान् ॥ पुनश्चमातु
षीयोनौमातृकुक्षेःसमुद्भूतः ॥ २४१ ॥ १ । ३ । १० । १२ । १८ । २० । २५ । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७३ ॥ ५३ अथ
चातुरीयोगः ॥ पूर्वजन्मनिभोविप्रचित्रकूटाद्रिसन्निधौ ॥ भिल्लोनाममहाव्याधःशौचाचारविवर्जितः ॥२४२॥ जीवांश्चघातयामासमार्गा
वरोधनेरतः ॥ एकस्मिन्समयेविप्रप्रयागेमकरेगतः ॥ २४३ ॥ तत्रभाविबलान्मृत्युर्बभूवद्विजसत्तम ॥ तेनपुण्यप्रभावेणसजातः
पादजोऽधुना ॥ २४४ ॥ ११ १३ । १८।२१ । २३ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६६ ॥ ५४ अथचोलमाख्ययोगः ॥ आसीज्ज
न्मान्तरेचैवतपस्वीब्राह्मणःकिल॥ध्वजाधरइतिख्यातोमदांधोगर्वसंयुतः ॥ २४५ ॥ किंचिद्विद्याविलासीचजपकर्माऽर्चनेदृढः॥ एकस्मि
न्समयेविप्रभाविनोर्थस्यवैबलात् ॥ २४६ ॥ दंडकारण्यनिकटेतपश्चर्य्यामथाऽकरोत् ॥ ब्राह्मणस्यसुतस्तत्रसर्वालंकरणैर्युतः ॥ २४७ ॥
धनलोभाद्धतस्तेनभाविनोर्थस्यवैबलात् ॥ तस्यचमातापितरौपुत्रस्नेहेनदुःखितौ ॥ २४८ ॥ अचिराच्चमृतःसोपिगतोवैयम

शासनम् ॥ तेनकर्मविपाकेननरकेपाचितोभृशम् ॥ २४९ ॥ पश्चान्मानुष्यमापन्नोव्रतदानप्रभावतः ॥ इदंचतुष्टयंजन्ममृताऽपत्यंद्विजो
त्तम ॥ २५० ॥ मृतःपुत्रोभवेदस्यजातोजातस्तथैवच ॥ इदंजीवेदिदंजीवेदित्याशामपिचाकरोत् ॥ २५१ ॥ जातंजातंविनष्टंचनकृतात
स्यनिष्कृतिः ॥ एवंयदिचिरंस्थित्वापश्चाच्चम्रियतेखलु ॥२५२॥ कृत्वास्वर्णमयींमूर्तिंविप्रबालस्यशोभनाम् ॥ पूर्वोक्तेनविधानेनसंकल्प्य
ब्राह्मणार्पणम् ॥ ततःश्रेयोभवेत्तस्यवंशवृद्धिर्भविष्यति ॥ २५३ ॥ १ । ४ । ५ । ९ । १२ । १६ । २५ । २७ वर्षेषुकष्टम् ॥परमायुर्व
र्षाणि ६९ ॥ ५५ अथचंद्रकांतियोगः ॥ कश्चित्प्रागभवद्विप्रःसर्वविद्याविशारदः ॥ वेदाभ्यासरतःश्रीमान्प्राप्तसर्वमनोरथः ॥ २५४ ॥
तुलादानानिदत्त्वाचघृतस्यभूसुरेष्वपि ॥ गृहीतवांश्चचौर्य्येणलोभोपहतचेतसा ॥ २५५ ॥ केनचित्सुकृतेनैवप्राग्भवेयत्फलंशृणु ॥ श्रोत्रि
यस्यकुलेजातोवेदवेदांगपारगः ॥ २५६ ॥ धनपुत्रसमायुक्तःक्षयरोगसमन्वितः ॥ सरस्वत्याश्चदानेनरोगाश्चविलयंगताः॥२५७॥ १ । ५ ।
७ । १० । १५ । २० । २८ । ३६ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५९ ॥ ५६ अथछर्छरीयोगः ॥ बभूवब्राह्मणःकश्चिद्वंगदेशेवस
न्सुधीः ॥ धर्मकर्मदयायुक्तोधनपुत्रादिसंयुतः ॥ २५८ ॥ दत्तानितेनविप्रेभ्योदानान्यत्यल्पशक्तितः ॥ सत्पात्रेभ्यस्तदाविप्रपर्वस्वपिविधा
नतः ॥ २५९ ॥ पापमाचरितंतेनकामलोभेननिश्चयः ॥ ब्राह्मण्यांधारितोगर्भोभाविनोर्थस्यगौरवात् ॥ २६० ॥ गर्भपातनजाद्दुःखा
त्साभृताद्विजसत्तम॥एवंचात्रगतेकालेप्राप्तश्चयमशासनम्॥२६१॥भुक्त्वापापाच्चनरकान्पुण्यात्स्वर्गंचशाश्वतम् ॥ पूर्वपुण्यप्रभावेणसजातो
ब्राह्मणोऽधुना ॥ २६२ ॥ धनमैश्वर्यमतुलंतथास्त्रीभोगभाङ्नरः॥दक्षःकार्य्येषुचार्वंगोधर्मिष्ठोलाभसंयुतः॥२६३॥ मानीयशस्वीपुरुषःकांति
मान्प्रियभाषकः॥पुण्यादिदंतथापापाद्विप्रपापरतःक्वचित् ॥२६४॥ धूर्तःशठःक्रोधपरोधनवृद्धिक्षयान्वितः॥पूर्वपापानुसारेणयुवापुत्रोमृतः

सल्लु ॥ २६५ ॥ १।५।२०।२८।३६॥४०॥४६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९३॥ ५७ अथछूरसञ्ज्ञकयोगः ॥ आसीज्जन्मान्तरेवच्छु
रकारश्चनापितः॥प्रयागेनिवसन्पूर्वंपरिचर्यात्कृतंधनम् २६६। नानाविभवविस्तारैःपुण्यमार्गेकृतोव्ययः ॥ आरामंचजलोत्सर्गंकन्योद्वाह
मथाकरोत्॥२६७॥आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः ॥ बभूवपादजःसोपिवैश्योभूत्वाततोपरि ॥२६८॥ इदंचतुष्टयंजन्मसर्वसौ
ख्येनसंयुतम् ॥ शरीरंपीडचमानंचह्युद्वेगोमानसीव्यथा ॥ २६९ ॥ १।२।७।९।१३।१८।१९।२०।२८।३३॥ वर्षेषुकष्टम्॥परमायुर्वर्षाणि
८७ ॥ ५८ अथजटायुयोगः ॥ ब्राह्मणीगर्भयुक्ताचप्रयाणेभर्तृसंयुता ॥ सर्वाभरणभूषाढ्यानानारत्नसमन्विता ॥२७०॥ बहवोमिलिता
श्चौराजगृहुश्चास्यभूषणम् ॥ तत्रकोलाहलोजातोगर्भपातोऽभवत्तदा ॥ २७१ ॥ १।५।९।१४।२०।२६।३० । वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ६९॥५९॥ अथजोधयोगः ॥ कश्चिद्दासकुलेपूर्वंचोत्कलेहितदाऽवसत् ॥ यानार्यघातयत्कंचित्पुरुषंप्राग्भवेद्विज २७२॥
सोत्रजन्मनिरोगेणशूलेनैवप्रपीडचते ॥ सुवर्णदानाद्विधिवत्तथारुद्रजपादिह ॥ २७३ ॥ पूजनाच्छंकरस्याऽपिशूलरोगाद्विमुच्यते ॥
॥ २७४ ॥ १।४।६।११।२०।२९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६० ६० अथजांगल्ययोगः ॥ कश्चित्क्षात्रकुलेपूर्वंपांचालेनग
रेऽपिच ॥ गोत्रघातःकृतस्तत्रपरस्त्रीरमणंतथा ॥२७५॥ सोत्रजन्मनिनूनंचमहाकष्टेनपीडितः ॥ तीर्थस्नानकृतादीनिनिष्फलान्यत्रभा
गेव ॥ २७६ ॥ ज्ञानपूर्वकृतात्पापाद्रोगहाचक्षयीभवेत् ॥ २७७ ॥ १।४।५।७।१०।१३।१६। वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ४६ ॥ ६१
अथजानकीयोगः ॥ कश्चिच्छूद्रोमहाभागबभूवप्राग्भवेधनी ॥ व्यापारनिरतोदक्षःक्रयविक्रयकर्मसु ॥२७८॥ नीतःसर्वरसस्तेनमिलित्वा
चार्द्धसीरिणा ॥ कालेनतद्धनंलोभात्स्नेहमूल्याधिकंसुत ॥ २७९ ॥ भुक्त्वापापफलाद्घोराद्भ्रमरत्वमुपागतः ॥ ततःपुण्याच्छुभान्भु

क्त्वाभोगाञ्जातोत्रबाहुजः ॥ २८० ॥ क्षात्रःपुण्यकलायुकोभूमिदानात्सुरार्चनात् ॥ स्नेहहारीयतःपूर्वंराजरोगात्प्रपीडितः ॥ २८१ ॥
सर्वस्नेहादिदानाद्वैस्ववित्तस्यप्रदायकः ॥ स्वर्णदानंतथाचात्रक्षयरोगाद्विमुच्यते ॥ २८२ ॥ २ । ६ । ९ । १३ । २० । २५ वर्षेषुकष्ट
म् ॥ परमायुर्वर्षाणि ८६ । ९५ ॥ ६२ अथजयवर्द्धीयोगः ॥ आसीज्जन्मान्तरेचैवबाहुजस्यवरांगना ॥ देशेहिककुभेचैवपतिपुत्रसम
न्विता ॥ २८३ ॥ विषंदत्त्वापतिंविप्रप्राग्यजाराश्रितासती ॥ पतिघ्नीसामहादुष्टाबाल्येऽत्रविधवाद्विज ॥ २८४ ॥ शिवस्याराधनाच्चैव
गंगायाउपसेवनात् ॥ गतिंशुभांसाप्राप्नोतिव्रतकृच्छ्रोपसेवनात् ॥ २८५ ॥ ३ । ७ । १२ । २० वर्षेषुकष्टम ॥ परमायुर्वर्षाणि ९५
॥ ६३ अथजज्वालयोगः ॥ मूर्द्धाऽभिषिक्तोयःकश्चिन्मथुरायामभूत्सुधीः ॥ राजसेवीमहाशूरआखेटकरतःसदा ॥ २८६ ॥ मृग
यायांगतोदैवाद्धातितामृगसूकराः ॥ तत्रैकाहरिणीविप्रघातितागर्भसंयुता ॥ २८७ ॥ तद्गर्भस्थौहतौवत्ससुशुभौभृगशावकौ ॥ स
हायाभ्यांयुतेनैवकृतंकर्माऽतिदारुणम् ॥ २८८ ॥ ताभ्यांमिलित्वाभुक्त्वाचाभूवंस्तेपापभागिनः ॥ नृपःकालेमहाभागप्राप्तःशत्रुपुरंतदा
॥ २८९ ॥ सशौर्य्यकर्मणाविप्रघातयित्वारिपून्बहून् ॥ घातितःसोपिबहुभिःप्रहारैरतिदारुणैः ॥ २९० ॥ संग्रामभूमौसमृतःप्रातःस्व
र्गपुरंतदा ॥ भुक्त्वानानाविधान्भोगान्सजातोब्राह्मणोधुना ॥ २९१ ॥ चंचलश्चातिचतुरःसर्वशास्त्रार्थकोविदः ॥ धनैर्नानाविधैर्युक्तो
गौरांगोरक्तलोचनः ॥ २९२ ॥ १ । ३ । ८ । १२ । १५ । २० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७७ ॥ ६४ ॥ अथजुद्धयोगः ॥ बभूवब्रा
ह्मणःकश्चिद्वंगदेशेवसन्सुधीः ॥ दत्तानितेनविप्रेभ्योदानानिजातिशक्तितः ॥ २९३ ॥ सत्पात्रेभ्यःपरंविप्रपर्वस्वपिविधानतः ॥ पापमा
चरितंतेनकामलोभेनभोद्विज ॥ २९४ ॥ ब्राह्मण्यांधरितोगर्भोभाविनोर्थस्यगौरवात् ॥ स्त्रीसहायश्चकृतवान्गर्भपातंद्विजोत्तम ॥ २९५ ॥

भुक्त्वानानाविधान्भोगांस्तिर्यग्योनीः पुनःपुनः ॥ पश्चान्मानुष्यमापन्नःपुत्रदारविवर्जितः ॥ २९६ ॥ १ । ८ । १२ । २१ वर्षेषुकष्टम्॥
परमायुर्वर्षाणि ७० ॥ ६५ अथजृंभकयोगः ॥ जृंभकेचनरोजातःपूर्वजन्मनिद्राविडे ॥ शूद्रस्त्वेकोऽवसत्तत्रकृषिवाणिज्यतत्परः ॥
॥२९७॥धनिकस्यहृतंद्रव्यंनदत्तंलोभहेतुना ॥ आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः ॥ पापाच्चंनरकंगत्वापुनरागत्यभूतले॥२९८॥
१ । २ । ४ । ८ । १२ । २० । २७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि९२॥ ६६ अथजनार्दनयोगः ॥ कश्चिद्वैश्यकुलेपूर्वंब्रह्मावर्तेऽवसत्तदा॥
कालिदासइतिख्यातःपत्नीपुत्रसमन्वितः ॥२९९॥ तस्मिन्ग्रामेऽवसत्त्वेकोब्राह्मणःपंडितःसच ॥ तेनविप्रेणवैश्येचद्रव्यंदत्त्वाचपुष्कलम्॥
॥३००॥स्थापितंतद्गृहेद्रव्यंपात्रेताम्रमयेद्विज ॥ सविप्रस्तीर्थंकेगत्वाकाश्यांचमृत्युमाप्तवान् ॥३०१॥ तस्यपुत्रस्तुयाचितवान्पितृद्रव्याणि
चानघ ॥ नदत्तंतेनवैश्येनसर्वस्वंभक्षितंद्विज ॥३०२॥ किंचिद्दानार्चनंकृत्वाबहुवर्षांतरेमृतः ॥ पापात्पापफलंभुक्त्वायोनिंभुक्त्वाकथंचन ॥
॥३०३ ॥ इहजन्मनिमहाभागपीड्यमानोमुहुर्मुहुः ॥ गर्भपातोमृतसुतोजायतेनात्रसंशयः ॥ ३०४ ॥ १५।१०।१५।२०।२५।२९ वर्षेषु
कष्टम् ॥ परमायुर्वर्षाणि ६८ ॥ ६७ अथजयीयोगः ॥ जयीयोगेचयोजातःपूर्वजन्मनिब्राह्मणः ॥ विद्यावेदविहीनश्चपरसंतापकारकः
॥ ३०५ ॥ एकस्मिन्समयेविप्रद्रव्यलोभेनब्राह्मणः ॥ विश्वासघातमकरोत्तेनाऽभूद्धर्मनाशकः ॥ ३०६॥ एवंस्वल्पतिथेकालेसविप्रःपंच
तांगतः ॥ विश्वासघातपापाच्चसर्वोदेहोरुजाकुलः ॥ दारिद्र्येणभवेत्पीडाचोद्यमेहानिरेवच ॥३०७॥ ३ । ८ । १० । २० । ३५ वर्षेषु
कष्टम् ॥ परमायुर्वर्षाणि १०० ॥ ६८ अथजीतायोगः ॥ कश्चिद्वैश्यःपुराजातोह्यंगदेशेतदानघ ॥ माधवेतिसमाख्यातःक्रयविक्रय
णेरतः ॥ ३०८ ॥ व्यापारेनिर्गतोदैवात्पूर्वदेशेतदानघ ॥ कृत्वाप्राप्तिंधनस्याऽयंहर्षगद्गदमानसः ॥ ३०९ ॥ ब्राह्मणानांकृतासेवादानं

दत्त्वास्वशक्तितः ॥ स्वदेशेपुनरागत्यकृतंकर्मतुदारुणम् ॥ ३१० ॥ दृष्ट्वास्वीयांसकोपेनपरजारसमागताम् ॥ खड्गेनघातितासाचपापमा
ऽऽचरितंत्विदम् ॥ रोगाकुलोऽत्रजननेवंशवृद्धिर्नजायते ॥३११॥ १ । ४ । ६ । ९ । १७ । २७ । ३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥
७५ ॥ ६९ अथजनारातियोगः ॥ आसीज्जन्मांतरेपूर्वंचोत्कलेनगरेवसन् ॥ बुद्धिनाथइतिख्यातोब्राह्मणोद्यूतकर्मकृत् ॥ ३१२ ॥ पर
कन्यांतदाविप्रविक्रयामासलोभतः ॥ तेनपापाऽनुसारेणपुत्रोनजायतेधुना ॥ ३१३ ॥ कन्याश्चबहवोजाताःपुत्रोनैवचनैवच ॥ कन्या
दानाद्भवेत्पुत्रोनान्यथाद्विजसत्तम ॥ ३१४ ॥ १ । ३ । ८ । ११ । १८ । २० । २८ वर्षेषुकष्टम् ॥ ज्वरादिवमनकफार्शसादिभिर्जले
श्चभीतिः ॥ परमायुर्वर्षाणि ५८ ॥ ७० अथजलदयोगः ॥ पूर्वजन्मनिवैश्योऽभूद्भार्य्याविप्रस्यसात्त्विकी ॥ पतिश्चापितदा
तस्यब्राह्मणोज्ञानसत्तमः ॥ ३१५ ॥ अप्रसूताप्रियातस्यचपलाचारुलक्षणा ॥ वैश्येनधर्षितासाचलोभमोहादिविभ्रमैः ॥ ३१६ ॥
अज्ञानात्काममिच्छंतावुभावपिहठेनच ॥ तावत्कालवशेनैवब्राह्मणः पंचतांगतः ॥ ३१७ ॥ सवैश्योदैवयोगाच्चभाविनोर्थस्यवैबला
त् ॥ तांचवैधर्षयामासबहुकालगतागतैः ॥ ३१८ ॥ व्यभिचारवशात्तत्रधनंसर्वंविनिश्चितम् ॥ गृहीतंधूर्तयालोभाद्वैश्यस्यतुद्विजोत्तम ॥
॥ ३१९ ॥ ब्राह्मणीनिधनंप्राताव्यभिचारपराऽसती ॥ वैश्योपिनरकंगत्वाबहुवर्षाणिभोगभाक् ॥ इदंजन्मद्वितीयंतुबहुशोव्याकुलः सदा
॥ ३२० ॥ १ । २ । ५ । ८ । १३ । २० । २७ । २९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७६ ॥ ७१ अथजज्ञासीयोगः ॥ आसीज्जन्मांतरे
चैवब्राह्मणःपूर्वकेवसन् ॥ देवरामइतिख्यातःपत्नीपुत्रसमन्वितः ॥ ३२१ ॥ देवाऽऽगारेसदाऽतिष्ठद्वाहुजस्यसहायतः ॥ देवद्रव्यापहरणं
कृतंरात्रौद्विजोत्तम ॥ ३२२ ॥ तेनपापानुसारेणकुष्ठरोगेणपीडितः ॥ सर्वांगेजायतेदुःखंपुत्रोजातोमृतःसच ॥ ३२३ ॥ १ । ३ । ८ । १२

१७।२१।२८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ७२ अथजदुयोगः ॥ जदुयोगेचयोजातोबाहुजःपूर्वजन्मनि ॥ देशेकारूषकेचैवनिव
सन्पूर्वजन्मनि ॥ ३२४ ॥ माधवेतिसमाख्यातःपत्नीपुत्रसमन्वितः ॥ एकदाचंद्रमोग्रस्तेभूमिदानंद्विजेददौ ॥ ३२५ ॥ पुनर्गृहीतासातेन
लोभाकुलितचेतसा ॥ तेनपापानुसारेणगतोलोकेचभास्करे ॥ पुनरागत्यमेदिन्यांबहुकष्टसमन्वितः ॥ ३२६ ॥ १।३।५।८। १२। १६।
२०। २८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ४९ ॥ ७३ अथजम्भारातियोगः ॥ जम्भारातौचयोजातोवैश्योनामसुदर्शनः॥ कुंडिनेनगरेचैव
निवसन्पूर्वजन्मनि ॥ ३२७ ॥ कृतवान्दारुणंकर्मगोत्रघातंतदाऽनघ ॥ भुक्त्वानानाविधान्भोगान्यमलोकेतदाऽनघ ॥ ३२८ ॥ पुनर्वै
मानुषींयोनिंगौरांगोदक्षिणेतिलः ॥३२९॥ २।४।६।८। १२। १६।२०।२५।२७।३५।३७ वर्षेषुकष्टम ॥ परमायुर्वर्षाणि
९३॥७४अथजसोमतियोगः॥जसोमतियोगेयोजातःपूर्वजन्ममिबाहुजः॥कृत्वातुविविधान्पुण्यान्ब्राह्मणाश्चापिपूजिताः॥३३०॥तत्रभावि
बलात्पुत्रगर्भिणीचशुनीहता ॥ तेनपापानुसारेणनरकंगत्वासबाहुजः ॥ ३३१ ॥ भुक्त्वावर्षसहस्राणिचागतोभूमिमंडले ॥ इदंजन्मतृतीयं
तुमानुषोजायतेऽधुना ॥ ३३२ ॥१।४।६।८।१२।१५ ।२५।२७। वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१ ॥ ७५ अथचैतन्ययोगः ॥ बभूवमुख
जःकश्चिद्विद्याधनसमन्वितः ॥ नानाकलासुकुशलोविष्णुभक्तिपरायणः ॥ ३३३ ॥ राहुग्रस्तेहिचन्द्रेतुसर्वस्वंब्राह्मणेददौ ॥ तत्रभाविबला
त्पुत्रपापमाचरितंत्विदम् ॥ ३३४ ॥ धर्षिताक्षत्रियातेनकामलोभाच्छुभानना ॥ प्रताडितःपतिस्तस्यास्तेनदैवहतेनतु ॥ ३३५ ॥ ततो
मृत्युवशंप्राप्तोगतोसौयमशासनम् ॥ शुभाशुभफलंभुक्त्वादिव्यवर्षसहस्रकम् ॥ ३३६ ॥ अस्मिञ्जन्मनिदानेनमानुषत्वंगतोधुना ॥ सुरूपदे
हःसद्बुद्धिःस्त्रीपुत्रधनसंयुतः ॥ ३३७ ॥ शूरोदाताप्रधानश्चदेशेदेशेतिविश्रुतः ॥ किंचित्पापरतत्वेनधूर्तोमनसिपीडितः ॥ ३३८ ॥ १।३।

६।१०।१५।१९।२१।२६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६७॥७६ अथचैनयोगः ॥ कश्चित्क्षात्रकुलेविप्रपूर्वजन्मनिभूमिपः ॥ गिरिवा
सीमहादुष्टश्चौरकर्मपरायणः ॥ ३३९ ॥ लुंठितोब्राह्मणस्तेनमार्गेसंताडितोभृशम् ॥ तत्ताडनान्महत्पापंमृतःकालेद्विजोत्तमः ॥ ३४० ॥
गतेबहुतिथेकालेसजातोब्रह्महाऽधुना ॥ गंगायमुनयोर्मध्येक्रूरकर्मामहोद्यमी ॥ ३४१ ॥ १।४।८।१०।२०।२३ । वर्षेषुकष्टम् ॥ परमायु
र्वर्षाणि ७३ ॥ ७७ अथचारार्कियोगः ॥ अथासीद्बाहुजाकाचिद्भर्तृप्रियरतासदा ॥ दानधर्मरतासाध्वीविप्राणांपूजनेरता ॥ ३४२ ॥तथादे
वात्सासुभगाद्रव्यलोभरतासदा ॥ सायोषापुत्रमदद्द्विषंलोभवशेनवै ॥ ३४३ ॥ मृतः सविषदोषेणगृहीतंतद्धनंस्वयम् ॥ पतिस्तस्यामृत
स्तत्रपुत्रदुःखेनदुःखितः ॥ ३४४ ॥ पापमाचरितंचोग्रंस्वपुत्रवधसंज्ञकम् ॥ प्राप्तायमपुरंभुक्त्वापूर्वपुण्याच्छुभानना ॥ ३४५ ॥ पूर्वपुण्यप्र
भावेणसाजाताबाहुजेकुले ॥ सारक्तगौराधर्मज्ञासदापुण्यपरायणा ॥ ३४६ ॥१।३।८।१२।१५।१८।२०।२५ वर्षेषुकष्टम् ॥ परमायुर्वर्षा
णि ७० ॥ ७८ अथचिरबुरायोगः ॥ कश्चिद्विप्रकुलोत्पन्नोदेहावयवशोभितः ॥ सदाचारःसुशोभाढ्योदयार्द्रोयमतत्परः ॥३४७ ॥ क्रयवि
क्रयकर्ताचार्किंचिद्व्यापारवान्भुवि ॥ तस्यप्रियाशुभाऽऽचारापतिभक्तिपरायणा ॥ ३४८ ॥ दासीपुत्रोहतोदैवात्पापमाचरितंत्विदम् ॥ तेन
पापानुसारेणसजातश्चात्रपुत्रक ॥ ३४९ ॥ १।३।८।१२।१८।२२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६६ ॥ ७९ अथचवणयोगः ॥ पूर्वजन्मनि
समुत्पन्नःकिंचिद्भूमिपतिस्तदा ॥ तावज्जन्मनिवैश्यस्तुपरवित्तापहारकः ॥ ३५० ॥ द्यूतकर्मणिनिरतोनानालोकाऽभिवंचकः ॥ ग्रामाधी
शस्यनिकटेसर्वंभाषितवांश्चसः ॥ ३५१ ॥ कश्चिद्विप्रोऽवसद्ग्रामेशांतोदांतःक्षमीसदा ॥ पुत्र्यःपंचतथासप्तपुत्रवित्तेनसंयुतः ॥ ३५२ ॥
कालेचैवमृतेविप्रे[illegible]सर्वंस्वमाहृतम् ॥ निराधारासुताजातानाकारिद्विजभोजनम् ॥ ३५३ ॥ क्रियाकर्मकृतंनैवसर्वैराज्ञाहृतंचयत् ॥

एवंकृत्वापराधंसक्षत्रियोभूतिनासह ॥ ३५४ ॥ म्लेच्छैर्विनिहतोमार्येगतोराजायमालयम् ॥ तेनपापानुसारेणधनपुत्रविवर्जितः ॥ ॥ ३५५ ॥ १ । ३ । ८ । १३ । १८ । २२ । ३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९० ॥ ८० अथचातृकयोगः ॥ ब्राह्मणोऽभूत्कुरुक्षेत्रे कृषिकृद्वेदपारगः ॥ स्वज्ञातिकस्यचान्यस्यवृत्तिलोपमकारयत ॥ ३५६ ॥ तेनयुद्धंमहाघोरंतस्यजातामृतिस्तदा ॥ वृत्तिलोपीद्विजः कालेगतश्चयमशासनम् ॥ ३५७ ॥ स एवचद्विजोजातोवेदाभ्यासाच्चपुत्रक ॥ कुष्ठक्षययुतःपापाद्युवभावेद्विजोत्तम ॥ ३५८ ॥ १ । ३ । ५ । ८ । १२ । १६।२२।२७। ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७३ ॥ ८१ अथचतुरयोगः ॥ आसीज्जन्मांतरे चैवबाहुजःसरयूतटे ॥ राजाचघातितस्तेनपापमाऽऽचरितंत्विदम् ॥३५९॥आयुषस्तुसमाप्तित्वात्समृतः कालचोदितः ॥ सराजयक्ष्मरोगेणयुक्तः स्यादन्यजन्मनि ॥ ३६० ॥ अस्मिंस्तुवयसिविप्रसोपिमानैर्वियुज्यते ॥ महापापोद्भवैरोगैःपीड्यमानोमुहुर्मुहुः ॥३६१॥२।८।१३।१९।२५।२८। ३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ८२ अथचाशनयोगः ॥ कुलद्वयाऽऽनंदकरीपूर्वजन्मनिवैश्यजा ॥ बभूवभर्तृसुहृदातदाज्ञापालिनीसती ॥ अत्रजन्मनिसाविप्राकाश्यांजाताहिपुत्रक ॥ ३६२ ॥ १ । ४ । ७ । १० । १२ । १५ । २० । २३ । २८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६३ ॥ ८३ अथचतुर्भुजयोगः ॥ कश्चिद्द्विजोमहाभागमैथिलेनगरेवसन् ॥ अंधदेवइतिख्यातः पत्नीपुत्रसमन्वितः ॥ ३६३ ॥ विष्णोश्चाऽऽराधनेनिष्ठःपरोपकरणेतथा ॥ विद्यादानंतथाकृत्वाह्यर्भकाःशिक्षिताभृशम् ॥ ३६४ ॥ एवंनिवसतस्तत्रबहुवर्षगतागतैः ॥ एकस्मिन्समयेविप्रपापमुग्रमुपार्जितम् ॥ ३६५ ॥ताडितश्चस्वशिष्यस्तुविद्यार्थेचैकदाऽनघ॥ तेनदुःखेनच्छात्रोऽसावन्धोपिचबभूवह ॥ ॥ ३६६ ॥ विप्रश्चकालेसंप्राप्तेमृतःस्वर्गंतदागतः ॥ पूर्वपुण्यप्रभावेणसजातोब्राह्मणोधुना ॥ सर्वसौख्येनसंयुक्तोयौवनेनेत्रकष्टितः ॥

॥ ३६७ ॥ १ । ३ । ५ । ८ । ११ । १५ । १९ । २३ । २७ । २९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६६ ॥ ८४ ॥
अथचरांगीयोगः ॥ बाहुजश्चाभवत्कश्चिदांत्रवेद्येतदाऽनघ ॥ कृषिकर्मोद्यमेमग्नोनिष्ठुरश्चविशेषतः ॥ ३६८ ॥ एकस्मिन्समये
विप्रकृतंकर्मजुगुप्सितम् ॥ वीर्यंहत्वागोसुतस्यनासिकायांददौगुणम् ॥ ३६९ ॥ तेनपापानुसारेणमृत्वासनरकंगतः ॥ पापात्पापफलं
भुक्त्वायोनिंभुक्त्वाकथंचन ॥ ३७० ॥ षष्टिवर्षसहस्रांतेचागतोभूमिमंडले ॥ यौवनेमेहरोगश्चभूत्वापिम्रियतेशिशुः ॥ ३७१ ॥ १ । ३ ।
८ । १३ । १७ । २० । २४ । ३२ । ३६ । ३९ । ४० । ४५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०६ ॥ ८५ अथचोलरोमायोगः ॥ १ ॥
आसीज्जन्मनियानारीचेंद्रप्रस्थस्यसन्निधौ ॥ बाहुजस्यगृहेविप्रसर्वसम्पद्युतातदा ॥ ३७२ ॥ सगर्भासाबभूवाऽथकृतंकर्मचदारुणम् ॥ मुष्टि
काहननंकृत्वाचोदरस्ताडितोभृशम् ॥ ३७३ ॥ तेनदुःखेनभोविप्रगर्भपातोबभूवह ॥ मूर्छिताज्वरदाहेनसोमृताद्विजसत्तम ॥ भुक्त्वापापं
चनरकेपुनरागत्यभूतले ॥ ३७४ ॥ १ । ३ । ८ । १३ । १५ । २० । २६ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ११० ॥ ८६ अथचालक
योगः ॥ चालकेचनरोजातःसर्वसम्पद्युतोऽधुना ॥ भूत्वापिम्रियतेबालःकेनतत्कर्मणावद ॥ ३७५ ॥ भृगुरुवाच ॥ शृणुपुत्रप्रवक्ष्यामिय
त्कृतंपूर्वजन्मनि ॥ नर्मदानिकटेपूर्वंब्राह्मणःशास्त्रकोविदः ॥ ३७६ ॥ वेदविद्याऽनुरक्तश्चशिवस्याराधनेरतः ॥ एकस्मिन्समयेविप्रवैश्य
भार्य्यावराङ्गना ॥ ३७७ ॥ आगतातस्यनिकटेदृष्ट्वाविप्रेणवैतदा ॥ हठात्तयासहरतिःकृताऽतःसाचगर्भिणी ॥ ३७८ ॥ मृतातेनैवदुःखेन
पापमाचरितंत्विदम् ॥ सोपिमृत्वापापफलंभुक्त्वापुण्यफलंतथा ॥ ३७९ ॥ षष्टिवर्षसहस्रांतेपुनरागत्यभूतले ॥ गौरांगःपृथुदेहश्चराज
सश्चतुरःसुधीः ॥ ३८० ॥ १ । ३ । ९ । १५ । २० । २८ । ३१ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६३ ॥ ८७ अथचतुरानन

योगः ॥ पूर्वजन्मनिभोविप्रदेशेकौशलकेपुरा ॥ राजपुत्रोऽवसत्त्वेकोबाधकोनामनामतः ॥ ३८१ ॥ पत्नीतस्यमहाशुभ्रागुणरूपसम
न्विता ॥ एकदाराजपुत्रेणगर्भिणीहरिणीहता ॥ ३८२ ॥ प्रत्यहंमृगमांसेनाऽपोषयत्स्वतनुंतदा ॥ शरीरेवृद्धताजातादयातस्य नजायते
॥ ३८३ ॥ ततोवैमरणंप्राप्तंपत्नीभूतासतीतदा ॥ सत्यलोकेगतःसोपिभार्य्यायाःसुकृतेनतु ॥ ३८४ ॥ भुक्काकल्पमितं पुण्यंसत्यलोके
द्विजोत्तम ॥ पुनःपुण्यक्षयेजातेमानुषत्वंगतोऽधुना ॥ पूर्वजन्मविपाकेनमृतवत्सत्वमाप्तवान् ॥ ३८५ ॥ १ । ३ । ८ । १३ । १९ । २७ ।
२७ । ३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६२ ॥ ८८ अथचारीयोगः ॥ आसीज्जन्मांतरेचैवब्राह्मणोवेदपाठकः ॥ पत्नीरुद्रवतीनाम्नादुः
शीलाकर्कशासदा ॥ ३८६ ॥ वेदपाठरतोनित्यंषडंगंप्रत्यहंपठेत् ॥ एकस्मिन्समयेविप्रतत्रग्रामाधिपोमृतः ॥ ३८७ ॥ मरणेतस्यवैजा
तेतद्विप्रश्चनिमंत्रितः ॥ भुक्तंतेनतदादेवक्षत्रियस्यक्रियासुच ॥ ३८८ ॥ गृहीतंतस्यवैदानंशय्याचैवगजादिकम् ॥ स्वगृहेपुनरागत्यहर्षग
द्गदमानसः ॥ ३८९ ॥ ततोबहुतिथेकालेतस्यविप्रस्यपंचता ॥ गतोऽसौयमलोकेचनरकेदारुणेभृशम् ॥ ३९० ॥ अजव्याघ्रकृमीणां
तुयोनीर्भुक्कापृथक्पृथक् ॥ मानुषत्वंपुनर्जातंपूर्वकर्मविपाकतः ॥ ३९१ ॥ पुत्राःकन्यामृताविप्रतस्यचविविधास्तथा ॥ मृतवत्सोभवे
च्चासौरोगाश्चविविधास्तथा ॥ ३९२ ॥ गायत्र्याश्चजपैर्देवचतुर्विंशतिलक्षकैः ॥ पुत्रोभवेत्तस्यरोगानाशंयास्यंतिचाशुवै ॥ ३९३ ॥ १।४।
८।१४।१६।२०।२७।३०।३९वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ८९ अथचौर्य्ययोगः ॥ कान्यकुब्जेशुभेदेशेपुरासूर्य्यपुरेतथा ॥
रुद्रशर्माद्विजस्तत्रपत्नीतस्यप्रभावती ॥ ३९४ ॥ वेदपाठरतोनित्यंदारिद्र्येणप्रपीडितः ॥ कर्कशाभामिनीतस्यनिष्ठुरंभाषिणीसदा ॥
॥ ३९५ ॥ एकदासूर्य्यग्रहणेतैलकारस्तदागतः ॥ गंगामध्येगतोदानंतस्मैविप्रायवेददौ६ ॥३९६॥ प्रददौलक्षसंख्याकांस्वर्णमुद्रांसदक्षि

णाम् ॥ प्रतिगृहीत्वाथोदानंगृहंगत्वाद्विजस्तदा ॥ ३९७ ॥ व्ययंचकारद्रव्यस्यभार्य्यापुत्रसमन्वितः ॥ वेदपाठंपरित्यज्यविषयान्सेवते
सदा ॥ ३९८ ॥ आयुषस्तुसमाप्तत्वात्सविप्रःपंचतांगतः ॥ सगतोनरकेघोरेयमराजेनघातितः ॥३९९॥ भुक्त्वानरकजंदुःखंस्त्रीपुत्रसहित
श्वसः ॥ युग्ममेकंतदाविप्रप्रेतत्त्वेकाकजंबुकौ ॥ ततःशृणुचभोविप्रमानुषत्वंपुनर्भवेत् ॥ ४०० ॥ १ । २ ।:४ । ७ । ९ ! १४ । १९ ।
२० । २३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७०॥९० अथचनाकारयोगः ॥ कान्यकुब्जेद्विजःकश्चिन्नर्मदादक्षिणेतटे ॥ माहिष्मत्यांवसंस्त
त्रवेदपाठनतत्परः ॥ ४०१ ॥ नामतःकविशर्मेतिपत्नीतस्यमनोत्सवी ॥ अत्यहंवैश्यवृत्तिश्चक्रयविक्रयकारकः ॥ ४०२ ॥ तत्रवैश्योऽवस
त्त्वेकोधनधान्यसमन्वितः ॥ वैश्यस्यतेनविप्रेणधनंनीतमृणेबहु ॥ ४०३ ॥ ततःकालवशंप्राप्तःसविप्रोमरणंगतः॥ पापात्पापफलंभुक्त्वा
योनिंभुक्त्वाकथंचन ॥ ४०४ ॥ पुनर्वैमानुषीयोनौमातृकुक्षेःसमुद्भतः॥२।६।९।१३।१६।२०।२८वर्षेषुकष्टम्॥परमायुर्वर्षाणि१०० ॥ ९१
अथचौर्ययोगः॥आंत्रवेद्येद्विजस्त्वेकःप्रतिग्राहीवसत्यसौ॥पुण्यकर्मविहीनश्चचौरकर्मरतःसदा ॥४०५ परस्त्रीलंपटोभूत्वास्वस्त्रियास्त्यागनं
कृतम् ॥ एवंबहुतिथेकालेसमृतोगदपीडितः ॥ ४०६॥ पापाच्चनरकेगत्वाह्यसिपत्रवनांतरे ॥ नानायोनावभ्रमत्सपूर्वकर्मानुसारतः॥मध्य
देशेसमुत्पन्नःश्यामारुणकलेवरः ॥ ४०७॥ १ । ४ । ८ । ११ । १६ । १९ । २४ । २८ । २९ । ३२ । ३९वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि
७८॥९२अथचटाचटायोगः ॥ गोमत्याउत्तरेविप्रक्रोशपंचप्रमाणके ॥ विष्णुदासेतिनाम्नावैदासपुत्रोबभूवह॥४०८॥प्रज्ञाकरेपुरेशुभ्रेतस्य
भार्य्यात्रसुंदरी ॥कृषिंचकुरुतेनित्यंब्राह्मणानांचसेवकः ॥ ४०९ ॥पित्रोश्चपरमोदासःसदाचप्रियभाषकः॥एकस्मिन्दिवसेदेवव्रतीकश्चित्स
[illegible] ॥४१०॥ [illegible]किंचिन्नाऽपिनप्राप्तवान् ॥ अपभ्रंशंचागदत्साभिक्षुकंचैवसुंदरी ॥४११॥ विष्णुदासोगृहेनाऽभूत्तद्दिने

मुनिवित्तम ॥ विष्णुदासस्यमरणंबभूवद्विजसत्तमं॥४१२॥पश्चान्मृताचसाबालागतासानरकेतदा॥किंचित्पुण्यावशेषेणचागताधरणीतले॥
१।५।९।१३।१६।२०।२६।३०।३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१
गौरस्वरूपोमतिमान्धनधान्यसमन्वितः ॥४१३॥ पौरोहित्येनभ्रष्टःसभुंक्तेचप्रतिसद्मवे ॥४१४॥ श्राद्धकर्मपरिभ्रष्टः
९३ अथचलकाद्युतियोगः ॥ देवशर्माद्विजःकश्चिन्मध्यदेशेवसत्ततदा ॥ पौरोहित्येनभ्रष्टःसभुंक्तेचप्रतिसद्मवे ॥४१४॥ श्राद्धकर्मपरिभ्रष्टः
परपाकरतःसदा ॥ धनंचसंचितंतेनप्रतिग्राहेणवैप्रभो ॥४१५॥ मरणंचगतोविप्रोभार्याऽपितदनन्तरम् ॥ गतोऽसौनरकेघोरेपूर्वकर्मफला
दपि ॥ ४१६ ॥ युगमेकंतदाविप्रभुक्त्वानरकजंफलम् ॥ अश्वस्ययोनौगत्वाचवृषभस्यततःपरम् ॥ लब्धंजन्मचतुर्थंचमानुषत्वमिदं
शुभम् ॥ ४१७ ॥ १।५।१०।१५।२७।३२।३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६० ॥ ९४ अथछलिकयोगः ॥ मध्यदेशेपुरा
विप्रोऽवसत्त्वेकोद्विजःखलु ॥ ब्रह्मकर्मरतोनित्यंवेदवेदांगपारगः ॥ ४१८ ॥ प्रत्यहंपाठयामासचतुर्वेदान्यथाविधि ॥ लोहकारोवसत्तत्र
ब्राह्मणस्यसुहृद्द्विज ॥४१९ ॥ लोहकारेणयद्द्रव्यंलोहकर्मण्युपार्जितम् ॥ तत्सर्वंब्राह्मणगृहेस्थापितंप्रेमहेतुना ॥ ४२० ॥ एवंस्वल्पेगते
कालेलोहकारस्तदामृतः ॥ ब्राह्मणेनधनंभुक्तंनदत्तंतस्यभ्रातृके ॥ ४२१ ॥ आयुषस्तुसमाप्तित्वात्सविप्रःपंचतांगतः ॥ पापात्पापफलं
भुक्त्वायोनिंभुक्त्वाकथंचन ॥ जन्मन्यस्मिन्भवेत्पीडामासिमासिचहायने ॥ ४२२ ॥ १।४।११।१६।२२।२६ वर्षेषुकष्टम् ॥ पर
मायुर्वर्षाणि ६७ ॥ ९५ अथछिद्रमानंदीयोगः ॥ कान्यकुब्जेशुभेदेशेनन्दनेनामवैपुरे ॥ बोधशर्मापुरातत्रावसद्विप्रोऽतिनिर्धनः ॥
॥ ४२३ ॥ भुक्तंचसर्वदाऽनेनपरान्नंसहपुत्रकैः ॥ तस्यपत्नीचविख्याताबांधवानामवैपुरा ॥४२४॥ साऽपिभुक्तवतीचान्नंपरेषामेवसर्वदा ॥
तयोःप्रतिग्राहिणोश्चवासोऽभून्नरकेतदा ॥४२५॥ नरकाच्चविनिःसृत्यकाकश्चमहिषोऽभवत् ॥ पुनर्मनुजयोनौचपूर्वकर्मविपाकतः ॥४२६॥

१ । ३ । १० । १२ । १६।१७।२०।२७।३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९६ ॥ ९६ अथछाकाहारीयोगः ॥ मथुरायांचयस्यांवैवसंति बहवोजनाः ॥ तस्यांपुर्य्यांद्विजश्रेष्ठकुलालोधनवानपि ॥४२७॥ कुलालकर्मतस्तेनबहुद्रव्यमुपार्जितम् ॥ कर्मचंद्रेतिविख्यातस्तस्यपत्नीचदेवकी ॥४२८॥ कुलालकर्मनिरतोयात्रांकृत्वादिनेदिने ॥ एवंगतेतुवयसिवृद्धत्वंचततोभवत् ॥ ४२९ ॥ प्राप्तेवार्द्धक्यसमयेदारिद्र्येण प्रपीडितः ॥ स्वर्णकारस्यवैद्रव्यंव्यवहारेगृहीतवान् ॥ ४३० ॥ शतसंख्यामितंद्रव्यंव्ययेयातंद्विजोत्तम ॥ मृत्युंगतःकुलालोऽपिपत्नीतस्य पुरामृता ॥४३१॥ नर्मदायांतुभोविप्रद्वावपिमृत्युमागतौ ॥ तस्मात्तीर्थफलादेवस्वर्गलोकेगताबुभौ ॥४३२॥ ततःपुण्यक्षयेजातेमर्त्यलोकेसमागतः॥ मनुष्येषुशुभंजन्मधनधान्यसमन्वितम् ॥ पुनर्विवाहितानारीपूर्वजन्मप्रसंगतः ॥ ४३३ ॥ १ । ३ । ६ । ९ । १२ । १७ । २१ । २३ । ३७ वर्षेषुमहत्तरंकष्टम् ॥ परमायुर्वर्षाणि ९७ ॥ ९७ अथछमापतियोगः ॥ अवंतिकायाःपुर्य्याश्चदक्षिणेपञ्चक्रोशके ॥ पुरंदरइतिख्यातेपुरेचैवातिशोभने ॥ ४३४ ॥ तत्राऽवसत्सर्वदाहिब्राह्मणोवेदपारगः ॥ किशोरशर्माविख्यातःक्रयविक्रयणेसुधीः ॥ ४३५ ॥ कष्टेनतुमहाद्रव्यंसंचितंचदिनेदिने ॥ धनंचबहुधाकृत्वापुण्यकार्य्येनदत्तवान् ॥ ४३६ ॥ ततोभ्रात्रेकनिष्ठायभागोनैवप्रदापितः ॥ कोटित्रयमितंद्रव्यंस्वगृहेचैवसंचितम् ॥ द्रव्यस्यैवविभागायमृतोभ्राताचविग्रहे ॥ एवंबहुगतेकालेकिशोरोपिमृतःसवै ॥४३७॥ गतोसौनरकेघोरेयुगमेकोनविंशतिः ॥ पुनःकर्मवशादेवगर्दभत्वेचजातवान् ॥४३८॥ वृकयोनौततोगत्वामानुषत्वमिहागतः॥मध्यदेशेधुनाजातःकिंचिद्विद्यासमन्वितः ॥ शीतवातेनकष्टंचजातोजातोमृतःशिशुः ॥ ४३९॥१।३।५।८।१२।१५।२६।२९।३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६८॥९८ अथ[illegible]द्रियोगः ॥ अवंतिकायांचपुरिरंगकारोवसत्पुरा ॥ अरंजयद्बहुविधवस्त्राणिचद्विजोत्तम ॥ ४४० ॥ ब्राह्मणीनगरस्थैकातस्यांप्री

तिसमुद्भवम्॥त्यक्त्वापतिव्रतांभार्य्यांब्राह्मण्याश्चपतिःखलु॥४४१॥द्रव्यंचसंचितंतेननदानंनैवभोजनम् ॥ भूमिंखात्वाधनंस्थाप्यकदन्नंभुंज
तेसदा॥४४२गंगायमुनयोःसंगेकिंचिद्दानंकृतंखलु ॥ मरणंतस्यवैजातंतस्यभार्याविवाहिता ॥४४३॥ तत्पुरेचसतीजातालीलानामपति
व्रता ॥ सत्यलोकंगतौद्वौचदिव्यवर्षसहस्रकम् ॥४४४॥ पुनःपुण्यक्षयेजातेचेहजातोहिमानुषः ॥ मध्यदेशेतुविख्यातोधनधान्यसमन्वितः
॥४४५॥पुत्राश्चबहवोजाताःकोपितेषांनजीवति ॥ ब्राह्मणीगमनात्पापात्खंजोपिजायतेधुना॥४४६॥ १।५।८।११।१७।२१।२६।३०।३७
३९ ।४०वर्षेषुकष्टम्॥परमायुर्वर्षाणि६९॥९९अथचलेखायोगः॥उज्जयिन्यांपश्चिमेभागेवैश्योऽवसच्चभाग्यवान्॥ धनधान्यसमायुक्तःस्वक
र्मनिरतःसदा ॥ ४४७॥ एवंमध्यवयःप्राप्तेदारिद्र्येणप्रपीडितः ॥ व्यापारार्थंततोदेवविप्रस्वर्णंगृहीतवान् ॥४४८॥ पलंविंशतिमानंचव्ययं
यातंदिनेदिने॥ततोवैश्यस्यमृत्युर्वैभार्य्यंयासहितस्यच ॥ ४४९ ॥ षष्टिवर्षसहस्राणिभुक्त्वाचैवशुभाशुभम् ॥ ततोवैमानुषीयोनौचागतो
धरणीतले ॥ धनधान्यसमायुक्तःपुत्रकन्याविवर्जितः ॥ ४५० ॥ १।५।८।१२।१७ एषुवर्षेषुप्रायःकष्टम् ॥ परमायुर्वर्षाणि ६७ ॥ १००
अथचीकूटाद्रियोगः॥ अयोध्यानगरीश्रेष्ठाततःक्रोशद्वयात्परे ॥ अग्निकोणेतदाविप्रसंगोग्रामश्चविश्रुतः ॥४५१॥ तस्मिन्ग्रामेऽवसत्त्वेकोब्रा
ह्मणोदौत्यतत्परः ॥ मद्यपानरतोनित्यंचौरविद्यारतः सदा ॥ ४५२ ॥ परस्त्रीरमणेधूर्तोवेश्यासुरततत्परः॥ चौरितंद्रव्यमुत्पाद्यदत्तंभागंच
तुर्थकम् ॥४५३॥ एवंगतेतुवयसितस्यमृत्युर्बभूवह ॥ नरकेतंपातयामासुर्यमदूतायमाज्ञया ॥५५४॥ सप्तवर्षसहस्राणिरौरवेपरिपाचितः॥
महाकष्टंभवेत्तस्यसूचीमुखक्रमादिभिः ॥४५५॥ पुनःकर्मवशादेवनरकान्निस्सृतोयदा॥ बिडालकाकयोनौचततोभूत्वाचमानुषः॥ सर्वांगे
जायतेपीडाचोद्वेगोमानसीव्यथा ॥४५६॥ १।३।५।९।१३।१६।२६।३१।३७ वर्षेषुकष्टम्॥ परमायुर्वर्षाणि ६३ ॥ १०१ अथचंपकारूढ

योगः॥कावेरीनिकटेचैववैश्यानामप्रभाकरः॥ धनधान्यसमायुक्तोद्रव्यस्योत्पादनेरतः ॥४५७॥ एकस्मिन्समयेविप्रसपघातःकृतोभृशम् ॥
वनेदावाग्निदाहेननितरांमुनिसत्तम॥४५८॥एकदामकरेमाघेसस्नातश्चरवौगते॥तेनपुण्यानुसारेणस्वर्गेगत्वाचवैश्यजः॥४५९॥ पापाच्चनर
केगत्वाह्यपिवर्षसहस्रकम् ॥ पुनरागत्यमेदिन्यांकिंचिद्वित्तसमन्वितः॥कंदंतेसर्वदिवसेपूर्वकर्मानुसारतः॥४६०॥१।४।८।१३।१५।१७।१९
२०।२४।२८।३०।३७वर्षेषुकष्टम्॥परमायुर्वर्षाणि९९॥१०२अथचर्वगीयोगः॥आसीज्जन्मांतरेचैवकेवटःकीकटेवसन् ॥ मीनांश्चघातयन्नि
त्यंतत्सकाशाद्धनंकृतम्॥४६१॥दत्तानितेनदानानिचंद्रग्रस्तेचपर्वणि॥एकस्मिन्समयेविप्रब्राह्मणस्यप्रसंगतः॥४६२ ॥ तीर्थाटनंकृतंसम्य
क्कथांश्रुत्वातथाऽनघ ॥ एवंगतेतुवयसितस्यमृत्युरभूत्पुरा ॥४६३॥ पापात्पापफलंभुक्त्वा योनिंभुक्त्वाकथंचन ॥ पुनरागत्यमेदिन्यांधन
धान्यसमन्वितः ॥४६४॥ पादजस्यकुलेजातोदानाचैवधनाधिपः ॥ यौवनेराजरोगेणपीड्यमानकलेवरः ॥ ४६५ ॥ १।३।८।१२।१६।
२१ । २६ । २७। २९ । ३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७८ ॥१०३॥ अथचारुमोचनयोगः ॥ कश्चिद्दासकुलेजातःकीटदेशेतदान
वं ॥ दत्तानितेनदानानिब्राह्मणेषुस्वशक्तितः ॥४६६ ॥ एकस्मिन्समयेविप्रकृत्वाव्यापारनिश्चयम् ॥ परदेशात्कृताप्राप्तिर्द्रव्याणिविविधा
निच ॥ ४६७ ॥ शिवालयःकृतःसम्यक्कन्योद्वाहमथाऽकरोत् ॥ एवंहिन्यवसत्तत्रबहुवर्षगतागतैः ॥ ४६८ ॥ स्वकीयांगृहिणींत्यक्त्वापर
भार्य्याचमानिता ॥ तेनपापानुसारेणयमलोकंचप्राप्तवान् ॥ ४६९ ॥ यमलोकात्परिभ्रष्टश्चागतोधरणीतले ॥ ईषद्गौरोमध्यदेहोदक्षिणांगे
समन्वितः ॥ ४७० ॥ १ । २ । १८ । २२ । २७ । २९ । ३२ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७२ ॥ १०४ अथचर्मकयोगः ॥
[illegible]नगरेऽवसत् ॥ शिवदेवीतिविख्यातासुंदरीचारुशोभना ॥४७१॥ पतिंत्यक्त्वाचसानारीपरपुरुषरताऽभवत् ॥देशे

[illegible]तुस्वैरिणीद्विजसत्तम॥४७२॥एकस्मिन्समयेविप्रजारमित्रप्रसंगतः॥ गंगास्नानेकृतंसम्यक्सामृतातत्रभोसुत ॥४७३गंमामृत्यु
[illegible]रात्तुत्रस्वर्गेगत्वाचसांगनां॥पुनरागत्यमेदिन्यांपूर्वपुण्यप्रभावतः॥४७४॥ईषद्गौरांगवदनाचारुकिञ्जल्कशोभना ॥ पतिप्रीतिरताचोग्रार
तितृप्तिर्नजायते ॥ ४७५ ॥ पुत्रार्थचिंतानित्यंचगुप्तपापकृताद्भवेत ॥ आद्येतृतीयेवर्षे[illegible]पीडातस्यतथाक्वचित् ॥ ४७६ ॥ अष्टमेनवमेव
र्षेमंगलंलभतेध्रुवम् ॥ विंशतिवर्षेत्यारिष्टंचपंचवेदाब्दकेमृतिः॥४७७ ॥ १०५ अथचंडलीकयोगः ॥ आसीज्जन्मांतरेचैवब्राह्मणःकीकटे
वसन् ॥ ब्रह्मकर्मपरिभ्रष्टोवैश्यकर्मसमाचरत् ॥४७८॥ शर्करांस्थाप्यवृषभेसम्यग्वाहितवान्द्विज ॥ मार्गेपंकेऽभवन्मग्नोवृषभोभारसंयुतः ॥
॥ ४७९ ॥ दंडेनताडितस्तेनक्रोधेनमहतावृषः ॥ तद्दुःखेनचदीनःसपंचत्वंप्राप्तवान्खलु ॥४८०॥ गतेकालेतुमृत्वासविप्रोऽपिनरकंगतः ॥
अस्यजन्मान्यभूवन्वैबहुवर्षसहस्रकम् ॥४८१॥ पुनरागत्यमेदिन्यांकिंचित्पुण्यप्रभावतः ॥ श्यामाऽरुणोलांछनिकःश्वेतकुष्ठेनचिह्नितः ॥
॥ ४८२ ॥ १।५।९।१२।१५।२१।२७।३७वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०५ ॥ १०६अथचंपाकांतियोगः ॥ किरातेनगरेपूर्वंब्रह्मदत्तो
पिब्राह्मणः ॥ सदाऽऽचारीव्रतीचैवब्रह्मकर्मपरायणः ॥ ४८३ ॥ श्रौतस्मार्तनिरतश्चशिवस्याऽऽराधनेरतः ॥ परोपकरणेनिष्ठःपरमैश्वर्य्य
संयुतः ॥४८४॥ एकस्मिन्समयेविप्रक्रोधेनमहतावृतः ॥ सविप्रःस्वस्यगेहंतुदग्धंहिकृतवान्खलु ॥४८५॥ जीवाश्चबहवस्तत्रभस्मीभूताश्च
दारुवत् ॥ तेनपापानुसारेणसविप्रःपंचतांगतः ॥ ४८६ ॥ पापात्पापफलंभुक्त्वापुण्यात्स्वर्गंतथाऽनघ ॥ बहुवर्षसहस्रांतेपुनरागत्यभूतले ॥
॥ ४८७ ॥ मध्यदेशेसमुत्पन्नःसुंदरःप्रियवाचकः ॥ दानेधर्मेमतिस्तस्यचंचलश्चकलात्मकः ॥ ४८८ ॥ १।५।८।१३।१६ वर्षेषु
कष्टम् ॥ परमायुर्वर्षाणि ७० ॥ १०७ अथचरेडकयोगः कश्चिद्द्विजकुलेपूर्वंब्रह्मपुत्रस्यसन्निधौ ॥ इंद्रजालीमनोभ्रष्टोभूतप्रेतादिसेवकः ॥

॥ ४८९ ॥ लोकानांवंचनेव्यग्रः परकार्य्यविनाशकः ॥ एकस्मिन्समयेविप्रतीर्थयात्रामथाऽकरोत् ॥ ४९० ॥ आयुषस्तुसमाप्तित्वान्ममारपथि भूसुरः ॥ पुनरागत्यमेदिन्यांमनुष्यत्वंगतोऽधुना ॥ ४९१ ॥ १ । ३ । ८ । १२ । १६ । २० । २९ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६५ ॥ १०८ अथचंद्रालीयोगः ॥ कश्चिद्द्विजकुलेपूर्वंब्रह्मपुत्रस्यसन्निधौ ॥ देवराजइतिख्यातः पत्नीपुत्रसमन्वितः ॥ ४९२ ॥ सर्वविद्याविवेकीचतेनकोपिनपाठितः विद्यागर्वयुतस्तत्रविचचारमहीतले ॥ ४९३ ॥ दत्तानितेनदानानिपर्वस्वपिहिभक्तितः ॥ गयाश्राद्धमथोकृत्वाब्राह्मणाश्चापितोषिताः ॥ ४९४ ॥ एवंनिवसतस्तत्रबहुवर्षगतागतैः ॥ आयुषस्तुसमाप्तित्वात्सविप्रः पंचतांगतः ॥ ४९५ ॥ चंद्रलोकेकृतोवासः पितृलोकेततः परम् ॥ पितृलोकात्परिभ्रष्टश्चागतोधरणीतले ॥ गौरस्वरूपोमतिमान्धनधान्यसमन्वितः ॥ ४९६ ॥ ३ । ६ । १३ । २० । २८ । ३५ । ४० वर्षेषुकष्टम् परमायुर्वर्षाणि ६१ ॥ १०९ अथचन्द्रमदीयोगः ॥ वाराणस्यामभूत्कश्चिद्ब्राह्मणोवेदवित्पुरा ॥ वेदानध्यापयामासस्वशिष्यान्सर्वदासच ॥ ॥ ४९७ ॥ मृत्वास्वर्गंगतश्चासौभुक्त्वाभोगांश्चशाश्वतान् ॥ आगत्यचधरापृष्ठेवेदशास्त्रस्यपारगः ॥ ४९८ ॥ १६ । २० । २५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ इतिचवर्गयोगः ॥ इतिश्रीयोगसागरेसभार्चितदेशेशुक्रभृगुसंवादेचवर्गादिनवोत्तरशतयोगकथनंनामपञ्चमं प्रकरणम् ॥ ५ ॥ अथटवर्गयोगः ॥ देशेकलिंगकेह्यासीत्पूर्वंबाहुजसंज्ञकः ॥ गंगास्नानंकृतंतेनबाहुजानांसहायतः ॥ १ ॥ एकदातुकुटुम्बंचघातितंतेनजानता ॥ एकस्मिन्वैदिनेगत्वाददाहवनमद्भुतम् ॥ २ ॥ एवंसुदारुणंकर्मकृत्वामृत्युंगतश्चसः ॥ यमाज्ञांचापिसंप्राप्यदुरितंकर्मभुक्तवान् ॥ ३ ॥ शुभाच्छुभफलंभुक्त्वापापाच्चनरकांस्तथा ॥ माघेचजाह्नवीस्नानात्सजातः पादजोधुना ॥ ४ ॥ भव्योमहोद्यमीगौरः कृशांगश्चान्धत्वत्कथा ॥ बहुलोभीबहुस्त्रीकोदेवताऽतिथिपूजकः ॥ ५ ॥ १ । ३ । ८ । १३ । १६ । २० । २७ । ३५ । ३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि

६७॥ १ अथटंकयोगः ॥ अत्रजन्मन्यसौवंध्याप्राग्भवेसुतसंयुता ॥ पूर्वपापप्रभावेणसपत्न्यागर्भघातनात ॥६॥ जातेयंपादजाऽत्रैवदुःखा
तासुतवर्जिता ॥ प्रायश्चित्तंप्रवक्ष्यामिसर्वपापप्रणाशकम् ॥७॥ काश्यांगत्वाचविधिनाशिवमाराध्ययत्नतः ॥ व्रतैर्दानैर्महापुण्यैर्नानाविभ
वविस्तरैः ॥८॥ शिवरात्रौततःपश्चाद्दीपमालादिपुष्पकैः ॥ अर्धरात्रेमहानद्यामध्येस्नानंतुकारयेत् ॥९॥ मन्त्रैर्वरुणसूक्तैश्चनौकायांचसमा
स्थितः ॥ यएवंकुरुतेविप्रतस्यस्यात्संततिर्ध्रुवम् ॥१०॥ १।५।९।१५।१८।२२।२७।३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ४९ ॥ २ अथटं
कोरयोगः ॥ याऽकरोत्प्राग्भवेकाचिन्नारीराजवधंतदा ॥ सैवाऽत्रजन्मनिब्रह्मन्क्षयरोगनिपीडिता ॥ ११ ॥ यक्ष्मणाचक्षयंयातिधातुतः
क्षयरोगिणी ॥ धातुक्षयेक्षयंयातितच्छरीरमशाश्वतम् ॥ १२ ॥ दृढकर्मकृतंपापंतेनैवाचरितंद्विज ॥ पापस्यनाशकर्तातुनाऽस्त्युपायोऽत्र
जन्मनि ॥ १३ ॥ २।४।६।९।१०।१५।२० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७२ ॥ ३ अथटनत्कारयोगः ॥ कश्चिद्द्विजोमहा
भागह्यासीद्वंगेहिधार्मिकः ॥ गयायांद्वादशेवर्षेकृत्वाश्राद्धंविधानतः ॥१४॥ विधिनातत्रदत्तानिकाम्यश्राद्धानिमानद ॥ ततोभाविबला
द्विप्रब्राह्मणेनतपस्विना ॥ १५ ॥ स्थापितंतद्गृहेद्रव्यंलोभाद्दत्तंनतद्धनम् ॥ सर्वैर्मिलित्वाभुक्तंतुस्त्रीपुत्रभ्रातृभिःसह ॥ १६ ॥ ततोबहुतिथे
कालेगतोहियमशासनम् ॥ पूर्वपुण्यप्रभावेणसजातोत्रापिवैद्विजः ॥ १७ ॥ विशालाक्षोधनीमानीसुरूपःप्रीतिदोघृणी ॥ बहुग्रामाधि
कारीचपुण्यात्सर्वंफलंत्विदम् ॥१८॥ लोभीक्रूरोमहाक्षुद्रःसदाचिंतासमन्वितः ॥ संतानसुखहीनस्तुप्रायश्चित्तेकृतेसुखम् ॥ १९ ॥ १।
३।८।२०।२९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९० ॥ ४ अथटनेश्वरयोगः ॥ विंध्याद्रिनिकटेपूर्वंशूद्रःपरमधार्मिकः ॥ धनमैश्वर्यमतुलं
किंचिद्देशाधिपःसच ॥ २० ॥ कार्मुकेतिसमाख्यातःशिवस्यस्मरणेरतः ॥ एकस्मिन्समयेविप्रभाविनोर्थस्यवैबलात् ॥२१॥ ब्राह्मणस्य

हृतंवित्तंलोभाकुलितचेतसः ॥ तेनपापानुसारेणगतोसौयमशासनम् ॥ २२ ॥ पुण्यात्पुण्यफलंभुक्तातेनाऽयंबाहुजोधुना ॥ ईषद्गौरोमनस्वीचवामांगेनसचिह्नितः ॥ २३ ॥ प्रथमेतृतीयेवर्षेषष्ठेद्वादशकेपिच ॥ पीड्यंतेसर्वगात्राणिविंशतिवर्षांतरेतथा ॥ पञ्चपंचाशदब्दान्तंकथितंप्राणधारणम् ॥ २४ ॥ ५ अथटर्णगायोगः ॥ आसीत्पूर्वंमहाभागअयोध्यानिकटेवसन् ॥ नामतोभीष्मदेवश्चबहुस्त्रीपरिवारयुक् ॥ २५ ॥ एकातुसुंदरीभार्य्यासुशीलाव्रतपालिनी ॥ सपत्नभावदोषेणकेनापिनिंदिताऽन्यया ॥ २६ ॥ अपभ्रंशैस्तर्जिताचसातिक्रोधेनविह्वला ॥ भीष्मदेवस्यवैचाग्रेसर्वमुक्तवतीस्वयम् ॥ २७ ॥ ततोमूर्ध्निदुर्भगासाभीष्मदेवेनताडिता ॥ साम्रृतातेनदुःखेनातोबभूवसपापभाक् ॥ २८ ॥ किंचित्कालांतरेविप्रभीष्मदेवोपिवैमृतः ॥ स्त्रीघातपापात्प्राप्तोयंनरकेभृशदारुणे ॥ २९ ॥ पुनरागत्यमेदिन्यांकिंचित्पुण्यप्रभावतः ॥ भूत्वापिम्रियतेभार्यापुत्रसौख्यंनलभ्यते ॥ ३० ॥ १ । ३ । ५ । ८ । ११ । १८ । २० । २४ । ३१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६५ । ६८ ॥ ६ अथटंकणायोगः ॥ कश्चिद्द्विजकुलेपूर्वं वेत्रवत्याश्चसन्निधौ ॥ हिरण्यदेवोविख्यातश्चतुरःसर्वकलात्मिकः ॥ ३१ ॥ भार्य्यामनस्विनीतस्यपरपूरुषरताचसा ॥ ब्रह्मकर्मपरिभ्रष्टापक्षिणांघातनेरता ॥ ३२ ॥ एकस्मिन्समयेविप्रतरुशाखाऽवलंबितम् ॥ शुकस्यनीडंचाकर्षन्दष्टाव्यालेनतत्रच ॥ ३३ ॥ मृत्वादुष्टापिसाविप्रगत्वाचयमशासनम् ॥ यमलोकात्परिभ्रष्टामानुषत्वंहिचागता ॥ ३४ ॥ १५ । ११ । २० । २७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८८ ॥ ७ अथटोरयोगः ॥ कश्चिद्विप्रकुलेपूर्वंनर्मदायास्तटेशुभे ॥ देवशर्माचविख्यातोभार्य्यातस्यवरांगना ॥ ३५ ॥ तृणकाष्ठयोर्व्यापारः सर्वदातेनकारितः ॥ तत्सकाशात्कृतंद्रव्यंकार्पण्येनविमोहितः ॥ ३६ ॥ नदातंनाऽपितेभोक्तंनश्राद्धंनद्विजोददौ ॥ ॥ किंचित्कालांतरेविप्रः सगत्वायममंदिरे ॥ ३७ ॥ नानाजन्मान्यभूवंश्चनानावर्षसहस्रकम् ॥

धनान्मानुष्यमापन्नःसर्वरोगेणपीडितः ॥ ३८ ॥ १ । ३ । ८ । १३ । १६।२०।२४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६७ ॥ ८ अथटामे
श्वरयोगः ॥ टामेश्वरेनरोंजातोधनवान्पंडितः सुधीः ॥ सत्यवादीविलासीचकुनखीबहुधार्मिकः ॥३९॥ पूर्वजन्मनिक्षात्रोऽसौगौरीकुमा
रकेऽवसत् ॥ एकदातत्रभोविप्रकृतंकर्मजुगुप्सितम् ॥ ४० ॥ भ्रातृपत्न्याश्चगमनंकृतंतेनतदाबलात् ॥ सामृतालज्जिताभूत्वाविषंभुक्त्वाचदा
रुणम् ॥ ४१ ॥ तेनपापानुसारेणजातःपुत्रोविनश्यति ॥ स्वर्णदानंपलंचैकंनराकारंचकारयेत् ॥४२ ॥ दक्षिणासहितंदेयंनिष्कृत्यर्थंद्वि
जन्मने ॥ ततःश्रेयोभवेत्तस्यपुत्रोजीवतिनिश्चितम् ॥ ४३ ॥ १ । ४ । ९ । १२ । १५ । २० । २७ । ३१ । ३६ । ३९ । ४० । ४५
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०० ॥ ९ अथटिक्कितयोगः ॥ दशारण्येऽवसत्पूर्वंबाहुजश्चपराक्रमी ॥ शैशवेयौवनेचाथवार्द्धक्येपापमाच
रत् ॥ ४४॥एकस्मिन्समयेविप्रभाविनोर्थस्यवैबलात्॥पूर्वंदत्तंहृतंक्षेत्रंब्राह्मणानामधर्मतः॥४५॥तेनपापानुसारेणनरकेरौरवेगतः॥ बहुवर्ष
सहस्रांतेपुनरागत्यभूतले ॥ ४६॥गौरोरुणोमध्यदेहोहृदिकंठेप्रचिह्नितः॥प्रथमेद्वितीयेवर्षेसौख्यंमातृसहायतः॥४७॥षष्ठेऽष्टमेचविकलमेक
विंशतिमेपिवा ॥ चतुःषष्टितमाब्दान्तेजीवनंकथितंमया ॥ ४८ ॥ १० ॥ अथडुंबरयोगः ॥ कार्णाटेनगरेविप्रशूद्रश्चन्यवसत्पुरा ॥ वृक्षा
णांछेदनंकृत्वाकीत्वावैलाभसंकुलः ॥४९ ॥ दत्तानितेनदानानिब्राह्मणेभ्यःस्वशक्तितः ॥ तीर्थाटनंतथाकृत्वाबहुवर्षगतागतैः ॥ ५० ॥
आयुषस्तुसमाप्तत्वान्ममारपथिपादजः ॥ इदंजन्मद्वितीयंतुबाहुजस्यकुलोत्तमे ॥ ५१ ॥ गौरस्वरूपोमतिमान्कीर्तिमान्धनसंयुतः॥ पुत्रा
र्थेसर्वदाचिंतापूर्वपापानुसारतः ॥५२॥ प्रकर्तव्यःहिरण्याढ्यःकल्पवृक्षःशुचान्वितः॥ सुवर्णकल्पवृक्षस्यरत्नाऽऽढ्यस्यद्विजोत्तम ॥ श्रद्धया
चक्रतेदानेपुत्रोभवतिनान्यथा ॥ ५३ ॥ १ । ३ । ५ । ९ । १० । १४ । १६ । २० । २५ । २८ । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६७

॥ ११ अथडिमडिमायोगः ॥ गंधर्वइतिविख्यातोराजपुत्रोबभूवह ॥ सरयूनिकटेविप्रन्यवसत्परिवारयुक् ॥ ५४ ॥ पितातस्यमहाराजा
शूद्रःपरमधार्मिकः ॥ गंधर्वेणतदाविप्रकृतंकर्मजुगुप्सितम् ॥ ५५ ॥ बलादाकर्षितातेनबालापुत्रवधूःशुभा ॥ एवंगतेतुवयसिपा
पमाचरितंभृशम् ॥ ५६ ॥ सर्वाप्रजाचविमुखाभूत्वाचद्विजसत्तम ॥ गंधर्वस्याहरत्प्राणान्सगत्वायमशासनम् ॥ ५७ ॥ नानाजन्मोत्तरे
विप्रमानुषत्वमिहागतः ॥ प्रथमाब्देद्वितीयेचचतुर्थेष्टमकेपिवा ॥ ५८ ॥ द्वादशेषोडशेवर्षेचाऽतिकष्टेनपीडितः ॥ राजरोगोभवेत्तस्यच
त्वारिंशद्गतेमृतिः ॥ ५९ ॥१२॥ अथडुंगरयोगः ॥ कश्चित्क्षात्रकुलेपूर्वंरुद्रवत्यापगातटे॥गोवर्द्धनःसमाख्यातःपत्नीपुत्रसमन्वितः॥६०॥
द्वीपव्यापारनिरतःक्रयविक्रयणेदृढः ॥ कृतानितेनद्रव्याणिबहुकालगतागतैः ॥६१॥ कृत्वाधर्मार्जनंचासौब्राह्मणायददौकिल॥दासीगमन
पापाच्चनरकेकर्दमेगतः ॥६२॥ दशवर्षसहस्राणिकृमियोनौपुनःपुनः ॥ पश्चाद्वैमानुषीयोनौमातृकुक्षेःसमुद्गतः ॥६३॥१।३।८।१३।१७।
२०।२८।३०। एषुवर्षेषुवैकष्टंकथितंचविशेषतः ॥ यदिजीवतिदानाद्वैतदायुःसप्तषष्टिकम् ॥ ६४ ॥ १३अथडोलनयोगः ॥ अथपूर्वे
विपाशायाःशूद्रोनाम्नादिवाकरः ॥ नृपसेवीमहामानीद्रव्यस्योत्पादनेरतः ॥६५॥ महाभिमानयुक्तेनकृतंकर्मचदारुणम् ॥ नृपस्यदुहिताभ
न्याकुमारीमनुवार्षिकी ॥ ६६ ॥ तस्यांतथाकृताप्रीतिर्यथाकामश्चवैरतौ ॥ सगर्भासाबभूवाऽपिभूपेनापिश्रुतातदा ॥ ६७ ॥ पाद
जस्यशिरश्छिन्नंखड्गेनचनृपाज्ञया ॥ सगत्वायमलोकेच बहुवर्षमभोगकृत् ॥ पुनरागत्यमेदिन्यांकष्टंतस्ययदाकदा ॥ ६८ ॥ १।५।
१०।१२।१७।२२।२५। २९। ३३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ४७ ॥ १४ अथढोलयोगः ॥ ढोलयोगेचयोजातो
[illegible]मानुषः ॥ परनारीविलासीचपरकार्य्यस्यविघ्नकृत् ॥ ६९ ॥ परापवादनिरतोबह्वाहारीबलान्वितः ॥ आसीत्पूर्वभवेक

[illegible]सर्वार्थसाधकः ॥ ७० ॥ कीटदेशेवसत्सोपिधनधान्यसमन्वितः ॥ गोशतंचकृतंदानंपृथ्वीदानंततःपरम् ॥ ७१ ॥ बाहुजेनतु
[illegible]ाहाय्यात्कृतंकर्मजुगुप्सितम् ॥ पृथक्छय्यास्वस्त्रियाश्चविप्राणांमानखंडनम् ॥ ७२ ॥ यतीनांचददौदंडमेवंकालगतागतैः ॥ तेनपापा
नुसारेणवंशवृद्धिर्नजायते ॥ १।३।८।१६।२२।२९।३५।३६।४० अल्पमृत्युःखवेदाब्देपरमायुःशताब्दकम् ७३ ॥ १५ अथढाकयोगः ॥
ढाकयोगेचयोजातःपूर्वजन्मनिबाहुजः ॥ विख्यातःकीर्तिमान्सोपिराज्यकर्तासदानघ ॥ ७४ ॥ एकस्मिन्समयेविप्रचाखेटकेसदारतः ॥
भृत्यान्वितश्चराजासवनंप्रतिययौतदा ॥ ७५ ॥ शशकान्सूकरांश्चैवमृगान्हत्वात्वनेकधा ॥ एकातुसुरभिस्तत्रह्यासन्नप्रसवातदा ॥ ७६ ॥
व्याघ्रवत्तनुमासाद्यद्रुमाकीर्णेतुचास्थिता ॥ दूरादपिविलोक्याथशरात्संताडिताद्विज ॥ ७७ ॥ पपातधरणीपृष्ठेदृष्ट्वाभूपश्चशंकितः ॥ पापा
च्चनरकंगत्वादिव्यवर्षसहस्रकम् ॥ पुनरागत्यमेदिन्यांसुन्दरश्वेतचिह्नितः ॥ ७८ ॥ १ । ४ । ८ । १० । १३ । १७ । २० । ३१ । ३६
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९७ ॥ १६ अथढुढुरीयोगः ॥ आसीज्जन्मांतरेचैववेश्याचंद्रकलाशुभा ॥ रूपयौवनसम्पत्त्याबहुद्रव्यमुपा
र्जितम् ॥ ७९ ॥ लोकानांवंचनेव्यग्राचंचलाचातिशोभना ॥ एकदाचंद्रग्रस्तेचब्राह्मणायकुटुम्बिने ॥ ८० ॥ स्वर्णमालांददौदानंगांत्वे
कांचसवत्सकाम् ॥ तेनपुण्यप्रभावेणचाधुनासुखसंयुता ॥ ८१ ॥ १ । ३ । ९ । १४ । १८ । २० । २६ वर्षेषुकष्टम् ॥ गर्भोत्पातनम् ॥
सर्वांगेकष्टम् ॥ ज्वरादिरुधिरस्रावः ॥ परमायुर्वर्षाणि ४८ ॥ १७ अथढनत्संज्ञकयोगः ॥ कालंजरगिरौरम्येतत्रविप्रोऽवसत्पुरा ॥ गी
र्वाणइतिविख्यातःपत्नीतस्यसुशोभना ॥ ८२ ॥ परमैश्वर्य्यमतुलंदेशकोशाधिपस्तदा ॥ ब्रह्मकर्मपरिभ्रष्टःक्षात्रधर्मेसदारतः ॥ ८३ ॥ ए
कस्मिन्समयेविप्रभाविनोर्थस्यवैबलात् ॥ पुत्रार्थंब्राह्मणद्वाराचण्डीपाठाश्चपाठिताः ॥ ८४ ॥ ततस्यचाऽभवत्पुत्रःपरमोत्कर्षसंयुतः ॥

ब्राह्मणस्याऽकरोन्निंदांतथावेदस्यभोद्विज ॥ ८५ ॥ तेनपापप्रभावेणगर्दभोपिबभूवह ॥ पुनर्वैमानुषींयोनिंस्वर्गाच्चैवमुपागतः ॥ हृष्टःपुष्टः सविज्ञेयःपुत्रेणरहितोऽनघः ॥ ८६॥ १।३।८।२०।२४।२१।२६।२९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८० ॥ १८अथडीहायोगः ॥ कश्चि द्विष्णुपुरेरम्येगंगायादक्षिणेतटे ॥ ब्राह्मणोन्यवसत्तत्रशौचाचारविवर्जितः ॥ ८७ ॥ यवनैश्चकृतामैत्रीबहुवर्षगतागतैः ॥ एकस्मिन्समये विप्रस्त्वर्णकारस्यवैधनम् ॥ ८८ ॥ चोरितंतेनमूढेननरकेदारुणेगतः ॥ नरकान्निःसृतोविप्रचायातोधरणीतले ॥ ८९ ॥ १ । ३ । ७ । १२ । १५ । २० । २९ । ३५ । ३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६० ॥ १९ अथडोहनयोगः ॥ डोहनेचनरोजातस्तपस्वीपूर्वजन्म नि ॥ इलावर्तेऽवसत्सोऽपिधनधान्यविवर्जितः ॥ ९० ॥ शारदेतिसमाख्यातापत्नीतस्यकुलोचना ॥ स्वीयांपाणिगृहसतींपरित्यक्त्वाद्वि जोत्तम ॥ ९१ ॥ परभार्य्यासमानीतास्वगृहेस्थापितातुसा ॥ उद्वाहितातुविपिनेक्रंदमानामुहुर्मुहुः ॥ ९२ ॥ साम्रृतापतिशोकेनपापमाच रितंत्विदम् ॥ कालांतरेमृतःसोपिगतोपियमशासनम् ॥ ९३ ॥ यमलोकात्परिभ्रष्टश्चागतोधरणीतले ॥ ईषद्गौरोतिह्रस्वश्चमतिमान्धनसं युतः ॥ ९४ ॥ प्रथमेद्वितीयेषष्ठेद्वादशेषोडशेपिवा ॥ विंशतिवर्षांतरेकष्टंप्राप्तेपंचाशकेमृतिः ॥ ९५ ॥ २० अथठंठपालयोगः ॥ कुमारी क्षेत्रमध्येतुब्राह्मणःप्राणिहिंसकः ॥ निर्दयोनिष्ठुरःसोऽपिशाक्तधर्मेसदारतः ॥ ९६ ॥ चौरकर्मरतःसोपिलोकापवादवर्जितः ॥ एकस्मिन्स मयेविप्रचोरितंनृपवेश्मनि ॥९७॥ बहुद्रव्याणिरत्नानिचानीतानिस्वकेगृहे ॥ कोटपालेनवैयत्नाद्बद्धश्चकरपादयोः ॥९८॥ कारागृहेचक्षिप्तः सुदृढंबद्धाचशृंखलैः ॥ समृतस्तत्रभोविप्रतुलस्यश्वत्थसन्निधौ ॥ ९९ ॥ पुण्यात्पुण्यफलंभुक्त्वाचापिवर्षसहस्रकम् ॥ पुनरागत्यमे दिन्यांदुःखभारसमन्वितः ॥ १०० ॥ १ । २ । ८ । १३ । १८ । २२ । २५ । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९०

२१ अथठकुरयोगः ॥ ठकुरेचनरोजातःसर्वसौभाग्यसंयुतः ॥ परमौदार्ययुक्तश्चसद्विद्याभ्युपजीविकः ॥१०१॥ दक्षिणांगेतथावामेलांछनं
तिलमाषयोः ॥ द्विभार्य्योगुणसम्पन्नःकृषिवाणिज्यतत्परः ॥ १०२ ॥ कन्याश्चबहवोजाताःपुत्रोनैवचनैवच ॥ शुक्रउवाच ॥ केनकर्मवि
पाकेनेदानींपुत्रविवर्जितः ॥१०३॥भृगुरुवाच ॥ आसीत्पूर्वेह्यङ्गदेशेब्राह्मणःपंडितःसच॥केवलेतिसमाख्यातःकृतंकर्मसुदारुणम् ॥१०४॥
गुरुद्रव्यंचविपुलंगृहीत्वाविविधैश्छलैः ॥ तेनकर्मानुसारेणपुत्रोनैवप्रजायते ॥१०५॥ गुरुमूर्तिश्चकर्तव्यातेनहेममयीतथा ॥ तीर्थभूमौप्रदा
तव्याब्राह्मणायसदक्षिणा ॥ १०६ ॥ ततःश्रेयोभवेत्तस्यपुत्रोजीवतिनिश्चितम् ॥ रोगाश्चविलयंयांतिजीवेद्वर्षाष्टषष्ठिकम् ॥ १०७ ॥ २२
अथडिंडिमाधरयोगः ॥ पूर्वजन्मनिशूद्रश्चगंडक्याःपश्चिमेतटे ॥ गांभीर्य्येतिसमाख्यातःपत्नीतस्यगुणाकरी ॥ १०८ ॥ पत्न्यासहैकदा
शूद्रोद्धारकायांगतश्चसः ॥ नानातीर्थाटनंकृत्वापुण्यमार्गेसदारतः ॥ १०९ ॥ एकस्मिन्समयेविप्रब्राह्मणस्यहृतंधनम् ॥ ब्रह्मस्वंभक्षितंतेन
नदत्तंलोभहेतुना ॥ ११० ॥ पत्नीतस्यसतीजातास्वर्गलोकमुभौगतौ ॥ पुनरागत्यमेदिन्यांगौरांगोदीर्घलोचनः ॥ १११ ॥ प्रथमेद्वि
तीयेवर्षेषष्ठेचाऽष्टमकेपिवा ॥ पीड्यमानस्तथादेवद्वादशाब्देविशेषतः ॥ ११२ ॥ चतुर्विंशेवत्सरेचमहारिष्टंप्रजायते ॥ चतुर्वेदाब्दपर्य्यंतं
कथितंप्राणधारणम् ॥ ११३ ॥ २३ अथडाकिन्ययोगः ॥ आसीज्जन्मांतरेचैवबाहुजःपृथवीपतिः ॥ सर्वधारीतिनाम्नावैचोग्रदंडः
प्रतापवान् ॥ ११४ ॥ नानायुद्धंकृतंतेनजित्वाशत्रुबलंबलात् ॥ द्विजस्यैकस्यकोपेनचाभवद्राक्षसस्तदा ॥ ११५ ॥ विंशतिवर्षसहस्रांते
मानुषत्वमजायत ॥ महाभिमाननिरतःप्रपंचकरणेरतः ॥ ११६ ॥ पार्थिवाःकोटिसंख्याकाःपूजिताश्चद्विजोत्तम ॥ धनपुत्रास्तदास्युर्वैना
न्यथाद्विजसत्तम ॥ षष्टिवर्षांतरेमृत्युर्भविष्यतिनसंशयः ॥ ११७ ॥ २४ अथदंडपाणियोगः ॥ कश्चिद्वैश्यकुलेपूर्वंगोमत्यानिकटे

तदा ॥ वासुदेवेतिनाम्नावैपत्नीतस्यकलाभिधा ॥ ११८ ॥ धनसैश्वर्य्यमतुलंदानधर्मपरायणा ॥ ब्राह्मणेनतदादेवस्वर्णमुद्राशतद्वयम् ॥
॥ ११९ ॥ स्थापितंतस्यवैगेहेसगत्वातीर्थकेतदा ॥ ब्राह्मणोदैवयोगेनतत्रैवचतदामृतः ॥ १२० ॥ तस्यपुत्रःसमायातोमुद्रार्थे वैश्यवेश्म
नि ॥ नदत्तंतस्यवैद्रव्यंतिरस्कारमथाकरोत् ॥ १२१ ॥ एवंस्वल्पेगतेकालेसवैश्योमृत्युमापह ॥ पापात्पापफलंभुक्त्वापुण्यात्पुण्यफलं
तथा ॥ १२२ ॥ षष्टिवर्षसहस्रांतेपुनरागत्यभूतले ॥ चैतन्यचारुश्चतुरोरूपवान्गुणसंयुतः ॥ १२३ ॥ प्रथमेतृतीयेवर्षेसप्तमाष्टमयो
रपि ॥ त्रिंशत्यब्देषोडशेचचतुर्विंशेविशेषतः ॥ १२४ ॥ पीड्यमानंतथांगंवाभूत्वापिम्रियतेशिशुः ॥ तुलादानाद्भवेच्छ्रेयोधनंपुत्रः
प्रलभ्यते ॥ चतुःषष्टिश्चवर्षाणिजीवनंतस्यचाधुना ॥ १२५ ॥ २५ अथडम्बरयोगः ॥ डम्बरेयोगेयोजातः सनरःसुखभाग्भवेत् ॥
शास्त्रविद्यासुनिपुणःपृथ्वीपतिरभूद्भुवि ॥ १२६ ॥ नानाविलासविभवैर्वैश्यागामीविशेषतः ॥ पूर्वंचबर्बरेदेशेशूद्रोऽभूत्तामसोबली ॥
॥ १२७ ॥ एकस्मिन्समयेविप्रैकादश्याश्चकृतंव्रतम् ॥ तंडुलंसेटकंकृत्वायत्रतत्रापियाचितम् ॥ १२८ ॥ प्रभातेभिक्षुकस्त्वेकः समा
यातश्चवैतदा ॥ दारिद्र्येणातिक्रोधेनभिक्षुकायसमर्पितम् ॥ १२९ ॥ उपोष्यद्वादशीयातातस्यांरात्रौमृतःखलु ॥ तेनपुण्यावशेषेणसर्व
सम्पद्युतोधुना ॥ १३० ॥ १ । ४ । ८ । १६ । ४ । २८ ॥ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५८ ॥ २६ अथडीलमीलकयोगः ॥ पंपापुरी
चनगरीप्रकीर्णागुणिनांगणैः ॥ तत्रविप्रः सुधादेवःसात्विकः पारमार्थिकः ॥१३१॥ शिवस्याऽऽराधनेनिष्ठोविद्याविनयसंयुतः॥गृहंत्यक्त्वा
गतस्तीर्थेकृष्णानद्याश्चसन्निधौ ॥ १३२ ॥ तपश्चर्याकृतातत्रदैवात्पत्नीसमागता ॥ तिरस्कारःकृतस्तस्याः पापमाचरितंत्विदम् ॥ ८२
॥ १३३ ॥ एवंस्वल्पेगतेकालेसविप्रःपंचतांगतः ॥ पापात्पापफलंभुक्त्वापुण्यात्स्वर्गंतथानघ ॥ १३४ ॥ पुनरागत्यमेदिन्यांपूर्वपुण्यप्रभा

वतः ॥ भुक्त्वापिम्रियतेभार्य्यापरस्त्रीसेवनात्सुखम् ॥ १३५ ॥ १ । ३ । ८ । १२ । १६ । २० । २५ । २८ । ३३ । २ वर्षेषुकष्टम् ॥ परमा
युर्वर्षाणि ५१॥२७अथडारयोगः ॥ डारयोगेचयोजातः पूर्वजन्मनिनोत्तमः ॥ बाहुजःशिवनामाख्यःपुत्रस्त्रीधनसंयुतः १३६॥गोदानमश्व
दानचपृथ्वीदानमथाऽकरोत् ॥ तीर्थेतीर्थेकृतासेवामुनीनांचपुनःपुनः ॥१३७॥ जन्मन्यत्रमहाभागप्रतापीबहुसेवकः ॥ उदारोमतिमांश्चै
वच्छलिकः कोपसंयुतः ॥ १३८॥ १ । ३ । ५ । ८ । १२ । २० । २२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६१॥२८ अथडारकयोगः ॥ डारे
योगेतुयोजातः प्राग्जन्मनिगुणेश्वरः ॥ अवंतिकांवसन्सोपिपादजश्चसुखान्वितः॥१३९॥कृषिवाणिज्यनिरतोव्यापारीसर्ववस्तुषु ॥ सततं
भक्षितंतेनच्छागमांसंविशेषतः ॥ १४० ॥ छागानामपिवस्त्राणामकार्षीत्क्रयविक्रयौ ॥ एकदातुरवौग्रस्तेगवांदानंकृतंशतम् ॥ १४१ ॥
नर्मदायांकृतंदानंस्वर्णवस्त्रकदम्बकम् ॥ ततोबहुतिथेकालेशूद्रस्यमरणंभवेत् ॥१४२॥ पापात्पापफलंभुक्त्वास्वर्गंभुक्त्वातथापिच ॥ पुनर्मा
नुष्ययोनौवैचागतोधरणीतले॥१४३॥१।५।८।१२।१६।२०।२५।२८वर्षेषुकष्टम्॥परमायुर्वर्षाणि७१॥२९अथडोलाख्ययोगः ॥ येनराः
परद्रव्याणिहरन्तिसततंद्विज ॥ तेनरादुखितालोकेरोगैस्तैस्तैःप्रपीडिताः ॥ १४४ ॥ अन्नंयस्यगृहीतंतुतस्ययोनददातितत् ॥ ऋणंसर्वं
दुःखदंवैपरलोकेचदारुणम् ॥ १४५ ॥ यस्यगात्रंचवैरूप्यंधातुरोगीतथानरः ॥ कन्याघातेकृतंपूर्वंफलंभवतिदारुणम् ॥ १४६ ॥ कीकटे
नंदनोनामवल्लभोवसतेतदा ॥ सनाढ्योवैतदादेवःकृपणःसहभार्य्यया॥ १४७॥नित्यंसचमहाभागब्राह्मणोवेदपाठकः ॥ सतिष्ठतिपुरोमध्ये
धनंचबहुसंचितम् ॥ १४८ ॥ प्रत्यहंवैपरान्नेनभोजनंकुरुतेद्विजः ॥ यदाप्रौढवयोजातंतदाचपुरमत्यजत् ॥ १४९ ॥ असौगतोमित्रपा
र्श्वेह्यवसद्वैपुरेशुभे ॥ आभीरस्यगृहावासंमित्रत्वेनप्रदत्तवान् ॥ १५० ॥ ब्राह्मणस्यहृतंद्रव्यंस्वगृहेस्थापितंद्विज ॥ ब्राह्मणःस्वर्णशोकेन

स्वशरीरंजहौतदा ॥ १५१ ॥ शूद्रेणैवतदादेवतस्यस्वर्णव्ययंकृतम् ॥ बहुकालेततोयातेशूद्रस्यैवदरिद्रता ॥ १५२ ॥ दरिद्रत्वेनभोशुक्रब
हुपापंचसंचितम् ॥ ततोमृत्युवंशेयातोवल्लभःसहभार्य्यया ॥ १५३ ॥ नरकेपातयामासुर्यमदूतायमाज्ञया ॥ ततस्तेनचप्रेतत्वंभुक्तंव
र्षसहस्रकम् ॥ शरय्वाश्चोत्तरेभागेमानुषत्वंचप्राप्तवान् ॥ १५४ ॥ १ । ४ । ६ । १२ । १६ । २१ । २५ । ३० । वर्षेषुकष्टम् ॥ परमा
युर्वर्षाणि ५९ ॥ ३० अथडवडवीयोगः ॥ अथांतरेप्रवक्ष्यामियत्कृतंपूर्वजन्मनि ॥ मथुरापुरतोदेवपूर्वेक्रोशप्रमाणके ॥ १५५ ॥ लक्ष्म
णस्यपुरंख्यातंतत्रैवबहवोजनाः॥वसंतिवैष्णवाःसर्वेवेदकर्मविचक्षणाः ॥ १५६ ॥ स्वर्णकारोवसत्तत्रस्वधर्मप्रतिपालकः ॥ दामोदरइति
ख्यातस्तस्यपत्नीप्रभावती ॥ १५७ ॥ विष्णुभक्तिरताशांतासज्जनानांचसेवकौ ॥ तस्यपुत्रौचद्वौजातौसद्गुणौपितृसेवकौ॥१५८॥ एका
चवल्लवीतत्रनिवासार्थंचह्यागता ॥ पुत्रद्वयसमायुक्ताबहुगोधनसंयुता ॥ एकोद्यूतरतःपुत्रोद्वितीयश्चौरकर्मणि ॥ १५९ ॥ उपा
र्जितंबहुद्रव्यंमहिषीगोधनंभृशम् ॥ ततोबहुतिथेकालेमहामारीसमागता ॥ १६० ॥ पुत्राभ्यांसहसानारीमृत्युंप्राप्तवतीततः ॥ द्रव्यंतस्या
स्तदादेवस्वर्णकारोगृहीतवान् ॥ १६१ ॥ भुक्तंद्रव्यंचतत्सर्वंजीवितावधिभूतले ॥ आयुषस्तुसमाप्तत्वात्स्वर्णकारस्तदामृतः ॥ १६२ ॥
स्वर्गापवर्गभोगश्चबभूवबहुवार्षिकः ॥ पुनःपुण्यक्षयेजातेमानुषश्चाभवद्भुवि ॥ १६३ ॥ १ । ४ । ९ । १५ । १९ । २६ । ३३ । ३७
वर्षेषुकष्टम् ॥ मेहाद्यर्शोरोगात्तथाज्वरः ॥ परमायुर्वर्षाणि ६७ ॥ ३१ अथडरनांतकयोगः ॥ आसीज्जन्मांतरेचैवनापितःकीक
टेवसन् ॥ क्षुरकर्मपरिभ्रष्टःकृषिकर्मोद्यमेरतः ॥ १६४ ॥ पत्नीतस्यमहाभ्रष्टापरपुंसिरताऽ[illegible]॥ एकस्मिन्समयेदेवनापितेनातिलोभिना॥
॥ १६[illegible]॥ अर्द्धरात्रेकृतंकर्मवैश्यपुत्रस्यमारणम्॥तस्यसर्वाणिद्रव्याणिनापितेनाप्यखादिच॥१६६॥व्ययंकृत्वातदादेवप्रत्यहंद्विजसत्तम॥

देवाच्चतीर्थंराजेहिसस्नातोमृगंगेरवौ ॥ १६७ ॥ आयुषस्तुसमाप्तत्वान्ममारपथिनापितः ॥ नानानरकेषुस्थित्वानानोजन्मानिचाप्तवा
न् ॥ १६८ ॥ बहुवर्षसहस्रांतेमर्त्यलोकेचमानुषः ॥ प्रथमेतृतीयेवर्षेदशमैकादशयोर्गदः ॥ १६९ ॥ आविंशेवामृतिःप्रायः षष्टिवर्षाणि
जीवति ॥ आश्विनेधवलेपक्षेह्यष्टम्यांमरणंवदेत् ॥ पुनर्जन्मभवेत्तस्यतदामुक्तिर्नसंशयः ॥ १७० ॥ ३२ अथढारकयोगः ॥ इन्द्रप्रस्थ
पुरेरम्येबाहुजोन्यवसत्तदा ॥ चोलसिंहइतिख्यातः पत्नीतस्यपतिव्रता ॥ १७१ ॥ किंचिद्देशाधिकारीसचोग्रदंडः प्रतापवान् ॥
सम्राजासहसैन्येनकृत्वायुद्धंविशेषतः ॥ १७२ ॥ कृतानितेनदानानिपर्वस्वपिविशेषतः ॥ एकस्मिन्समयेविप्रसाध्वीचस्त्रीकलं
किता ॥ १७३ ॥ प्रजानांदापितोदंडोद्रव्यलोभेनतेनच ॥ ततोवैमरणंजातंपत्नीजातासतीतदा ॥ बहुवर्षसहस्रांतेचागतोधरणीतले ॥
॥ १७४ ॥ १ । ४ । ९ । १३ । १७ । २० । २७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६५ ॥ ३३ अथढरकीयोगः ॥ आसीज्जन्मांतरे
चैवकेशवोनामनर्तकः ॥ यत्रतत्रकृतावासोलोकानांवंचनायच ॥ १७५ ॥ द्रव्यंचविपुलंकृत्वापुण्यमार्गेव्ययःकृतः ॥ तीर्थाव
गाहनंकृत्वागयाश्राद्धमथाकरोत् ॥ १७६ ॥ ब्राह्मणेषुगृहस्थेषुश्राद्धदानंतदाददौ ॥ मृतः स्वर्गपुरेयातः पत्नीजातासतीतदा ॥
॥ १७७ ॥ पुनरागत्यमेदिन्यांपूर्वपुण्यप्रभावतः ॥ प्रथमेमश्चमेवर्षेद्वादशेषोडशेपिवा ॥ १७८ ॥ चतुर्विंशमितेवर्षेचाल्पमृत्युर्भ
विष्यति ॥ षष्टिवर्षांतरेकालः सत्यंसत्यंवदाम्यहम् ॥ १७९ ॥ ३४ अथढाढीयोगः ॥ कश्चिच्छूद्रकुलेपूर्वंयमुनायाःशुभेतटे ॥
शंकरेतिसमाख्यातः पत्नीपुत्रसमन्वितः ॥ १८० ॥ उद्यमेषुसदामग्नोब्राह्मणानांचसेवकः ॥ एकस्मिन्समयेविप्रभाविनोर्थस्यवै
बलात् ॥ १८१ ॥ बाहुजस्यप्रसंगेनकृतंकर्मचदारुणम् ॥ राजपुत्रवधंकृत्वामहापापमुपार्जितम् ॥ १८२ ॥ ततोवैमरणंप्राप्य

नरकेरौरवेगतः ॥ शतजन्मोत्तरेविप्रमानुषत्वमिहागतः ॥ १८३ ॥ १ । ५ १० । १५ । २० । २७ । वर्षेषुकष्टम् ॥ परमायुर्व
र्षाणि १०६ ॥ ३५ अथठंढनायोगः ॥ ठंढनायांनरोजातःपूर्वजन्मनिबाहुजः ॥ कौशिक्याश्चशुभेतीरेन्यवसत्परिवारयुक् ॥
॥ १८४ ॥ सचक्षात्रस्तुवैतत्रतुलादानमथाकरोत् ॥ चन्द्रेग्रस्तेप्रयागेचगोशतंब्राह्मणेददौ ॥ १८५ ॥ भूमिवादेचवैतत्रगोत्रिपुत्रश्चघाति
तः ॥ तेनकर्मविपाकेनपुत्रकन्याविवर्जितः ॥ १८६ ॥ १ । ३ । ८ । १२ । १६ । २६ । ३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९० ॥
३६ अथडोंगरीयोगः ॥ सारस्वत्येशुभेदेशेब्राह्मणःशास्त्रकोविदः ॥ रामदत्तइतिख्यातःसपत्नीकःसपुत्रकः ॥ १८७ ॥ ब्रह्मकर्म
परःश्रेष्ठोधनधान्यसमन्वितः ॥ एकस्मिन्समयेविप्रभाविनोर्थस्यवैबलात् ॥ १८८ ॥ यजमानगृहेयातोबहुलोभेनसंयुतः ॥ यजमानो
ददौकिंचिन्नगृहीतंचतद्धनम् ॥ १८९ ॥ परस्परंकृतंयुद्धमतिप्रबलदंडिना ॥ स्थूलेनलगुडेनाथबाहुजश्चप्रताडितः ॥ १९० ॥ समृतस्ते
नदुःखेनपापमाचरितंत्विदम् ॥ तेनपापानुसारेणसविप्रःपंचतांगतः ॥ १९१ ॥ पापात्पापफलंभुक्त्वायोनीर्भुक्त्वाकथंचन ॥ पुनर्वैमानुषीयो
नौगौरांगोभव्यरूपवान् ॥१९२ ॥ १।३।७।१२।१५।२०।२७।३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६१ ॥ ३७ अथडुबरीयोगः ॥ डुबरी
योगकेजातःकालिंजरगिरौवसन् ॥ बाहुजःशस्त्रजीवीचहिंसायांचसदास्थितः ॥ १९३ ॥ एकस्मिन्समयेविप्रकृतंकर्मचदारुणम् ॥ द्रव्य
लोभेनवैश्यश्चमार्गेचैवविघातितः ॥१९४॥ तेनपापानुसारेणमीनयोनिशतैरपि ॥ बहुवर्षसहस्रांतेचाश्रितामानुषीतनुः ॥१९५॥१।३।५
८।१३।२० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ३९॥३८ अथडिग्विहारीयोगः ॥ आसीज्जन्मांतरेचैवबाहुजःपृथिवीपतिः ॥ उग्रसेनइतिख्या
तःशतकोशाऽधिपस्तदा ॥ १९६ ॥ परस्त्रीरमणेरक्तोवाममार्गपरायणः ॥ पितृष्वसामहाभव्याबलादाकर्षितातदा ॥१९७॥ तयासहकृ

तोभोगः पापसुग्रसुपार्जितम् ॥ सम्मृतोव्रणदोषेणगतोऽसौयमलोककम् ॥ पुनरागत्यमेदिन्यांसुकांतिः प्रमदाधिपः ॥ १९८ ॥ १ । ३ । ८ ।
॥ २० । २३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६८ ॥ ३९ अथडेनकीयोगः ॥ डेनकीयोगेयोजातोभूतसेव्यत्यसद्गतिः ॥ मलिनाम्बरधारी
र्किंचिद्वित्तसमन्वितः ॥ १९९ ॥ पूर्वजन्मनिविप्रोसाविंद्रजालीकलाकरः ॥ नानाविधैर्धूर्तवृत्तैर्लोकानांवंचनेरतः ॥ २०० ॥ तेनकर्मा
नुसारेणयमलोकंतदागतः ॥ यमलोकात्परिभ्रष्टश्चागतोधरणीतलम् ॥ २०१ ॥ १ । ४ । ८ । १३ । २१ । २६ । २९ । ३० । ३५ । ३७
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६७ ॥ ४० अथडिगधारकयोगः ॥ कश्चिद्विजकुलेपूर्वंमागधेनगरेऽवसत् ॥ कैवर्तकोपितत्रैवावसद्ग्रामेचनं
दने ॥ २०२ ॥ मनोहरइतिख्यातोधनाढ्योजायतेमहान् ॥ मत्स्यमांसस्यभोदेवप्रत्यहंविक्रयेरतः ॥ २०३ ॥ संचितानिचरत्नानिनदा
नंचकदाचन ॥ एकदाचंद्रमोग्रस्तेस्वर्णाऽलंकृतगांददौ ॥ २०४ ॥ सत्पात्रायचविप्रायभार्य्ययासहभक्तितः ॥ ततोमृत्युवशंयातोभार्य्या
जातासतीतदा ॥ २०५ ॥ पापाच्चनरकेगत्वाह्यसिपत्रवनांतरे ॥ नरकान्निःसृतोविप्रश्शृगालोगहनेवने ॥ २०६ ॥ पुनश्चकाकयोनिःसमानु
षस्तुततोभवत् ॥ गुणज्ञोदेवताभक्तोवेश्यासुरतितत्परः ॥ २०७ ॥ रागीशुष्यत्तनुर्वक्ताज्ञानवान्सुतवर्जितः ॥ स्वर्णस्यप्रतिमांभव्यांसूर्याकृति
पलद्वयाम् ॥ संकल्प्यब्राह्मणेदद्यात्पुत्रोजीवतिनिश्चितम् ॥ २०८ ॥ १ । ४ । ८ । १२ । १५ । १७ । २० । २५ । २९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि
६२ ॥ ४१ अथटिक्कितायोगः ॥ अथांतरेप्रवक्ष्यामिटिक्कितायोगजंफलम् ॥ तत्सर्वंशृणुमेदेवयत्कृतंपूर्वजन्मनि ॥ २०९ ॥ मध्यदेशे
द्विजश्रेष्ठधनाढ्योबल्लवोऽवसत् ॥ हंसकेतुरितिख्यातोभार्य्यातस्यतुकर्कशा ॥ २१० ॥ बहवोवृषभागावोमहिष्यश्चाऽपितस्यच ॥ कृषि
कर्मरतःशूद्रोविक्रीतागोवृषादिकाः ॥ २११ ॥ एकोवैश्योधनाढ्योवैतस्यमित्रंतदाऽभवत् ॥ महाप्रीतिस्तदाजाताबहुवर्षप्रमाणतः ॥ २१२ ॥

एकदातुनिशायांवैसशूद्रोवणिजंद्विज ॥ सुतंरत्नादिलोभेनशस्त्रेणहतवांश्रमः ॥२१३॥द्रव्यंसर्वंगृहीत्वातुभूमिमध्येधृतश्वसः ॥ बहुवर्षगतेचै
वशूद्रोमृत्युवशंगतः ॥ २१४ ॥ पातयामासवैचोरेनरकेभृशदारुणे ॥ ततोजातस्तदादेवराक्षसोगहनेवने॥ २१५॥ बहुवर्षसहस्रांतेमानुषत्व
मितोऽधुना॥मित्रघातात्कृतात्पापात्पुत्रसौख्यंनलभ्यते ॥ २१६ ॥ कुर्यात्स्वर्णमयींमूर्तिंपलपंचप्रमाणिकाम् ॥ संकल्प्यब्राह्मणेदद्यात्पुत्रो
भवतिनान्यथा॥२१७॥२।५।१३।१६।२०।२५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६४ ॥ ४२ अथटकबालकयोगः ॥ अथांतरेप्रवक्ष्यामि
शृणुदेवविशेषतः ॥ आदौपापफलंदेवभुज्यतेसर्वमानुषैः ॥ २१८ ॥ पश्चात्पुण्यफलंदेवपरत्रचत्विहापिच ॥ एकःशिल्पकरोदेवन्यवसद्ध
स्तिनापुरे ॥ २१९ ॥ हेमदासइतिख्यातोभार्य्याद्वयसमन्वितः ॥ प्रत्यहंशिल्पकार्य्यंचकरोतिव्ययकारणात् ॥ २२० ॥ अश्वत्था
दिकवृक्षाणांछेदनंचकृतंबहु ॥ एवंबहुतिथेकालेशिल्पकारोमृतस्तदा ॥ २२१ ॥ नरकेकर्दमेचैवयमदूतैश्चक्षेपितः ॥ बिडालः
शरठोभूत्वाकाकोबकश्चजातवान् ॥ २२२ ॥ सजातोमध्यदेशेतुमानुषःसुखसंयुतः ॥ वृक्षच्छेदनकात्पापात्पुत्रेणरहितोऽभवत् ॥ २२३॥
धेनवःपंचदातव्याःसत्पात्रायद्विजायच ॥ ततोभवतिपुत्रोपिपूर्वपापव्यपोहनात् ॥ २२४ ॥ १।४।७।१०।१३।१६।२०।२५।
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७८ ॥ ४३ अथटाडीसंज्ञकयोगः ॥ मध्यदेशेतुहेपुत्रलोहकारोऽवसत्पुरा ॥ विष्णुव्रतरतोनित्यंसाधूनां
पोषकश्वसः ॥ २२५ ॥ धनधान्यसमृद्धस्तुमहालोभेनसंयुतः ॥ ब्राह्मणस्यहृतंवित्तंलोभात्संकुलितेनच ॥ २२६ ॥ तेनपापानुसारेण
कुंभीपाकेतदागतः ॥ दिव्यवर्षसहस्रांतेमानुषश्चाऽभवत्पुनः ॥२२७॥ सर्वांगेजायतेपीडावंशवृद्धिर्नजायते ॥ गायत्रीमूलमंत्रंचजपेल्लक्षचतु
ष्टयम् ॥ ततःश्रेयोभवेत्तस्यवाऽन्यथाविपरीतकम् ॥२२८॥ १।४।८।१२।१६।१८।२६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥१०९॥

॥४४ अथटीकरयोगः ॥ अंयोध्यानगरीरम्याततःकोशचतुर्दशे ॥ तत्राप्येकोऽवसच्छूद्रोडम्बराख्योमहाबलः ॥२२९॥ चित्रातस्याभवत्प
त्नीपतिसेवापरायणा ॥ गुरुसेवारतोनित्यंप्रत्यहंशाकविंक्रयी ॥२३०॥ एकामार्जारिकाश्वेतापालितातेनवैद्विज ॥ सगर्भासायदाजाता
वधंतस्यास्तदाकरोत् ॥२३१॥ ततोबहुतिथेकालेशूद्रमृत्युरभूद्द्विज ॥ स्वर्धुनीमरणात्पुण्यात्स्वर्गंगत्वाचपादजः ॥२३२॥ षष्टिवर्षसहस्रा
णिभुक्तास्वर्गभवंफलम् ॥ पुनर्वैमानुषोजातोधनधान्यसमन्वितः ॥ कन्याश्चबहवोजाताःपुत्रोनैवचनैवच ॥ २३३ ॥ १।३।८।१२।१६
१७।२०।२७।३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८८ ॥ ४५ अथटोरीयोगः ॥ पुरीकाशीसमाख्यातात्रैलोक्येदेवपूजिता ॥ तस्यास्तु
पश्चिमेदेशेकोशपंचदशेमिते ॥ २३४ ॥ मांडव्यस्यपुरेरम्येऽवसंश्चबहवोजनाः ॥ तन्मध्येचैवशूद्रोपिह्यवसन्मानवर्जितः ॥२३५॥ डिंडि
मेतिसमाख्यातोगौरीतस्यवरांगना ॥ धनंतुसंचितंतेननदानंकृतवान्पुरा ॥ २३६ ॥ एकदादैवयोगेनब्राह्मणाश्चनिमंत्रिताः ॥ भोजनंप्रद
दौप्रीत्यादक्षिणासमयेतदा ॥ २३७ ॥ गौरेकाकपिलादत्तापुरोहितायभूषिता ॥ ब्राह्मणोऽप्यजल्पत्तत्रकश्चिच्छूद्रंप्रतिद्विज ॥ २३८ ॥
अहंग्रामस्यवैपूज्योमदीयागौःशृणुप्रभो ॥ पुरोहितायकथंदत्ताप्राणदानंददाम्यहम् ॥ २३९ ॥ इतिश्रुत्वावचस्तस्यदुर्वचोब्राह्मणस्यच ॥
इत्युक्तोविप्रःक्रोधेनविषंपीत्वातदामृतः ॥ २४० ॥ शूद्रस्यमरणंजातंकुम्भीपाकेतदागतः ॥ मानुषेचततोजन्मबहुवर्षांतरेधुना ॥
॥ २४१ ॥ पूर्वपापफलात्पुत्रवंशवृद्धिर्नजायते ॥ गामेकांकपिलांदद्याद्वस्त्रस्वर्णैरलङ्कृताम् ॥ तदापुत्रोभवेत्तस्यचान्यथाविपरीतक
म् ॥ २४२ ॥ १।३।८।१२।१६।१७।२०।३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९१ ॥ ४६ अथटोराख्ययोगः ॥ अल
कैचपुरेदेवशूद्रस्त्वेकोवसत्पुरा ॥ शूद्राचाररतोनित्यंविक्रयंकुरुतेसदा ॥ २४३ ॥ गोमहिष्यादिव्यापारेव्ययंकुर्याद्दिनेदिने ॥

एकदातस्यगोवृंदंवनेतिष्ठतिभोनघ ॥२४४॥ महावृष्टिस्तत्रजातातावद्गावःप्रपीडिताः ॥ तासांमध्येमहाबाहोबहुगावोमृतास्तदा ॥२४५॥ रक्षाकृतानवैतासांतृणाऽऽच्छादनकेर्द्विज ॥ नरकेपातयामासुर्यमदूतायमाज्ञया ॥२४६॥ बहुवर्षसहस्राणिभुक्त्वानरकजंफलम् ॥ नरकान्निःसृतोदेवगजयोनौसमुद्भतः ॥२४७॥ गजयोनिंचवैभुक्त्वामानुषत्वंततोऽभवत् ॥ पूर्वपापानुसारेणमहाव्याधिःप्रजायते ॥ गायत्रीलक्षजापाश्चहवनंमार्जनंतथा ॥ २४८ ॥ १।२।५।८।११।१३।१७।१९।२५।३१ । ३६ वर्षेपीडाभवेत्तस्यपरमायुःशताब्दकम् ॥ २४९ ॥ इति ॥ ॥ ४७ अथटंटकयोगोव्याख्यायते ॥ अयोध्यानगरात्पूर्वेयोजनद्वयसंमिते ॥ २५० ॥ लवनस्यपुरेरम्येवसंतिबहवोजनाः ॥ २५१ ॥ तन्मध्येशूद्रएकोहिकैवर्तोधनधान्यवान् ॥ मत्स्यव्यापारनिरतस्तत्सकाशात्कृतंधनम् ॥२५२॥ मत्स्यंभुंक्तेचनित्यंसमांसंबहुविधंद्विज॥ निर्दयःसर्वजंतूनांकच्छपानांविशेषतः ॥ २५३ ॥ एवंबहुगतेकालेतस्यमृत्युरभूत्पुरा ॥ यमदूतैर्महाघोरैर्निक्षिप्तश्चयमाज्ञया ॥२५४॥ नरकान्निःसृतोदेवदद्रुणश्चतदाऽभवत् ॥ ऋक्षत्वंचपुनस्तत्रमानुषत्वमजायत ॥ २५५ ॥ १।३।८।११।१५।२० । २७ । ३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ४८ अथटारुयोगः ॥ आसीज्जन्मांतरेचैवधनीवैश्यकुलेतदा ॥ मैथिलस्याऽतिनिकटेमंगलेनामवैपुरे ॥ २५६ ॥ तस्यपत्नीविशालाक्षीसुन्दरीसुखदायिनी ॥ आचारवांश्चशांतोहिक्रयविक्रयतत्परः ॥ २५७ ॥ एकदाब्राह्मणःस्नेहीतस्यगेहेसमागतः ॥ आदरंबहुधाकृत्वाभोजयामासशास्त्रतः ॥ २५८ ॥ स्वर्णदानंततोदेवलक्षमुद्राःप्रदापिताः ॥ दत्तावैश्येनभोदेवब्राह्मणायसुशांतये ॥२५९॥ ब्राह्मणेनततोद्रव्यंस्थापितंतस्यवैगृहे ॥ ततःकाश्यांद्विजोगत्वासमृत्युवशगोऽभवत् ॥२६०॥ भुक्तंसर्वंततोदेवस्वदत्तंचयदाधनम् ॥ अयोध्यांप्रतितीर्थेस्वर्गंगत्वाचवैश्यजः ॥ ततःपुण्यक्षयेजातेपुनरागत्यभूतले ॥२६१॥ १।४। ९ । १३ । १७ । २० । २५ । २९ । ३६

वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६२ ॥ ४९ अथटांरणयोगः ॥ कश्चिद्द्विजकुलेपूर्वंवंगदेशेतदाऽवसत् ॥ मत्स्यमांसादनेव्यग्रः सुरापीवृष
लीपतिः ॥ २६२ ॥ प्रत्यहंद्यूतकारीसव्ययंकृत्वाधनंभृशम् ॥ एवंबहुतिथेकालेतस्यमृत्युरभूत्पुरा ॥ २६३ ॥ पापाच्चनरकेगत्वाह्यसिपत्र
वनांतरे ॥ नानायोनिषुचोत्पन्नोबहुवर्षप्रमाणकम् ॥ पश्चान्मानुष्यमापन्नःकिंचित्पुण्यप्रभावतः ॥ २६४ ॥ १।८।९।१३।१८।२०।२२।
२६।३२।३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०५ ॥ ५० अथटीमाकरयोगः ॥ आसीज्जन्मांतरेचैवकुलालःकीकटेवसन् ॥ मयादासइ
तिख्यातःपत्नीपुत्रसमन्वितः ॥ २६५ ॥ पात्राणांमृन्मयानांसक्रयविक्रयकारकः ॥ तस्यप्रियःसमायातोब्राह्मणोवेदपारगः ॥२६६॥ पत्नी
तस्यमहादुष्टाब्राह्मणीव्यभिचारिणी ॥ कुलालेनकृतामैत्रीमैथुनंप्राकरोत्सदा ॥ २६७॥ एवंगतेषुवर्षेषुकुलालोमरणंगतः ॥ ततोयमपुरेप्रा
प्तोयमदूतैर्निपीडितः ॥ २६८ ॥ महाकटाहनरकेरौरवेचसमाविशत् ॥ बहुवर्षसहस्रांतेमानुषत्वंपुनर्भवेत् ॥ २६९ ॥ १।३।७।१२।१९
२० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ ५० पुनः टीमाकरयोगः ॥ विष्णुकांच्यांपुराविप्रवैश्यस्त्वेकोऽवसत्तदा ॥ मकरंदइतिख्यातः
पत्नीतस्यसुलोचना ॥ २७० ॥ अश्वादिविक्रयंकृत्वाराजपक्षीतदानघ ॥ पितृसेवांपरित्यज्यभक्ताद्यैर्व्यसनेरतः ॥ २७१ ॥ पितृश्राद्धंकृतं
नैवद्विजाश्चापिनभोजिताः ॥ एवंगतेषुवर्षेषुपंचत्वंतस्यचाऽभवत् ॥ २७२ ॥ भुक्त्वानरकजंदुःखंक्रमियोर्निविशेषतः ॥ नरकान्निःसृतोदेव
बिडालोपिबभूवह ॥ इदंजन्मतृतीयंतुमानुषश्चाऽभवद्ध्रुवम् ॥२७३॥ १।२।५।१०।१५।२०।२४ वर्षेषुकष्टम्॥परमायुर्वर्षाणि ६६॥५१अथ
टोनयोगः॥कश्चिद्द्विजकुलेपूर्वंब्रह्मपुत्रस्यसंनिधौ॥वृंददेवइतिख्यातःसपत्नीकःसपुत्रकः॥शास्त्राभ्यासीमनोत्साहीकुकर्मणिरतःसदा॥२७४॥
भ्राताकनीयांश्चतस्यतस्यपत्नीसुशोभना ॥ बलादाकर्षितातेनकृतःसुरतिसंगमः ॥ भ्रातुःप्रतिभवेद्युद्धमतिप्रबलदंडिना ॥ २७५ ॥

कनिष्ठेनहतस्तत्रसमृतःपापभागपि ॥ नानानरकेषुसस्थित्वाकृमियोनिशतंगतः ॥ पुनर्वैमानुषोजातोमध्यदेशेद्विजोत्तम ॥ २७६ ॥
१।३।५।८।१२।१६।२०।२७।३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि८०॥५२ अथटाराकीयोगः ॥ मथुरायांवसन्पूर्वंगुर्जरोबहुधार्मिकः॥ महि
षीगोधनधनैःसंकुलंतस्यवेश्मच॥२७७॥दधिदुग्धंघृतंतक्रंविक्रयामासवैखलु॥तत्सकाशात्कृतंद्रव्यंरत्नानिविविधानिच ॥२७८॥एकस्मि
न्समयेविप्रतुलादानंतदाऽकरोत् ॥ ब्राह्मणायददौद्रव्यंपुष्कलंस्वर्णरूपकम् ॥२७९॥ एवंचैवगतेकालेवृद्धत्वेचतदाऽनघ ॥ पुत्रायचददौद्रव्यं
भ्रातृपुत्रायनैवच ॥ २८०॥ ततोबहुतिथेकालेतस्यमृत्युरभूत्पुरा ॥ पापात्पापफलंभुक्त्वायोनिंभुक्त्वाकथंचन॥पुनर्वैमानुषीयोनौधनधान्य
समाकुलः ॥२८१॥ १।५।१०।१३।२०।२७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६१ ॥ ५३ अथटाकनयोगः ॥ कश्चिद्वैश्यकुलेपूर्वंरेवानद्या
श्रसन्निधौ ॥ प्रवीरइतिविख्यातःक्रयविक्रययोरतः ॥ २८२ ॥ धनधान्यसमृद्धश्चधर्मकर्मार्चनेरतः ॥ एकस्मिन्समयेविप्रबाहुजस्यप्रसं
गतः ॥ २८३ ॥ वनंदावाग्निनादग्धंहत्वाजन्तून्बहूंस्तदा ॥ तीर्थावगाहनेयातःपरिवारेणसंयुतः ॥ २८४ ॥ नौकोपरिसमाविश्यगंगाम
ध्येनिमज्जितः ॥ पापात्पापफलंभुक्त्वापुण्यात्स्वर्गंतथागतः ॥ ततःपुण्यक्षयेजातेमर्त्यलोकेचमानुषः ॥ २८५ ॥ १ । ३ । ५ ।
८ । १२ । २० । २५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८२ ॥ ५४ अथटनकाद्युतियोगः ॥ आसीज्जन्मांतरेचैवकौण्डिन्योनामब्राह्मणः ॥
वेदविद्याविवेकीचअर्भकान्पाठयेत्ततः ॥ २८६ ॥ सहशिष्यैश्चसविप्रःपरदेशेतदागतः ॥ विद्याविलासमभवत्पराजयमचीकरत् ॥२८७॥
तेनभूपेनविप्रायद्रव्यंदत्तंसुपुष्कलम् ॥ स्वगृहेसम्यगानीयसन्मार्गेचव्ययःकृतः ॥ २८८ ॥ आयुषस्तुसमाप्तित्वात्सविप्रःपंचतां
गतः ॥ षष्टिवर्षसहस्राणिभुक्त्वास्वर्गभवंफलम् ॥ ततःपुण्यक्षयेजातेपुनरागत्यभूतले ॥ २८९॥१।५।१०। १५। २० । २५ । २९

वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि६९॥५५ अथटोडलाख्ययोगः॥ अथांतरेप्रवक्ष्यामियत्कृतंपूर्वजन्मान ॥ पुनःपुनानदातारब्राह्मणान्यवसत्त
दा॥ गोत्रदेवइतिख्यातःसपत्नीकःसपुत्रकः ॥२९०॥ शिवस्याऽऽराधनेव्यग्रोब्राह्मणानांचपालकः ॥ सर्वस्वंविधिनादत्तंसत्पात्रायद्विजाय
च ॥२९१॥ एकस्मिन्समयेविप्रकृतंकर्मजुगुप्सितम् ॥ स्वकृतंवर्णितंसम्यग्गोत्रजागमनंकृतम् ॥ २९२ ॥ आयुषस्तुसमाप्तित्वात्समृतः
कालचोदितः ॥ पापात्पापफलंभुक्त्वापुण्यात्स्वर्गनिवासकृत ॥ पुनर्वैमानुषीयोनौपूर्वपुण्यात्सआगतः ॥ २९३ ॥ १ । ८ । १६ ।
२२ । २७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६२ ॥ ५६ अथटीकाख्ययोगः ॥ आसीज्जन्मांतरेचैवविवेकीनृपतिःप्रभुः ॥ इंद्रसेनिरि
तिख्यातःपत्नीपुत्रसमन्वितः ॥ २९४ ॥ धर्ममार्गेचकुशलोब्राह्मणाऽतिथिपूजकः ॥ एकस्मिन्समयेविप्रद्वरातिश्चसमागतः ॥
॥ २९५ ॥ परस्परंकृतंयुद्धंततःकोलाहलोह्यभूत ॥ तत्पुरंचगृहीतंवैद्वरातिनातदानघ ॥ २९६ ॥ भयभीतश्चभूपःसपलायनपरायणः ॥
एकाकीहयमारुह्यजगामगहनेवने ॥ २९७ ॥ तपश्चर्य्याकृतातत्रबहुवर्षांतरेमृतः ॥ पुनरागत्यमेदिन्यांषष्टिवर्षसहस्रके ॥ गौरांगोभव्यमूर्तिश्च
सर्वसम्पद्युतोधुना ॥ २९८ ॥ १ । ४ । ८ । १२ २० । २५ । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५९ ॥ ५७ अथटौनकयोगः ॥
पूर्वजन्मनिवैश्योऽसौकाम्पिल्येनगरेवसन् ॥ मोहनेतिसमाख्यातःपत्नीतस्यखगेश्वरी ॥ २९९ ॥ दम्पतीप्रीतिवशतस्तीर्थराजेसमा
गतौ ॥ तौस्नातौमृगगेभानौमासमेकंनिरंतरम् ॥ ३०० ॥ हरिद्वारेततोगत्वागंगास्नानंकृतंद्विज ॥ वैजनाथेसमागत्यवैजनाथार्चनंकृत
म् ॥ ३०१ ॥ पत्नीतस्यमृतातत्रशोकाकुलितमानसः ॥ उन्मत्तोपिबभूवापिपर्य्यटन्गांचतुर्दिशः ॥३०२॥ आयुषस्तुसमाप्तित्वात्सवैश्यः
पंचतांगतः ॥ पापात्पापफलंभुक्त्वापुण्यात्स्वर्गेतथाऽनघ ॥ मानुषश्चभवेत्सोपिसर्वसम्पद्युतोऽधुना ॥ ३०३ ॥ १ । ८ । १३ । १७ ।

१० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६८ ॥ ५८ अथठकुरेश्वरयोगः ॥ सौराष्ट्रेनगरेपूर्वंशोभनेनामवैपुरे ॥ क्षत्रियश्चाऽवसत्त्वेकोधन
धान्यसमन्वितः ॥ ३०४ ॥ गोविंदइतिविख्यातः पत्नीतस्यसुधाकरी ॥ वैश्यवृत्तिरतोनित्यंव्यापारंसर्वदाऽकरोत् ॥ ३०५ ॥ व्यापारा
र्थंततोदेववृषभौपालितौयदा ॥ द्वौवृषौयोजितौतेनकूपेचपतितौमृतौ ॥ ३०६ ॥ मृतौपुत्रौचसमयेनजातोन्यस्तदाद्विज ॥ यत्किंचि
त्क्रियतेकर्मशुभंवाप्यशुभंद्विज ॥ ३०७ ॥ तत्सर्वंचक्षयंयातंमृत्वाचनरकंगतः ॥ मुद्गरैस्ताडयामासुर्यमदूतायमाज्ञया ॥ षष्टिवर्षसहस्रांते
मानुषत्वमिहागतः ॥ ३०८ ॥ १ । ४ । ८ । १२ । १६ । २० । २२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७२ ॥ ५९ अथडारतीयोगः ॥
देशेकाश्मीरकेचैवकाष्ठकारोऽवसत्पुरा ॥ रंगदासःसमाख्यातःपत्नीद्वयसमन्वितः ॥ ३०९ ॥ छित्त्वासर्वाणिकाष्ठानिव्ययंकुर्य्याद्दिने
दिने ॥ स्वगोत्रकन्ययातेनमैथुनंचकृतंहठात् ॥ ३१० ॥ ततोबहुतिथेकालेतस्यमृत्युरभूत्पुरा ॥ यमदूतैर्महाघोरेनरकेपरिपातितः ॥
॥ ३११ ॥ षष्टिवर्षसहस्रांतेपुनर्वैमानुषोऽधुना ॥ गोत्रजागमनात्पापात्पुत्रमृत्युर्ध्रुवंभवेत् ॥ १ । ३ । ८ । १२ । १६ । २० ।
२५।२८ । ३१ । ३६ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ वर्षेकष्टंविजानीयात्षट्षष्टिसंमितेमृतिः ॥ ३१२ ॥ ६० अथडोरमाकांतयोगः
सौहलेवैपुरेरम्येसिंहदेवेतिबाहुजः ॥ तस्यभार्य्याविशालाक्षीसुर्य्यानाम्नीतिविश्रुता ॥ ३१३ ॥ आतिथ्यकरणेसक्तादेवताद्विजपूजका ॥
कार्तिकेमाघवैशाखेदीपदानंकरोतिसा ॥ ३१४ ॥ कदाचिद्दैवयोगेनतीर्थयात्रांसमागता ॥ साम्रृतातत्रभोविप्रदेवलोकेगताद्विज॥३१५॥
सिंहदेवेनवैतत्रचोरितंवैश्यकंधनम् ॥ कालसर्पेणवैहत्वाक्षत्रियोनरकंगतः ॥ ३१६ ॥ विंशद्वर्षसहस्रांतेपुनर्वैमानुषोऽभवत् ॥ ३१७ ॥
१ । ६ । १० । १८ ... वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ ६१ अथडाहीयोगः ॥ नर्मदादक्षिणेभागेब्राह्मणःपूर्वजन्मनि ॥
सहस्राणिभुक्त्वा

कापथ्याऽऽचरणेव्यग्रः परद्रव्यापहारकः ॥ ३१८ ॥ कुशदेवइतिख्यातः पत्नीतस्यवरांगना ॥ एकस्मिन्समयेविप्रतस्यमित्रंसमागतम् ॥
॥ ३१९ ॥ तस्यभार्य्यातिगौराचमृद्वंगीचारुलोचना ॥ तयासहकृतामैत्रीमैथुनंचचकारसः ॥ ३२० ॥ तस्यधनंचयत्किंचिद्व्ययंकृत्वा
दिनेदिने ॥ एवंस्वल्पगतेवर्षेब्राह्मणः पंचतांगतः ॥३२१॥ तिर्यग्योनौसमुत्पन्नोजंबुकाकौतथामृगः ॥ इदंतुमानुषंजन्मधनपुत्रविवर्जितम् ॥
॥ ३२२ ॥ १ । ४ । ८ । १२ । १६ । २०। २९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७९ ॥ ६२ अथडावरयोगफलंप्रकथ्यते ॥ अथां
तरेप्रवक्ष्यामियोगंडावरमेवच ॥ कश्चिद्द्विजकुलेपूर्वंशोणभद्रस्यपश्चिमे ॥ ३२३ ॥ नारंतकः समाख्यातः क्षात्रधर्मपरायणः ॥ द्रव्यंचवि
पुलंकृत्वाबहुग्रामाधिकारकः ॥ ३२४ ॥ नानामनोरथयुक्तेनशिवस्थापनंकृतम् ॥ आहूयब्राह्मणाः सर्वेह्याहताश्चविशेषतः ॥ ३२५ ॥
एकंसंपूज्यविप्रंचकृतंद्वंद्वंपरस्परम् ॥ नदत्तंतस्यवैकिंचिद्विमुखोब्राह्मणोगतः ॥३२६॥ एवंस्वल्पेगतेकालेसविप्रः पंचतांगतः ॥ ततोवैमानुषी
योनौमर्त्यलोकेसमागतः ॥ ३२७ ॥ धनधान्ययुतोप्यत्रपुत्रवृद्धिर्नजायते ॥ महारोगेणविकलः सर्वदातप्तमानसः ॥ ३२८ ॥ १ । ९
९ । १३ । १८ । २२ । २९ । ३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ६३ अथडेनयोगः ॥ कलिंगेब्राह्मणश्चासीद्वेदपाठीचधार्मिकः॥
शिष्याअध्यापिताविप्रबहुकालंविशेषतः ॥ ३२९ ॥ एकदाक्रोधयुक्तेनकश्चिच्छात्रोऽतिताडितः ॥ तेनपापेनप्रथमंभुक्त्वानरकजंफलम् ॥
॥ ३३० ॥ पश्चात्पुनर्नंदनंप्राप्तोविद्यादानप्रभावतः ॥ तत्रत्यभोगंभुक्त्वाऽथपुनश्चात्रैवब्राह्मणः ॥ ३३१ ॥ विद्याऽभ्यासीसुधर्माचधनधान्य
समन्वितः ॥ पुत्रदारयुतोधीमान्विद्यादाताजितेन्द्रियः ॥ ३३२ ॥ ७ । १२ । १६ । २० । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७९ ॥ ६४
अथडेलाख्ययोगः ॥ डेलाख्ययोगेयोजातोबाहुजोवंगदेशके ॥ शिवदासः पुराख्यातः शिवस्याऽऽराधनेरतः ॥ ३३३ ॥ एकदाशिवरात्रौ

२० । २७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६८ ॥ ५८ अथठकुरेश्वरयोगः ॥ सौराष्ट्रेनगरेपूर्वंशोभनेनामवैपुरे ॥ क्षत्रियश्चाऽवसत्त्वेकोधन
धान्यसमन्वितः ॥ ३०४ ॥ गोविंदइतिविख्यातः पत्नीतस्यसुधाकरी ॥ वैश्यवृत्तिरतोनित्यंव्यापारंसर्वदाऽकरोत ॥ ३०५ ॥ व्यापारा
र्थंततोदेववृषभौपालितौयदा ॥ द्वौवृषौयोजितौतेनकूपेचपतितौमृतौ ॥ ३०६ ॥ मृतौपुत्रौचसमयेनजातोन्यस्तदाद्विज ॥ यत्किंचि
त्क्रियतेकर्मशुभंवाप्यशुभंद्विज ॥ ३०७ ॥ तत्सर्वंचक्षयंयातंमृत्वाचनरकंगतः ॥ मुद्गरैस्ताडयामासुर्यमदूतायमाज्ञया ॥ षष्टिवर्षसहस्रांते
मानुषत्वमिहागतः ॥ ३०८ ॥ १ । ४ । ८ । १२ । १६ । २० । २२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७२ ॥ ५९ अथडारतीयोगः ॥
देशेकाश्मीरकेचैवकाष्ठकारोऽवसत्पुरा ॥ रंगदासःसमाख्यातःपत्नीद्वयसमन्वितः ॥ ३०९ ॥ छित्त्वासर्वाणिकाष्ठानिव्ययंकुर्य्याद्दिने
दिने ॥ स्वगोत्रकन्ययातेनमैथुनंचकृतंहठात् ॥ ३१० ॥ ततोबहुतिथेकालेतस्यमृत्युरभूत्पुरा ॥ यमदूतैर्महाघोरेनरकेपरिपातितः ॥
॥ ३११ ॥ षष्टिवर्षसहस्रांतेपुनर्वैमानुषोऽधुना ॥ गोत्रजागमनात्पापात्पुत्रमृत्युर्ध्रुवंभवेत् ॥ १ । ३ । ८ । १२ । १६ । २० ।
२५।२८ । ३१ । ३६ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ वर्षेकष्टंविजानीयात्षट्षष्टिसंमितेमृतिः ॥ ३१२ ॥ ६० अथडोरमाकांतयोगः
सौहलेवैपुरेरम्येसिंहदेवेतिबाहुजः ॥ तस्यभार्य्याविशालाक्षीसुर्य्यानाम्नीतिविश्रुता ॥ ३१३ ॥ आतिथ्यकरणेसक्तादेवताद्विजपूजका ॥
कार्तिकेमाघेवैशाखेदीपदानंकरोतिसा ॥ ३१४ ॥ कदाचिद्दैवयोगेनतीर्थयात्रांसमागता ॥ सामृतातत्रभोविप्रदेवलोकेगताद्विज॥३१५॥
सिंहदेवेनवैतत्रचोरितंवैश्यकंधनम् ॥ कालसर्पेणवैहत्वाक्षत्रियोनरकंगतः ॥ ३१६ ॥ विंशद्वर्षसहस्रांतेपुनर्वैमानुषोऽभवत् ॥ ३१७॥
१ । ६ । १० । १९सहस्राणिमुंचकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ ६१ अथडाहीयोगः ॥ नर्मदादक्षिणेभागेब्राह्मणःपूर्वजन्मनि ॥

कापत्याऽऽचरणेव्यग्रःपरद्रव्याऽपहारकः ॥ ३१८ ॥ कुशदेवइतिख्यातःपत्नीतस्यवरांगना ॥ एकस्मिन्समयेविप्रतस्यमित्रंसमागतम् ॥
॥ ३१९ ॥ तस्यभार्य्यातिगौराचमृद्वंगीचारुलोचना ॥ तयासहकृतामैत्रीमैथुनंचचकारसः ॥ ३२० ॥ तस्यधनंचयत्किंचिद्व्ययंकृत्वा
दिनेदिने ॥ एवंस्वल्पगतेवर्षेब्राह्मणःपंचतांगतः॥३२१॥तिर्यग्योनौसमुत्पन्नोजंबुकाकौतथामृगः ॥ इदंतुमानुषंजन्मधनपुत्रविवर्जितम् ॥
॥ ३२२ ॥ १ । ४ । ८ । १२ । १६ । २०। २५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ ६२ अथडावरयोगफलंप्रकथ्यते ॥ अथां
तरेप्रवक्ष्यामियोगंडावरमेवच ॥ कश्चिद्द्विजकुलेपूर्वंशोणभद्रस्यपश्चिमे ॥ ३२३ ॥ नारंतकःसमाख्यातःक्षात्रधर्मपरायणः ॥ द्रव्यंचवि
पुलंकृत्वाबहुग्रामाधिकारकः ॥ ३२४ ॥ नानामनोरथयुक्तेनशिवस्थापनंकृतम् ॥ आहूयब्राह्मणाःसर्वेह्यादृताश्चविशेषतः ॥ ३२५ ॥
एकंसंपूज्यविप्रंचकृतंद्वंद्वंपरस्परम् ॥ नदत्तंतस्यवैकिंचिद्विमुखोब्राह्मणोगतः ॥३२६॥ एवंस्वल्पेगतेकालेसविप्रःपंचतांगतः॥ततोवैमानुषी
योनौमर्त्यलोकेसमागतः ॥ ३२७ ॥ धनधान्ययुतोप्यत्रपुत्रवृद्धिर्नजायते ॥ महारोगेणविकलःसर्वदाततप्तमानसः ॥ ३२८ ॥ १ । ५
९ । १३ । १८ । २२ । २९ । ३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ६३ अथडेनयोगः ॥ कलिंगेब्राह्मणश्चासीद्वेदपाठीचधार्मिकः॥
शिष्याअध्यापिताविप्रबहुकालंविशेषतः ॥ ३२९ ॥ एकदाक्रोधयुक्तेनकश्चिच्छात्रोऽतिताडितः ॥ तेनपापेनप्रथमंभुक्त्वानरकजंफलम् ॥
॥ ३३० ॥ पश्चात्तुनंदनंप्राप्तोविद्यादानप्रभावतः ॥ तत्रत्यभोगंभुक्त्वाऽथपुनश्चात्रैवब्राह्मणः ॥ ३३१ ॥ विद्याऽभ्यासीसुधर्माचधनधान्य
समन्वितः ॥ पुत्रदारयुतोधीमान्विद्यादाताजितेन्द्रियः ॥ ३३२ ॥ ७ । १२ । १६ । २० । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ ६४
अथडेलाख्ययोगः ॥ डेलाख्ययोगेयोजातोबाहुजोवंगदेशके ॥ शिवदासःपुराख्यातःशिवस्याऽऽराधनेरतः ॥ ३३३ ॥ एकदाशिवरात्रौ

तुजागरणेह्याखुरागतः ॥ पुष्पंगृहीत्वागतवांस्तावत्तेनप्रताडितः ॥ ३३४ ॥ ताडनान्मरणंयातस्तेनाऽसौपापभाक्खलु ॥ मृत्वायमाज्ञ
याद्दुःखंभुक्त्वेशानस्यसन्निधिम् ॥ ३३५ ॥ तत्रभुक्त्वाबहून्भोगान्भूतलेसुंदरोजनः ॥ पुत्रभार्यादिसहितोधनीमानीप्रतापवान् ॥३३६॥
१५।२२।२७।३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८० ॥ ६५ अथडंडभतारियोगः ॥ देशेकलिंगकेपूर्वंवैश्योऽभून्मदनेपुरे ॥ शिवदासइति
ख्यातःपत्नीतस्यपतिव्रता ॥ ३३७ ॥ कलावतीतिविख्याताकृष्णभक्तिपरायणा ॥ जन्माष्टम्यांभाद्रपदेव्रतंकृतवतीततः ॥३३८॥ शिव
दासोऽपिदृष्ट्वैवचकारव्रतमुत्तमम् ॥ कथंचिद्दिनमुल्लंघ्यक्षुधार्तःसनिशामुखे ॥३३९॥ क्रोधेनोक्तंप्रियायैनोनिशीथान्तंनजीवनम् ॥ भोजनं
कुरुदुर्बुद्धेकिमेतेनव्रतेनच ॥३४०॥ नाङ्गीकृतंकलावत्यातद्वचोभक्तिकारणात् ॥ अतिक्रोधेनदुष्टेनताडितासावरांगना ॥३४१॥ मृत्वाया
ताचमृद्धंगीवैकुंठभवनंततः ॥ विरहेणप्रतप्तोऽसौशीघ्रंमृत्युंगतस्तदा ॥ ३४२ ॥ यमाज्ञयारौरवंतुभुक्त्वायातोधरातले ॥ उद्वाहितोद्वाहिता
चकांतातस्यनजीवति ॥ ३४३ ॥ ९ । १५ । २० । २५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८० ॥ ६६ अथडालमालयोगः ॥ डालमाले
नरःकश्चिच्छूद्रोभूद्वंगकेपुरा ॥ जीवघातीसर्वदाचतथाऽधर्मरतश्चसः ॥ ३४४ ॥ एकदातेननिहतोमृगश्चमुनिपालितः ॥ तद्वियोगेनतप्तो
ऽसौमुनिश्चव्याकुलेन्द्रियः ॥ ३४५ ॥ कालेनाल्पेनभोदेवशूद्रोयातोयमालयम् ॥ लोहशंकुंचनरकंभुक्त्वाऽऽयातश्चभूतले ॥ ३४६ ॥ मृग
हत्यासूचकंचिह्नंवामांगेचप्रदृश्यते ॥ तेनैवघोरपापेनपुत्रसौख्यविवर्जितः ॥ ३४७ ॥ १० । १९ । ३० । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि
८० ॥ ६७ अथडमास्वरयोगः ॥ डमास्वरेचयोजातोबाहुजःसकलिंगके ॥ चोलसिंहःपुराख्यातःप्रजापालनतत्परः ॥ ३४८ ॥ एकदाच
कृतोमन्त्रस्तेनराज्ञाद्विजोत्तम॥हतासगर्भाचमृगीतेनपापेनदूषितः ॥ ३४९ ॥ मृत्वायातश्चनरकंभुक्त्वापापंतदात्मनः ॥ भूतलेमानवीयो

नोपुत्रश्चासुखवर्जितः ॥ ३५० ॥ २० ।२९।३०।३४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ६८ अथडोहनयोगः ॥ पूर्वजन्मनिदा
शोऽसौतैलंगेनिवसन्पुरा ॥ परिचर्य्यारतोनित्यंविप्राणांचविशेषतः ॥ ३५१ ॥ एवंगतेषुवर्षेषुसमृत्वानंदनेगतः ॥ क्षीणेपुण्येततोविप्रमा
नुषःक्षितिमंडले ॥ ३५२ ॥ सर्वसौख्ययुतोधीमान्सर्वाभीष्टप्रसादकः॥शूरोदातागभीरश्चजनेषुसप्रधानकः ॥३५३॥रोगार्तोजायतेसोपि
वर्षेमासेचहायने॥३५४॥ १।२।४।७।१२।१५।१९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६२ ॥ ६९ अथडोहनकारीयोगः ॥ आसीत्पूर्वंचकेदा
रेबाहुजश्चप्रतापवान् ॥ काव्यकर्ताधनीमानीराजसश्चतुरःसुधीः॥३५५॥सुस्वादीसुगुणज्ञश्चप्रवक्तादंभसंयुतः॥एकस्मिन्समयेविप्रब्राह्मस्त्वे
कआगतः ॥ ३५६ ॥ सर्वशास्त्रस्यवक्ताचबाहुजस्यगृहंगतः ॥ शास्त्रवादोह्यभूत्तत्रपरस्परंतदाऽनघ ॥ ब्राह्मणःक्षत्रियस्यैवपराजयमचीकर
त् ॥ ३५७ ॥ बाहुजश्चातिकोपेनचापभ्रंशंतदाऽवदत् ॥ ब्राह्मणेनातिक्रोधेनशापोदत्तश्चदुष्करः ॥ सराजाराक्षसोभूत्वाचाशीत्यब्दसहस्र
कम् ॥पुनर्वैमानुषीयोनौपुत्रकन्याविवर्जितः ॥ ३५८ ॥ १।५।१३।१८।२२।२७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७३ ॥ ७१ अथडंडक
योगः ॥ आसीज्जन्मांतरेचैवविप्रवंशेमहागुणी ॥ आभीरस्यप्रसंगेनदुष्टकर्मरतःसदा ॥ ३५९ ॥ परदाराभिगमनःपरद्रव्यापहारकः ॥
एवंहिन्यवसत्तत्रबहुवर्षगतागतैः ॥ ३६० ॥ आयुषस्तुसमाप्तित्वात्सविप्रःपंचतांगतः ॥ बभूवगर्दभः सोपिमृगोभूत्वाचपर्वते
॥ ३६१ ॥ मृगयोनिंपरित्यज्यहंसःसरसिमानसे ॥ पुनर्वैमानुषोभूत्वामध्यदेशेद्विजोत्तम ॥ ३६२ ॥ गौरारुणोदीर्घदेहोध
नधान्यसमन्वितः ॥ प्रथमेपंचमेवर्षेद्वादशेविंशवर्षके ॥ मृत्युतुल्यंभवेत्कष्टंषट्षष्ट्यब्दंचजीवनम् ॥ ३६३ ॥ ७२ अथडोरयोगः
प्रकथ्यते ॥ कश्चिन्म्लेच्छकुलेपूर्वंयमनोनामविश्रुतः ॥ गोमतीतटिनीतीरेन्यवसत्पूर्वजन्मनि ॥ ३६४ ॥ धनधान्यसमृद्धस्तुसत्क

माणमनोरमः ॥ एकस्मिन्समयेवप्रजातोऽन्ययमहधता ॥ ३६५ ॥ भवछाकापरकश्चहाहाभूताचमोदनी ॥ यमनेनतद देवदत्तं धान्यंविशेषतः ॥ ३६६ ॥ बुभुक्षितेभ्यश्चाब्दान्तंददावन्नंतदाकिल ॥ आयुषस्तुसमाप्तित्वात्समृतोजाह्नवीतटे ॥ ३६७॥ स्वर्गेगत्वाच भोविप्रकल्पमेकंतथाऽवसत् ॥ सजातोमानुषोप्यत्रसर्वसौख्यसमन्वितः ॥ ३६८ ॥ १।३।५।८।१२।१६।२०।२५।३१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ ७३ अथडार्हेद्रयोग ॥ पूर्वजन्मनिवैश्योसौगंगातीरेतदावसन् ॥ डालचंदइतिख्यातः पत्नीतस्यमनोत्सवा ॥३६९॥ क्रयविक्रयकर्ताचधनपुत्रसमन्वितः । घृतमिष्टान्नव्यापारात्कृतंद्रव्यंतुपुष्कलम् ॥३७०॥ एकंतस्यभवेन्मित्रंवैश्योग्रामाधिपस्तदा ॥ तेनवैश्येनवैश्यायददौद्रव्यंविशेषतः ॥ ३७१ ॥ कार्य्यार्थयाचितंतेननदत्तंलोभहेतुना ॥ भोजनेचविषंदत्त्वामित्रघातंतथाऽकरोत् ॥३७२॥ मित्रघातनकात्पापाद्गतोऽसौयमशासनम् ॥ षष्टिवर्षसहस्राणिभुक्त्वानरकजंफलम् ॥ पुनरागत्यमेदिन्यामांत्रवेद्येप्रजायते ॥ ३७३ ॥ १।३।६।१०।१५।२२।२८।३३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७७ ॥ ७४ अथडिल्पिकयोगः ॥ डिल्पिकेयोगयोजातोब्राह्मणः पूर्वजन्मनि ॥ केशवेतिसमाख्यातोब्रह्मचर्य्यरतःसदा॥३७४॥एकांघ्रिभुजमुत्थाप्यरामनामस्मरंश्वसः॥दंडकारण्यानिकटेकृतवान्दारुणंतपः ॥ ३७५ ॥ तपोन्तेचक्ष्माप्यपिविघ्नंतस्यविशेषतः ॥ एकातुस्वैरिणीभव्यायथाकामंहिचागता ॥३७६॥ परस्परंलग्नचित्तौकामकृच्छ्रेणमोहितौ ॥ तपश्चर्यांपरित्यज्यभक्ताद्यैर्व्यसनेरतः ॥ ३७७ ॥ तेनपापानुसारेणभुक्त्वाभोगांश्चशाश्वतान् ॥ मनुष्यस्यकुलेजाताइदानींसुतसंयुतः ॥ ३७८ ॥ १।३।८।१४।१८।२०।२७।३७ वर्षेषुकष्टम् ॥ महोत्पातः ॥ परमायुर्वर्षाणि ६३ ॥ ७५ अथ डहरुयोगः ॥ डहरुयोगेयोजातः पूर्वजन्मनिमर्कटः ॥ सरयूनद्याश्चतीरेतुन्यवसत्पूर्वजन्मनि ॥ ३७९ ॥ समृतःसरयूमध्येबभूव

पृथिवीपतिः ॥ भ[illegible] पूर्वषाणि ६५ [illegible]ज्यश्चशिवस्याऽऽराधनेरतः ॥ ३८० ॥ परमोदारोऽतुलश्चपरात्मनांचपोषकः ॥ एकस्मिन्समयेविप्रगृहंत्य
क्त्वासमार्थ्यकः ॥ ३८१ ॥ हिमाद्रिनिकटेगत्वातत्रस्थित्वाद्विजोत्तम ॥ आराधयन्महादेवमम्बुपर्णाशनेरतः ॥३८२॥ सराजापंचतांप्राप्तः
स्वर्गलोकेतदागतः ॥ षष्टिवर्षसहस्रांतेचागतोभूमिमंडले ॥३८३ ॥ १।३।९।१६।२०।२९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७४ ॥ ७६
अथदुत्कटयोगः ॥ पुरेवैमदनेदेवतैलकारोऽवसत्पुरा ॥ धनधान्यसमायुक्तःकोटिद्रव्यसमन्वितः ॥ स्त्रियौतुतस्यद्वेआस्तांज्येष्ठाभ्रष्टाचकर्क
शा ॥ ३८४ ॥ कनिष्ठाचगृहेतस्यगृहिणीधर्मचारिणी ॥ त्यक्त्वाबहुतिथेकालेतैलकारोमृतस्तदा ॥ पापाच्चनरके गत्वास्त्रीत्यागात्पापभाक्ख
लु ॥ ३८५ ॥ कुक्कुटोमहिषोव्याघ्रःसर्पयोनौपुनःपुनः ॥ पश्चाच्चमर्कटोभूत्वासमृतोजाह्नवीतटे ॥ ३८६ ॥ पुनश्चमानुषीयोनौजातश्चा
त्रतुभार्गव ॥ धनधान्यसमायुक्तोगुणज्ञोज्ञानवानपि ॥ बहुरोगसमायुक्तस्तथापुत्रोनजायते ॥ ३८७ ॥ १।३।७।१२।१६।२०।२५।३०।
३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९५ ॥ ७७ अथटेमयोगः ॥ गयापुर्यांपुरादेवब्राह्मणोन्यवसत्तदा ॥ वेदकर्मपरिभ्रष्टोमद्यपानरतःसदा
॥३८८॥ वेश्यागमनरक्तश्चपाखंडाचरणेरतः ॥ आयुषस्तुसमाप्तित्वात्सविप्रःपंचतांगतः ॥ ३८९ ॥ महाकटाहनरकेनिक्षिप्तोयमदूतकैः॥
बहुवर्षसहस्रांतेपुनरागत्यभूतले ॥ युक्तःसौख्येनमहतापुत्रकन्याविवर्जितः ॥३९०॥२।४।६।१०।१९।२२।२५।३५ वर्षेषुकष्टम्॥ परमायु
र्वर्षाणि ७५ ॥ ७८ अथटेमाख्ययोगः ॥ देशेहिनंदनेचैवस्वर्णकारोवसत्तदा ॥ महाधनीमहोत्साहीस्वकर्मनिरतःसदा॥३९१॥तस्मिन्ग्रा
मेवसत्येकोब्राह्मणोबहुधार्मिकः ॥ शतपलप्रमितंस्वर्णंतस्मैदत्तंद्विजन्मने ॥३९२॥ सर्वस्वर्णव्ययोकारिस्वर्णकारेणभोनघ ॥ वेश्यांदत्त्वातु
तत्स्वर्णंब्राह्मणोव्याकुलोऽभवत ॥ तद्ग्रामाच्चपलायित्वाह्यन्यत्रतुततोगतः ॥३९३ ॥ एवंस्वल्पेगतेवर्षेस्वर्णकारस्तदामृतः ॥ नरकेरौरवेघो

[illegible] ॥ [illegible]मानुषत्वंततोऽभवत् ॥ धनधान्ययुतोनित्यंवंशवृद्धिर्नजायते ॥ रोगैश्चविविधैर्गात्रंपीडच
मानंमुहुर्मुहुः॥ ३९५॥४।८।१५।१९।२६।२९ वर्षेषुकष्टम् ॥परमायुर्वर्षाणि७२॥७९अथटीटहीयोगः॥ कश्चिद्वैश्योऽभवत्पूर्ववंगदेशेद्विजो
त्तम ॥ महाभिमानसंसक्तःपरद्रोहेरतःसदा ॥३९६॥ मानधाताइतिख्यातःपत्नीतस्यप्रभावती ॥ धूर्तविद्यासुनिपुणःपरद्रव्यापहारकः ॥
॥ ३९७ ॥ एकस्तुन्यवसत्तत्रब्राह्मणोधनसंयुतः ॥ अपवादेनभोविप्रतस्यसर्वंहृतंधनम् ॥३९८॥ तेनविप्रेणक्रोधेनस्वशरीरंचघातितम् ॥
एवंबहुगतेकालेवैश्योमृत्युवशंगतः ॥ ३९९ ॥ गर्दभोमाहिषोभूत्वागृध्रोभूत्वाचपर्वते ॥ गंगामरणजात्पुण्यात्सगृध्रोमानुषोऽधुना ॥
॥ ४०० ॥ १ । ३ । ८ । १६ । २० । २५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८८ ॥ ८० अथटनाभयोगः ॥ अयोध्यापश्चिमेभागेविप्र
रामपुरेशुभे ॥ ह्यासीद्वैश्योरामदासोविख्यातश्चक्षितौसदा ॥ ४०१ ॥ एकदात्वतिथेस्तेनानादरोबहुधाकृतः ॥ तेनपापेनवैश्योसौमृत्वा
यातोयमालयम् ॥ ४०२ ॥ तत्रभुक्त्वामहद्दुःखमागतोभूतलेपुनः ॥ अस्मिञ्जन्मनिनिर्धनश्चपूर्वपापप्रभावतः ॥ ४०३ ॥ २० । २५ ।
५० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९० ॥ ८१ अथटंटकारण्ययोगः ॥ आसीज्जन्मांतरेचैवब्राह्मणोवेदपाठकः ॥ सर्वसामर्थ्यजननोधर्म
कर्माचरेरतः ॥ ४०४ ॥ तीर्थेतीर्थेकृतासेवादेवतायागुरोरपि ॥ एकस्मिन्समयेविप्रलोभाकृष्टेनचेतसा ॥ ४०५ ॥ दक्षिणस्यांदिशिग
त्वायत्रतत्रभ्रमन्नसौ ॥ विविधंयत्नंकृत्वापिलब्धवान्नवराटिकाम् ॥ ४०६ ॥ अतिथिश्चैवभूत्वाथपर्य्यटंश्चचतुर्दिशः ॥ गुरुद्रोहःकृतस्तेन
भाविनोर्थस्यवैबलात् ॥ ४०७ ॥ तेनपापानुसारेणाऽतिथिःसनरकेगतः ॥ नरकान्निःसृतोदेवमानुषोत्राऽभवत्पुनः ॥ ४०८ ॥ १ ।
३ । ६ । ९ । १२ । १६ । २० । २७ । ३२ । ३६ । ३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८४ ॥ ८२ अथटास्दयोगः ॥

काश्मीरेनगरेपूर्वंब्राह्मणोग्रवनोयथा ॥ असद्धर्मांह्यसद्राषीद्रव्याऽऽकांक्षीतथातुरः ॥ ४०९ ॥ एकस्मिन्समयेविप्रमध्यदेशेसमागतः ॥ प्र
यागेनैमिषारण्येसस्नातोभक्तिसंयुतः ॥४१०॥ एकस्मिन्स्समयेविप्रकाश्यांवैब्राह्मणालये ॥ यत्किंचित्तुधनंलब्धंकृत्वातुविविधैश्छलैः ॥
॥ ४११ ॥ तेनपापानुसारेणनरकंभुक्त्वाऽथदारुणम् ॥ षष्टिवर्षसहस्रांतेभूतलेह्यागतःपुनः ॥ किंचिद्द्रव्ययुतोप्यत्ररोगाश्चविविधास्तथा ॥
॥ ४१२॥१।३।८।१३।२९।५० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७९ ॥ ८३ अथटरढाकनयोगः॥ अथान्यच्चप्रवक्ष्यामिपूर्वजन्मनिबाहुजः॥
कृष्णानद्याश्चनिकटेन्यवसत्परिवारयुक् ॥ ४१३ ॥ धनधान्ययुतस्तत्रपापकर्मपरायणः ॥ एकस्मिन्समयेविप्ररणाग्रेचतदागतः ॥
॥ ४१४ ॥ कृत्वापरस्परंयुद्धमतिप्रबलदंडिनौ ॥ युद्धात्पलायमानःसबभूवद्विजसत्तम ॥ ४१५ ॥ तेनपापानुसारेणयमलोकेहिप्राप्त
वान् ॥ बहुवर्षसहस्रांतेपुनरागत्यभूतले ॥ ४१६ ॥ १ । २ । ४ । ८ । १२ । १७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७२ ॥ ८४
अथटाहरयोगः ॥ कश्चिद्द्विजकुलेविप्रव्यापारेचसदारतः ॥ घृतव्यापारनिरतोद्रव्यलोभीसदाद्विज ॥ ४१७ ॥ गृहेपुनःस
मागत्यविमुखोपिबभूवह ॥ मातापितरौपरित्यज्यभ्रातृवैरेतथारतः ॥ ४१८ ॥ पत्नीतस्यमहादुष्टाकर्कशाकटुवादिनी ॥ सर्पदंशे
नविप्रस्यमरणंचततोऽभवत् ॥ ४१९ ॥ पापात्पापफलंभुक्त्वाबहुवर्षसहस्रकम् ॥ पुनरागत्यमेदिन्यामधुनामानुषोऽभवत् ॥
॥ ४२० ॥ १ । २ । ८ । १० । १२ । १८ । २९ । ३० । ३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९८ ॥ ८५ अथठंठपालभ्रयोगः
प्रकथ्यते ॥ पूर्वजन्मनियानारीसोरठेनगरेऽवसत् ॥ कुमारीधर्मशीलाचपतिमित्रविवर्जिता ॥ ४२१ ॥ ब्राह्मणस्यकुलेजातानाना
सौख्यसमन्विता ॥ सर्वस्वंब्राह्मणेदत्त्वाजगामबद्रिकाश्रमे ॥ ४२२ ॥ तत्रस्थित्वाद्विजश्रेष्ठतपश्चर्य्यामथाकरोत् ॥ तपोंतेसामृताबाला

बभूवपुरुषोऽधुना ॥ धनधान्यसमायुक्तःपुत्रस्त्रीभूमिसंयुतः ॥ ४२३ ॥ १ । ३ । ८ । १२ । १७ । २० । २५ । २६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८३ ॥ ८६ अथठंढयोगः ॥ ठंढयोगेचयोजातःपूर्वजन्मनिबाहुजः ॥ ज्वालामुख्याश्चनिकटेसिद्धपृष्ठेतदाऽवसत् ॥ ॥ ४२४ ॥ गौरवेतिसमाख्यातःपत्नीह्यास्त्रावतीशुभा ॥ नानाविभवसंयुक्तोदेव्यर्चनयुतःसदा ॥ ४२५ ॥ तत्रभाविबलात्पुत्रदुर्योगश्च समागतः ॥ द्रव्याणांतस्यसर्वेषांव्ययोभूत्वादिनेदिने ॥ ४२६ ॥ दारिद्र्येणाभवत्पीडाऽश्रमद्देशेचदेशके ॥ अखाद्यंखादितंतेनगतोयमपुरे द्विज ॥ अत्रजन्मनिमहारोगीचोदरेपीडनंमहत् ॥ ४२७ ॥ १ । ४ । ६ । १० । १३ । १८ । २२ । २७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८५ ॥ ८७ अथठोकनयोगः ॥ ठोकनेचनरोजातःपर्वतेपूर्वजन्मनि ॥ केदारइतिविख्यातःपत्नीतस्यमहेश्वरी ॥ ४२८ ॥ धनमैश्वर्यमतुलंभोक्ताचापिविशेषतः ॥ पर्वस्वपिचतेनैवभोजिताब्राह्मणाःशुभाः ॥ ४२९ ॥ एकस्मिन्समयेविप्रदम्पतीतीर्थकंगतौ ॥ तत्रपत्नी मृतापांथोब्राह्मणोपिमृतस्तदा ॥ ४३० ॥ पत्नीशोकेनभोविप्रयमलोकेतदागतः ॥ यमलोकात्परिभ्रष्टश्चागतोभूमिमंडले ॥ ४३१ ॥ १ । २ । ४ । ६ । ८ । १३ । १७ । २० । ३४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०० ॥ ८८ अथढासयोगः ॥ ढासयोगेचयो जातःसपुमान्कुलदीपकः ॥ पूर्वजन्मनिमहाराष्ट्रेदेशेदेशेभ्रमंस्तुवै ॥ ४३२ ॥ पत्नींपुत्रंतदात्यक्त्वाब्रह्मचर्य्यरतःसदा ॥ एकस्मिन्समयेविप्र परस्त्रीलोलुपोभवत् ॥ ४३३ ॥ व्रणरोगेणविकलःसमृतोगदपीडितः ॥ पापात्पापफलंभुक्त्वापुण्यात्स्वर्गंतथानघ ॥ षष्टिवर्षसहस्रांतेचा गतोधरणीतले ॥ ४३४ ॥ १ । ३ । ८ । १३ । २० । २४ । ३४ । ३८ । ४१ । ४८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७३ ॥ ८९ अथठर्पदयोगः ॥ कश्चिद्द्विजोमहाभागचम्पकारण्यसन्निधौ ॥ भूदेवइतिनामावैपत्नीतस्यकुलार्णवी ॥ ४३५ ॥ श्रौतस्मार्त्तनिरतश्चपठने

पाठनेरतः॥ सर्वदाशिवभक्तश्चअन्यत्कर्मनंज्ञायते ॥४३६॥ एकस्मिन्समयेविप्रकृतंकर्मसुदारुणम्॥ शिवालयेऽकरोज्जाप्यंतत्रैकाचागता
जना॥ ॥४३७॥बलात्काराद्रतिंकृत्वापापमाचरितंत्विदम्॥ब्राह्मणस्यततोमृत्युर्बभूवस्त्रीसतीतदा ॥ पुनर्वैमानुषीयोनौमूत्रकृच्छ्रेणकष्टितः
॥४३८॥१।२।४।१३।१८।२०।२७।३९ वर्षेषुकष्टम्॥ परमायुर्वर्षाणि ९७॥९०अथडर्पदयोगः॥आसीज्जन्मांतरेचैवव्याधोवसश्चपर्वते॥
व्याधकर्मरतोनित्यंजीवानांघातनेरतः॥४३९॥पशुपक्षिमृगादीन्सजघानचदिनेदिने॥एकस्मिन्समयेविप्रमहाघोरेचजांगले॥४४०॥अभ्रम
त्तत्र्याकुलोऽभूत्क्षुत्तृड्भ्यांचसपीडितः॥४४१॥इतस्ततश्चविचरन्पर्यटन्गांश्चतुर्दिशः॥ बिल्वमूलेततोमृत्युर्बभूवद्विजसत्तम ॥४४२॥ शिव
दूतैःसमंगत्वाकैलासशिखरेगतः ॥ कैलासाच्चपरिभ्रष्टश्चागतोधरणीतले ॥ ४४३ ॥ १ । ४ । ८ । १३ । १७ । २० । २७ । ३८। ४० ॥
४४।४९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ ८१ अथडोहीयोगः ॥ कश्चिद्वैश्यकुलेपूर्वंमगधेचतदावसन् ॥ ब्राह्मणस्यप्रसंगेनश्रुत्वापौ
राणिकींकथाम् ॥ ४४४ ॥ चातुर्मास्यव्रतंकृत्वाब्राह्मणास्तोषिताअपि ॥ तेनपुण्यप्रभावेणबभूवबाहुजस्तदा ॥ ४४५ ॥ राज्यंकृत्वासुखंभु
क्त्वानानासत्संगमेरतः ॥ तत्रदानंकृतंतेनश्रद्धयाचद्विजोत्तम ॥ सजातोप्यत्रभोविप्रब्राह्मणस्यकुलेधुना ॥ ४४६ ॥ १। ३ ।५ । १० । १२
१७ । २० । २७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७८॥९२ अथटाटयोगः ॥ आसीज्जन्मांतरेचैववावनोनामबाहुजः ॥ स्वप्रतापीकलग्रीवा
नामभार्याशुभानना ॥ ४४७॥ पतिसेवारताचोग्राअन्यदेवंनजानती ॥ एकस्मिन्समयेविप्रबाहुजेनदुरात्मना॥४४८॥परस्त्रीमानितातेन
सतींत्यक्त्वाचभोनघ ॥ साबालाचविलप्याथयथाहिकुररीखलु ॥ ४४९ ॥ वनाद्रिनिकटेविप्रसामृताद्विजसत्तम॥महाघोरेचनरकेबाहुजः
पतितस्तदा ॥ ४५० ॥ षष्टिवर्षसहस्राणि भुक्त्वानरकजंफलम् ॥ पुनर्वैमानुषोभूत्वासर्वरोगान्वितःसच ॥ ४५१ ॥ १ । ४ । ८ । १२ ।

१७ । २० । २७ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०५ ॥ ९३ अथटंघनयोगः ॥ टंघनेयोगेयोजातः पूर्वजन्मफलंशृणु ॥ विपाशायास्तटेचैवबाहुजोऽभूद्द्विजोत्तम॥४५२॥धर्मकर्मसमायुक्तोग्रामेषुविश्रुतोमहान्॥पापकर्मार्जितंतेनभाविनोर्थस्यवैबलात् ॥४५३॥ शूद्र्यांवैधारितंगर्भेपातनंचतथाऽकरोत्॥साम्प्रतंतेनदुःखेनपापमाचारितंत्विदम् ॥४५४॥ तेनपापप्रभावेणयमलोकमुपागतः॥ पुनर्वैमानुषोभूत्वापवैतारण्यसन्निधौ ॥ ४५५ ॥ प्रथमेवाष्टमेवर्षेद्वादशेषोडशेपिवा॥मृत्युप्रायंहिकष्टंचषष्टिवर्षोत्तरेमृतिः ॥ ४५६ ॥ ९४ अथटेनकायोगः ॥ पूर्वजन्मन्ययोध्यायांशूद्रोनामरमानुजः॥परमोदारोऽतुलश्चरामभक्तःसदादृढः ॥ ४५७ ॥द्रव्यंतूपार्जितंतेनपूर्वकर्मप्रभावतः॥ तस्यव्ययोऽकारितेनसाधूनांचप्रसंगतः ॥ ४५८ ॥ शिवनिंदारूपपापाद्गतोनरकेचदारुणे ॥ षष्टिवर्षसहस्राणिनरकेपरिपच्यते॥पुनर्वैमानुषोभूत्वाधनधान्यसमायुतः ॥ ४५९ ॥ सर्वांगेजायतेदद्रुःपीडातस्यविशेषतः ॥ पुत्रकन्याश्चबहवोभूत्वायांतिचमृत्युताम् ॥ ४६० ॥ शिवस्याऽऽराधनात्पुत्रसर्वाबाधाविनश्यति ॥ रोगाश्चविलयंयांतिपुत्रपौत्रसमन्वितः ॥ ४६१ ॥ चतुर्थेपंचमेवर्षेनवमेकादशेपिच ॥ महत्कष्टेनविकलोजायतेमुनिसत्तम ॥ प्राप्तेपंचाशत्तमेऽब्देह्यल्पमृत्युर्भविष्यति ॥ ४६२ ॥ ९५ अथटेककनकयोगः ॥ कालिंदीनिकटेपूर्वंब्राह्मणःशास्त्रपाठकः ॥ कौपीनइतिविख्यातः पत्नीपुत्रसमन्वितः ॥ ४६३ ॥ अग्निहोत्रादिकंकर्मदम्पतिभ्यांसदाकृतम् ॥ एकस्मिन्समयेविप्रभगिनीपुत्रःसमागतः ॥ ४६४ ॥ परदेशात्तदाविप्ररत्नभारसमन्वितः ॥ आदरंबहुधाकृत्वास्वगृहेस्थापितोद्विजः ॥ ४६५ ॥ तस्यद्रव्याणिसर्वाणिगृहीत्वाविविधैश्छलैः॥तत्कर्मणोवशात्पुत्रब्राह्मणःकौशिकोऽभवत् ॥ ४६६ ॥ पुनर्वैमानुषीयोनौधनधान्यसमन्वितः॥प्रथमेपंचमेवर्षेषष्ठेऽष्टमेचद्वादशे ॥ विंशतिवर्षांतरेकष्टंषष्टिवर्षांतरेमृतिः॥४६७ ॥ ९६ अथटंघनटयोगः॥इदानींसुखसौभाग्यंपरमोदारवत्सलः ॥ स

मातृपितृभक्तश्चदानपुण्यपरायणः ॥४६८ ॥ विद्याविनयसम्पन्नःपुत्रेणरहितोऽधुना ॥ भृगुरुवाच ॥ पूर्वजन्मनिविप्रोसौप्रयागेह्नितदाऽव
सत् ॥ कृष्णदेवइतिख्यातःपत्नीपुत्रसमन्वितः ॥४६९॥ मातुलान्यांचगमनंविभ्रमेणतदाऽकरोत् ॥ गर्भपातनकात्पापात्पुत्रवृद्धिर्नजाय
ते॥४७०॥१।३।९।१२।१६।१७।२०।२९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०३ ॥ ९७ अथटामरीयोगः ॥ आसीज्जन्मांतरे चैववंगदेशे
द्विजोधनी ॥ कर्मदेवःसमाख्यातःपत्नीतस्यकुमोदकी ॥ ४७१॥ पातिव्रत्यरताचोग्रापतिसेवापरायणा ॥ ब्राह्मणःकामसक्तश्चपरभार्य्या
रतःसदा ॥४७२ ॥ परमार्थसाधनेनैवविषयान्वितसंभ्रमः ॥ एकस्मिन्समयेविप्रद्यूतकार्येद्विजोत्तम ॥ ४७३ ॥ सभार्य्यंचधनंसर्वंहारितं
वैद्विजेनतु ॥ सविप्रःपंचतांप्राप्तोगतोऽसौयमलोकके ॥४७४॥ विंशतिजन्मपशुर्भूत्वामानुषत्वंततःपरम् ॥ विकलोदीनःक्षीणश्चहीनवृत्ति
प्रपीडितः ॥ ४७५ ॥ १।३।८।१२।२०।२७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६८॥ ९८ अथटेकनेकयोगः॥कश्चिद्द्विजकुलेपूर्वंकामरूपेऽवस
त्तदा ॥ पुरुषोत्तमनामावैमिथ्याजल्पतिनित्यशः ॥४७६॥ परापवादकरणेसमर्थोपिविशेषतः ॥ एकस्मिन्समयेविप्रगोत्रपुत्रीकलंकिता॥
॥ ४७७ ॥ तेनपापानुसारेणनरकेभृशदारुणे ॥ बहुवर्षसहस्राणिभुक्त्वानरकजंफलम् ॥ पुनर्वैमानुषोभूत्वापाखंडीधूर्तएवच ॥४७८॥ १।
३ । ६ । ९ ।१२।१६।२०।२७।३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९३ ॥ ९९ अथटरकोपीयोगः ॥ आसीज्जन्मांतरेचैवब्राह्मणःकोंकणे
वसन् ॥ शिवरामइतिख्यातःसपत्नीकःसपुत्रकः ॥ ४७९ ॥ राजपूज्योगुणातीतःकापट्याऽऽचरणेरतः ॥ तस्मिन्ग्रामेद्विजस्त्वेकोदरिद्रः
कृपणस्तथा ॥ ४८० ॥ तस्यपुत्रीयौवनेनवरयोग्याबभूवह ॥ उद्वाहकालोवैदैवादायातश्चनिवारितः ॥ ४८१ ॥ तेनवैशिवरामेणदुष्टेन
चद्विजोत्तम ॥ शिवरामोगतस्तेनकुंभीपाकंतथैवच ॥ ४८२ ॥ दिव्यवर्षसहस्राणिभुक्त्वाभोगांश्चशाश्वतान् ॥ मानुषोत्रधरायांतुपुत्रदार

निवर्जितः ॥ ४८३ ॥ १।४।६।१२। १३। १६। १८। २०। २७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८८ ॥ १०० अथटंटमिस्वरयोगः ॥
श्रीहट्टनगरेपूर्वेगंधर्वोनामपादजः ॥ कृषिकर्मणिसव्यग्रोधनधान्यसमन्वितः ॥ ४८४ ॥ ब्राह्मणानांकृतासेवातीर्थयात्रातथाकृता ॥
सर्वस्वंविधिनादत्तंसत्पात्रायद्विजायच ॥ ४८५ ॥ जगामबद्रिकाऽऽरण्येतपश्चर्य्याकृताभृशम् ॥ दम्पतीमरणंप्राप्तौगताविंद्रपुरंचतौ ॥
॥ ४८६ ॥ ततः पुण्यक्षयेजातेमर्त्यलोकेचबाहुजः ॥ धनधान्यसमायुक्तः सर्वसौख्येनसंयुतः ॥ ४८७ ॥ १। ५। ८। १३। १७।
२२।२८।३१।३९ वर्षेषुकष्टम् ॥ परमायुःशताब्दांतेवैशाखेमरणंभवेत् ॥ जाह्नवीनिकटेचैवसंशयोनात्रभार्गव ॥ ४८८ ॥ १०१ अथ
टोकनयोगः ॥ ताप्त्याश्चनिकटेविप्रतत्त्ववदेवेतिब्राह्मणः ॥ महामूर्खोतिजरठःसदादारिद्र्यपीडितः ॥ ४८९ ॥ सत्यवतीतस्यभार्यारूपवती
पतिप्रिया ॥ एकस्मिन्समयेविप्रदम्पतीकाननेगतौ ॥ ४९० ॥ तत्रभाविबलात्पुत्रनृपस्त्वेकः समागतः ॥ आखेटकेततोदेवदृष्टागुणवती
शुभा ॥ ४९१ ॥ बलादाकर्षिताभूयःस्यंदनेस्थापिताचसा ॥ ब्राह्मणोव्याकुलोभूत्वास्वशरीरंजघानह ॥ ४९२ ॥ आत्महापापदोषेण
चिरायनरकेस्थितः ॥ अत्रजन्मनिद्विजोजातःकंठेबाहौसचिह्नितः ॥ ४९३ ॥ १। ३। १०। १५। १९। २३। २७। ३३। ३६
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१ ॥ १०२ अथटोन्नतयोगः ॥ दंडकारण्यनिकटेराजपुत्रोमहाबलः ॥ पूर्वजन्मनिवित्ताढ्यःसहसैन्ये
नराजते ॥ ४९४ ॥ जीतकेतुश्चेतिनामचोग्रदंडःप्रतापवान् ॥ कृतानिशूरकर्माणिदानंदत्तंविशेषतः ॥ ४९५ ॥ एकदाभिक्षुकेणैव
ह्यो[illegible]द्धारेकृतःखलु ॥ अपभ्रंशंवदंस्तस्यतिरस्कारमथाऽकरोत् ॥ ४९६ ॥ तेनविप्रेणक्रोधेनविषंपीतं[illegible]णम् ॥ समृतस्तेनदुःखेनपा
पमाचरितंत्विदम् ॥ ४९७ ॥ बहुवर्षसहस्राणिभुक्त्वानरकजंफलम् ॥ धरायांमानुषोभूत्वाप्रथमेद[illegible]निःसुखस[illegible]तमेवर्षेपंचत्वंचभ

विष्याति ॥ ४९८ ॥ १०३ अथढोकरयोगः ॥ कश्चिच्छूद्रकुलेपूर्वंकीकटेहितदावसन् ॥ चौरकर्माणि [illegible] च ॥ पूर्वजन्मनि [illegible]
निर्दयःपापभागीचकृतंकर्मदुरासदम् ॥ एकस्मिन्समयेविप्रपरदेशेतदागतः ॥५००॥ मार्गेवनांतरेचैवप्रसूताचशुनीद्विज॥ [illegible] शुघातनतत्परः ॥ ४९९ ॥
लादीनाचाऽकंदद्विजसत्तम ॥५०१॥ दृष्ट्वातांचसवैशूद्रोदयायुक्तोबभूवह॥शुन्यैतुसक्तून्दत्त्वासजलपानमकारयत् ॥ ५०२ ॥ क्षुत्तृड्भ्यांविक
नैवस्वर्गंयातःसपादजः ॥ ततःपुण्यक्षयेजातेमानुषश्चाऽभवद्भुवि ॥ सर्वसम्पद्युतोप्यत्रपुत्रदारधनैर्युतः ॥ ५०३ ॥ तेनैवसुकृते
३९ । ३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०० ॥ १०४ अथढंढमारकयोगः ॥ आसीज्जन्मांतरेचैवपापिष्ठःपृथिवीपतिः ॥ १। ४।९। १४।१९।२४।
इतिख्यातोलोकाचारेसदारतः ॥ ५०४ ॥ ब्राह्मणानांहृतंक्षेत्रंकीर्तिभंगंतथाऽकरोत ॥ अमेध्यभक्षणंकृत्वाह्यगम्यागमनंकृतम् ॥ ५०५ ॥ मगसिंह
अदंड्योदंडितस्तेनाऽपेयंपीतंचसर्वदा ॥ एवंबहौगतेकालेसराजापंचतांगतः ॥५०६॥ सतेनकर्मणायुक्तःप्राप्तस्तुयमशासनम् ॥ बहुवर्षस
हस्रांतेचागतोधरणीतले ॥५०७॥ पुत्रदुःखंचदारिद्र्यंशरीरेकष्टमादिशेत् ॥ प्रथमेतृतीयेवर्षेह्यष्टमेद्वादशेतथा ॥ षोडशेब्देमहाकष्टंषष्टिवर्षा
तरेमृतिः ॥५०८॥ १०५ अथटवरयोगः ॥ धुंधमारीचनामाख्यःपूर्वजन्मनिधनेश्वरः ॥ ऐरावतस्यनिकटेन्यवसत्परिवारयुक् ॥ ५०९॥
महाश्मशाननिलयेजपकर्मसमाचरत् ॥ कालिकायाःकृतापूजाषोडशैरुपचारकैः ॥५१०॥ बलिंदत्त्वातदाविप्रचार्घमाचमनंतथा॥आविर्ब
भूवसहसाकोटिसूर्य्यसमप्रभा ॥५११॥ दृष्ट्वासमूर्छितोभूत्वाचोन्मत्तोपिबभूवह ॥ नग्नःस्फोटनयुग्गात्रोभ्रमतिस्मधरातले ॥ पुनर्वैमानुषो
भूत्वागंगायाश्चोत्तरेतटे ॥ ५१२ ॥ १।३।५।९।११।१५।१७।२०।२५।२९।३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६७ ॥ १०६ अथटात्का
लीयोगः ॥ अथपूर्वंदरिद्रश्चमोदनोनामबाहुजः ॥ शिवसेवाकृतासम्यङ्मनइंद्रियनिग्रहात् ॥ ५१३॥ व्रतानितुप्रदोषस्यकृत्वोद्यापनमा

चरत्॥ तीर्थावगाहनंकृत्वागयाश्राद्धंचकारह॥५१४॥आयुषस्तुसमाप्तित्वात्सविप्रःपंचतांगतः॥ पत्नीतस्यसतीजातास्वर्गलोकमुभौगतौ
॥५१५॥स्वर्गाच्चैवच्युतिर्भूत्वाचागतोधरणीतले॥गौरःसुरूपोमतिमान्धनपुत्रसमन्वितः॥५१६॥चतुर्थेपंचमेवर्षेचातिकष्टेनकष्टितः॥विंश
त्यब्दोत्तरेविप्रचाल्पमृत्युर्भविष्यति॥अष्टवेदाब्दपर्य्यंतंपरमायुरिहोच्यते॥५१७॥ १०७ अथटीकटयोगः॥आसीज्जन्मांतरेचैवब्राह्मणःकुरु
जांगले॥नंदलालइतिख्यातःपत्नीतस्यमनोरमा ॥५१८॥नानाधर्मार्जनंकृत्वानानातीर्थावगाहनम्॥एकस्मिन्समयेविप्रभाविनोर्थस्यगौर
वात् ॥५१९॥ भगिनीपुत्रस्यागतस्यह्यादरोबहुधाकृतः ॥ पुत्रवत्स्थापितोगेहेसर्वस्वमददत्पुरा॥ ५२०॥ किंचित्कालांतरेविप्रस्वभार्य्या
पुत्रसंभवः ॥ वाक्यमुक्त्वात्वपभ्रंशंभगिनीपुत्रंप्रतिद्विज ॥५२१॥ भवनान्निष्कासितश्चासौपापमाचरितंत्विदम् ॥ दैवाद्भार्याचपुत्रश्चमृत्युं
यातौदिनांतरे ॥५२२॥ ततःस्वल्पेगतेकालेसद्विजोपिमृतस्तदा ॥ पापात्पापफलंभुक्त्वापुण्यात्स्वर्गंतथानघ ॥ ५२३ ॥ षष्टिवर्षसहस्रांते
चागतोधरणीतले ॥ ईषद्गौरोमध्यदेहोदक्षिणांगेप्रचिह्नितः ॥ ५२४ ॥ प्रथमेपञ्चमेषष्ठेचाष्टमेदशमेपिवा ॥ द्वादशेषोडशेवर्षेमृत्युप्रायः
सकष्टितः ॥ ५२५ ॥ एकोनत्रिंशत्तमेऽब्देचाल्पमृत्युर्भविष्यति ॥ चतुःषष्टितमाब्दांतंकथितंप्राणधारणम् ॥ ५२६ ॥ पुनर्जन्मभवेत्तस्य
नर्मदादक्षिणेतटे ॥ तदामुक्तोनसंदेहःसत्यंसत्यंवदाम्यहम्॥५२७॥ १०८ अथटेमलयोगः॥ पुरातुकच्छकेदेशेब्राह्मणोवेदपारगः॥५२८॥
श्रौतस्मार्तनिरतश्चसत्यव्रतंसमाऽऽचरत् ॥ देवकर्मरतोनित्यंकुंभेकार्तिकमाघयोः ॥ ५२९ ॥ देवशर्मेतिविख्यातःपत्नीचकर्कशाऽधमा॥
पतिद्वेषकरीदुष्टानिष्ठुराकलहप्रिया ॥ ५३० ॥ एकदातस्यविप्रस्यभगिनीगृहमागता ॥ आदरंबहुधाकृत्वास्वर्णंदत्तंतदानघ ॥ ५३१ ॥
श्रुत्वाचकर्कशाचंडीविषभोजनमाचरत् सहस्राणिभुक्त्वानरकंभेनपुरुषस्याग्रेद्विजोत्तम ॥ ५३२ ॥ अनेनचकृतंकर्मद्विजेनदेवशर्मणा ॥

ततः कश्चिद्गतेकालेमृत्युस्तस्यद्विजस्यच ॥ ५३३ ॥ गंगायादक्षिणेकूलेस्वर्गवासस्ततोभवत् ॥ च ॥ पूर्वजन्मर्जितैर्मर्त्यलोकेत्वजायत ॥ ५३४ ॥ धनधान्यसंमायुक्तःपुत्रकन्याविवर्जितः ॥ पुण्यकर्मवशादेवतस्यभार्य्याचसाऽभवत् ॥ ५३५ ॥ पूर्वजन्मनिवैदेवमृतायापुरुषोपरि ॥ मध्येमध्येमहत्कष्टंजायतेनात्रसंशयः ॥ ५३६ ॥ गायत्रीमूलमंत्रस्यजपाःकार्याविशेषतः ॥ गोभूहिरण्यदानानिदद्याद्विप्रायवैखलु ॥ पुत्रार्थीलभतेपुत्रंरोगीरोगात्प्रमुच्यते ॥ ५३७ ॥ १।३।५।८।११।१४।१७।२०।३१।३५।३८।४० वर्षेषुरोगादिकष्टम् ॥ परमायुर्वर्षाणि ७० इति श्रीयोगसागरेसभार्चितदेशेशुकभृगुसंवादेद्वकमार्धाष्टोत्तरशतयोगकथनंनामषष्ठंप्रकरणम् ॥ ६ ॥ अथतवर्गाद्यायोगाःकथ्यन्ते ॥ १ अथतारणीयोगः ॥ कश्चिद्वैश्यकुलेपूर्वंमध्यदेशेतदाऽवसत् ॥ गिरिधरेतिविख्यातःपत्नीपुत्रसमन्वितः ॥ १ ॥ महोद्यमीसाहसीचकृषिवाणिज्यतत्परः ॥ द्रव्यंतुविपुलंकृत्वाभूमौहिखननेक्षिपत् ॥ २ ॥ कन्योद्वाहंतथाकृत्वागोदानंचतथानघ ॥ एवंचन्यवसत्तत्रबहुवर्षगतागतैः ॥ ३ ॥ आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः ॥ पुनर्वैमानुषोभूत्वाधनधान्यसमन्वितः ॥ देव्याश्वपूजनेनिष्ठःपरोपकरणेतथा ॥ ४ ॥ १।३।१७।२०।२६। ३२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६१ ॥ २ अथतत्त्वयोगः ॥ आसीज्जन्मांतरेचैवशाककारोऽतिनिष्ठुरः ॥ आंतर्वेद्येवसत्सोपिमंगलोनामविश्रुतः ॥ ५ ॥ शाकंकरोतिसततंहारिद्राजीरकंतथा ॥ कृषिंकरोतिवैतत्रमहिषीगोधनंभृशम् ॥ ६ ॥ एकदावृषभौदेवयोजितौचकलेपिच ॥ एकस्तुवृषभस्तत्रदैवान्मृत्युवशंगतः ॥ ७ ॥ ज्ञात्वादोषंशाककारःप्रायश्चित्तंनचाकरोत् ॥ सतेनकर्मणायुक्तःप्राप्तस्तुयमशासनम् ॥ ८ ॥ पक्षीकीटोविहंगोन्यायोनीर्भुक्त्वाकथंचन ॥ मानुषत्वंततःप्राप्तः पुत्रकन्याविवर्जितः ॥ ९ ॥ १।३।८।१४।१८।२३।३१।२६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ ३ अथतत्त्वगोपाल्योगः ॥ एकस्तुब्राह्मणः पूर्ववेदवेदांगपारगः ॥ नंदशर्माइतिख्यातस्तस्यप

त्नीतुचंचला ॥ १० ॥ कुलटारूपसम्पन्नावाराणस्यांततोऽवसत् ॥ परपुरुषरतानित्यंपरद्रव्याणिलुंठति ॥ ११ ॥ उपार्जितंबहुद्रव्यंमैथु
नेनतदानघ ॥ वज्रलेपोबभूवापिक्षेत्रस्यैवप्रभावतः ॥ १२ ॥ ब्राह्मणोहर्षसंयुक्तोद्रव्यस्यसंग्रहाच्चवै ॥ ततोबहुतिथेकालेद्विजस्यैवतुपंचता ॥
॥ १३ ॥ मृत्यौजातेतदानारीस्वेच्छयापरगेहिनी । नकरोतितदापुत्रगंगास्नानंकदाचन ॥ १४ ॥ सौगंध्यतैलताम्बूलसेवनंसर्वदाचवै॥
परपुरुषप्रसंगेनवयोऽर्द्धंचगतंद्विज ॥ १५ ॥ मृत्यौजातेततस्तस्याःकाशीवासप्रभावतः ॥ बहुवर्षसहस्राणिस्वर्गवासस्ततोभवत् ॥ १६ ॥
ततःपुण्यक्षयेजातेमर्त्यलोकमुपागतः ॥ मध्यदेशेततोजन्मसुन्दरोगुणसंयुक्तः ॥१७॥ धनधान्यसमायुक्तःपुत्रकन्याविवर्जितः॥रोगराजेन
संयुक्तस्तीव्रज्वरेणपीडितः ॥ १८॥१।४।८।१५।१८।२८।३१।३७ वर्षेषुकष्टम्॥परमायुर्वर्षाणि६५॥४अथतिग्वलयोगः॥ अंगदेशेऽवसत्त्वे
कोबाहुजश्चदुरासदः ॥ पापिष्ठश्चपरद्रोहीनिंदकःपशुबुद्धिकः ॥ १९ ॥ मिथ्याविवादनिरतःपरकार्य्यविनाशकः ॥ तस्यभार्य्याविशाला
क्षीसुशीलारूपसंयुता ॥२०॥ देवतापूजनेनिष्ठापातिव्रत्यपरायणा ॥ एकदाश्राद्धसमयेब्राह्मणोवेदपारगः ॥२१॥ राजानमुक्तवान्राजञ्छ्रा
द्धंकुर्यान्नचैवहि ॥ पत्नीरजस्वलायस्माद्गृह्णन्तिपितरोनहि ॥ २२ ॥ बाहुजश्चाऽतिकोपेनकटुवाक्यमवदद्द्विजम् ॥ ब्राह्मणेनतदापुत्रबाहुज
श्चप्रताडितः ॥ २३ ॥ बाहुजेनतुविप्रोऽसौशस्त्रेणचततोहतः ॥ बहुवर्षसहस्रांतेनरकान्निःसृतोद्विज ॥२४ ॥ महिषीवृकसर्पाणांयोनीर्भुक्त्वा
कथंचन ॥ मानुषोभवतिह्यत्रगोधूमाकारवत्तनुः ॥ २५ ॥१।२।५।१०।१३।१८।२५। २९ । ३४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६७ ॥ ५
अथतोमरयोगः ॥ तोमरेचनरोजातःपूर्वजन्मनिबाहुजः ॥ कृष्णराजःसमाख्यातःपत्नीतस्यचराधिका॥२६॥धर्माधर्मविवेकीचशूरकर्मणि
तत्परः ॥ दानशीलोमहाप्राज्ञोब्राह्मणानांचसेवकः ॥२७॥ एकस्मिन्समयेविप्रसमरेचसमागतः ॥ कृत्वापरस्परंयुद्धंखड्गैरपितुमुद्गरैः॥२८॥

वा॥ततस्तेनबहुभिःप्रहाररतिदारुणैः ॥ संग्राममभूमौसमृतःस्वर्गंगत्वाचबाहुजः ॥ २९ ॥ पत्नीत्र ॥ पूर्वजन्मनितस्मिन्गयातावुभावपि ॥ षष्टि
वर्षसहस्रांतेचागतौभूमिमंडले ॥ ३० ॥ मध्यदेशेधुनाजातःसर्वसौख्यसमन्वितः ॥ नानाविचारकुशलैःपरकार्य्यस्यसाधकः ॥ ३१ ॥प्रथ
मेद्वितीयेवर्षेषष्ठेऽष्टमकेपिवा ॥ विश्वाब्देषोडशेविंशेकष्टेनातिप्रपीडितः ॥३२॥ खवेदाब्देगतेविप्रचाल्पमृत्युर्भविष्यति ॥ यदिधर्मःसहायः
स्याज्जीवेद्वर्षाष्टषष्टिकम् ॥ चैत्रेमासिसितेपक्षएकादश्यांमृतिर्भवेत् ॥ ३३ ॥ ॥ ६ अथतोषणयोगः ॥ बंदरेनगरेविप्रबाहुजस्तत्रकीर्त्ति
मान् ॥ तस्यपत्नीप्रभानाम्नीसुशीलापरमासती ॥ ३४ ॥ वैश्यकर्मरतःसोपिच्छात्रधर्मविवर्जितः ॥ मद्यपानरतोनित्यंमत्स्यमांसंतुभुज्यते
॥ ३५ ॥ परस्त्रीरतिसंतोषश्चागम्यागमनेरतः ॥ संचितंबहुधाद्रव्यंरत्नसागरसंज्ञकम् ॥ ३६ ॥ तस्यमित्रंद्विजस्त्वेकोमहाद्रव्येणसंयुतः ॥
आगतोनिकटेतस्यपुत्रदारैश्चसंयुतः ॥ ३७ ॥ आदरंबहुधाकृत्वावासंचस्वगृहेददौ ॥ वर्षमात्रंततः स्थित्वाकथाप्रीतिरजायत ॥ ३८ ॥
वैश्योहिदुष्टबुद्धिश्चब्राह्मणायविषंददौ ॥ समृतस्तेनदुःखेनसर्वस्वंतस्यनीतवान् ॥ ३९ ॥ क्षत्रियोनरकेगत्वामन्वन्तरंतथास्थितः ॥ अत्रतु
मानुषीयोनौदुःखभारसमन्वितः ॥ ४० ॥१।२।४।७।८।१६।२९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१ ॥ ७ अथतेजायोगः ॥ आसीज्ज
न्मांतरेचैवब्राह्मणः शास्त्रकोविदः ॥ देशेहिकीकटेचैवन्यवसत्पूर्वजन्मनि ॥ ४१ ॥ नंदकेश्वरनामाख्यःपत्नीतस्यकिशोरिका ॥ धनधा
न्यसमायुक्तःपुत्रकन्यासमन्वितः ॥ ४२ ॥ परदेशेगतोदैवात्तत्रद्रव्यंहिचार्जितम् ॥ स्वदेशेपुनरागत्यहर्षगद्गदमानसः ॥ ४३ ॥ एकस्मि
न्समयेविप्रब्राह्मणःस्त्रीवशंगतः ॥ परस्त्रीलोलुपोभूत्वाबहुवर्षंतथाऽनव॥४४॥ ब्राह्मणस्यततोमृत्युर्बभूवद्विजसत्तम ॥ पुनरागत्यमेदिन्यांसु
खसौभाग्यसंयुतः ॥ ४५ ॥ यदाकदाभवेत्पीडामासिवर्षेद्विजोत्तम ॥ पंचषष्टिस्तुवर्षाणिकथितंदेहधारणम् ॥ ४६ ॥ ८ अथतर्कयोगः॥

आसीज्जन्मांतरेचैवबभूवमुखजस्तदा ॥ हेमदेवइतिख्यातः पत्नीपुत्रसमन्वितः ॥४७॥ देशेहिकीकटेचैवपरिवारेणसंयुतः ॥ वेदशास्त्रविहीनश्चकृषिकर्मोद्यमेरतः ॥ ४८ ॥ धान्यंतुविविधंकृत्वातत्सकाशाच्चजीवनम् ॥ एकदाचंद्रमोग्रस्तेविधिवद्दानमाचरत् ॥ ४९ ॥ ब्राह्मणायविधिज्ञायदत्तंस्वर्णसुदान्वितम् ॥ तस्यगेहेस्थितः सर्पोदष्टवातंचैवब्राह्मणः ॥ ५० ॥यत्नेनहतवान्सर्पपापमाऽऽचरितंत्विदम् ॥ पापात्पापफलंभुक्त्वापुण्यात्स्वर्गंतथानघ ॥ पुनरागत्यमेदिन्यांधनधान्यसमृद्धिमान् ॥५१॥ १।३।८।१५।२०।२८।३२वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९८ ॥ ९ अथताडनयोगः ॥ कश्चिद्द्विजोमहाभागकौशिक्याश्चशुभेतटे ॥ बिल्वदेवःसमाख्यातः पत्नीद्वयसमन्वितः ॥ ५२ ॥ ब्राह्मणोदैवयोगेनयजमानगृहेगतः ॥ यजमानोददौप्रीत्यास्वर्णमुद्रासहस्रकम् ॥ ५३ ॥ स्वगृहेचागतोविप्रो हर्षगद्गदमानसः ॥ पत्नीभ्यांतुकृतंयुद्धंकथंस्वर्णंनदेहिमाम् ॥ ५४ ॥ ज्येष्ठयातुकृतंयुद्धंमहाघोरंद्विजंप्रति ॥ तेनविप्रेणक्रोधेनस्थूलेनलकुटेनवै ॥ ५५ ॥ ज्येष्ठाहताशिरोभग्नंसामृतातेनकष्टिता ॥ किंचित्कालांतरेचैवसविप्रः पंचतांगतः ॥ ५६ ॥ षष्टिवर्षसहस्राणिभुक्त्वानरकजंफलम् ॥ ततोवैमानुषोजातोधनधान्यसमन्वितः ॥ ५७ ॥ १।४।९।१२।१७।२२।२८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५५ ॥ १० अथतुंदिलयोगः ॥ कश्चिद्धर्मपुरेरम्येब्राह्मणःशास्त्रकोविदः ॥ गुणीमानीयशस्वीचशिवस्याऽऽराधनेरतः ॥ ५८ ॥ एकस्मिन्समयेविप्रभाविनोर्थस्यगौरवात् ॥ ब्राह्मणस्यहृतंद्रव्यंलोभोपहतचेतसा ॥ ५९ ॥ नदत्तंतस्यवैद्रव्यंबहुकालगतागतैः ॥ तत्राजावसत्त्वेकस्तत्सकाशात्कृतश्छलः ॥ ६० ॥ तेनपापानुसारेणनानानरकेषुसंस्थितः ॥ किंचित्पुण्यवशात्पुत्रसजातोमानुषोऽधुना ॥ ईषद्गौरोदीर्घदेहोदक्षिणांगेप्रचिह्नितः ॥ ६१ ॥१।३।७।११।१७।२०।२३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९७ ॥ ११ अथतिरस्कारयोगः ॥ आसीज्जन्मांतरेचैवबाहुजःकोंकणेवसन् ॥

प्रमासेद्दः समाख्यातः सपत्नीकः सपुत्रकः ॥ ६२ ॥ मैथिलेनगरेगत्वादैवाचपरिवारयुक् ॥ मातापितृतिरस्कारः कृतस्तेनतदानघ ॥६३॥
तेनघातंतदासम्यग्द्रव्यंतुविविधंद्विज ॥ पितरौतौमृतौतस्यक्षुत्तृड्भ्यांचप्रपीडितौ ॥ ६४ ॥ तेनपापानुसारेणनरकेबाहुजोगतः ॥ महि
षस्यवराहस्यकुक्कुटस्याथयोनिषु ॥ ६५ ॥ गंगामध्येताम्रचूडोमृत्वास्वर्गंततोगतः ॥ अत्रवैमानुषीयोनौचागतोभूमिमण्डले ॥ ६६ ॥
कुशत्वंदक्षिणेचिह्नंचंचलश्चतुरोदृढः ॥ प्रथमेपञ्चमेवर्षेह्यग्निनादह्यतेतनुः ॥ ६७ ॥ दशमैकादशेवर्षेपीडाभवतिदारुणा ॥ चतुर्वेदोत्तरे
कष्टंजीवनंसतषष्टिकम् ६८ ॥ १२ अथतलंचाख्ययोगः ॥ आसीज्जन्मांतरेचैववैश्योनामसुदर्शनः ॥ पुरेवैशदनेचैवन्यवसत्पूर्वजन्मनि
॥ ६९ ॥क्रयविक्रयकर्ताचद्रव्यान्वितगृहंशुभम् ॥ पत्नीमनोहरातस्यसुंदरीगुणवत्सला ॥ ७० ॥ आरामोनिर्मितस्तेनपथिकूपाश्चवै
तदा ॥ एकस्मिन्समयेविप्रकृतंकर्मतुदारुणम् ॥ ७१ ॥ स्वभ्रात्रेचकनिष्ठायभागस्तस्मैनदापितः ॥ एवंबहुगतेकालेवैश्योमृत्युवशंगतः
॥ ७२ ॥ पापात्पापफलंभुक्त्वापुण्यात्स्वर्गंतथाभृशम् ॥ ततोवैमानुषीयोनौचांतर्वेद्यांसमुद्भतः ॥ ७३ ॥ १ । ४ । ७ । १४
१८ । २० । ३१ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ १३ अथतीतरयोगः ॥ कश्चिद्रेवातटेपूर्वंबाहुजोबहुधार्मिकः ॥ पत्नीहुताश
नीतस्यगृहपालनतत्परा ॥ ७४ ॥ बाहुजश्चतदापुत्रशक्त्यादानंददौपुरा ॥ तोषितास्त्रिदशाःसर्वेदानेनतोषिताद्विजाः ॥ ७५ ॥ एक
स्मिन्समयेतत्रकृतंकर्मजुगुप्सितम् ॥ ब्राह्मण्यांधारितोगर्भपापमाचरितंद्विज ॥ ७६ ॥ आयुषस्तुसमाप्तत्वान्ममारसचबाहुजः ॥ नाना
जन्मान्यभूवंश्चतिर्यग्योनौपुनःपुनः ॥ मनुष्यत्वंततोयातस्तुर्येब्देनवमेरुजा ॥ ७७ ॥ १५ । २० । २५ । ३१ । ३६ । ४० । ४८
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥ १४ अथथलसंज्ञकयोगः ॥ थलसंज्ञेचयोजातस्तपस्वीपूर्वजन्मनि ॥ आयुषस्तुसमाप्त

त्वाद्देवाद्गंगातटेमृतः ॥ ७८ ॥ गतोऽसाविंद्रलोकेचनंदनेहिवनेतदा ॥ ततःपुण्यक्षयेजातेमानुषत्वमिहागतः ॥ ७९ ॥ १ । ३
६ । ९ । १४ । १७ । २० । २२ । २८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०० ॥ १५ अथदीर्घयोगः ॥ आसीत्पूर्वभवेकापि
शल्लकीगह्वरेवने ॥ महामतंगयूथानामधिकारोबृहत्तनुः ॥ ८० ॥ गंडकीजलमध्येचदैवात्तत्रमृताखलु ॥ स्वर्गाचैवच्युताभूत्वा
मानुषत्वंततोऽलभत् ॥ बाहुजस्यकुलेजातःसर्वसम्पद्युतोऽधुना ॥ ८१ ॥ १ । ३ । ४ । ८ । १७ । २७ । ३७ वर्षेषु
कष्टम् ॥ परमायुर्वर्षाणि ४९ ॥ १६ अथदतायोगः ॥ पूर्वजन्मनियानारीकुरुदेशेतदावसत् ॥ स्वैरिणीरूपसम्पन्नानाम्नावेसातिलो
त्तमा ॥ ८२ ॥ स्वपतेश्चविषंदत्त्वापरपुंसिरताचसा ॥ द्रव्यंचोपार्जितंप्राज्यंमैथुनेनतदानघ ॥ ८३ ॥ एकदासूर्य्यग्रस्तेचप्रयागेमकरे
द्विज ॥ दैवाद्वेण्यांचमग्नाऽभूद्गतासापरमंपदम् ॥ ८४ ॥ बहुवर्षसहस्रांतेचागताभूमिमण्डले ॥ ८५ ॥ १ । ३ । ५ । ८ । १२ । १६ ।
२० । २५ वर्षेष्वेतेषुवैकष्टंजातःपुत्रोविनश्यति ॥ बहुदुःखंचानुभूयपश्चाद्रंडाभविष्यति ॥ ८६ ॥ परमायुर्वर्षाणि ५८ ॥ १७ अथदया
धारयोगः ॥ खानदेशेवसत्पूर्वमाभीरःपादजस्तदा ॥ धनधान्यसमृद्धस्तुदानधर्मेसदारतः ॥ ८७ ॥ दत्तानितेनदानानिपर्वस्वपिविशे
षतः ॥ तुलादानंगोशतंचगजवाजिसहस्रकम् ॥ ८८ ॥ जलोत्सर्गंवनोत्सर्गंद्विजगेहान्यकारिच ॥ एवंनिवसतस्तत्रपापमाचरितंक्वचि
त् ॥ ८९ ॥ गृहान्निराशोह्यतिथिर्यातोदुःखीपरत्रतत् ॥ स्वर्गापवर्गभोगश्चबभूवबहुवार्षिकः ॥९० ॥ ३ । ६ । ९ । १४ । २० । २८ । ३५
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि॥७५॥ १८अथदारणयोगः ॥ आसीज्जन्मांतरेचैवशूद्रोनाममहीधरः ॥ मैथिलेनगरेचैवन्यवसत्परिवारयुक्
॥ ९१ ॥ कृषिकर्मोद्यमेमग्नःपरिवारस्यपोषकः ॥ एकस्मिन्समयेविप्रकृतंकर्मजुगुप्सितम् ॥ ९२ ॥ गृहाश्रितःश्वावैतेनविनाघंतुहतस्तदा ॥

प्रसूतस्तेनदुःखेनपापमाचरितंत्विदम् ॥ ९३ ॥ ततःशूद्रोमृतोविप्रगतोऽसौनरकेतदा ॥ पुनरागत्य जन्मपूर्णपुत्रहीनेनन्यधीः ॥ ९४ ॥
प्रथमेपंचमेवर्षेद्वादशेषोडशेपिवा ॥ कष्टंतस्यभवेच्चाथषष्टिवर्षोन्तरेमृतिः ॥ ९५ ॥ १९ अथतारणयोगः ॥ नैमिषारण्यनिकटेच
क्रकारोऽवसत्पुरा ॥ गुणीदासइतिख्यातःपत्नीतस्यपतिव्रता ॥ ९६ ॥ नानाकर्मकृतंतत्रसदावैपापबुद्धिना ॥ एकस्मिन्समयेवत्सतरी
तत्रसमागता ॥ ९७ ॥ परक्षेत्रगताविप्रपादजेननिवारिता ॥ पापमाचरितंतेनबहुवर्षगतागतैः ॥ ९८॥ समृतःकुष्टरोगेणपत्नीजातासती
तदा ॥ स्वर्गवासःकृतोद्वाभ्यांपितृवर्षसहस्रकम् ॥ स्वर्गाच्चैवच्युतोभूत्वामर्त्यलोकेचमानुषः ॥ ९९ ॥ १।३।५।९।१२।१७।२०।२५ वर्षेषु
कष्टम् ॥ परमायुर्वर्षाणि ८१॥२० अथद्रष्टुयोगः ॥ द्रष्टुयोगेचयोजातःपूर्वजन्मनिसर्पजः ॥ महाकालवदनोविषेणपरिवेष्टितः॥१००॥
देशेहिकीकटेचैवराजहर्म्यस्यसन्निधौ ॥ देवाद्गंगातटेसर्प्पःसमृत्वाचदिवंगतः ॥१०१॥ गंगामृत्युवशात्पुत्रसजातोभुविमानुषः॥सर्वाभीष्ट
प्रदाताचसर्वसम्पद्युतोधुना ॥ मध्येमध्येभवेत्कष्टंतच्छान्त्याचसुखंभवेत् ॥ १०२ ॥ २।४।८।१५।२०।३९ वर्षेषुकष्टम् ॥ परमा
युर्वर्षाणि ६१ ॥ २१ अथदंलह्ययोगः ॥ पूर्वंतुगिरिरम्यस्यविंध्यस्यनिकटेतदा ॥ हयग्रीवेतिनामाढ्योविप्रोवसतिवैतदा ॥१०३॥ बहु
पुत्रभ्रातृबंधुश्चंडक्रोधानलःसदा ॥ एकस्मिन्समयेविप्रगंगास्नानंतदाकरोत् ॥ १०४ ॥ पापानिविलयित्वाचस्वर्गवासीबभूवह॥पुनर्वैमा
नुषीयोनौसर्वसौख्यसमन्वितः ॥१०५॥ १।३।५।८।१३।२०।२८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १००॥ अथतरकयोगः॥आसीज्जन्मां
तरेचैवबाहुजोमगधेवसन् ॥ राजसेवीमहाशूरःकिंचिद्ग्रामाधिपस्तदा ॥ १०६ ॥ एकंतस्यभवेन्मित्रंभूपतिर्बहुधार्मिकः॥तस्याऽऽज्ञयाकृतं
पापंशृणुशुक्रयथामति ॥ १०७ ॥ पूर्वंदत्त्वातुविश्वासंराज्ञश्चहतवान्सवै ॥ सराजयक्ष्मरोगेणपीडयमानकलेवरः ॥ १०८ ॥ १।३।८।

स्वज्ञातीयस्यचाऽन्यस्यवृत्तिलोपंतथाऽकरोत् ॥ १०९ ॥ तेनपापानुसारेणवंशवृद्धिर्नजायते ॥ दशवर्णास्ततोगावःसंकल्प्यब्राह्मणार्पणम ॥ ११० ॥ ततःश्रेयोभवेत्तस्यपुत्रोजीवतिनिश्चितम् ॥ पापानिविलयंयांतिनात्रकार्य्याविचारणा ॥ १११ ॥ २३ अथदरणीयोगः ॥ वैश्योऽभवद्वंगदेशेकृषिवाणिज्यतत्परः ॥ व्यापारेसंचितालक्ष्मीस्तेनवैश्येनवैद्विज ॥ ११२ ॥ दानंनदत्तवान्कापिपर्वस्वपिद्विजायच ॥ तेनदोषेणदारिद्र्यंलभतेऽस्मिन्हिजन्मनि ॥११३॥ कुरुक्षेत्रेकृतेदानेवित्तसौख्यसमन्वितः॥अन्यथानहिमुच्येतदारिद्र्याद्येनकेनचित् ॥११४॥ ९।१९।२०।२४ वर्षेषुकष्टम्॥परमायुर्वर्षाणि७९॥२४अथदीर्घकेशयोगः॥कुलद्वयाऽऽनंदकरीपूर्वजन्मनिवैश्यजा॥ बभूवभर्तृसुहृदातदाज्ञापालिनीसती॥११५॥ अत्रजन्मनिब्राह्मण्याकाश्यांवैगमनंकृतम्॥व्रतैर्दानैश्वतत्रापिकृतंद्वाराधनंतया ॥११६॥पंचपंचाशदब्दांतेमृत्युंयातापतिव्रता॥साऽगमिष्यद्वैस्वर्गंचात्रजन्मनिवैनरः ॥भविष्यतिमहाराजकुलेराजाऽतिधार्मिकः॥११७॥२५अथदलाकारयोगः॥क्षात्रेकुलेसमुत्पन्नोगुल्मवातोदरामयी॥वित्तपःकृपणश्चैवमदोदरसमन्वितः ॥ ११८ ॥ धनधान्यसमायुक्तःकिंचिद्व्यापारवान्भुवि॥दायादशत्रुपीडाचमिथःक्लेशश्चदारुणः ॥११९॥ तस्यनारीद्वयंचास्तिसंजातंचात्रजन्मनि ॥ बहुपुत्र्यःप्रसूताश्चनतुपुत्रःप्रजायते ॥१२०॥ कदाचिज्जातमात्रस्तुमृतःपुत्रोऽष्टमासकः ॥ एकापुष्पवतीभार्य्यासंजातस्तत्रभार्गव ॥१२१॥ इति ॥ २६ अथदंडयोगः॥पूर्वजन्मनिसोप्यत्रकिंचिद्भूमिपतिस्तदा ॥ अर्थलुब्धःप्रवर्त्तेतग्रामाधीशःप्रतापवान्॥१२२॥ग्राममध्येस्तुतिंचक्रेब्राह्मणोज्ञानसत्तमः॥पुत्राःपंचतथासप्तपुत्रोवित्तसंयुतः ॥ १२३ ॥ कालेनमृत्युमापन्नोधनलुब्धोनराधिकः ॥ तस्यभार्य्यामहासाध्वीसाहसंचाकरोद्भृशम् ॥ १२४ ॥

[illegible]पुत्रायुतःसदा ॥ पुराकृतानिकर्माणिभुज्यंतेमानवैःसदा ॥ (१२५) ॥ १।३।५।८।१५।२०।३१। ३६ वर्षेषुकष्टम् ॥ परमायु
र्वर्षाणि ६५ ॥ २७ अथदोलनयोगः ॥ अथशूद्रकुलेपूर्वमासीत्पुण्यावरांगना ॥ तदादानरतायाताकुरुक्षेत्रेद्विजोत्तम ॥१२६॥ सर्वैःसुखैः
सदोपेतासर्वसंपत्तिसंयुता ॥ तयाकृतंमहापापंभाविनोर्थस्यवैबलात् ॥ १२७ ॥ समीपेवसतोविप्रब्राह्मणस्यनवंगृहम् ॥ निर्दग्धंचाग्निदाहे
नवैरभावेनवैतदा ॥ १२८ ॥ गृहदाहरूपपापाच्चनरकेसागताध्रुवम् ॥ नरकान्दारुणान्भुक्त्वाआगताऽत्रमहीतले ॥ १२९ ॥ दानधर्मकृ
तात्पुण्यात्सोत्रजातोद्विजोत्तमः ॥ सुखदुःखसमाक्रांतःसंततिश्चविनश्यति ॥ १३० ॥ १।२।४।८।१२।२०।२६।३१।३६
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१ ॥ २८ अथदत्तकयोगः ॥ असौजन्मांतरेचैवबभूवब्राह्मणःसच ॥ गौरीकुमारिकाखंडेन्यवसत्परि
वारयुक् ॥ १३१ ॥ धर्मदेवइतिख्यातःपत्नीपुत्रसमन्वितः ॥ देशेकारूषकेचैवनिवसन्परिवारयुक् ॥१३२ ॥ सत्यव्रतपरोनित्यंशुक्लवृत्ते
श्चजीवनम् ॥ एकस्मिन्समयेविप्रभागिनेयःसमागतः ॥ १३३ ॥ आदरश्चकृतोनास्यतिरस्कारमथाकरोत् ॥ सविप्रःपंचतांप्राप्तःपापात्पाप
फलंभृशम् ॥ इदंजन्मद्वितीयंतुमहारोगैःप्रपीडितः ॥ १३४ ॥ १।३।५।८।१४।२०।२६।३१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि
६० ॥ २९ अथदीनयोगः ॥ कश्चिद्दासकुलेपूर्वंचारणोज्ञानदुर्बलः ॥ शिवभक्तिपरोनित्यंदेवताऽतिथिपूजकः ॥ १३५ ॥ देशे
मालवकेपुण्येस्थलेचपरिवारयुक् ॥ तत्रदानानिदत्तानिब्राह्मणस्यकरग्रहे ॥ १३६ ॥ सकदाचिन्महाभागपापंतुकृतवानिदम् ॥
[illegible]धारितोगर्भःकामलोभेननिश्चितम् ॥ १३७ ॥ यत्नेकृतेपितेनैवनासीद्गर्भस्यपातनम् ॥ मृतासातेनदुःखेनगर्भपातेनभोनघ ॥

॥ १३८ ॥ एवंबहुतिथेकालेगतोऽसौयमशासनम् ॥ भुक्त्वापापफलाद्दुःखंपुण्याँल्लोकाञ्छुभानिह ॥ पूर्वपुण्यप्रभावेणसजातः
पादजोधुना ॥ १३९ ॥ १ । ३ । ५ । ७ । १५ । २१ । २४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५८ ॥ ३० अथदि
व्ययोगः ॥ काचिन्नारीचारणस्यबभूवप्रियवादिनी ॥ व्रतदानरतासाध्वीपूर्वजन्मनिभार्गव॥ १४०॥साचग्रामांतरेगत्वाचादहद्गह्वरंवनम्॥
विनिर्दग्धेवनेतत्रबहुजीवाः क्षयंगताः ॥ ततोबहुतिथेकालेतज्जंदुःखंतुप्राप्यच ॥ तत्रदानवशात्पूर्वादत्रसापादजास्मृता ॥ १४१ ॥
जीवघातात्तथापूर्वात्पापादत्रैवजन्मनि ॥ जातासंततिहीनासाकुष्ठरोगेणपीडिता ॥ १४२ ॥ १ । ३ । ४ । ८ । ९ । १८ । २२ ।
२७ । ३८ । ४४ वर्षेषुकष्टम् ॥ परमायुःशतार्द्धंचतथात्वेकोनषष्टिकम्॥नवम्यांचार्द्धरात्रेचगंगातीरेविनश्यति ॥१४३॥३१ अथदीनाद्रयो
गः ॥ अथातःसंप्रवक्ष्यामिविस्तरेणसमासतः ॥ आसीज्जन्मांतरेचैवब्राह्मणोज्ञानसंयुतः ॥ १४४ ॥ पत्नीतस्यमहादुष्टाकर्कशाकटुवादिनी॥
ऐरावतस्यनिकटेन्यवसत्पूर्वजन्मनि ॥ १४५॥ एकस्मिन्समयेविप्रब्राह्मणः परदेशके॥ धनस्यकृतवान्प्राप्तिंनानायुक्तिसमन्वितः॥१४६॥
स्वगृहेद्रव्यमानीयभार्यायैचनिवेदितम् ॥ साचदुष्टव्ययंकृत्वाजारस्यापिददौधनम् ॥ १४७ ॥ पत्यासहकृतंयुद्धंब्राह्मणेनविपाटिता ॥
एवंस्वल्पेगतेकालेसविप्रःपंचतांगतः ॥ १४८॥ पापात्पापफलंभुक्त्वापुण्यात्पुण्यफलंतथा ॥ बहुवर्षसहस्रांतेचागतोधरणीतले ॥१४९॥
१ । ३ । ५ । ८ । १६ । २० । २७ । ३८॥ वर्षेषुकष्टम्॥परमायुर्वर्षाणि ५७ ॥ ३२ अथ दंडपाणियोगः ॥ पूर्वजन्मनिसौराष्ट्रेनगरेबहवोज
नाः ॥ तत्रवैश्योऽवसत्त्वेकआराधनयुतोहरेः ॥ १५० ॥.एकदावृन्दकारण्येब्राह्मणस्यशुभाद्विज ॥ बहुक्षीरप्रदात्रीचपरिवारस्यपालिका ॥
॥ १५१ ॥ तेनवैश्येनवैतस्यांगोर्वत्सश्चहृतस्तदा ॥ तद्दुःखेनतुगौस्तत्रक्रंदंतीप्रतिवासरम् ॥ १५२ ॥ व्याकुलावत्सशोकेनमरणंचापवै

ध्रुवम् ॥ प्रायश्चित्तंकृतंनैवगोपितंयस्मरेद्द्विज ॥१५३॥ ततोमृत्युवशंप्राप्तोवैश्योयातोयमालयम् ॥ लोकाच्चैवपरिभ्रष्टःषष्टिवर्षसहस्रकम् ॥
पुनर्वैमानुषोभूत्वामर्त्यलोकेद्विजोत्तम ॥१५४॥ १ । ४ । ८ । १३ । १७ । २१ । २७ । ३१ । ३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७७
॥ ३३ अथ दुर्गायोगःप्रकथ्यते ॥ नीलकंठध्वजोराजाह्यजीतपुरसंस्थितः ॥ तस्यपत्नीस्वधाख्यातापातिव्रत्यपरायणा ॥१५५॥
सराजाधर्मशास्त्रज्ञोगोसुरार्चनतत्परः ॥ सार्वभौमपतिर्भूत्वाचोग्रदंडःप्रतापवान् ॥ १५६ ॥ तोषितास्त्रिदशाःसर्वेदानेविप्राश्चतोषिताः ॥
नानाविलासविभवैःपुत्रकन्याविवर्जितः॥१५७॥दुर्गार्चनंकृतंसम्यक्कोटिजापास्ततःपरम्॥होमकुंडेतदादेवीप्रादुर्भूयाऽवदत्त्विमम्॥१५८॥
पुत्रस्तेभविताराजन्सर्वलक्षणसंयुतः ॥ एवंदेवीवरंदत्त्वाचान्तर्धानंगतातदा ॥१५९॥ किंचित्कालांतरेचैवबभूवसुन्दरःसुतः ॥ सराजापंच
तांप्राप्तइंद्रलोकेतदागतः ॥ इन्द्रलोकात्परिभ्रष्टश्चागतोधरणीतले ॥ १६० ॥ १ । ३ । ५ । ८ । १२ । १८ । २२ । २७ । ३५ । ३८ ।
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६६ ॥ ३४ अथदंपतियोगः ॥ देशेपुण्यतमेचैवह्यवात्सीद्बहुसुन्दरः ॥ ब्राह्मणोवेदविभ्रष्टोवेदशास्त्रस्य
निंदकः ॥ १६१ ॥ समांसस्यैववैभोक्तामत्स्योनित्यंप्रभुज्यते ॥ तस्यस्त्रीपरमानाम्नाभ्रष्टाचातीवसुन्दरी ॥ १६२ ॥ परपुंसिरतानित्यं
निर्भयापतिवंचिका ॥ एवंहिन्यवसत्तत्रबहुवर्षगतागतैः ॥ आयुषस्तुसमाप्तत्वाद्गंगातीरेमृतौद्विज ॥ १६३ ॥ स्वर्गवासःकृतोद्वा
भ्यांबहुवर्षसहस्रकैः ॥ ततोवैमानुषीयोनौसर्वसौख्यसमन्वितः ॥ १ । २ । ३ । ४ । ७ । १२ । १५ । २० । २७ । ३२ ।
३७ । ४० । ४५ एतद्वर्षेभवेत्कष्टंपीड्यमानोमुहुर्मुहुः ॥ १६४ ॥ परमायुर्वर्षाणि ५९ ॥ ३५ अथदारुणयोगः ॥ अन्तर्वेद्यां
द्विजस्त्वेकः सर्वपूज्योधनेश्वरः ॥ माहेश्वरः समाख्यातः पत्नीतस्यप्रभावती ॥ १६५ ॥ क्रयविक्रयणेनिष्ठोबहुशिष्यैश्चशोभितः ॥

शिष्यद्रव्यंहरेन्नित्यंसदादानंचदत्तवान् ॥ सदाऽभिमानयुक्तश्चदंभवृत्तिंकरोतिसः ॥ १६६ ॥ एवंसर्ववयोयातंब्राह्मणस्यैवपंचता ॥
शिष्यद्रव्यापहारेणवंशहीनोऽभवत्खलु ॥ मध्येभवेत्सर्वैरोगैः पीड्यमानकलेवरः ॥ १६७ ॥ १ । ३ । ८ । १३ । १७ । २२ । २९ ।
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०० ॥ ३६ अथदारिद्र्ययोगः ॥ गोदावरीनदीतीरेबाहुजोन्यवसत्तदा ॥ हेमकर्णइतिख्यातोबहु
पत्नीभिरन्वितः ॥ १६८ ॥ बहुपुत्रोबहुभ्राताबहुराज्योपशोभितः ॥ द्रव्यलोभेनतेनैवप्रजाश्चव्याकुलीकृताः ॥ १६९ ॥ अदंड्योदंडित
स्तेनचागम्यागमनंकृतम् ॥ स्वभार्य्यांचपरित्यज्यवेश्यायांप्रीतिमुद्वहन् ॥ १७० ॥ प्राप्तेवार्द्धक्यसमयेकिंचिद्दानार्चनंकृतम् ॥ सगत्वा
यमलोकेचपुण्यपापफलंगतः ॥ पुनरागत्यमेदिन्यांसुखसौभाग्यसंयुतः ॥ १७१ ॥ १ । २ । ५ । ८ । ११ । १५ । २७ । ३१ वर्षेषुक
ष्टम् ॥ परमायुर्वर्षाणि ॥ १०५ ॥ ३७ अथदानवेंद्रयोगः ॥ न्यवसन्मध्यदेशेतुवैश्यस्त्वेकोपिगर्वितः ॥ हरिदासेतिविख्यातोगोविंदेति
पुरेऽवसत् ॥ १७२ ॥ तस्यपत्नीप्रभानाम्नीसुन्दरीरूपगर्विता ॥ नमन्यतेद्विजान्देवान्नातिथीन्पितरावपि ॥ १७३ ॥ पतिसेवारतानित्यं
पतिनासहमोदते ॥ वैश्येनबहुधाद्रव्यंस्वर्णमौक्तिकमर्जितम् ॥ १७४ ॥ वल्लभोनामवैश्योपितस्यमित्रंबभूवह ॥ परदेशाच्चव्यापारात्कृत्वा
प्राप्तिनिरंतरम् ॥ १७५ ॥ आगतोविप्रकष्टेनहरिदासश्चवैगृहे ॥ आदरंबहुधाकृत्वास्वगृहेस्थापयद्द्विज ॥ १७६ ॥ लक्षद्वयंस्वर्णमुद्रामित्र
हस्तेप्रदापितम् ॥ स्नानार्थंचगतोवैश्योवाराणस्यांविचक्षणः ॥ १७७ ॥ तत्रतस्याभवन्मृत्युर्गतःस्वर्गंद्विजोत्तम ॥ तत्स्वर्णंचव्ययं
कृत्वाभार्य्ययासहितश्चसः ॥ १७८ ॥ ततोमृत्युवशंयातोभार्य्ययासहितोऽपिवा ॥ सत्यलोकाच्च्युतौभूत्वामर्त्यलोकंसमागतौ ॥ १७९ ॥
१ । २ । ५ । ६ । ९ । १३ । १६ । २३ । २९ । ३३ । ३८ । ४० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७३ ॥ ३८ अथदर्वीयोगः ॥ इन्द्रप्रस्थ

पुरेचास्तिशूद्रस्त्वेकोविचक्षणः ॥ रेवशर्मणोनामगुणवान्भक्तिसंयुतः ॥१८०॥ तस्यचंद्रवतीनाम्नीप्रियाभक्तिसमन्विता ॥ तेनकन्यातु
युवतिर्दत्तावृद्धवरायच ॥ १८१ ॥ द्रव्यलोभेनभोविप्रकृतंकर्मजुगुप्सितम् ॥ जामाताचमृतःशीघ्रंकन्याजातासतीतदा ॥ १८२ ॥ तस्या
द्रव्याणिसर्वाणिव्ययंकृत्वादिनेदिने ॥ समृत्वाचातिकष्टेननरकेरौरवेगतः ॥ ततोवैमानुषीयोनौबहुदुःखेनदुःखितः ॥१८३॥ ११३११०।
१८। २५। ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ ३९ अथद्वीपकयोगः ॥ कश्चिद्वैश्यकुलेपूर्वंवंगदेशेवसन्नपि ॥ यदुवीरइतिख्यातः
पत्नीपुत्रसमन्वितः ॥ १८४ ॥ देशेहिरामक्षेत्रेचवाणिज्येचरतः सदा ॥ द्रव्यस्योत्पादनंकृत्वाबहुयुक्तयातथैवच ॥ १८५ ॥ एकस्मिन्स
मयेविप्रकृतंकर्मसुदारुणम् ॥ बाहुजस्यप्रसंगेनमृगंहत्वाविशेषतः ॥ १८६ ॥ तेनपापानुसारेणसंप्राप्ययमशासनम् ॥ ततोवैमानुषोभूत्वा
सर्वसम्पद्युतोधनी ॥ १८७ ॥ १ । ३ । ६ । २० । २५ । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८५ ॥ ४० अथदीनकयोगः ॥ सर्वधारी
समाख्यातोब्राह्मणोधनवर्जितः ॥ दानंप्रतिग्रहंचासावग्रहीद्लोभसंयुतः ॥ १८८ ॥ गृहदानंस्वर्णदानंमहिषीगजवाजिनाम् ॥ एवंगतेषु
वर्षेषुब्राह्मणस्यैवपंचता ॥ १८९ ॥ पापाच्चनरकंगत्वासर्पयोनिंततःपरम् ॥ काकोलूकवृकानांचयोनीर्भुक्त्वापृथक्पृथक् ॥ १९० ॥ पश्चा
च्चमानुषीयोनिःसरय्वाश्चोत्तरेतटे ॥ कन्यायावंशवृद्धिश्चपुत्रोनैवतुनैवच ॥ १९१ ॥ गोसहस्रप्रदानाच्चवंशवृद्धिर्भविष्यति ॥ १९२ ॥
१ । ३ । १० । १५ । २० । २७ । ३० । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८८ ॥ ४१ अथधर्मारियोगः ॥ अयोध्यानगरेपूर्वंका
यस्थोवैष्णवस्तथा ॥ तत्रतिष्ठतिभोविप्रनंददासेतिविश्रुतः ॥ १९३ ॥ तस्यपत्नीसमाख्यातानाम्नासत्यवतीशुभा ॥ पातिव्रत्यरताचोग्रा
पतिशुश्रूषणेरता ॥ १९४ ॥ तस्यमित्रमभूदेकोमहाधनसमन्वितः ॥ ततोबहुगतेकालेतीर्थयात्रांगतःसवे ॥ १९५ ॥ कायस्थेस्थाप्यत

द्रव्यंस्नानार्थंचपतिर्गतः ॥ कायस्थेनश्रुतंतस्यपतेश्चमरणंह्यभूत् ॥ १९६ ॥ तस्यद्रव्याणिसर्वाणिव्ययंकृत्वातदानघ ॥ कायस्थस्यभवे
न्मृत्युर्यमलोकेप्रपीडितः ॥ १९७ ॥ पुनर्वैमानुषीयोनौमर्त्यलोकेद्विजोत्तम ॥ १९८ ॥ १ । ४।८।१३।१७। २० वर्षेषुकष्टम् ॥ परमायु
र्वर्षाणि ६५ ॥ ४२ अथतानरंगयोगः ॥ अयोध्यानगरात्पूर्वंक्रोशमात्रेचवैपुरे ॥ धनधान्यसमायुक्तोमहिषीपालनेपरः ॥१९९॥ कृषिवृ
त्तौचनिरतोवेदनिंदापरायणः ॥ वेश्यासुरतसंतुष्टोदेवतातीर्थनिंदकः ॥ २०० ॥ एवंबहुतिथेकालेसमृतोगदपीडितः ॥ तिर्य्यग्योनिसमु
त्पन्नःसतदाचमहीतले ॥ २०१ ॥ १ । ३ । ६ । १४ । २० । ३२ । ३८ । ४१ । ४२ वर्षेषुमहत्कष्टम् ॥ परमायुर्वर्षाणि ९९ ॥ ४३
अथधोधकयोगः ॥ मांडव्येचपुरेदेवसूदएकोपितिष्ठति ॥ यादवेतिसमाख्यातस्तस्यभार्य्याचयादवी ॥२०२॥ प्रत्यहंगोधनेनैवक्रयविक्रय
मांचरत् ॥ ब्राह्मणोमित्रमेकंचतत्समीपेगतोऽवसत् ॥ २०३ ॥ तस्यपत्नीविशालाक्षीपुंश्चलीपतिवंचिका ॥ बलादाकृष्यतांशूद्रःकृतंसु
रतिसंगमम् ॥ २०४ ॥ एवंस्वल्पेगतेकालेशूद्रोमृत्युवशंगतः ॥ पापात्पापफलंभुक्त्वाकुंभीपाकेचभोनघ ॥ षष्टिवर्षसहस्रांतेमानुषोपिततो
भवत् ॥ २०५ ॥ १ । ४ । ११ । १७ । २० । २५ । २९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०० ॥ ४४ अथधर्मकाशयोगः ॥ पैठने
नगरेपूर्वंक्षात्रस्तुकृषिकर्मकृत् ॥ भीमसेनःसमाख्यातःपत्नीपुत्रसमन्वितः ॥ २०६ ॥ एकस्मिन्समयेविप्रकृतंकर्माऽतिदारुणम् ॥ ब्राह्मण
स्यहृतंक्षेत्रंसधान्यंचतदानघ ॥ २०७ ॥ एवंनिवसतस्तत्रबहुवर्षगतागतैः ॥ ततोमृत्युवशंयातोनानानरकसंस्थितिः ॥ २०८ ॥ ततोवै
मानुषीयोनौकीकटेहिसमागतः ॥ पुत्रवृद्धिर्नजायेत इट नैवविशेषतः ॥ २०९ ॥ १ । ३ । ६ । २० । २५ । ३५ वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ६८ ॥ ४५ अथबंधमारी ... थकेदारदेशेतुब्राह्मणःशास्त्रकोविदः ॥ देवनंदननामाख्यःसहशिष्ये

णराजते ॥ २१० ॥ एकस्मिन्समयेगेहंत्यक्त्वाचब्राह्मणः ॥ वनाद्रिनिकटेस्थित्वाकृत्वाजाप्यंनिरंतरम्॥२११॥ तत्रभूपःसमायातोदृ
ष्ट्वाविप्रश्चसत्कृतः ॥ विप्रंगृहंसमानीयदशग्रामाःप्रदापिताः ॥ २१२ ॥ तपश्चर्य्यांपरित्यज्यविषयानन्वभूदसौ ॥ पापाच्चनरकेगत्वापुण्या
त्त्वत्रसुखान्वितः ॥ २१३ ॥ १।४।८।१९।२९।३९।३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७७ ॥ ४६ अथधंधयोगः ॥ नर्मदा
दक्षिणेभागेभूयोऽभूद्ग्रामसिंहकः ॥ चौर्येणकर्मणाद्रव्यंसंचितंप्राणवद्द्विज ॥ २१४ ॥ नदानंनचभोगश्चनतीर्थेषुव्ययःकृतः ॥ एवंनिवस
तस्तत्रबहुवर्षगतागतैः ॥२१५॥ अरातिश्चसमायातस्तद्द्रव्यंलुंठितंभृशम् ॥ एवंस्वल्पेगतेकालेसराजापंचतांगतः ॥ २१६ ॥ तिर्य्यग्यो
नौसमुत्पन्नःशृगालकच्छपादिषु ॥ इदंतुमानुषंजन्मधनधान्यसमन्वितः ॥ २१७ ॥ १।३।८।१३।२१।२३।३९।३६ वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ६८ ॥ ४७ ॥ अथधौमाख्ययोगः ॥ कश्चिद्वेश्याकुलेजातःपूर्वजन्मनिभूमिपः ॥ परदारासमासक्तोवेश्यायांप्रीतिमुद्वहन्
॥ २१८ ॥ धर्मकर्मनजानातिकुकर्मणिसदारतः ॥ वेश्याज्ञयाकृतंदानंचन्द्रग्रस्तेचपर्वणि ॥ २१९ ॥ गोशतंब्राह्मणेदत्तंसर्वालंकरणैर्यु
तम् ॥ मृतोयमपुरंप्राप्तःससहायोद्विजोत्तम ॥ वेश्यागर्भसमुत्पन्नोधनधान्यसमन्वितः ॥ २२० ॥ १।३।८।११।१९।२०।२७।३९।३७
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥ ४८ अथधान्यकयोगः ॥ कंदर्पदेशेवनगह्वरेचाऽवसत्तुविप्रोबहुधर्मसाधकः ॥ सत्यात्मकंसत्यसमा
धिनिष्ठःपरोपकर्त्ताबहुशास्त्रपाठकः ॥ २२१ ॥ एकदादैवयोगेनवेश्यातत्रसमागता ॥ शोषणमोहनोन्मादैर्वशेवैकृतवत्यमुम् ॥ २२२ ॥
तपश्चर्य्यांपरित्यज्यव्यसनेषुरतश्चसः ॥ कालयोगेनवैमृत्युःपुनरागत्यभूतले ॥ २२३ ॥ १।३।६।९।१६।२२ वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ७९ ॥ ४९ अथधारकयोगः ॥ अथातःसंप्रवक्ष्यामियत्कृतंपूर्वजन्मनि ॥ पुष्करंरमणंक्षेत्रंतत्रविप्रोऽवसत्त्वसौ ॥

॥ २२४ ॥ राघवेन्द्रइतिख्यातःपत्नीतस्यकलाभिधा ॥ ब्रह्मकर्मपरिभ्रष्टोधूर्तविद्योपजीवनम् ॥२२५॥ एकस्मिन्समयेविप्रशूद्रेणदुष्कृतं
कृतम् ॥ पुस्तकंचाक्षमालांचब्राह्मणस्यहृतंद्विज ॥ २२६ ॥ चोरितंचार्द्धरात्रेचपापमाचरितंत्विदम् ॥ आयुषस्तुसमाप्तत्वात्सविप्रः पंच
तांगतः ॥ २२७॥ सतेनकर्मणायुक्तःप्राप्तस्तुयमशासनम् ॥ ततोवैमानुषीयोनौमर्त्यलोकेसमागतः ॥ २२८ ॥ १ । २ । ४ । ८ । १२।
१६ । २० । २७ । ३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६८ ॥ ५० अथ नृसिंहयोगः ॥ अन्तर्वेद्यांवसन्पूर्वंबाहुजोधनवर्जितः ॥ भिक्षुके
तिसमाख्यातः पत्नीतस्यसुधाकरी ॥ २२९ ॥ पतिसेवारतानुग्रापातिव्रत्यपरायणा ॥ शिवार्चनंकृतंसम्यक्कायवाचिकमानसैः ॥ २३०॥
शिवेनविभवोदत्तःसर्वसौख्यंबभूवह ॥ परस्वंचोरितंतेनकृतंकर्मजुगुप्सितम् ॥ २३१ ॥ भागिनेयस्ययद्द्रव्यंहृतंतेनचवैबलात् ॥
दैवान्मृत्युवशंप्राप्तःपापाच्चनरकंगतः ॥ २३२ ॥ पुण्याद्वैमानुषीयोनौधनधान्यैश्चसंयुतः ॥ १ । ३ । ६ । १० । १५ ।
१९ । २७ । ३२ । ३६ । ४० । एतद्वर्षेमहाकष्टंजायतेनात्रसंशयः ॥ २३३ ॥ परमायुर्वर्षाणि ६२ ॥ ५१ अथनद
ननामयोगः ॥ अन्तर्वेद्यांवसन्पूर्वंविपाशानिकटेऽपिच ॥ आनंदइतिविख्यातः पत्नीतस्यमनोरमा ॥ २३४ ॥ ब्रह्मावर्त्तस्य
निकटेन्यवसत्परिवारयुक् ॥ बाहुजोधर्मवान्सोपिपितृश्राद्धपरायणः ॥ २३५ ॥ पत्नीतस्यमहाभ्रष्टापत्यवज्ञाकरीसदा ॥ एवंनिव
सतस्तत्रबहुवर्षंगतागतेः ॥ २३६ ॥ आयुषस्तुसमाप्तत्वात्समृतोगदपीडितः ॥ पापात्पापफलंभुक्त्वाषष्टिवर्षसहस्रकम् ॥ पुनर्वैमानुषो
जातःपीड्यमानकलेवरः ॥२३७॥ १ । ४ । ७ । १२ । १७ । २१ । २२ । ३६ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७४ ॥ ५२ अथनादी
तायोगः॥ कुमारीखंडनिकटेपूर्वजन्मनिपादजः॥ किशोरइतिनामाढ्यः पत्नीपुत्रविवर्जितः॥२३८॥ तस्मिन्ग्रामेऽवसत्त्वेकोवैश्यःपरमधा

मिकः ॥ तस्यपुत्रीविशालाक्षीसुंदरीचातिशोभनां ॥२३९॥ बलादाकर्षितातस्यांहठाच्चैवरतिः कृता ॥ साबालाचविषंपीत्वामृताचलोक
शंकया ॥२४०॥ किंचित्कालांतरेविप्रपादजोमृत्युमाप्तवान्.॥ नानाकष्टंबभूवाऽपियमदूतैर्निपीडितः॥२४१॥पश्चाद्वैमानुषीयोनौचागतो
भूमिमंडले॥१।४।८।११।१९।२०। वर्षेषुकष्टातुरःसोथजपदानार्चनात्सुखम्॥२४२॥ परमायुर्वर्षाणि ७३॥९३ अथनेतायोगःप्रकथ्यते॥
काश्मीरेवैततोदेवब्राह्मणोनामगौतमः॥पठितंबहुलंशास्त्रंसंध्योपासनसंयुतः॥२४३॥ म्लेच्छभाषाप्रभाषीचमांसाहारीचकुत्सितः ॥ तस्य
भार्य्यामहालुब्धावाणीमात्रंनदापयेत्॥२४४॥कोटिद्रव्यंकृतंतेननिःक्षिप्तंवसुधातले॥ भ्रातैकदागतस्तत्रदारिद्र्येणप्रपीडितः॥२४५॥अना
दरःकृतोऽत्यंतंनदत्तंभोजनंक्वचित् ॥ एवंस्वल्पेगतेकालेब्राह्मणःपञ्चतांगतः ॥ २४६ ॥ पत्नीतस्यसतीजातास्वर्गलोकमुभौगतौ ॥ अव
तीर्णःपुनःसोपिब्राह्मणस्यकुलेधुना ॥ २४७ ॥ १ । ४।८।१७।२१।३१।३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७२ ॥ ९४ अथनेतायोगः॥
मध्यदेशेतदाविप्रवसंतिबहवोजनाः ॥ सतत्रतिष्ठतिद्विजस्त्वेकोधर्मरतःसदा ॥२४८॥ तस्यपत्नीमहादुष्टाकर्कशानिष्ठुराधमा ॥ पापकर्म
रतानित्यंपुंश्चलीपतिवंचिका ॥२४९॥ पतिंत्यक्त्वाचसानारीमृताचगिरिगह्वरे ॥ ब्राह्मणःस्वर्धुनीतीरेपंचत्त्ववशमाप्तवान् ॥ २५० ॥ बहु
वर्षसहस्रांतेपुनरागत्यभूतले ॥ धनधान्यसमायुक्तःपूर्वांस्त्रीमत्रप्राप्तवान् ॥ मध्येमध्येभवेत्पीडाचोदरेकरपृष्ठयोः ॥२५१॥ १।८।१९।
२०।२७।३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ९५ अथनोहरयोगः ॥ महाराष्ट्रेनगरेदेवसोमकोनामब्राह्मणः ॥ तस्यपत्नीविशा
लाक्षीमनोज्ञाचातिसुंदरी ॥२५२॥ अतिथिंपूजयेन्नित्यंपतिसेवांतथाऽकरोत् ॥ ब्राह्मणोवेदनिरतस्तत्सकाशात्कृतंधनम् ॥ २५३ ॥ एक
स्मिन्समयेविप्रह्यतिथिश्चसमागतः ॥ संध्याकालेतदापुत्रनदत्तंतस्यवैक्वचित् ॥२५४॥ तिरस्कारःकृतस्तस्यपापमाचरितंत्विदम् ॥ पापा

त्वापफलंभुक्त्वापुण्यात्स्वर्गंतथाऽनघ ॥ ततोवैमानुषीयोनौधनधान्यसमन्वितः ॥ २५५ ॥ १ । २ । ५ । ८ ।२०।२७ वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ६७ ॥ ५६ अथनेष्टचययोगः ॥ वसतेम्लेच्छदेशेतुकायस्थोहितदानघ ॥ वैदिकानांचविद्वेषीवेदानांतुविनिंदकः ॥२५६॥
ब्रह्मस्वहरणंकृत्वाब्राह्मणीगमनंकृतम् ॥ ततोबहुतिथेकालेकायस्थोमृत्युमाप्तवान् ॥२५७॥ कुम्भीपाकेचनरकेयमदूतैर्निपातितः ॥ काक
योनिःपुनर्भूत्वाकुक्कुटोवृषभस्तथा ॥ पुनर्वैमानुषींयोनिंचागतोधरणीतले ॥ २५८ ॥ २।५।७।१२।१७।२०।२५।२८।३०वर्षेषुकष्टम्॥
परमायुर्वर्षाणि ७५ ॥ ५७ अथनाराचयोगः ॥ अयोध्यानगरेपूर्वंवैश्यस्त्वेकोवसन्नपि ॥ धनधान्यसमायुक्तः पत्नीद्वयसमन्वितः
॥ २५९ ॥ कनिष्ठातस्यवैपत्नीसुशीलारूपसंयुता ॥ ज्येष्ठातुदुर्भगातस्यपरपुंसुरताधमा ॥ २६० ॥ महाधनस्यगर्वेणभार्य्यात्यागः
कृतस्तदा ॥ एवंकृतेनगोदानंनातिथिर्नचतर्पणम् ॥ ३६१ ॥ मरणंतस्यवैजातंयमदूतैर्यमाज्ञया ॥ रौरवंनरकंविप्रषष्टिवर्षसहस्रकम् ॥
॥ २६२ ॥ भुक्तंबहुविधंदुःखंपूर्वपापाऽनुसारतः ॥ शृगालोमर्कटोभूत्वाततोवैमानुषोभुवि ॥ २६३ ॥ १ । ३ । ५ । ८ ।१४।१८।२२।२७
३८ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१ ॥ ५८ अथनेमीनयोगः ॥ शृंगवेरपुरेदेवहेमकारस्तदाऽवसत् ॥ स्वकर्मनिरतोधीरःकुटुम्बपरि
पोषकः ॥ २६४ ॥ भार्य्यातस्यमहाशीलासुंदरीचवरांगना ॥ गंगायांमरणंजातंस्वर्गलोकेतदाऽवसत् ॥ २६५॥ षष्टिवर्षसहस्राणिबहुसौ
ख्यसमन्वितः ॥ ततःपुण्यक्षयेजातेमानुषोह्यत्रजन्मनि ॥१६६॥ धनधान्यसमायुक्तःपुत्रदारसमन्वितः ॥ रोगेणमहताविष्टोयुवभावेद्विजो
त्तम ॥ २६७ ॥ १।३।८।११।१६।२२।२७।३१।३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥ ५९ अथनेमाख्ययोगः ॥ कदाचिद्विपिने
रम्येहिमव[illegible]धौ ॥ नीतिदेवेतिनाम्नावैपत्नीतस्यकलाभिधा ॥ २६८ ॥ धनधान्यसमायुक्तोवैश्यवृत्तिरतः सदा ॥ क्रयविक्रयक-

तांचकार्पि[illegible]मा हतः ॥ २६९ ॥ [illegible]स्मिन्समयेविप्रगुरुपुत्रःसमागतः ॥ नदत्तंतस्यवैकिंचिद्भोजनंछादननच ॥ २७० ॥ निराशोपि
गतश्चासौपापमाचरितंत्विदम् ॥ आयुषस्तुसमाप्तित्वान्ममारपथिभूसुरः ॥ पुण्यात्पुण्यफलंभुक्तंपापात्पुत्रविवर्जितः ॥ २७१ ॥ १।३।९।
१२।१७।२०।३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि७८॥६० अथनमामियोगः ॥ मकेश्वरपुरेदेवब्राह्मणस्तत्रतिष्ठति ॥ ब्रह्मकर्मपरिभ्रष्टोदेवपूजा
विनिर्गतः ॥ २७२ ॥ शिवनिर्माल्यभोजीचप्रत्यहंचतदानघ ॥ शिवशर्मेतिविख्यातस्तस्यपत्नीप्रभावती ॥ २७३ ॥ कुलटाचंचलानि
त्यंपतिवंचनतत्परा ॥ ब्राह्मणोमूढसंचेताः परद्रव्यापहारकः ॥ २७४ ॥ मिथ्यापवादनिरतःपशुपीडनतत्परः ॥ किंचिद्दानार्चनंकृत्वावा
द्धर्क्येऽपितदानघ ॥ २७५ ॥ मरणंतस्यवैजातंयमदूतैर्निपीडितः ॥ नरकाच्चैवनिर्गत्यमानुषत्वंगतोधुना ॥ २७६ ॥ मस्तकेव्रणचिह्नंचमु
खेपार्श्वेतथाकरे ॥ कुनखीरोगसंयुक्तः पूर्वपापप्रभावतः ॥ २७७ ॥ १।३।५।१२।१६।२४।२९। ३३ वर्षेषुकष्टम् ॥ परमायु
र्वर्षाणि ८१॥६१ अथनित्यानंदयोगः ॥ आसीज्जन्मांतरेचैवबाहुजः सर्वजित्खलु ॥ पत्नीमनोहरातस्यपतिसेवापरायणा ॥२७८॥ राम
भक्तिरतः सोपिपूजनध्याननैष्ठिकः ॥ तस्यमित्रंद्विजस्त्वेकोमहाभक्तोऽतिवैष्णवः ॥ २७९ ॥ स्वर्णलक्षंततोदेवस्थापितंबाहुजेगृहे ॥
स्थापयित्वातुतद्द्रव्यंकाश्यांयातस्तदानघ ॥ वाराणस्यांमृतोविप्रोगतोऽसौपरमंपदम् ॥ २८० ॥ ततोबहुदिनेयातेबाहुजस्यापिपंचता ॥
भुक्त्वातुवैष्णवंद्रव्यंतेनयातोयमालयम् ॥ पुनरागत्यमेदिन्यांमानुषत्वंततोऽगमत् ॥ २८१ ॥ १।४।८। १५।२२। ३८ वर्षेषुकष्टम्
परमायुर्वर्षाणि ८७ ॥ ६२ अथनिमावत्ययोगः ॥ मथुरायांवसत्पूर्वमाभीरोधनसंयुतः ॥ महिषीगोधनैश्चैवसंकुलंतस्यवेश्मच ॥ २८२॥
कृष्णभक्तिरतोनित्यंपरदाराभिलाषुकः ॥ एकस्मिन्समयेविप्रकृतंकर्मसुदारुणम् ॥ २८३ ॥ देवागारेचयद्द्रव्यंभूषणंपात्रवस्त्रकम् ॥ सर्वं

स्वंचोरितंतेनपापमाचरितंत्विदम् ॥ २८४ ॥ ब्राह्मणस्यसुताश्रेष्ठाहठाच्चैवाऽकरोद्रतिम् ॥ तेनपापानुसारेणदारिद्र्येणप्रपीडितः ॥२८५॥
मृतोयमपुरेगत्वानानानरकेषुसंस्थितः ॥ नानायोनौभ्रमन्सोपिमानुषोह्यत्रजायते ॥ २८६ ॥ १ । ३ । ५ । ८ । १३ । १७ । २० ।
३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८३ ॥ ६३ अथनिंदयोगः ॥ मदांधोबाहुजःपूर्वेकान्यकुब्जेऽवसत्पुरा ॥ शौचाचारविहीनश्चमलिनः
कोपसंयुतः ॥ २८७ ॥ पूर्वंह्युपार्जितंद्रव्यंव्ययंकृत्वादिनेदिने ॥ द्यूतमार्गेतदाविप्रवेश्यायांप्रीतिमुद्वहन् ॥ २८८ ॥ एकस्मिन्समयेविप्रत
त्रविप्रःसमागतः ॥ तस्मिन्ग्रामेकथाऽकारिश्रुतासाबाहुजेनवै ॥ २८९ ॥ पूर्वंकर्मपरित्यक्त्वाधर्ममार्गेरतःसदा ॥ कालांतरेमृतःसोपिबभ्र
वभल्लुकोपिसः ॥ पश्चाद्वैमानुर्षीयोनौचागतोधरणीतले ॥ २९० ॥ १ । ३ । ७ । ९ । १४ । १८ । २२ । २८ वर्षेषुकष्टम् ॥ परमायु
र्वर्षाणि ६९ ॥ ६४ अथनिंदावलीयोगः ॥ कांधारेनगरेपूर्वंब्राह्मणःसर्वभक्षकः ॥ अपेयमपिपीतंचह्यगम्यागमनंकृतम् ॥ २९१ ॥ एकस्मि
न्समयेविप्रब्राह्मणस्यप्रसंगतः ॥ तीर्थावगाहनंकृत्वासभार्य्योपितदानघ ॥ २९२ ॥ नानातीर्थाटनंकृत्वागोदानंवाजिस्वर्णकम् ॥
गयाश्राद्धंततःकृत्वाह्यन्नदानंततःपरम् ॥ २९३ ॥ व्यचरद्बहुतीर्थेषुश्रद्धायुक्तेनचेतसा ॥ पथिचासौमृतस्तत्रपत्नीजातासतीतदा ॥
॥ २९४ ॥ षष्टिवर्षसहस्रांतेमानुषोजायतेऽधुना ॥ गौरांगोमध्यदेहश्चचतुःषष्ट्यब्दजीवनम् ॥ २९५ ॥ ६५ अथनरयोगः ॥ अथकेर
लदेशेवैह्यतिथिश्चतदाऽवसत् ॥ परस्त्रीरमणेधूर्तःपाखण्डाऽऽचरणेरतः ॥ २९६ ॥ एवंनिवसतस्तत्रबहुवर्षगतागतेः ॥ आयुषस्तु
समाप्तित्वात्[illegible]रोगदपीडितः ॥ २९७ ॥ कृमियोनिशतंभुक्त्वानरकेभृशदारुणे ॥ पश्चान्मानुष्यमापन्नोधनधान्यविवर्जितः ॥ पूर्वपापप्र
भावेणचेद्[illegible] ॥ २९८ ॥ १ । ३ । ५ । १० । १४ । २० । ३६ वर्षेषु[illegible]ष्टम् ॥ परमायुर्वर्षाणि ६५ ॥ ६६ अथ

नाकयोगः ॥ पुरवैमैथिलेदेवब्राह्मण[illegible]कोविदः ॥ हेमदत्तःसमाख्यातःपत्नीपुत्रसमन्वितः ॥ २९९ ॥ ससद्विद्योपजीवीचद्रव्यस्यो
त्पादनेदृढः ॥ एवंनिवसतस्तत्रबहुवर्षगतागतेः ॥ ३०० ॥ एकस्मिन्समयेविप्रस्वगुरुस्तत्रचागतः ॥ काय्यार्थंयाचितंद्रव्यंनदत्तापि
वराटिका ॥ ३०१ ॥ निराशश्चगतःसोपिपापमुग्रमुपार्जितम् ॥ सविप्रःपंचतांप्राप्तःपत्नीभूतासतीद्विज ॥ ३०२ ॥ सत्यलोकात्परिभ्रष्टः
षष्टिवर्षसहस्रके ॥ १ । ३ । ५ । ८ । १३ । १५ । २० वर्षेषुकष्टंमृत्युतुल्यं जपदानार्चनेसुखम् ॥ ३०३ ॥ परमायुर्वर्षाणि ९३ ॥ ६७
अथनाकावलीयोगः ॥ अथकुक्कुरदेशेचबाहुजोनिर्दयोवसन् ॥ भारद्वाजइतिख्यातःपत्नीतस्यकलेवरा ॥ ३०४ ॥ मद्यमांसेनजी
वन्सप्रजानांक्लेशदायकः ॥ मृतोयमपुरंगत्वास्थित्वावर्षसहस्रकम् ॥ ततोवैमानुषीयोनौमातृकुक्षेःसमुद्गतः ॥ ३०५ ॥ १ । ३ । ६
९ । १३ । १७ । १९ । २० । २२ । २३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८५ ॥ ६८ अथनाकीवयोगः ॥ आसीज्जन्मांतरेचैववित्तवा
न्वर्णसंकरः ॥ कीकटेहिवसन्सोपिदासकर्मरतःसदा ॥ पत्नीतस्यदुराधर्षापत्युराज्ञानुपालिनी ॥ ३०६ ॥ दत्तानितेनदाननिपर्वस्वपि
चशक्तितः ॥ मरणांतेसतीजातापत्नीतस्यसुकर्मणा ॥ दिव्यवर्षसहस्रांतेपुनरागत्यभूतले ॥ ३०७ ॥ १ । ३ । ५ । ९ । १३ । २० । २४ ।
२५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८३ ॥ ६९ अथनैर्ऋतियोगः ॥ कारुण्यपात्रःसचदेवभक्तोलोकेप्रसिद्धःपुरुषोत्तमाख्यः ॥ निव
र्त्तितर्कैःपरिसेव्यमानःशास्त्रस्यवार्त्ताप्रतिवासरेषु ॥ ३०८ ॥ दत्तंचदानंबहुभूमिरत्नंतथाऽश्वधेनुःप्रतिपूर्णिमायाम् ॥ चांद्रायणेकुशलःकंद
भोजीद्विजार्चनंसम्यक्तत्रवासः ॥ समध्यदेशेह्यवसच्चनूनंक्षात्रक्रियासाधनतत्परश्च ॥ ३०९ ॥ एकस्मिन्समयेविप्रराजदोषेणवैतदा ॥ सा
ध्वीचस्त्रीगुणातीतातस्यैदंडःप्रदापितः ॥ ३१० ॥ एवंस्वल्पतिथेकालेबाहुजोमृत्युप्राप्नुयात् ॥ पुनरागत्यमेदिन्यांपुण्यपापफलंशृणु ॥ ३११ ॥

गौरस्वरूपोमतिमान्यशस्वीप्रीतिमानपि ॥ विनश्यतिजातपुत्रोदद्रुकुष्ठसमन्वितः॥३१२॥१ । ४ । ८ । ११ । १७ । २६ । ३१ । ३७
४० । ४६ वर्षेमहाऽरिष्टम्॥यदिजीवतितदायुःसप्तषष्टिकम् ॥७० अथथलयोगःप्रकथ्यते॥द्राविडेनगरेपूर्वंब्राह्मणोन्यवसत्तदा॥ हेमदेवइति
ख्यातःपत्नीतस्यचमत्कृतिः ॥ ३१३ ॥ गंगास्नानायप्रीत्यर्थंदम्पतीचगतौतदा ॥ तत्रपत्नीमृतातस्यचोन्मत्तःसबभूवह॥३१४॥चौरेणा
पिहृतंसर्वंव्याकुलोपिबभूवह॥ इतस्ततश्चविचरन्नुर्व्यांचैवचतुर्दशः ॥ ३१५ ॥ आयुषस्तुसमाप्तित्वान्ममारपथिभूसुरः ॥ स्वर्गाच्चैवच्यु
तिर्भूत्वामर्त्यलोकेसुखान्वितः ॥ ३१६ ॥ २ । ५ । ९ । १४ । २० । २९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६५ ॥ ७१अथदीर्घयोगः॥ क
श्चिद्वैश्यकुलेपूर्वंदेवनद्याश्चसन्निधौ ॥ क्रयविक्रयकर्त्ताचशंकरेतिचविश्रुतः॥३१७॥शिवसेवाकृतातत्रषोडशैरुपचारकैः ॥ गंगाम्भसातु
वैसम्यग्वैद्यनाथार्चनंकृतम् ॥ ३१८ ॥ नदत्तंब्राह्मणेदानंनभोज्यंश्राद्धकर्मणि ॥ एवंहिन्यवसत्तत्रबहुवर्षगतागतैः॥ ३१९ ॥ आयुषस्तुस
माप्तित्वात्समृतोजाह्नवीतटे ॥ इंद्रलोकेऽभवद्वासोह्यपिवर्षसहस्रकम् ॥ ३२० ॥ ततःपुण्यक्षयेजातेचागतोधरणीतले॥ इंद्रप्रस्थस्यनिकटे
बाहुजस्यगृहेऽधुना ॥ ३२१ ॥ श्यामारुणश्चह्रस्वश्चदक्षिणांगेसचिह्नितः ॥ क्षिप्रकोधीप्रवक्ताचशिवभक्तिदृढश्चसः॥३२२॥ १ । २ ।
८ । १३ । १७ । २० । २५ । ३१ । ३७ ॥ ४५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ कार्त्तिकेधवलेपक्षेचतुर्दश्यांचपंचता ॥ काश्यां
मृत्युवशात्पुत्रपुनर्जन्मनजायते ॥ शावाकारोभवेत्सोपिह्येतत्सत्यंवदाम्यहम् ॥३२३ ॥ ७२ ॥ अथदीस्वरयोगःप्रकथ्यते ॥ विंध्याद्रिनि
कटेपूर्वंपादजोन्यवसत्तदा ॥ हिरण्येतिसमाख्यातःपत्नीतस्यवरांगना ॥ ३२४ ॥ गोघृतक्रयविक्रेयंप्रत्यहंचतदाकरोत् ॥ एकस्मि
न्समयेविप्रप्रयागेमकरेवसन् ॥ ३२५ ॥ सस्नातोमृगगेभानौमासमेकंनिरंतरम् ॥ सप्राप्यभवनेशीघ्रंकृतवान्कर्मदारुणम् ॥ ३२६ ॥

मातृघातःकृतंपापंभाविनोर्थस्यगौरवात् ॥ एवंबहौगतेवर्षेतस्यमृत्युर्बभूवह ॥ ३२७ ॥ लक्षवर्षांतरेविप्रनरकान्निःसृतःपुनः ॥ ततोवै
मानुषीयोनौचागतोभूमिमंडले ॥ ३२८ ॥ १ । २ । ६ । ८ । १४ । २० । २९ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७४ ॥ ७३ अथ
दारोहयोगः ॥ अथकेदारदेशेतुबाहुजोधनगर्वितः ॥ प्रतापलंकेश्वरोनामसहसैन्येनराजते ॥ ३२९ ॥ कृत्वावसुन्धराभोगंचोग्रदंडः
प्रतापवान् ॥ एकस्मिन्समयेविप्रपापमाचरितंभृशम् ॥ ३३० ॥ अरातिनासहमैत्रींकृत्वाकार्पण्यसंयुतः ॥ पश्चात्तस्यशिरश्छित्त्वापापमा
चरितंतदा ॥ ३३१ ॥ गतोसौयमलोकेचभुक्तानरकजंफलम् ॥ पुनर्वैमानुषीयोनौधूर्तउज्झितसत्क्रियः ॥ राजरोगेणविकलःपूर्वपापस्य
दोषतः ॥ ३३२ ॥ २ । ८ । ११ । १६ । २१ । २४ । २९ । ३१ । ३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ११० ॥ ७४ अथदीनानाथ
योगः ॥ मथुरानगरीमध्येवैश्यस्त्वेकोपितिष्ठति ॥ महालोभेनसंयुक्तोद्रव्यस्योत्पादनेरतः ॥ ३३३ ॥ नज्ञातिभ्योददौभोज्यमतिथिभ्यो
पिनकचित् ॥ गुणीदासेतिविख्यातस्तस्यपत्नीशुभानना ॥ ३३४ ॥ लुब्धस्तथामहाधूर्तोजीवेष्वन्नंप्रदत्तवान् ॥ एकस्मिन्समयेविप्र
नृपेणलुंठितंधनम् ॥ धनशोकान्मृतोवैश्योगतोऽसौयमशासनम् ॥ ३३५ ॥ तिर्यग्योनिशतंभुक्त्वाबहुवर्षसहस्रकम् ॥ पश्चान्मानुष्य
मापन्नोदुःखैरपिसमन्वितः ॥ ३३६ ॥ १ । ३ । ६ । १३ । १७ । २० । २९ । ३४ । ४० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८९ ॥ ७५
अथदामोदरयोगः ॥ अग्रजेवैपुरेदेवपादजस्तत्रतिष्ठति ॥ विष्णुनामसदापाठीविष्णुदासस्यसेवकः ॥ ३३७ ॥ गंगादासइतिख्यातस्तस्य
पत्नीप्रभावती ॥ युवतींस्त्रींपरित्यक्तागतोऽसौगह्वरेवने ॥ ३३८ ॥ तत्रस्थित्वाजपंकृत्वाराम नामनिरंतरम् ॥ आयुषस्तुसमाप्तित्वात्सशूद्रः
पंचतांगतः ॥ गतोऽसौपरमंस्थानंनंदनेचवनेशुभे ॥ ३३९ ॥ बहुवर्षसहस्राणिभुक्तास्वर्गभवंफलम् ॥ ततःपुण्यक्षयेजातेमानुषत्वमिहा

गतः ॥ ३४० ॥ १ । ३ । ५ । ८ । १२ ।१६।२०।२५।२९।३१।३५ । ३९ ॥ एतद्वर्षेमहाकष्टंदैवाज्जीवतिमानवः ॥ प्रायश्चित्तेकृतेविप्र
षष्टिमब्दांश्चजीवति ॥ ३४१ ॥ ७६ अथदालभ्ययोगः ॥ कालिंजरपुरेशुभेतत्रक्षत्रीवसत्यसौ ॥ व्याधरूपीमहाधूर्तोदेवब्राह्मणनिंदकः ॥
॥ ३४२ ॥ प्रत्यहंमृगयांकृत्वामृगमांसेनजीवति ॥ शिवशर्मेतिविख्यातःपत्नीतस्यकुमारिका ॥ ३४३ ॥ कुलटारूपसम्पन्नारूपगर्वेण
गर्विता ॥ नमन्यतेदुराचारादेवंचभूसुरंतथा ॥ ३४४ ॥ तस्यमित्रंद्विजस्त्वेकोवेदविद्यापरायणः ॥ आगतोब्राह्मणस्तत्रमित्रदर्शनलालसः
॥ ३४५ ॥ बहुस्वर्णसमायुक्तआशयातत्रमूढधीः ॥ मासमेकंततःस्थित्वापुनःकाश्यांगतःसवै ॥ ३४६ ॥ स्वर्णसर्वंततोधृत्वामित्रगेहेत
दाद्विज ॥ तत्रकाश्यांमृतःसोपिब्राह्मणोब्रह्मकर्मणा ॥ ३४७ ॥ रतिंकृत्वातदातेनप्रत्यहंभार्य्ययासह ॥ नदत्तंतस्यपुत्रस्यवित्तंकर्मजुगु
प्सितम् ॥ ३४८ ॥ एवंबहुगतेकालेतस्यमृत्युरभूत्पुरा ॥ गतोऽसौनरकेघोरेयमदूतैर्यमाज्ञया ॥ ३४९ ॥ नरकान्निःसृतोजातस्तिर्यग्यो
नौपुनःपुनः ॥ पश्चाद्वैमानुषीयोनौचागतोधरणीतले ॥ ३५० ॥ १ । ३ । ५ । ९ । ११ । १८ । २० । २७ । ३७ वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ८५ ॥ ७७ अथद्रष्टयोगः ॥ कश्चिद्द्विजोमहाभागतथाचर्मण्वतीतटे ॥ केशवेतिपुरेरम्येब्राह्मणःशास्त्रपारगः ॥ ३५१ ॥
महाभिमाननिरतोदुष्कर्माणितुचाचरत् ॥ गुरुनिंदाकृतैर्दोषैर्नरकेभृशदारुणे ॥ ३५२ ॥ निःक्षिप्तोयमदूतैश्चह्यशीत्यब्दसहस्रकम् ॥
पुनर्जन्मपुनर्मृत्युर्जन्ममृत्युः शतंखलु ॥ ३५३ ॥ पश्चाद्वैमानुषीयोनौमातृकुक्षेः समुद्भवः ॥ अधर्मीदीर्घरोगीचव्याकुलश्चसदात्वसौ ॥
॥ ३५४ ॥ १ । २ । ४ । ६ । ८ । १० । १२ । १५ । २० । २५ ॥ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७८ ॥ ७८ अथधनसंज्ञक
योगः ॥ कान्यकुब्जेशुभेदेशेब्राह्मणोह्यवसत्तदा ॥ पुरेनारायणेतत्रकृषिकर्मरतः सदा ॥ ३५५ ॥ शिवरामइतिख्यातः पत्नीतस्यप्रभा

वती ॥ सुशीलापतिभक्ताचंदेवभक्तिरतातथा ॥ ३५६ ॥ गोमहिषीधनधान्यादिक्रयविक्रयतत्परा ॥ कोटिद्रव्यंतथाशुक्रसंचितंब्राह्मणेनवै
॥ ३५७ ॥ पत्नीतस्यसतीजातामर्त्यलोकेचमानुषः॥ बहुद्रव्ययुतोप्यत्रकार्पण्येनविमोहितः॥३५८॥शरीरेमहतीपीडामेहाश्चविविधास्त
था ॥ शांतिंकृत्वाभवेत्सौख्यंसंशयोनात्रभार्गव ॥ ३५९ ॥ १ । ३ । ६ । १२ । २० । २७ । ३५ । वर्षेषुकष्टम्॥परमायुर्वर्षाणि१०० ॥
७९ अथधमोइयोगः॥ मथुरायाः समीपेचपूर्वस्यांदिशिभार्गव ॥ तत्पुरेगुर्ज्जरोप्येकोबहुगोधनसंकुलः॥३६०॥महिष्योवृषभाश्चैवसंचितागु
र्वरेणतु ॥ सुदर्शनेतिविख्यातस्तस्यपत्नीस्वभावती ॥ ३६१ ॥ नदत्तंपुण्यमार्गेषुब्राह्मणायशुभायच ॥ तृष्णाऽनलेनसंदग्धोमहालोभव
शंगतः ॥ ३६२ ॥ तस्यमृत्युरभूत्पश्चादतोवैयममंदिरे ॥ यमदूतैर्महाघोरेनरकेसंकुलेपिच ॥ ३६३ ॥ निक्षिप्तौदम्पतीतत्रमहाकष्टेनमोहि
तौ ॥ षष्टिवर्षसहस्राणिभुक्त्वानरकयातनाः ॥३६४॥ नरकान्निःसृतोदेवव्याघ्रयोनौप्रजातवान्॥ ततोवैमानुषीयोनौकुलेमहतिजातवान् ॥
पुत्रेणरहितः सौम्यधनधान्यसमाऽऽकुलः ॥ ३६५ ॥ १। ३। ८। १२। २०। २४। वर्षेषुकष्टम्॥परमायुर्वर्षाणि६१॥८०अथधूरणयोगः॥
मथुरापुरतोदेवक्रोशमात्रेतुपश्चिमे ॥ शत्रुघ्नेतिपुरेरम्येप्रकीर्णेगुणिनांगणैः॥ ३६६॥तत्रचैकोऽवसच्छूद्रोधनधान्यसमाकुलः॥ तस्यपुत्रोहरी
दासस्तस्यपत्नीसतीशुभा ॥ ३६७ ॥ स्वपत्न्याश्चपरित्यागःकृतस्तेनदुरात्मना ॥ कन्योद्वाहेनकिमपिदत्तंतेनपुरोहिते॥३६८॥ परस्पर
मभूद्युद्धंदंडेनमुद्गरेणच ॥ सविप्रःपंचतांप्राप्तस्ततःशूद्रोमृतोऽचिरात्॥३६९॥पापाच्चनरकेगत्वातत्तांगारभयानके ॥ बहुवर्षसहस्रांतेपुनराग
त्यभूतले ॥ दद्रुकुष्ठेनविकलःपूर्वपापानुसारतः ॥ ३७० ॥ १ । ३ । ५ । ९ । १३ । २० । २७ । ३५वर्षेषुकष्टम्॥परमायुर्वर्षाणि ७० ॥
८१ अथथलकारयोगः॥मथुरानगरीश्रेष्ठासर्वपापप्रणाशिनी ॥ वसंतिबहवोलोकाःशुचिधर्मपरायणाः॥३७१॥तत्रवैश्योऽवसत्त्वेकोवैश्य

कर्मपरायणः ॥ ऊर्णाकम्बलचर्माणिनानावस्तुगुडादिच ॥ प्रत्यहंविक्रयामासहेमताम्रंघृतंतथा ॥ ३७२ ॥ दम्पतीखलुतौदेवमहालोभेनसं
युतौ॥स्वज्ञातिवणिजायांवैबलादाकर्षितंद्विज॥सर्वस्वंभूषणंवस्त्रमर्द्धरात्रेगृहीतवान्॥३७३॥रतिंकृत्वादुराचाराद्भवनान्निष्कासिताचसा ॥
वैश्योमृत्युवशंप्राप्यकुंभीपाकंचप्राप्तवान्॥दिव्यवर्षसहस्रांतेमानुषोपिततोऽभवत्॥३७४॥१।१०।१५।२०वर्षेषुकष्टम्॥परमायुर्वर्षाणि६६॥
८२ अथधुंधचारीयोगः॥ अथपूर्वंमहाभागपादजोगुणवानपि॥सर्वविद्यानुरक्तश्चकाव्यालंकरणेरतः॥३७५॥दशारण्यस्यनिकटेन्यवसत्परि
वारयुक्॥धर्माधर्मविवेकीचनृपस्याग्रेप्रतिष्ठितः ॥३७६॥ सर्वस्वमदद्चासौसत्पात्रायद्विजायच॥एकस्मिन्समयेविप्रकृतंकर्मचदारुणम् ॥
३७७॥नृपद्रव्यंचोरयित्वाभयेनत्वपलायत॥मार्गेचौरैर्हृतंद्रव्यंसर्वंचैवद्विजोत्तम॥३७८॥चौरहस्तान्मृतःसोपिगतोवैयममंदिरे ॥ इदंजन्म
द्वितीयंतुदुःखेनाऽतिप्रपीडितम् ॥ ३७९ ॥ १ । ३ । ८ । ११ । १५ । १८ । २० । २५ । २९ । ३१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९१ ॥
८३ अथधानुषयोगः ॥ आसीज्जन्मांतरेचैवमाधवोनामब्राह्मणः ॥ पत्नीपुत्रवधूस्तस्यबालरंडातदानघ ॥ ३८० ॥ तेनपापानुसारेण
महानरकेचदारुणे ॥ षष्टिवर्षसहस्रांतेपुनरागत्यभूतले ॥ ३८१ ॥ धूर्तकर्मणिसदानिष्ठःसत्यधर्मपराङ्मुखः ॥ यौवनेपीडचमानश्चमा
सिमासिचहायने ॥ ३८२ ॥ १। २। ४। ८। १२। १६। २० । ३१ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५९ ॥ ८४ अथधवलीयोगः॥
कश्चिद्वैश्यकुलेपूर्वंब्रह्मभक्तोऽतिविश्रुतः ॥ प्रधानंसचवैग्रामेदानेपुण्येसदारतः ॥ ३८३ ॥ एकस्मिन्समयेविप्रदुष्टकर्मकृतंतदा ॥ विप्रस्य
दुहिताभ्रष्टापरपुंसुरताधमा ॥ ३८४ ॥ तस्यास्तुघातनेविप्रसंधानंकथितंतदा ॥ तेनपापानुसारेणमह[illegible]गौ ॥ ततोवैमानुषी
योनौभूत्वापिम्रियतेशिशुः ॥ ३८५ ॥ १ । ४ । ८ । १६ । २४ । ३५ वर्षेषुकष्टम्[illegible] ॥ ७२ ॥

८५ अथाग्निम्बुयोगः ॥ अयोध्यायास्तटपूर्वेब्राह्मणोह्यवसत्तदा ॥ स्वकर्मनिरतोधीरस्तथाशक्तेरुपास कोटिद्रव्यंतथाशुक्रसंचित्ऽभवन्मित्रं
वैश्योधनसमन्वितः ॥ ब्राह्मणोपिगतस्तत्रवैश्येनचादरंकृतम् ॥ ३८७ ॥ मासमेकंतदादेववासोवैश्यगृहेऽभवत् ॥ वैश्यभार्य्याविशालाक्षी
मृदंगीचारुलोचना ॥ ३८८ ॥ प्रीतिराशिवशाच्चैवब्राह्मणोरतिमाचरत् ॥ ब्राह्मणःस्वगृहंगत्वाबहुवर्षगतागतैः ॥ ३८९ ॥ आयुषस्तुसमा
प्तित्वात्सविप्रःपंचतांगतः ॥ पापात्पापफलंभुक्त्वायोनिंभुक्त्वाकथंचन ॥ ततश्चमानुषीयोनौसर्वांगेकुष्ठसंयुतः ॥३९०॥ १।४।१६।२६।३०
महत्कष्टंपरमायुर्वर्षाणि ६७ ॥ ८६ अथनेमावलीयोगः ॥ नैमिषारण्यनिकटेबाहुजोन्यवसत्पुरा ॥ दामोदरइतिख्यातःपत्नीतस्यसुलोच
ना ॥ ३९१ ॥ पातिव्रत्यपरानित्यंसत्यासत्यव्रतेरता ॥ पतिःस्त्रीलंपटोधूर्तोधनाढ्योधनगर्वितः ॥ ३९२ ॥ आखेटकेगतःसोपिमृगान्ह
त्वावनांतरे ॥ वनेचसहसैन्येनभुक्तंमांसंविशेषतः ॥३९३॥ सर्पेणैवहतस्तत्रजगामयममंदिरे ॥ भुक्त्वानानाविधान्दुःखान्नरकेभृशदारुणे ॥
कतिवर्षसहस्रांतेमानुषोपिततोऽभवत् ॥ ३९४ ॥ १।३।९।१४।२१।२३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥ ८७ अथनांदीयोगः ॥ आं
त्रवेद्येपुरेरम्येवैश्यस्त्वेकोऽवसत्पुरा ॥ दंडदासइतिख्यातःसपत्नीकःसपुत्रकः ॥३९५॥ सर्वसौख्येननिरतःपत्नीतस्यमहाखला ॥ एकस्मि
न्समयेविप्रब्राह्मणस्तत्रचागतः ॥ ३९६ ॥ स्वगृहेस्थाप्यचवैश्योह्यादरंकृतवान्भृशम् ॥ वैश्योददौसुवर्णंचचंद्रग्रस्तेचपर्वणि ॥ ३९७॥ भा
र्ययाचकृतंयुद्धंवैश्येनापिहतातुसा ॥ तेनपापानुसारेणगतोसौयमशासनम् ॥ नानाजन्मनिभूत्वापिततश्चमानुषोऽभवत् ॥ ३९८ ॥१।९।
१६।२१।३२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०३ ॥ ८८ अथनरनारायणयोगः ॥ अथचभारतेदेशेबाहुजोन्यवसत्तदा ॥ धनधान्यसमृ
द्धस्तुदानधर्मरतःसदा ॥ ३९९ ॥ सुरतेतिसमाख्यातःपत्नीतस्यमनोरमा ॥ धर्मशीलागुणाढ्याचपतिसेवापरायणा ॥४००॥ एकस्मिन्स

मयेविप्रसगर्भासाबभूवह ॥ पुष्पवाटिकांततोगत्वासखीभिःपरिवेष्टिता ॥ ४०१ ॥ नारंगीचोरितातत्रगर्भलोभेनवैतया ॥ बाहुजेनकृतोय
स्माद्रोगोमृत्वातुगर्भिणी ॥ ४०२ ॥ ततोयमपुरेप्राप्तौदंपतीचतदानघ ॥ सोत्रजन्मनिपापेनव्रणरोगेणकष्टितः ॥ ४०३॥१।३।६।७।१३।
२०।२९वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८६ ॥ ८९ अथनिम्राधरयोगः ॥ निम्राधरेषुयोजातःपूर्वजन्मनिब्राह्मणः ॥ जालंधरस्यनिकटेन्य
वसत्परिवारयुक् ॥ ४०४ ॥ धनधान्यसमायुक्तःकृषिकर्मोद्यमेरतः ॥ परदाराभिगमनंसततंकारयेत्ततः ॥ ४०५ ॥ एकस्मिन्समयेविप्रकृ
तवान्कर्मदारुणम् ॥ दासपुत्रवधोकारिह्यन्यायेनतदानघ ॥ ४०६ ॥ एवंबहौगतेकालेतस्यमृत्युरभूत्पुरा ॥ ततश्चनरकेगत्वाअपिवर्षसहस्र
कम् ॥ पुनर्वैमानुषीयोनौचागतोभूमिमंडले ॥ ४०७॥१।४।८।१३।१८।२०।२७।३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१ ॥ ९० अथना
रंजीयोगः ॥ रंगकारोऽभवत्पूर्वमयोध्यानिकटेवसन् ॥ हनुमंतइतिख्यातःपत्नीतस्यकुमोदिनी ॥ ४०८ ॥ रंजयेत्सर्ववस्त्राणितत्सकाशा
त्कृतंधनम् ॥ एकस्मिन्समयेविप्रकृतवान्कर्मदारुणम् ॥ ४०९ ॥ भगिन्यासहकृतोभोगःपापमाचरितंत्विदम् ॥ पापाच्चनरकेगत्वातिर्य
ग्योनिंपुनःपुनः ॥ ४१० ॥ पश्चान्मानुष्यमापन्नःकीकटेहिद्विजोत्तमः ॥ प्रथमेपंचमेवर्षेद्वादशेषोडशेपिवा ॥ ४११ ॥ आविंशेमरणप्राय
गदयुक्तःसजायते ॥ परमायुःशताब्दंचतस्यांतेमरणंभवेत् ॥ ४१२ ॥ ९१ ॥ अथनाचारीयोगः ॥ आसीज्जन्मांतरेचैवब्राह्मणःशास्त्रवर्जि
तः ॥ असीजीवीबभूवापिधर्मकर्मनज्ञातवान् ॥ ४१३ ॥ म्लेच्छासनेसमासीनोम्लेच्छैःसहसदारतः ॥ परदाराभिगमनःपरनिंदापराय
णः ॥ ४१४ ॥ कालसर्पेणनिहतोब्राह्मणःपंचतांगतः ॥ महाभयसमाकीर्णोबभूवप्रेत्यनारके ॥ षष्टिवर्षसहस्रांतेचागतोधरणीतले॥४१५॥
१।५।९।१५।२०।२४।३१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ ९१ अथनवनीतयोगः ॥ आसीज्जन्मांतरेचैववाराणस्यांच

ब्राह्मणः ॥ निर्माल्येनतदापुत्रपरिवारस्यपोषकः ॥ ४१६ ॥ तस्यपत्नीमहाभ्रष्टागुप्तपापमथाकरोत् ॥ सविप्रःकामसंसक्तःपरदाररतःसदा ॥
॥ ४१७ ॥ एकस्मिन्समयेविप्रपरदेशेगतःसर्वे ॥ तत्रदैवान्मृतःसोपिगतोसौयमलोकके ॥ ४१८ ॥ नानाकर्मवशात्पुत्रनानानरकेषुसं
स्थितः ॥ पश्चाच्चमानुषोजातःकंपतेसर्वदातनुः ॥ ४१९ ॥ १।२।८।११।१७।२०।२३।२९।३०।३६।४०।५५ वर्षेषुकष्टम् ॥ परमायुर्वर्षा
णि १०५ ॥ ९२ अथतिरस्कारयोगः ॥ एरंडदेशेगुणसागरोऽभूत्समस्तलोकेगुणवान्प्रसिद्धः ॥ सनत्कुमारःसचबाहुजोपिकृतानिपुण्या
नितथार्चनंसदा ॥४२०॥ सत्कर्मसाहस्यपरार्थकार्य्योदेशाटनादागतवांश्चवैतदा ॥ रम्येऽचलेखलुविलोक्यगुहांसुशोभामुवासराजाखलु
वैतपोऽर्थम् ॥ ४२१ ॥ हरिंस्मरन्वैसतुसर्वदाद्विजःप्रफुल्लगात्रोनवकोनियुक्तः ॥ तथाम्बुपर्णाशनध्याननिष्ठोविभूतिचर्माम्बरधारणश्च ॥
॥ ४२२ ॥ एवंकृतेतत्रसमाधिसत्यसत्यात्मकोविष्णुद्विजाकृतिःसदा ॥ समागतस्तत्रविलोक्यराजन्प्रफुल्लगात्रोधरणौपपात ॥ ४२३ ॥
धन्योस्मिकृतकृत्योस्मिश्रीमतांदर्शनादपि ॥ पापंचविलयंयातंश्रीपतेपुरुषोत्तम ॥ ४२४ ॥ जुष्टोहंतवगजेंद्रतपसादुष्करेणते ॥ वरंवरय
राजेंद्रतद्दास्यामिनसंशयः ॥ ४२५ ॥ राजोवाच ॥ देवदेवकृपासिंधोशरणागतवत्सल ॥ देहिमेतनयंभव्यंपरत्रचशुभांगतिम् ॥ ४२६ ॥
एवंब्रुवंस्तदाविप्रह्यन्तर्धानंगतोहरिः ॥ किंचित्कालांतरेचैवबभूवसुन्दरस्सुतः ॥ ४२७ ॥ एवंस्वल्पेगतेकालेसराजापंचतांगतः ॥
पत्नीतस्यसतीजाताब्रह्मलोकंतदागतौ ॥ ४२८ ॥ बहुवर्षसहस्रांतेचागतोधरणीतले ॥ सर्वसौख्येनसंयुक्तोहरिभक्तिदृढश्चसः ॥ ४२९ ॥
१ । ४ । ८ । १३ । १७ । २० । २५ । ३२ । ३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०३ ॥ ९३ अथतमाकारीयोगः ॥ अथातःसंप्रव
क्ष्यामियत्कृतंपूर्वजन्मनि ॥ कुरुक्षेत्रेऽवसत्त्वेकःपादजोनामबाहुजः ॥ ४३० ॥ कृषिकर्मोद्यमरतःपत्नीपुत्रसमन्वितः ॥ एकस्मिन्समये

विप्रकृतंकर्मसुदारुणम् ॥ ४३१ ॥ तस्यपुत्रोयुवाजातःकृषिकर्मनचाकरोत् ॥ परस्त्रीलम्पटःसोपिभवनान्निष्कासितोद्विज ॥ ४३२ ॥ क्षु
धातृड्भ्यांचविकलःसपुत्रःपंचतांगतः ॥ एवंबहुतिथेकालेवृद्धेसतिद्विजोत्तम ॥ ४३३ ॥ दत्तानितेनदानानिब्राह्मणेषुसहर्षितः ॥ स्मृतो
बहुरोगेणपत्नीजातासतीतदा ॥ ४३४ ॥ बहुवर्षसहस्रांतेपुनरागत्यभूतले ॥ धनधान्यसमायुक्तःकष्टेनचसमावृतः ॥ ४३५ ॥ १ । २
४ । ८ । १३ । २० । २९ । ३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५९ ॥ ९४ अथतमसायोगः ॥ कश्चिद्द्विजकुलेपूर्वंब्रह्मदत्तेतिविश्रुतः ॥
शिवमाराधयेन्नित्यंसर्वदाचद्विजोत्तमः ॥ ४३६ ॥ पत्नीतस्यगुडाकेशीनर्मदानिकटेऽवसत् ॥ दत्तानितेनदानानिपर्वस्वपिचशक्तितः ॥
कदाचिद्विपिनेरम्येतपश्चर्य्यामथाकरोत् ॥ ४३७ ॥ तत्रपत्नीसमागत्यचोद्विग्नंबहुधाकरोत् ॥ तेनविप्रेणक्रोधेनस्वशरीरंचघातितम् ॥
॥ ४३८ ॥ आत्महापापदोषेणसविप्रोयमपुरेगतः ॥ यमलोकात्परिभ्रष्टोमर्त्यलोकेचमानुषः ॥ ४३९ ॥ विद्याविनयसंयुक्तोधर्म
कर्मणिनिष्ठितः ॥ प्रथमेद्वितीयेवर्षेकष्टंतस्यमुहुर्मुहुः ॥ ४४० ॥ षष्ठेऽष्टमेचदशमेविंशतिवर्षांतरेगदः ॥ सप्तवेदाब्दपर्य्यंतंदेहिनांदेह
धारणम् ॥ ४४१ ॥ ९५ अथतानसंज्ञकयोगः ॥ अथकाशीपुरीमध्येगणेशोनामब्राह्मणः ॥ सर्वकर्माविधाताचपठनेपाठनेरतः ॥
॥ ४४२ ॥ परस्त्रीलोलुपःसोपिवेश्यायांप्रीतिमुद्वहन् ॥ एकस्मिन्समयेविप्रद्रव्यलोभेनब्राह्मणः ॥ ४४३ ॥ परदेशंगतोदैवा
न्नृपद्वारेसमाऽऽस्थितः ॥ तेनभूपेनविप्रायद्रव्यंदत्तंचपुष्कलम् ॥ ४४४ ॥ तस्मिन्ग्रामेद्विजस्त्वेकस्तस्यकन्यासुयौवना ॥
वैधव्यासुन्दरीकांताबलादाकर्षिताचसा ॥ ४४५ ॥ हर्षात्तयारतिंकृत्वासगर्भापिबभूवह ॥ तांत्यक्त्वापलायमानःस्वगृहाचतदागतः ॥
॥ ४४६ ॥ ... न्यवशंयातःप्राणाञ्ज्ञरकेतदा ॥ बहुवर्षसहस्रांतेचागतोबाहुजेकुले ॥ ४४७ ॥ १ । ४ । ८ । १३ ।

१७ । २२ निर्ग्गल्येन्द । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९३ ॥ ९६ अथतारायोगः ॥ आसीज्जन्मांतरेव्यासोनामद्विजोत्तमः ॥ भार्य्यागुणवतीतस्यपतिशुश्रूषणेरता ॥ ४४८ ॥ वामाऽऽचारेचकुशलःकालिकाख्याननैष्ठिकः ॥ बलिमर्घ्यंतथादत्त्वाह्याचारमनुकम्पया ॥ ४४९ ॥ एकस्मिन्समयेविप्रमहारण्येचपर्वते ॥ तपश्चर्य्यांतथाकृत्वाविंशतिवर्षप्रमाणिकाम् ॥ ४५० ॥ समृत्वातत्रभोविप्रकैलासशिखरेगतः ॥ षष्टिवर्षसहस्रांतेपुनरागत्यभूतले ॥ ४५१ ॥ अत्युदारश्चनिपुणोधनधान्यसमन्वितः ॥ वाचामधुरयायुक्तोराजसश्चतुरःसुधीः ॥ कटचुदरव्यथादुःखीमासिमासिचहायने ॥ ४५२ ॥ १ । ५ । ७ । ८ । १७ । १९ । २० । २४ । २८ । ३४ वर्षेषुकष्टम् ॥ वातगुल्मादिरुधिरस्रावपीडाचमस्तके ॥ चतुःषष्टितमेवर्षेमरणंजाह्नवीतटे ॥ ४५३ ॥ ९७ अथताटंकयोगः प्रकथ्यते ॥ आसीज्जन्मांतरेचैवभिल्लोनामगणेश्वरः ॥ चित्रकूटाद्रिनिकटेपरिवारेणसंयुतः ॥ ४५४ ॥ स्वधर्मनिरतःसोपिचौरकर्मपरायणः ॥ ब्राह्मणस्यप्रसंगेनतथातीर्थाटनंकृतम् ॥ ४५५ ॥ दैवाद्गंगातटेमृत्युर्बभूवद्विजसत्तम ॥ पुनर्वैमानुषीयोनौधनधान्यसमन्वितः ॥ पूर्वपापप्रभावेणरोगार्तोजायतेसदा ॥ ४५६ ॥ १ । ४ । ८ । १४ । २० । ३१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥ ९८ अथतानीसयोगः ॥ वंगदेशेवसत्पूर्वंनैषधोनामबाहुजः ॥ किंचिद्देशाधिकारीचचोग्रदंडःप्रतापवान् ॥ ४५७ ॥ कृतानितेनदानानिश्रद्धयाचतथानघ ॥ स्वगृहेचपुनःप्राप्यकृतवान्कर्मदारुणम् ॥ ४५८ ॥ मिथ्यापवादनिरतोवैश्यघातंतथाकरोत् ॥ तस्यद्रव्याणिसर्वाणिलुंठितानिप्रचेतसा ॥ ४५९ ॥ एवंबहुतिथेकालेबाहुजःपंचतांगतः ॥ पापात्पापफलंभुक्त्वापुनर्भूत्वाचमानुषः ॥ अधनीदीर्घरोगीचजातःपुत्रोविनश्यति ॥ ४६० ॥ १ । ४ । ९ । १४ । २० । २८ । ३१ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०२ ॥ ९९ अथतेजस्वी

योगः ॥ कश्चिद्द्विजकुलेपूर्वमयोध्यानिकटेवसन् ॥ सर्वजीतइतिख्यातोब्रह्मचर्य्यरतःसदा ॥ ४६१ ॥ शिवस्यध्याननिष्ठश्चअन्यत्कर्मन ज्ञातवान् ॥ तपोंतेचमृतःसोपिगतोसौपरमंपदम् ॥४६२॥ ततःपुण्यक्षयेजातेचागतोधरणीतले ॥ तेजस्वीदेवताभक्तःपरमोदारश्चपंडितः॥ सभामानीगुणातीतःसर्वसम्पद्युतस्तथा ॥ ४६३ ॥ १ । ४ । ८ । १० । १४ । १९ । २० । २६ । ३१ । ३६ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥ ८३ ॥ १०० अथतित्तिरयोगःप्रकथ्यते ॥ कश्चिद्वैश्यकुलेपूर्वंकीकटेन्यवसत्पुरा ॥ चिन्तामणिःसमाख्यातःपत्नीतस्यजवाभिधा ॥ ४६४ ॥ कृषिवाणिज्यनिरतोब्रह्मभक्तिपरोदृढः ॥ सर्वसम्पद्युतोमानीद्रव्याढ्यःसाहसीक्षमी ॥ ४६५ ॥ एकस्मिन्समयेविप्रचंद्रग्रस्तेचपर्वणि ॥ गृहंक्षेत्रंधनंधान्यंब्राह्मणायसमर्पितम् ॥४६६॥ जगामचहरिद्वारेमृतःपथिचवैश्यजः ॥ गतोसौपरमंस्थानंयत्सुरैरपिदुर्लभम् ॥ ततःपुण्यक्षयेजातेमानुषत्वंगतोधुना ॥ ४६७ ॥ १ । ३ । ८ । १३ । १५ । २० । ३१ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७३ ॥ १०१ अथतोतायोगः ॥ आसीज्जन्मनियानारीशोणभद्रस्यपश्चिमे ॥ दग्धंकृत्वातुभवनंस्वगोत्रस्यतदानघ ॥ ४६८ ॥ तेनपापानुसारेणजातसंततिर्नश्यति ॥ गृहदानार्चनेपुण्येपुत्रोजीवतिनिश्चितम् ॥ ४६९ ॥ १ । ४ । ८ । १४ । २० । २८ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥ १०२ अथतोषकयोगः ॥ उत्कलेनगरेपूर्वंब्राह्मणस्यवरांगना ॥ कृतानितत्रपापानिदेवरस्यविषंददौ ॥ ४७० ॥ तेनपापानुसारेण बहुकन्याश्चजज्ञिरे ॥ रोगाश्चबहवोजाताःपीडचमानातथातनुः ॥४७१॥ १ । ५ । ९ । १३ । २० । २५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ४७ ॥ १०३ अथतिलांगीयोगः ॥ काचिद्राजकुलेपूर्वंवैराटेनगरेतदा ॥ ब्राह्मणस्यसुताविप्रमोहिनीनामविश्रुता ॥४७२॥ पतित्यागंचकृत्वासापरपुंसुरताधमा ॥ नानानरकेचसास्थित्वादिव्यवर्षसहस्रकम् ॥ पुनरागत्यमेदिन्यांपतिपुत्रविवर्जिता ४७३ ॥ १ । ३ । ८ । १५ । २० । २१ ।

३० । ३३ । वर्षेषुमहाकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ १०४ अथतमस्कारयोगः ॥ अथातःसंप्रवक्ष्यामितमस्कारभवफलम् ॥ आसीज्जन्मां
[illegible]कुष्मांडोनामबाहुजः ॥ देशेचदक्षिणेचैवगोदानद्याश्चसन्निधौ ॥ ४७४ ॥ ससम्राट्सहसैन्येनवशेकृत्वावसुंधराम् ॥ कृत्वादानार्चनं
[illegible]न्यत्कथापापंचकारह ॥ ४७५ ॥ खड्गेनमरणंस्वस्यकृत्वाचनरकंगतः ॥ ततोवैमानुषीयोनौबहुरोगैः प्रपीडितः ॥ ४७६ ॥ २ । ४ ।
८ । १२ । १६ । २० । २७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ४९ ॥ १०५ अथतिलांगीयोगः ॥ आसीज्जन्मांतरेचैवब्राह्मणःशास्त्रपाठ
कः ॥ एकादश्यांव्रतंकृत्वाक्षुत्तृड्भ्यांसचव्याकुलः ॥ ४७७ ॥ गुप्तेषुह्यशनंकृत्वाबहुवर्षगतागतैः ॥ समृतोमानुषोभूत्वाह्यत्रजन्मनिगदा
कुलः ॥ ४७८ ॥ १ । ३ । ५ । ९ । १३ । १७ । २२ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७७ ॥ १०६ अथतास्वरीयोगः ॥ आसी
त्पूर्वंद्विजस्त्वेकोमथुरायांतदावसन् ॥ ब्रह्मदत्तश्चनाम्नावैकृष्णभक्तिरतःसदा ॥ ४७९ ॥ दत्तानितेनदानानिहर्षगद्गदचेतसा ॥ एकस्मिन्सम
येविप्रब्राह्मणस्यसुताशुभा ॥ ४८० ॥ बलादाकर्षितातस्यांकृत्वासुरतिसंगमम् ॥ साम्रुतातेनदुःखेनपापमाचरितंत्त्विदम् ॥ पुनर्वैमानुषीयो
नौमर्त्यलोकेसमागतः ॥ ४८१ ॥ १ । ४ । ८ । १४ । १८ । २२ । ३१ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ इतीश्रीभृगुसंहि
तायांतवर्गयोगकथनंनामसप्तमंप्रकरणंसमाप्तम् ॥ अथपवनयोगः १ ॥ अथातःसंप्रवक्ष्यामिपवर्गयोगजंफलम् ॥ आसीज्जन्मांतरेचैवबभू
वपादजस्तथा ॥ १ ॥ कुमारइतिविख्यातःपत्नीपुत्रसमन्वितः ॥ काश्मीरेनगरेचैवन्यवसत्परिवारयुक् ॥ २ ॥ ऊर्णावस्त्रस्यव्यापारः
[illegible]किंकियतेतदा ॥ तत्सकाशात्कृतंद्रव्यंरत्नानिविविधानिच ॥ ३ ॥ किंचिद्धर्मार्चनंकृत्वाभूमौवैनिखनेऽक्षिपत् ॥ एकस्मिन्स
[illegible]विनोर्थस्यगौरवात् ॥ ४ ॥ उद्वाहितायाः कांतायाः परित्यागस्तथाकृतः ॥ परदाराःसमानीताःस्थापिताःस्वगृहे

तदा ॥ ५ ॥ एवंनिवंसततस्तत्रबहुवर्षगतागतैः ॥ आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः ॥ ६ ॥ सतेनकर्मणायुक्तः प्राप्तस्तुयमशासनम् ॥ पापात्पापफलंभुक्त्वायोनिंभुक्त्वाकथंचन ॥ पुनरागत्यमेदिन्यांततोवैमानुषोधुना ॥ ७ ॥ १ । २ । ४ । ८ । ११ । १७ । २२ । ३१ । ३६ ॥ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥ अथपर्वतीयोगः प्रकथ्यते २ ॥ कश्चिच्छूद्रोभवत्पूर्वंदानधर्मक्रियारतः ॥ ब्राह्मणेषुगृहस्थेषुसर्वस्वंविधिनाऽददात् ॥ ८ ॥ एकस्मिन्समयेविप्रकृतंकर्मातिदारुणम् ॥ ब्राह्मणस्यहृतागावः पूर्वसंकल्प्यदापिताः ॥ ९ ॥ कालेमृत्युवशंप्राप्तः सगत्वायमशासनम् ॥ ततोवैमानुषीयोनौमृत्युलोकेसमागतः ॥ १० ॥ १ । ३ । ५ । ८ । १२ । १७ । २० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ अथप्रेख्यायोगः ३ ॥ आसीज्जन्मनियानारीचम्पकारण्यसन्निधौ ॥ बाहुजाधर्मशीलाचडिवशीनामनामतः ॥ ११ ॥ सानारीनकुलंतत्राऽघातयद्द्विजसत्तम ॥ सात्रजन्मनिरोगैश्चपीडयमानामुहुर्मुहुः ॥ हेमबभ्रुप्रदानाद्वैसर्वसौख्यमवाप्नुयात् ॥ १२ ॥ १ । ८ । १३ । २० । २५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६१ ॥ अथप्रेमायोगः ४ ॥ कश्चित्क्षात्रकुलेजातोनानाव्रतपरायणः ॥ देशेमरुस्थलेचैवन्यवसत्परिवारयुक् ॥ १३ ॥ श्यामकर्णसमाख्यातःपत्नीतस्यपतिव्रता ॥ घातिताबहवःसर्पास्तेनासौबहुरोगयुक् ॥ १४ ॥ १ । ३ । ५ । ९ । १४ । १७ । २० । २५ । वर्षेसंग्रहणीवातरोगःप्रजायते ॥ परमायुर्वर्षाणि ४९ ॥ अथ पावनयोगः ५ ॥ पूर्ववनांतरेजातस्तस्करोवस्त्रहारकः ॥ निषादैःसहसंभूयचौरकर्मणितत्परः ॥ १५ ॥ वनानामंतरेप्राप्तेकश्चिद्विप्रःसमागतः ॥ गृहीत्वातस्यसर्वस्वंयत्किंचिच्चार्जनंकृतम् ॥ १६ ॥ तेनैवनिहतोविप्रस्तस्करेणदुरात्मना ॥ तस्करोऽसौमृतिंयातस्तत्रैववक [illegible] नानानरकवासोस्थ [illegible] श्चात्तुनरकेघोरेपतितोऽयुतसंख्यया ॥ पश्चान्मान [illegible] पन्नःकिंचित्पुण्यप्रभावतः ॥ १८ ॥

इदंचतुष्टं । वर्षेषुमहाकष्टम् ॥ पर[illegible]र्त्त॥ प्रायश्चित्तंकृतेविप्रपूर्णःस्यात्तुमनोरथः ॥ १९ ॥ १।५। ११। १७। २०।२८। वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ९० ॥ अथपावनयोगः ६॥ शूद्रघातकरीपूर्वंयाकाचित्पापमोहिता॥ सात्रजन्मनिदुःखार्त्तादंतानांपतनात्खलु ॥२०॥ वि
धिवद्धेनुदानाद्धिब्राह्मणायकुटुम्बिने ॥ प्राजापत्यव्रताच्चैवघोरपापात्प्रमुच्यते ॥ २१ ॥ १ ।४।८।१२।२०। २८ । वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ६८ ॥ अथपाटकयोगः ७ ॥चक्रपादरुजायुक्तस्त्वत्रजन्मनिजायते ॥ पूर्वजन्मनिमोहाद्वैहताशुनीद्विजोत्तम॥२२॥ निष्क
त्रयंप्रदातव्यंसुवर्णंवेदपारगे ॥ दानेनानेनविधिनापूर्वपापात्प्रमुच्यते ॥ २३ ॥ १ ।८। १५। २२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि६६ ॥
अथपार्षदयोगः ८॥ कश्चिदासपुराविप्रचारणोज्ञानवानपि॥ शिवभक्तिपरोनित्यंदेवतातिथिपूजकः ॥२४॥ देशेमाधवकेपुण्येस्थलेचाप्य
भवद्विजः ॥ तत्रदानानिदत्तानिब्राह्मणस्यकरग्रहे ॥ २५ ॥ तेनैकदामहाभागपापमाचरितंत्विदम् ॥ स्वजात्यावैहतोगर्भःकामलोभेन
निश्चयः ॥ २६ ॥ यत्नेकृतेपितत्रैवनासीद्गर्भस्यपातनम् ॥ मृतासातेनदुःखेनगर्भपातेचभोद्विज ॥ २७ ॥ एवंबहुतिथेकालेसगत्वायम
शासनम् ॥ भुक्त्वापापफलंदुःखंपुण्यंनाकेद्विजोत्तम ॥ सरक्तगौरोमतिमान्दीर्घदेहःपृथुःसुधीः ॥ २८ ॥ १ ।८।१६।२४।३६
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०० ॥ अथपिप्लीयोगः ९ ॥ आसीज्जन्मांतरेचैवबाहुजोबहुविक्रमी ॥ आखेटकरतोनित्यंकंदर्पेनगरे
वसन् ॥ २९ ॥ सचबभ्रून्महाभागहत्वामोहान्नराधमः ॥ बभ्रुमंडलरोगार्तःसोत्रजन्मनिजायते ॥ ३० ॥ निष्कद्वयंहिरण्यस्यकृत्वात्रन
कुलंशुभम् ॥ बभ्रुमंडलनाशार्थंब्राह्मणायप्रदापयेत्॥३१॥१।८।१२।१६ ।२० वर्षेषुकष्टम्॥परमायुर्वर्षाणि७०॥अथपवनात्मजयोगः१०॥
कश्चिद्द्विजकुलेपूर्वंमागधेचतदाद्विज॥मंत्रशास्त्रविनोदेनचोलूकान्हतवांश्चसः ॥ ३२ ॥ उलूकघातनात्पूर्वजन्मन्यत्रचपुत्रक॥पांडुरोगेणसत

तंपीडयतेचात्रजन्मनि॥२३॥हाटकस्यपलंचैकंदद्याद्विप्रायपर्वणि ॥ उलूकघातजंपापंविनश्यतिचतत्क्षणात् ॥ तस्मिन्पापोपशमनेपांडु
रोगोविनश्यति ॥२४॥१।३।८।९।१४।१८।२२।२५।३०।३१ वर्षेषुकष्टंमहोत्पातः॥परमायुर्वर्षाणि॥७५ अथपाखंडकयोगः ११॥बभूवबा
हुजःकश्चिद्देशेपंचनदेपुरा ॥ धनधान्यसमायुक्तःपापकर्मामहोद्यमी ॥ ३५ ॥ विप्रसंगगतःसोपिप्रयागेमकरेवसन् ॥ सस्नातोमृगगेभा
नौधूर्तःकर्मक्रियोज्झितः ॥ ३६ ॥ संप्राप्यस्वगृहंशीघ्रंकृतवान्कर्मदारुणम् ॥ ग्रामेनिवसतस्तस्यक्षत्रियस्यद्विजोत्तम ॥३७॥ददाहभवनं
रम्यंवैरभावात्पुराऽनघ॥तत्रवत्सतरीदग्धाजीवाश्चापिविशेषतः॥३८॥कालयोगेनसंप्राप्तःसमृत्वायमशासनम् ॥ पूर्वपुण्यप्रभावेणमानुषत्व
मिहागतः ॥ ३९ ॥ ४ । ७ । ९ । ११। १७। २०। २७। ३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥ अथपंचत्वयोगः १२ ॥ वणिक्पुराऽभ
वत्कश्चिद्दासधर्मपरायणः॥द्विभार्य्यःसिद्धपीठस्थोधनधान्यसमन्वितः॥४०॥दत्तानितेनदानानिपर्वस्वपिचभक्तितः॥ब्राह्मणेषुगृहस्थेषुस
त्पात्रेषुविशेषतः ॥ ४१ ॥ अथोऽत्रकृतवान्पापंकामलोभेननिश्चयः ॥ ज्येष्ठात्यक्ताऋतुप्राप्तासुशीलाधर्मपालिनी॥४२॥रतिंददौकनिष्ठा
येरूपेणातिविमोहितः ॥ ततोमृत्युवशंप्राप्तःससहायोवणिक्सुतः ॥ ४३ ॥ भुक्त्वापापफलंपापात्पुण्यात्पुण्यफलंतथा ॥ सोत्रज
न्मनिपापेभ्यस्तत्तापचमुहुर्मुहुः ॥ ४४ ॥ २ । ४ । ८ । १२ । १६ । २० । २८ । ३१ । ३६ वर्षेषुकष्टम्॥परमायुर्वर्षाणि७४ ॥ अथपा
णीयोगः १३॥ [illegible] संप्रवक्ष्यामियत्कृतंपूर्वजन्मनि ॥ ऐरावतीनदीतीरेन्यवसत्पूर्वजन्मनि॥४५॥ कलिकेतिसमाख्यातोगुणीमानीधने
[illegible]॥कृतानितेनदानानि [illegible]ययद्विजायच ॥ ४६ ॥ एकस्मिन्समयेविप्रकृतंकर्मसुदारुणम् ॥ मूषकाबहवोविप्रघातितास्तेनवैतदा ॥
[illegible] पीडयतेचात्रज[न्]मनि॥४७॥२।४ । ८ । १२ । १५ । २० । २५ । २९ । ३६वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि७० ॥ अथपु

ज्ययोगः १५॥ काश्यां द्विजकुलेपूर्वंगोमत्याश्चशुभेतटे ॥ देवदत्तःसमाख्यातोब्राह्मणःशास्त्रकोविदः ॥ ४८ ॥ तेनाव्रणवतत्रशुकघातःकृत
स्तथा॥तेनपापेनमोविप्रसर्वांगेदद्रुपीडितः ॥४९॥ शुकंस्वर्णमयंकृत्वापलैकेनतुसंमितम् ॥ संकल्प्यब्राह्मणेदद्याद्दद्रुरोगात्प्रमुच्यते॥५०॥
१।८।१४।२०।२७। वर्षेषुकष्टम् ॥परमायुर्वर्षाणि ७५ ॥ अथपुष्पकयोगः १५ ॥ पूर्वजन्मनियानारीकुरुदेशेऽवसत्पुरा ॥ कृतानितेन
पापानिगोत्रपुत्राश्चघातिताः ॥ ५१ ॥ तेनात्रपापबाहुल्यात्पुत्रनाशःप्रजायते ॥ राजतंगोत्रपुत्रंचपलसप्तप्रमाणकम् ॥ संकल्प्यब्राह्मणेद
द्यात्पुत्रोजीवतिनिश्चितम् ॥ ५२॥ १।८।१६।२४।३२।३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६७ ॥ अथपुरातनयोगः १६॥ कश्चिद्दासकुले
पूर्वंतमसानद्याश्चसन्निधौ ॥ पादजस्यकृतासेवातत्सकाशाद्धनागमः ॥ ५३ ॥ कृतश्चबहुद्रव्याणांसंग्रहश्चतदानघ ॥ एकस्मिन्समयेविप्र
शिवस्योद्यापनंकृतम्॥५४॥नानापुष्पाक्षतैर्माल्यैर्बिल्वपत्रांकुरैस्तथा ॥ कतिचिद्दिनांतरेविप्रसमृत्वात्रिदिवंगतः॥५५॥देवलोकात्परिभ्रष्ट
श्चागतोधरणीतले ॥ धनधान्यसमायुक्तःपुत्रस्त्रीधनसंयुतः ॥५६॥ १।४।८।१३।२०।२९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि७१॥ अथपौलोमा
योगः १७॥ दशारण्येवसत्पूर्वंकोवरोनामबाहुजः ॥ क्षात्रधर्मंपरित्यज्यवैश्यकर्ममहोद्यमी ॥ ५७ ॥ एकस्मिन्समयेविप्रकथांश्रुत्वामुदा
न्वितः ॥ तीर्थावगाहनंकृत्वातथादानार्चनंभृशम् ॥ ५८ ॥ एकस्मिन्समयेविप्रहतःपारावतःखलु ॥ अत्रजन्मनितत्पापात्पीड्यमानकले
वरः ॥५९॥ १।४।८।१२।१६।२२।२८। वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि७७॥अथपर्जकयोगः १८ ॥ सिंधुनद्याश्चनिकटेब्राह्मणोवेदपारगः॥
कृतानितत्रदानानिवेदविद्यातथाऽनघ ॥६०॥अर्भकान्पाठयंस्तत्रचाजीवत्सतुनित्यशः॥ एकस्मिन्समयेविप्रभाविनोर्थस्यगौरवात्॥६१॥
दत्तोघातस्तातेनपापमाचरितंत्विदम् ॥ तत्पापपरिपाकेनत्विदानींपुत्रवर्जितः ॥ धनधान्यविहीनश्चजायतेनात्रसंशयः ॥ ६२ ॥ १ ।८।

१६। २२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ॥७१॥ अथपौराणिकयोगः प्रकथ्यते १९ ॥ आसीज्जन्मांतरेचैवब्राह्मणोग्रामयाचकः ॥ पति देवइतिख्यातःसपत्नीकःसपुत्रकः ॥ ६३ ॥ नैमिषारण्यनिकटेन्यवसत्परिवारयुक् ॥ धनधान्यविहीनश्चह्यसत्कर्मरतःसदा ॥ ६४ ॥ एक स्मिन्समयेविप्रकृतंकर्मजुगुप्सितम् ॥ द्विजगेहेदशाहेचभोजनंकृतवानपि ॥ ६५ ॥ द्रव्यलोभेनवैतत्रकृतंकर्मजुगुप्सितम् ॥ नरकेरौरवे गत्वापुनर्भूत्वाचमानुषः ॥ ६६ ॥ १ । ४ । ८ । १६ । २० । २२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७६ ॥ अथपालाशयोगः २० ॥ योगेकलिंगदेशेतुबाहुजःसहसैनिकः ॥ कृपासिंहःसमाख्यातःपत्नीहारावतीशुभा ॥ ६७ ॥ पतिसेवारताचोग्रापातिव्रत्यपरायणा ॥ एकस्मिन्समयेविप्रकृतंकर्मसुदारुणम्॥६८॥ब्रह्मस्वंभक्षितंतेननदत्तंतेनवैतदा ॥ आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः॥अत्रजन्मनि रोगीचपूर्वपापानुसारतः ॥ ६९ ॥ १ । ४ । ८ । १४ । २० । २७ । २५ । ३० । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८३ ॥ द्वितीयपाला शयोगः २१ ॥ अथतापीनदीतीरेवैश्योनामसुधाकरः ॥ क्रयविक्रयकर्ताचपशुहिंसापरायणः ॥ ७० ॥ स्नुषायांगमनंकृत्वा पापमाचरितंत्विदम् ॥ एवंन्यवसतस्तत्रबहुवर्षगतागतैः ॥७१॥ वज्रेणनिधनंतस्यबभूवद्विजसत्तम ॥ नानानरकेषुसंस्थित्वानानाजन्मा निचाऽभवन् ॥ ७२ ॥ दिव्यवर्षसहस्रांतेपुनर्भूत्वाचमानुषः ॥ धनधान्यसमाकीर्णःपुत्रपुत्रीविवर्जितः ॥ ७३ ॥ प्रथमेपञ्चमेवर्षेद्वादशे षोडशेपिवा ॥ द्वाविंशेत्रिंशवर्षेचमहताकष्टेनकष्टितः ॥ परमायुःशताब्दंचदेहिनांदेहधारणम् ॥ ७४ ॥ अथफूल्लयोगः ॥ २२ ॥ आसी ज्जन्मांतरेचैवदासवंशेतदाऽनघ ॥ दत्तानितेनदानानिब्राह्मणेषुचशक्तितः ॥ ७५ ॥ तीर्थावगाहनंकृत्वादम्पत्याचतदाऽनघ ॥ एकस्मि न्समयेविप्र[illegible]नंभृशम् ॥ ७६ ॥ गोवत्सस्यवियोगश्चक्रोधतत्परमानसः ॥ दुग्धलोभेनवैतत्रपापमाचरितंत्विदम् ॥ अत्रजन्मनि

तत्पापंकृत्वापाप्रयताशशुः ॥ ७७ ॥ १ । ४ । ८ । १० । १६ । २५ । ३१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ अथफलस्तुतियोगः
२३ ॥ अथकेदारदेशेतुब्राह्मणोह्यवसत्तदा ॥ दारिद्र्येणसमाकीर्णःक्षुधार्तःसर्वकालिकः ॥ ७८ ॥ एकस्मिन्समयेविप्रगोशतंबाहुजोददौ ॥
तत्सकाशाद्भवेत्सौख्यंपरिवारेणसंयुतः ॥ ७९ ॥ तस्यमित्रंसमागत्यद्रव्यभारसमन्वितः ॥ द्रव्यलोभेनतंविप्रभोजनेचविषंददौ ॥८० ॥
तस्यतुसर्वद्रव्याणांव्ययंकृत्वादिनेदिने ॥ यमलोकेगतःसोपियमदूतैर्निपीडितः ॥ लक्षवर्षांतरेविप्रततोवैमानुषोऽधुना ॥ ८१ ॥ १। ३।६।
८। १२ । १६ । २० । २४ । ३१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ अथवज्रदंष्ट्रकः ॥ २४ अथरेवानदीतीरेशूद्रोनामप्रमोधकः ॥
धनधान्यसमायुक्तःकृषिकर्मपरायणः ॥ ८२ ॥ धान्यंतुविविधंकृत्वासर्वंचैवाऽवहन्मुदा ॥ एवंनिवसतस्तत्रबहुवर्षागतागताः ॥८३॥ चो
रितंसकलंद्रव्यंशूद्रघातंतथाऽकरोत ॥ तेनपापानुसारेणयमलोकंगतस्तदा ॥ ततोवैमानुषीयोनौगुणवान्पंडितःसच ॥ ८४ ॥ १ । ४ । ८
१७ । २२ । २८ । ३४ । ३६ । ४० वर्षेषुपरमंकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ अथब्रह्मयोगः प्रकथ्यते २५ ॥ आसीज्जन्मांतरेचैवकुडि
लोनामबाहुजः ॥ देशेविदर्भकेचैवन्यवसत्परिवारयुक् ॥ ८५ ॥ नानाद्रव्ययुतोविप्रनानाबाहुजसंयुतः ॥ एकस्मिन्समयेविप्रपापमाचारि
तंत्विदम् ॥ ८६ ॥ शतघ्नीभिर्हतास्तत्रग्रामाश्वविविधास्तदा ॥ मृताःप्रजाश्चतत्रैवव्याकुलाश्चतदानघ ॥ ८७ ॥ सक्षात्रः पंचतांप्राप्तः सग
त्वायममंदिरे ॥ तिर्य्यग्योनिर्बभूवापिबहुवर्षप्रमाणकम् ॥ किंचित्पुण्यप्रभावेणसजातोमानुषोऽधुना॥ ८८॥ १ । २।६।१३। १९ । २२।
२८ वर्षेषुकष्टम्॥परमायुर्वर्षाणि ६१॥ अथवेतालयोगः २६॥ चंद्रभागानदीतीरेब्राह्मणःशास्त्रवर्जितः ॥ कौतूहलसमाख्यातःसर्वदारोगसं
युतः ॥ ८९ ॥ एकस्मिन्समयेविप्रकृतंपुण्यार्जनंभृशम् ॥ शिवसेवनजात्पुण्यात्सजातः सुखसंयुतः ॥ नानाविलासविभवैःकांचनैश्छादि

तातनुः ॥९०॥१।३।६।८।११।१६।२२।२९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५८ ॥ अथबोधकयोगः २७ ॥ अथपंपापुरेदेशेकौशिकोनाम
पाद्जः ॥ वंगदेशेवसत्सोपिव्यापारकुशलः सदा ॥ ९१ ॥ एकस्मिन्समयेविप्रह्यधर्माद्धारितंधनम् ॥ ब्राह्मणस्यकृतानिंदागोत्रिणांचत
थैवच ॥ गत्वायमपुरेविप्रपुनरागत्यभूतले ॥ ९२ ॥ १।४।८।१२।२०।२७।३४।४० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८८॥ अथ
चाकदयोगः २८ ॥ अथातःसंप्रवक्ष्यामिपूर्वजन्मशुभाऽशुभम् ॥ अत्रजन्मनिनिर्धनंचसंततिरपिनश्यति ॥९३॥ शुक्रउवाच ॥ कोऽस्ति
पूर्वंकिंकृतंतत्रपापंपुण्यंतथाऽनघ ॥ भृगुरुवाच ॥ कश्चिद्द्विजकुलेपूर्वंधारादेशेतदाऽवसत् ॥ ९४ ॥ धारदेवसमाख्यातः सपत्नीकः सपु
त्रकः ॥ शिवस्यस्मरणेनिष्ठः पवित्रो व्रतकारकः ॥ ९५ ॥ एकस्मिन्समयेविप्रवनाद्रिनिकटेगतः ॥ महिषस्तत्रमहाभीमोदृष्टमात्रंप्रधावितः
॥ ९६ ॥ स्थूलेनलकुटेनैवब्राह्मणेनप्रताडितः ॥ समृतस्तेनदुःखेनपापमाऽऽचरितंत्विदम् ॥ ततोवैमानुषीयोनौचागतोभुविमंडले ॥
॥ ९७ ॥ १।३।५।८।११।१४।१७।२०।२५। वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०७ ॥ अथब्रह्मदंडीयोगः
२९ ॥ आसीज्जन्मनियानारीबाहुजाशुभलक्षणा ॥ सुन्दरीचातिलावण्यायथाकिंजल्ककानना ॥ ९८ ॥ पितातस्यमहाराजा
चोग्रदंडः प्रतापवान् ॥ जामात्रेचददौराज्यंजगामगिरिगह्वरे ॥ ९९ ॥ साबालागर्वसंयुक्तातृणवन्मन्यतेत्पतिम् ॥ एकस्मिन्समये
दम्पत्योः कलहोभवत् ॥ १०० ॥ राज्यंत्यक्त्वावनंयातो राज्यंस्त्रीकृतवत्यसौ ॥ पुरुषरतादुष्टासामृताकालचोदिता ॥ १०१ ॥
[illegible] पीडिता ॥ षष्टिवर्षसहस्राणिभुक्तानरकजंफलम् ॥ ततो [illegible] मृतिपुत्रविवर्जिता ॥१०२॥ १।४।८
[illegible] ३१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ अथवाराहयोग [illegible] आत्वह्याभीरोन्यवसत्तदा ॥ शार्ङ्गेति
[illegible] विमानुषीजाता [illegible]
[illegible] २२।२७ [illegible] १७ ॥ [illegible] वयोगः ॥ अ [illegible] ः ३० ॥ अथके [illegible] नरक [illegible]

...परस्परम् ॥ ...ततस्तेनबहुभिःप्रहारैरतिदारुणैः ॥ १०५ ॥ सप्तवासरपर्य्यंतंजित्वाशत्रुबलंबलात् ॥ तदा...
...मादेनरिपुपत्नीप्रताडिता ॥ १०६ ॥ सामृतातेनदुःखेनपापमुग्रमुपार्जितम्॥ततोमृत्युवशंयातःशूद्रोभूत्वाचसूकरः॥ ततोवैमानुषीयो
नौमध्यदेशेसमुद्भवः ॥ १०७॥ १।३।५।८।१३।१८।२२।२९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१ ॥ अथवसनयोगः३१ ॥ पूर्वजन्मनि
कायस्थःकीकटेहितदावसन् ॥ धनधान्यसमायुक्तःपुत्रस्त्रीबंधुसंयुतः ॥ १०८ ॥ कृतानितत्रदानानिपर्वस्वपिविशेषतः ॥ एकस्मि
न्समयेविप्रनृपमंत्रीबभूवह ॥ १०९ ॥ राज्याधिकारेसमर्थःसर्वकार्य्येषुसम्मतः ॥ तस्मिन्ग्रामेऽवसत्त्वेकोब्राह्मणःशिवसेवकः ॥११० ॥
तस्यक्षेत्रंचसर्वस्वंहृतंतेनबलंबलात् ॥ पापमाचरितंतेनबहुवर्षगतागतैः ॥ १११ ॥ पापान्चनरकेगत्वाह्यसिपत्रवनांतरे ॥ कृकलासोऽभव
त्सोपितिर्य्यग्योनौपुनःपुनः ॥ पश्चाद्वैमानुर्षीयोनौधनपुत्रविवर्जितः ॥ ११२ ॥ १।८।१६।२४।३३।४०॥ वर्षेषुकष्टम् ॥ परमायु
र्वर्षाणि ८१॥ अथवसुयोगः३२॥कश्चिद्द्विजकुलेपूर्वचित्रदेशेवसत्यसौ ॥ चित्रकेतुरितिख्यातश्चित्रकर्मरतःसदा ॥११३॥ एकस्मिन्समये
विप्रमातुलान्यांरतिःकृता ॥ तेनपापेनभोपुत्रमहानरकेगतश्चसः ॥ ११४ ॥ नरकान्निःसृतोविप्रमानुषश्चततोऽभवत्॥ उदरेपृष्ठभागेवाकटि
देशेप्रपीडितः ॥ ११५ ॥ २।४।८।१२।१६।२०।२३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६५ ॥ अथविश्वाधारयोगः ३३॥ आसी
...न्यांतरेचैवबाहुजःपृथवीपतिः ॥ सर्वधारीसमाख्यातःसनृपोगर्वमंडितः ॥११६॥नानाविलासविभवैःसहसैन्येनराजते॥ एकस्मिन्सम
ये...पूज्याःपूजितास्तदा ॥ ११७ ॥ अगम्यागमनंकृत्वाह्यदंडयादंडिताद्विज ॥ पुरोहितस्यविप्रस्यतिरस्कारमथाऽकरोत्॥११८ ॥

तेनपापेनभोपुत्रजगामयममंदिरे ॥ षष्टिवर्षसहस्रांतेचागतोधरणीतले ॥ मानुषस्यकुलेजातःपुत्रकन्याविवर्जितः ॥ ११९ ॥१ । ४ । ८ ।
१६ । २० । २७ वर्षेषुपीडा ॥ परमायुर्वर्षाणि ६३ ॥ द्वितीयविश्वाधारयोगः३४॥अथबद्रीस्थलेदेशेबाहुजोन्यवसत्तदा॥महाभिमाननि
रतःपरदाररतःसदा ॥ १२० ॥ मृतोयमपुरेप्राप्तःससहायोद्विजोत्तम ॥ ततोवैमानुषीयोनौचागतोधरणीतले ॥१२१॥१ ।४ । ६ । १२ ।
१६ । २० । २६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६१॥अथवाणिज्ययोगः३५॥पूर्वजन्मनियानारीवंगदेशेतदाऽवसत्॥ स्वर्णादेवीइतिख्या
तापरलिंगेनतृप्यति ॥ १२२ ॥ पतिस्तस्यामहाकामीपरस्त्रीरतिलम्पटः ॥ एकस्मिन्समयेविप्रपतिंत्यक्त्वाचसांगना ॥ १२३ ॥ परपुरुष
प्रसंगेनसागताबद्रिकाश्रमम्॥भ्रमद्देशविदेशौचबहुवर्षगतागतैः ॥१२४॥ साम्प्रतासागरेतीरेगंधर्वनगरेगता॥पुनरागत्यमेदिन्यांकुलेमहति
चाधुना ॥ १२५ ॥ १ । ४ । ८ । १३ । १६ । २० । २८ ॥ वर्षेषुकष्टम्॥परमायुर्वर्षाणि९५ ॥ अथवणसंज्ञकयोगः३६॥आंत्रवेद्येऽवसत्पूर्वं
ब्राह्मणोवेदपारगः ॥ जयदेवइतिख्यातःपत्नीतस्यातिकर्कशा ॥ १२६ ॥ पतिद्वेषरताभ्रष्टाश्वशुरद्रोहकारिणी॥ पक्षिघातःकृतःसम्यक्
पक्षिमांसेनजीवति॥१२७॥सविप्रःपंचतांप्राप्तःपुनर्वैमानुषोऽभवत्॥ वेदविद्याविवेकीचतथाशास्त्रस्यपाठकः ॥१२८॥ अत्रजन्मधनाढ्योऽ
सौसुखेपार्श्वेसकष्टितः१।४।१६।२४।३०।३६।४०।वर्षेष्वेतेषुकष्टंहिजायतेनात्रसंशयः॥परमायुर्वर्षाणि६७॥१२९॥अथवधयोगफलम्३७।
किष्किंधानगरेपूर्वंबाहुजोबहुधार्मिकः॥कल्लुसिंहेतिनाम्नावैचोग्रदंडःप्रतापवान्॥१३०नानाविलासविभवैःसिंहनादंतथाऽकरोत् ॥बलिष्ठ
श्चातिमतिमान्परार्थेकार्य्यसाधकः ॥ १३१ ॥ एकस्मिन्समयेविप्रकृतंयुद्धंविशेषतः ॥ अतिबलेनभोविप्रजित्वाशत्रुबलंबलात् ॥१३२॥
दत्तानितेन [illegible] सत्पात्राण्यद्विजा [illegible] ॥ सराजाचदिवंप्राप्तःसभार्य्योद्विजसत्तम ॥ पुनरागत्यमेदिन्यांसुखस्यै [illegible] १३३॥१ ।
[illegible] मानुषाजाति [illegible]
[illegible] कत्वापा [illegible] १७ ॥ [illegible] वयोगः ॥ अ [illegible] ः ३० ॥ अथके [illegible] नरक [illegible]

४।८।१३।[illegible]।२६।३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६५ ॥ अथबोधकयोगः ३८॥ पूर्वजन्मन्ययोध्यायांब्राह्मणस्तंत्रकोविदः ॥
पठनेपाठनेमग्नोधनधान्यसमन्वितः ॥ १३४ ॥ बहुशिष्यैःशोभतेस्मआकाशेचयथागुरुः ॥ प्रचंडपापमकरोद्ब्राह्मण्यांगमनंकृतम् ॥
॥ १३५ ॥ सगर्भाजायतेसातुनासीद्गर्भस्यपातनम् ॥ ततोयमपुरेप्राप्तःससहायोद्विजोत्तम ॥१३६॥ षष्टिवर्षसहस्रांतेचागतोधरणीतले ॥
गौरांगःशास्त्रवेत्ताचमदगर्वेणगर्वितः ॥ १३७ ॥ १।४।८।१७।२०।२१। २९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६६ ॥ अथवेणुयोगः ३९ ॥
वेणुयोगेचयोजातःपूर्वजन्मनिधनाधिपः ॥ केरलेह्यवसत्सोपिबाहुजस्तत्रजन्मनि ॥ १३८ ॥ गुडाकेशइतिख्यातःपत्नीपुत्रसमन्वितः ॥
दानधर्मरतःसोपिबहुसेवकसंयुतः ॥ १३९ ॥ एकस्मिन्समयेविप्रकृतंकर्मसुदारुणम् ॥ पुत्रंपत्नींवनेत्यक्त्वापरभार्य्यासमन्वितः ॥ १४० ॥
एवंस्वल्पेगतेवर्षेबाहुजोमृत्युमागतः ॥ नानाकष्टसमायुक्तोयमदूतैर्यमाज्ञया ॥ १४१ ॥ नरकेभुक्त्वामहद्दुःखंपुण्यात्पुण्यफलंतथा ॥ ततोवै
मानुषीयोनौमर्त्यलोकेसमागतः ॥ १४२ ॥ १ । ४ । ८ । १३ । १७ । २० । २४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०० ॥ अथवर्षवह्लि
कायोगः ४० ॥ इन्द्रप्रस्थपुरेरम्येवसंतिबहवोजनाः ॥ तत्रशूद्रोऽवसत्त्वेकोधनधान्यसमन्वितः ॥ ३४३ ॥ विप्रसंगगतःसोपिद्वारकायां
तदाद्विज ॥ तत्रदानार्चनंकृत्वाकेशवांघ्रितथाऽनघ ॥ १४४ ॥ तत्रभाविबलात्पुत्रसशूद्रःपञ्चतांगतः ॥ बभूवबाहुजःसोपिसमस्तक्षितिमं
डले ॥ १४५ ॥ प्रजाःपालयतेसम्यक्दानंपुण्यंतथाऽकरोत् ॥ समृत्वायमुनामध्येचन्द्रलोकंतदागतः ॥ १४६ ॥ ततःपुण्यक्षयेजातेमर्त्य
लोकेपिमानुषः ॥ सर्वसौख्ययुतोभव्योगौरकांतिःसुलोचनः ॥ १४७ ॥ मातृपितृसुखैश्वर्य्यमतिमांश्चप्रतापिकः ॥ युवभावेभवेत्पीडापूर्व
राज्यानुसारतः ॥ १४८ ॥ १ । ३ ।५।८।११।१७।२०।२१।२७।३०।३६।४०।४६ वर्षेषुकष्टम् ॥ विशेषतःपरमायुर्वर्षाणि ८१ ॥ अथ

वालयोगः ४१ ॥ अथरेवातटेपूर्वंव्याधोवसतिवैतदा ॥ व्याधकर्मरतःसोपिजीवानांघातनेरतः ॥ १४९ ॥ नकुलस्तुतदाविप्रखादितःपारि
वारयुक् ॥ एकस्मिन्समयेविप्रगंगास्नानमथाकरोत् ॥ १५० ॥ तेनपुण्यप्रभावेणव्याधोगत्वापिस्वर्गकम् ॥ पापात्पापफलंभुक्त्वाचापिव
र्षसहस्रकम् ॥१५१॥ पुनर्जन्मपुनर्मृत्युर्जन्ममृत्युशतंतथा ॥ इयंतुमानुषीयोनिर्धनधान्यसमन्विता ॥१५२॥१।३।५।७।८।९।१२।१६।
१९।२०।२४।३०।३६ एषुवर्षेषुकष्टीस्यात्पूर्वपापानुसारतः ॥ चतुःषष्टितमेवर्षेपंचत्वंचभविष्यति ॥ १५३ ॥ अथवल्मीक
योगः ४२ ॥ पूर्वजन्मनियानारीचम्पकारण्यसन्निधौ ॥ बाहुजोधर्मशीलश्चनित्यंहरिहरसेवकः ॥ १५४ ॥ पत्नीपतिव्रतातस्यपतिसेवा
परायणा ॥ एकस्मिन्समयेविप्रप्रमादात्सूकरोहतः १५५ ॥ दानेपुण्येमहोत्साहीह्याखेटकेसदारतः ॥ आयुषस्तुसमाप्तित्वात्सराजापंचतां
गतः ॥१५६॥ पत्नीतस्यसतीजातास्वर्गलोकमुभौगतौ ॥ पुनरागत्यमेदिन्यांसुखसौभाग्यसंयुतः ॥ १५७ ॥ १ । ३ । ६ । ८ । १३
१६ । १८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ४५ ॥ द्वितीयवल्मीकयोगः ४३ ॥ काचिद्वेश्याविप्रपूर्वंकीकटेहितदानघ ॥ मृदंगीमधुराला
पीगीतवाद्यपरायणा ॥ १५८ ॥ नृपानुकम्पयाविप्रद्रव्यंतुविपुलंकृतम् ॥ तीर्थस्थानेददौदानंबहुश्रद्धान्विताचसा ॥ १५९ ॥ प्राप्तेवार्द्ध
क्यसमयेसामृतागदपीडिता ॥ पापात्पापफलंभुक्त्वापुण्यात्पुण्यफलंतथा ॥ १६० ॥ पुनर्वैमानुषीयोनौकुलेवैमहतीधनी ॥ पृथ्वी
पानाद्भवेत्पुत्रोनान्यथाद्विजसत्तम ॥ १६१ ॥ १ । ५ । ९ । १४ । १७ । २१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५६ ॥ अथवासुदेव
योगः ॥ ४४ ॥ किष्किंधानगरेपूर्वंब्राह्मणोज्ञानवर्जितः ॥ परापवादनिरतःपाखंडाचरणेरतः ॥ १६२ ॥ प्रमादी [illegible]कारीच[illegible]त्मार्थमुद्यमे
रतः ॥ एकस्मिन्समयेविप्रमर्कटश्चवनेहतः ॥ १६३ ॥ शरैश्चलकुटैर्वापिपापमुग्रमुपार्जितम् [illegible]सुखसौ[illegible] १३३ [illegible]संस
[illegible] १७ ॥ [illegible] वयोगः ॥ अ[illegible] [illegible]रकियातोबहुव

नकम् ॥ दुःपत्नीत्यमेदिन्यादुःख[illegible]वतः ॥ १६४ ॥ १। ३। ६।८। १३ । १६। २०।२५।२७।३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि
३१ ॥ अथवीराख्ययोगः ॥ ४५ ॥ कश्चिद्वैश्योऽभवत्पूर्ववाराणस्याश्चदक्षिणे ॥ कह्लारइतिविख्यातः सर्वसम्पद्युतोधनी ॥ १६५ ॥
कृतंचतेनबाहुल्यात्परस्त्रीगमनंतदा ॥ ब्राह्मणस्यसुतःश्रेष्ठःसर्वालंकरणैर्युतः ॥ १६६ ॥ द्रव्यलोभेनवैतेनपापमुग्रमुपार्जितम् ॥ आयुषस्तु
समाप्तित्वात्सवैश्यःपंचतांगतः ॥ १६७ ॥ स्वतेनकर्मणायुक्तः प्राप्तस्तुयमशासनम् ॥ नानाजन्मोत्तरेविप्रमानुषत्वमुपागतः ॥१६८॥ १।
३ । ८। १३ । १७ । २१ । २४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५८ ॥ अथवारणयोगः ४६ ॥ किरातोनगरेपूर्ववर्णसंकरसुन्दरः ॥ ब्रा
ह्मणस्यकृतासेवाकायवाणीमनोऽर्पणैः ॥ १६९ ॥ मरणंतस्यवैजातंबभूवपादजस्तदा ॥ सत्कर्माणिवैकृतानितेनवैश्योमहाधनी ॥
॥ १७० ॥ १ । ४ । ८। १४ । १७ । २० । २५ । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०७ ॥ अथवारूयोगः ४७ ॥
पुरापंपापुरेरम्येवसंतिबहवोजनाः ॥ तत्रवैश्योऽवसत्त्वेकोक्रयविक्रयकारकः ॥ १७१ ॥ महोदारोह्यतुलश्चपरकार्य्यस्यसाधकः ॥ कृता
निपुण्यदानानितथाश्राद्धंविधानतः ॥ १७२ ॥ वापीकासारनिर्माणंकृतंवैयत्रतत्रच ॥ ब्राह्मणस्यगृहंरम्यंगोशालाचतदाऽनघ ॥ १७३ ॥
तीर्थेतीर्थेकृतासेवाऋषीणांचपुनः पुनः ॥ सवैश्यः पंचतांप्राप्तो बभूवबाहुजःपुनः ॥ १७४ ॥ चोग्रदंडः प्रतापीचराज्यकार्य्यपरा
यणः ॥ राज्यंकृत्वाधनंभुक्त्वापुनर्वैकुंठमाययौ ॥ वैकुंठाच्चच्युतिर्भूत्वामानुषोपिततोऽधुना ॥ १७५ ॥ १ । २ । ४ । ८ । १० । १२ ।
१४ । १६ । २० । २४ । ३१ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१ ॥ अथबद्रिकायोगः ४८ ॥ अथगंगातटेपूर्वंकारूषोहितदा
नच ॥ विश्वनाथेतिनाम्नावैब्राह्मणः शास्त्रकोविदः ॥१७६॥ धनमैश्वर्य्यमतुलंनानाद्रव्योपशोभितः ॥ अर्भकान्पाठयेत्तत्रदानंदत्त्वाद्विजा

यच ॥ १७७ ॥ विद्याविनयसम्पन्नः संतोषेचसदारतः ॥ शिवस्यार्चाप्रदानेनसदातत्परमानसः ॥ १७८ ॥ एकस्मिन्समयेविप्रभाविनोर्थ
स्यगौरवात् ॥ तृष्णानलेनदग्धोभूद्गृहीत्वास्वर्णभूषणम् ॥ १७९ ॥ शिष्येणतुतदादत्तंकृतंसंकल्पमानसम् ॥ एवंस्वल्पतिथेकालेसविप्रः
पंचतांगतः ॥ दिव्यवर्षसहस्रांतेचागतोधरणीतले ॥ १८० ॥ १ । ३ । ५ । ८ । १० । १३ ।१५।२०।२५।२८।३१।३५।३८।४०।४५
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ अथवल्कलयोगः ॥ ४९ ॥ वनाद्रिनिकटेवासः कर्दमेनगरेपुरा ॥ वेदशर्मासमाख्यातोब्राह्मणः
शक्तिपूजकः ॥ १८१ ॥ नानाकलासुकुशलस्तेनकोपिनपाठितः ॥ द्रव्यलोभेनवैविप्रकृतवान्कर्मदारुणम् ॥ १८२ ॥ कुत्सितदानग्र
हीताचकुभोजीमलिनाम्बरः ॥ एवंगतेतुवयसिसर्वद्वेष्टितदानघ ॥ १८३ ॥ गोदानंचकृतंतेनह्येकदापापभागिना ॥ मृतोयमपुरेप्राप्तो
नानानरकेषुसंस्थितः ॥ १८४ ॥ पश्चाद्वैमानुषीयोनौचागतोधरणीतले ॥ १ । ४।८।१२।१५।२०।२२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि६१
अथबांधवयोगः ५० ॥ ताराचनगरीश्रेष्ठाप्रकीर्णागुणिनांगुणैः ॥ सर्वजिन्नामराजाभूत्सदोदारश्चवत्सलः ॥ १८५ ॥ निर्विघ्नंचाकरोद्रा
ज्यंपूर्वजन्मनिसत्तम ॥ कृतानितेनदानानियज्ञाश्चविविधास्तथा ॥ १८६॥ प्रस्थंप्रस्थंददौस्वर्णंब्राह्मणेभ्योविशेषतः ॥ तोषितास्त्रिदशाः
सर्वैर्दानैर्विप्राश्चतोषिताः ॥ १८७ ॥ एकदागिरिमध्येचजीवाश्चबहुघातिताः ॥ एकांचचमरींहत्वाह्यजानन्सद्द्विजोत्तम ॥ १८८ ॥
तेनपापानुसारेणभुक्तानरकजंफलम् ॥ पुनर्भूत्वामहाभागपृथ्वीतलेचमानुषः ॥ १८९ ॥ यौवनेचातिकष्टेनपीडयमानकलेवरः ॥
प्रथमेपंचमेकष्टंसप्तमेद्वादशेतथा ॥ १९० ॥ त्रिंशद्वर्षोत्तरेव्याधिःसप्तषष्टितमेमृतिः ॥ तदामृत्यौनसंदेहःशृणुशुकयथामति ॥
॥ १९१ ॥ अथविश्वरातयोगः ५१ ॥ अथकश्चिद्द्विजःश्रेष्ठःकुलाद्रौरमणेऽवसत् ॥ सर्वार्थसाधकोनित्यंहरिनिष्ठःसमाधिना॥ १९२॥प्रपं

चत्यागीचतु[illegible]वान् ॥ संसारतरणेवांछिहरश्चानन्यभक्तितः ॥ १९३॥ भक्त्यातुष्टोहरीर्विप्रह्यागतस्तस्यसन्निधौ ॥ उवाच
मधुरांवाणींवरंवरयपुत्रक ॥ १९४ ॥ यथेप्सितंचदास्यामिसत्यंसत्यंवचोमम ॥ समाधिनिष्ठोविप्रोसौकिंचिन्नोवाचवैद्विज ॥ १९५ ॥
हरिर्यातः स्वभवनमिन्द्रोविघ्नंचकारह ॥ साप्सरोगणकामेनसमाधिभ्रंशितस्तदा ॥१९६॥दृष्ट्वाग्रेसुंदरींविप्रःकामासक्तोबभूवह ॥ हरिसेवांप
रित्यज्यभक्ताद्यैर्व्यसनेरतः ॥ १९७ ॥ एवंस्वल्पेगतेकालेसविप्रः पंचतांगतः ॥ दिव्यवर्षसहस्रांतेचागतोधरणीतले॥१९८॥ बहुराज्या
धिकरणेसमर्थश्चबभूवह ॥ १ । २ । ३ । ५ । ८ । १२ । १६ । २० । २४ । ३१ । ३६ ४० वर्षेषुकष्टम्॥परमायुर्वर्षाणि७० ॥ अथवार
स्पत्ययोगः ॥ ५२ ॥ पूर्वजन्मनिमहाराजाशूद्रवंशेतदाऽनघ ॥ राज्याधिकारलोभेनकृतंकर्मसुदारुणम् ॥ १९९ ॥ प्रयागेसर्वतीर्थेषुदंडंद
त्वाद्विजोत्तमान् ॥ यत्रयत्राप्यगच्छद्वैतत्रदंडोनिरंतरम् ॥ २०० ॥ एवंकृत्वातदादेवबहुवर्षगतागतैः ॥ सराजापंचतांप्राप्तःससहायोद्वि
जोत्तम ॥ २०१ ॥ षष्टिवर्षसहस्रांतेचागतोप्यत्रमानुषः ॥ महाभीमाकृतिर्देहोगर्वितःसहसैनिकः ॥ २०२ ॥ १ । ३ । ५ । ८ । १३ ।
१७ । २० । २७ । ३० । ३१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९० ॥ अथभवानीयोगः ५३ ॥ आसीज्जन्मांतरेचैवविद्वांश्चवेदनिंदकः ॥
महाभिमानयुक्तश्चमातृपितृवधःकृतः ॥ २०३ ॥ ततोयमपुरंप्राप्तोयमदूतैर्यमाज्ञया ॥ नानानरकेषुसस्थित्वाततश्चजंबुकोऽभवत् ॥
॥ २०४ ॥ काकोगृध्रउलूकश्चव्याघ्रोभूत्वाततःपरम् ॥ शूकरोजायतेपश्चात्पशुयोनौनिरंतरम् ॥ २०५ ॥ गोगर्भेचाभवत्सोपिवाराणस्यां
चदक्षिणे ॥ समृतोजाह्नवीतीरेमानुषत्वंततोभवत् ॥ २०६ ॥ नानाकष्टप्रकोपेनबहुवर्षैःप्रपीडितः ॥ १ । २ । ४ । ५ । ८ । ११ । १३ ।
१६ । १८ । २० । २५ । ३१ । ३६ । ४० । ४५ । ४८ महाकष्टेनविकलएतद्वर्षेद्विजोत्तम ॥ परमायुषःशताब्दाश्चयद्यरिष्टंविन

यच ॥ १७७ ॥ विद्याविनयसम्पन्नः संतोषेचसदारतः ॥ शिवस्यार्चाप्रदानेनसदातत्परमानसः ॥ १७८ ॥ एकस्मिन्समयेविप्रभाविनोर्थे
ष्यति ॥ २०७ ॥ अथभार्गवयोगः ॥ ५४ ॥ आसीज्जन्मांतरेचैवब्राह्मणःशास्त्रपाठकः ॥ नानाकाव्येषुकुशलोनानाऽलंकारसंयुतः ॥
॥ २०८ ॥ नानादेशाटनंकृत्वानानाभूपालयोगतः ॥ प्राप्तिस्तस्यनर्किंचिद्वैबभूवद्विजसत्तम॥२०९॥ दारिद्र्येणमहत्कष्टंबभूवद्विजसत्तम॥
तत्रराज्याधिकरणेसमंत्रविद्योऽभवत् ॥ २१० ॥ समृतःसिंधुनिकटेयोर्निभुक्ताकथंचन ॥ पश्चाद्वैमानुषीयोनौमातृकुक्षेःसमुद्भवः ॥
॥ २११ ॥ १ । ३ । ५ । ८ । १३।१६ ।२०।२८ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८५ ॥ अथभावीयोगः ५५ ॥ गयायांपूर्वभागेचयो
जनोपरिवैपुरे ॥ ब्राह्मणःशाक्तधर्मज्ञोदेव्याश्चपूजनेरतः ॥ २१२ ॥ पंचोपचारसहितमद्यमांसेनतृप्यति ॥ एकस्मिन्समयेविप्रराजद्वारस्य
सन्निधौ ॥ २१३ ॥ तपोवनेनवर्म्यांचह्याश्विनेचतदानघ ॥ देव्याअग्रेबलिंदत्त्वाअजायामहिषस्यच ॥ २१४ ॥ स्वपुत्रस्यबलेर्दानाच्चा
विर्भूताहिचांबिका॥वरंदत्त्वाऽतिहर्षेणपुत्रस्यजीवदानकम् ॥२१५ ॥ एवंनिवसतस्तत्रबहुवर्षगतागतेः ॥ सविप्रःपंचतांप्राप्तःपुनर्वैब्राह्मणो
धुना ॥ दीप्तकांतिर्गुणज्ञश्चसाहसीतुकृपान्वितः ॥ २१६ ॥ १५ । १३। २०। ३२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥ अथभीमसेनि
योगः ५६ ॥ अथपुरांगिरादेशेब्राह्मणोमंत्रवित्तदा ॥ देवराजइतिख्यातःकालीसेवानिरंतरः ॥२१७॥ एकस्मिन्समयेविप्रोविंध्यपर्वतमा
श्रयः ॥ कृतंतेनतपःपूर्वंबहुवर्षप्रमाणकम् ॥ २१८ ॥ प्रादुर्भूताततोदेवीप्रमोदेनद्विजोत्तम ॥ वरंवरयहेविप्रतुष्टाहंतपसातव ॥
॥ १९१ ॥त्व ॥ २१९ ॥ जगद्व्यापिनीकष्टहर्त्रीसदैवदुराधर्षगाऽतीतगम्यागभीरा ॥ परिध्वंसिनीपापतूलाद्रिशंकांकृतंह्यद्भुतंब्रह्मनिष्ठे
कृताऽनेकजन्मानिमिथ्यापवादंसधन्योऽधुनायामिपदाम्बुजंते ॥ इतिस्तवःकृतोविप्रदेव्याअग्रेतदाऽनघ ॥२२१॥
॥ २२ ... ॥ सविप्रःपञ्चतांप्राप्तःकिंचित्कालेगतेपिवा ॥ २२२ ॥ कैलासशिखरेस्थित्वादिव्यवर्षसहस्रकम्
हारयाति ... र्ष्वप्रस्थ ... पत्रक ... गमत

ततोवैमानुषीयोनौधनधान्यसमन्वितः ॥ २२३ ॥ तत्रकन्यासमायुक्तोयौवनेकष्टसंयुतः ॥ १ । ४ । १६ । १८ । २० । २८ । ३६
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०० ॥ ५१ अथभगोदर्वियोगः ॥ अथवैराटदेशेतुब्राह्मणःशास्त्रवर्जितः ॥ अथनेपालदेशेचपूर्वंतुबाहुजो
त्तमः ॥ २२४ ॥ रणधीरेतिविख्यातःसत्यधर्मपरायणः ॥ परमोदारोनन्यश्चस्वप्रतापीजनेश्वरः ॥ २२५ ॥ प्रजानांदंडनेनिष्ठोद्रव्य
लुब्धेनचेतसा ॥ प्रजाचविमुखीसर्वाबभूवद्विजसत्तम ॥ २२६ ॥ रणाग्रेचहतश्चासौराजावैपंचतांगतः ॥ सतेनकर्मणायुक्तःप्राप्तस्तुयमशा
सनम् ॥ पुनरागत्यमेदिन्यांकिंचित्पुण्यप्रभावतः ॥ २२७ ॥ १ । ४ । ८ । ११ । १६ । २५ । २८ । वर्षेषुकष्टम् ॥ शस्त्रादिपीडा ॥
परमायुर्वर्षाणि ६२॥५२ अथभारथयोगः ॥ खशदेशेपुराविप्रःशूद्रोनामसुधाकरः ॥ प्रपंचनिरतःसोपिबहुद्रव्यंचवैकृतम् ॥२२८॥ चतुः
पत्न्यःपंचपुत्राःसर्वसौख्येनसंयुतः ॥ एकस्मिन्समयेविप्रकथांश्रुत्वाचवैतदा ॥ २२९ ॥ कार्पण्यंचपरित्यक्त्वाब्राह्मणेभ्योददौधनम् ॥
तीर्थेतीर्थेव्ययंकृत्वाजीर्णोद्धारंतथाऽकरोत् ॥२३०॥ एवंनिवसतस्तत्रकालेमृत्युवशंगतः ॥ पुनर्वैमानुषीयोनौसर्वसौख्येनसंयुतः ॥२३१॥
१।४।६।८।१२।१६।२०।२४ वर्षेषुकष्टम् ॥ चतुःषष्टितमाब्दांतंप्राणिनांप्राणधारणम् ॥ २३२ ॥ ५३ अथभरथात्मकयोगः ॥ परापवाद
निरतोमिथ्याजल्पतिनित्यशः ॥ विक्रयःपरकन्यानांतद्द्रव्येणचजीवति ॥ २३३॥ एवंस्वल्पतिथेकालेयमलोकंचप्राप्तवान् ॥ नानाजन्म
निगत्वाचगोगर्भेषुचजातवान् ॥ २३४ ॥ अंत्रवेद्येसमुत्पन्नःसमृतोजाह्नवीतटे ॥ तेनासौब्राह्मणोजातोबहुकन्यासमन्वितः ॥ २३५ ॥
१ । ४ । ८ । १६ । २४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८० ॥ ५४ अथभवनानियोगः ॥ कश्चित्तुबाहुजःपूर्वंधनाढ्यश्चातिविक्रमी ॥ माहे
श्वरस्यनिकटेन्यवसत्सर्वकालिकः ॥२३६॥ कुमारीगमनंकृत्वापापमाचरितंत्विदम् ॥ तेनासौचांत्रवेद्येषुमानुषोपिततोऽभवत् ॥ २३७॥

१।५।८।११।१७।२९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ ५५ अथभागीरथयोगः ॥ ज्वालामुख्याश्चनिकटेब्राह्मणोबहुजापकः ॥ कदा
चिन्नैवकृतवान्सुकृतंस्वार्थंद्विजोत्तम ॥ २३८ ॥ परापवादकरणसमर्थोपिविशेषतः ॥ तेनपापेनभोःपुत्रसगत्वायमलोककम् ॥ २३९ ॥
यमलोकात्परिभ्रष्टोमानुषोपिततोधुना ॥ आंत्रवेद्येसमुत्पन्नश्चंडक्रोधप्रवर्द्धनः ॥ २४० ॥ १ । ३ । ८ । ९ । १६ । २० । २८ । ३१
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६५ ॥ ५६ अथमन्मथोमारीयोगः ॥ कश्चिद्वैश्यकुलेपूर्वंकीटदेशेतदाऽवसत् ॥२४१ ॥ गुणदासेतिविख्या
तःपत्नीपुत्रसमन्वितः ॥ कृषिकर्मोद्यमेनिष्ठोव्यापाराच्चकृतंधनम् ॥ २४२ ॥ पत्नीतस्यमहासाध्वीपुण्यमार्गेव्ययःकृतः ॥ एकस्मिन्सम
येविप्रदृष्ट्वावैश्येनवैतदा ॥ २४३ ॥ पत्नीत्यागःकृतस्तेनह्यतिथिश्चबभूवह ॥ मरणंगोमतीतीरेबभूवद्विजसत्तम ॥ २४४ ॥ पापात्पापफलं
भुक्त्वायोनिंभुक्त्वाकथंचन ॥ ततोवैमानुषोजातः सत्कर्मणिरतःसदा ॥ २४५ ॥ १ । ३ । ९ । १३। २० । २९। ३३। ३७ वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ४९ ॥ ५७ अथमातुलीयोगः ॥ भार्गववैपुरेपूर्वंगंधर्वोनामराक्षसः ॥ अभक्ष्यंभक्षितंनैवह्यपेयंनैवपीतवान् ॥ २४६ ॥
विप्रशापाच्चभोविप्रबभूवराक्षसेकुले ॥ संचितानिचकर्माणिभुज्यंतेप्यत्रमानुषैः ॥२४७॥ ततोवैमरणंयातश्चागतोधरणीतले ॥ गौरांगोभव्य
प्रथर्भ स्वदेवताऽऽराधनेरतः ॥ २४८ ॥ १।८।१६ । २९। ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०७ ॥ अथमधुलिड्योगः ॥५८॥ पिनाक
॥ १९१ [illegible] ॥ [illegible]ःपृथिवीपतिः ॥ धैर्य्यराजःसमाख्यातःपरपीडारतःसदा ॥२४९ ॥ नानाकर्माणिकृत्वाऽसौबहुवर्षगतागतैः ॥ आयुष
मूर्ति [illegible] गमृत्युमागतः ॥ २५० ॥ ततोवैमानुषीयोनौदारिद्र्येणप्रपीडितः ॥ २५१ ॥ १ । ३ । ८ । १६ । २२ । २७ । ३७
देशेऽभवत्पूर्वबाहुज [illegible] ६६ ॥ ५९ अथमाधवयोगः ॥ शृंगवेरपुरेदेवनिषादोन्यवसत्तदा ॥ स्वधर्मे [illegible] पुण्यमथाऽ
स्तुसमाप्तित्वात्सराज [illegible] मत [illegible]

करोत ॥ २५२ ॥ आरोपितंगृहेनूनंतुलसीवनमद्भुतम् ॥ दीपावलींददौनित्यंतथाऽऽकाशेविशेषतः ॥ २५३ ॥ संमृतोजोह्नवीतीरेगतोसौ
नंदनेवने ॥ इन्द्रलोकात्परिभ्रष्टश्चागतोभूमिमंडले ॥ २५४ ॥ १ । ३ । ८ । ११ । १६ । १९ । २२ । २७ । ३८ एतद्वर्षेमहाकष्टंमध्येम
ध्येसुखागमः ॥ चतुःसप्ततिवर्षांतेमरणंगोमतीतटे ॥ २५५ ॥ ६० अथमधुहायोगः ॥ देशेबंदरकेदेवउत्कलस्यापिसन्निधौ॥पादजोन्यव
सत्तत्रबहुग्रामाधिकारवान् ॥ २५६ ॥ द्रव्यस्योत्पादनेमग्नोबहुवर्षगतागतैः ॥ नदानंनातिथेर्भोज्यंदत्तंचब्राह्मणेक्वचित् ॥ २५७ ॥ महा
कार्पण्यनिरतः पुत्रदारसमन्वितः ॥ मृत्वापिनरकेगत्वाह्यपिवर्षसहस्रकम् ॥ ततोवैमानुषीयोनौचागतोधरणीतले ॥ २५८ ॥
१ । ३ । ४ । ८ । १७ । २० । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६८ ॥ ६१ अथमौक्तिकयोगः ॥ चोलदेशेवसत्पूर्वंधनाढ्यःकाममोहितः॥
ब्राह्मणःशूद्रक्रियासुतत्परःप्रतिवासरम् ॥ २५९ ॥ स्वज्ञातिःपरज्ञातिश्चचर्मकारीसमन्विता ॥ रजकीनापितावेश्याह्यगम्यागमनंकृतम् ॥
॥ २६० ॥ अभक्ष्यंभक्षितंतेनचापेयमपिपीतवान् ॥ आयुषस्तुसमाप्तित्वात्सगत्वास्वर्गलोककम् ॥ २६१ ॥ भुक्तंनानाविधंसौख्यंस्वर्ग
लोकेमहीतले ॥ पुनर्वैमानुषीयोनौचागतोधरणीतले ॥ २६२ ॥ महाकामेनलुब्धश्चधनधान्यसमन्वितः ॥ १ । ४ । ८ । १६ । २४ ।
३० । ३६ । ४२ । ४५ । एतद्वर्षेमहाकष्टंजायतेनात्रसंशयः ॥ २६३ ॥ परमायुर्वर्षाणि ९९ ॥ ६२ अथमोदसंज्ञकयोगः ॥ मगदेशेऽवस
त्पूर्वंबाहुजः सर्वभक्षकः ॥ दातृत्वशक्तिनिरतोयुद्धाकांक्षीमहोत्सवी ॥ २६४ ॥ समरेचमृतःशूरोगतइन्द्रपुरंप्रति ॥ बहुवर्षसहस्रांतेचागतो
धरणीतले ॥ २६५ ॥ गौरांगोमधुरालापीदानवत्सलधार्मिकः ॥२६६॥ १ । ३ । ५ । ८ । १४ । १७ । २२ । २७ । ३० वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ९९ ॥ ६३ अथमकरीयोगः ॥ देशेभोजकटेचैवनृपस्याग्रेचपार्षदः ॥ कौशलेतिसमाख्यातःपत्नीतस्यपतिव्रता ॥२६७॥

... ततनकर्मणाशुक्तःप्रातस्तुयमशासनम् ॥ २६८ ॥ पु
...मानुषोभूत्वाब्रह्मपुत्रस्यसन्निधौ ॥ अधनोदीर्घरोगीचह्यपत्यरहितोधुना ॥ २६९ ॥ १ । ३ । ५ । ८ । १४ । १६ । २० । २७ वर्षेषु
कष्टम् ॥ परमायुर्वर्षाणि ७० ॥ ६४ अथमूशलयोगः ॥ मथुरानिकटेविप्रकोशमात्रेचपश्चिमे ॥ गुर्जरोधनधान्याढ्यःपरमोदारमानसः॥
॥ २७० ॥ ब्राह्मणानांददौदानंगोभूम्यश्वादिकानिच ॥ समृत्वायमुनामध्येगतइन्द्रस्यवैपुरे ॥२७१॥ इन्द्रलोकात्परिभ्रष्टोमानुषश्चाधुना
...त ॥ अत्रिवंशेसमुत्पन्नोधनधान्यसमन्वितः ॥२७२॥ १ । ४ । ८ । १२ । १५ । २० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६६ ॥ ६५ अथ
...रीयोगः ॥ अयोध्यापूर्वभागेचकायस्थोवैष्णवोमतः ॥ शास्त्राभ्यासीगुणग्राहीलोलुपश्चविशेषतः ॥ २७३ ॥ प्रमादात्कामलोभेनकृ
...मोतिदारुणम् ॥ गोत्रजागमनंकृत्वागोपितंघस्मरंद्विज ॥ २७४ ॥ साम्रृतातत्रभोविप्रविषंपीत्वाचदारुणम् ॥ कायस्थोपिमृतस्तत्रय
...समागतः ॥ २७५ ॥ षष्टिवर्षसहस्रांतेमानुषोपिततोधुना ॥ २७६ ॥ ३ । ६ । ९ । १३ । १६ । २० । २४ वर्षेषुकष्टम् ॥ पर
...र्षाणि ५६ ॥ ६६ अथमज्जासारयोगः ॥ आसीज्जन्मांतरेचैवबाहुजोनर्मदातटे ॥ प्रसेनिरितिविख्यातःपत्नीतस्यसुलोचना ॥
...२७७ ॥ बाहुजश्चातिकामीचपरस्त्रीरतिलम्पटः ॥ एकस्मिन्समयेविप्रजस्वलागमनंकृतम् ॥ २७८ ॥ परदेशेमृतःसोपिगतोयमपुरेत
...र्षसहस्रांतेमानुषत्वमुपागतः १।३।८। १३ । ११ । १८ । २१ । २७ । ३१ । ३६ । ३८ एषुवर्षेष्वरिष्टंस्याद्दानपुण्यार्चनात्सु
... ॥ २७९ ॥ परमायुर्वर्षाणि ७७ ॥ ६७ अथमाणिक्ययोगः ॥ पूर्वजन्मनियानारीदंडकारण्यसन्निधौ ॥ तपश्चर्य्यारतासातु
...सत्परा ॥ २८० ॥ एकस्मिन्समयेविप्रप्रयागेमकरेगता ॥ वेण्यास्तटेमृतायासागतालोकेचभास्करे ॥ ...पहस्तां
... ६८ ॥ ६९ अथ... ॥ ...रपुरे ... ...न्थवसरे ... ॥
...योगः ॥

...मंडले ॥ २८१ ॥ १ । ३ । ८ । १३ । २० । २९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६१ ॥ ६८ अथमेधायोगः ॥ भारद्वा
...लकोनामबाहुजः ॥ प्रजाश्चपुत्रवंद्विप्रपालयामासवैतदा ॥ २८२ ॥ तीर्थेतीर्थेकृतासेवाऋषीणांचपुनःपुनः ॥ सक्षत्रःपंचत्वं
...सगत्वाचंद्रलोककम् ॥ इंद्रलोकात्परिभ्रष्टःसमायातश्चभूतले ॥ २८३ ॥ १ । २ । ८ । १३ । १७ । २२ । २८ ॥ वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ८१ ॥ ६९ अथमोदनयोगः ॥ चंद्रभागानदीतीरेजैमिनिर्नामब्राह्मणः ॥ बिडालोघाततिस्तत्रपापमाचरितंद्विज ॥ २८४ ॥
यमलोकेऽभवत्प्राप्तोह्यशीतिवर्षसहस्रकम् ॥ ततोवैमानुषीयोनौचांत्रवैश्येसमुद्भवः ॥ २८५ ॥ १ । ३ । ८ । १६ । २५ वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ८१ ॥ ७० अथमुल्मुलयोगः ॥ वंगदेशेऽभवत्पूर्वमंत्यजोधनवानपि ॥ नानापापसमाकीर्णोजीवहिंसापरायणः ॥ २८६ ॥
एकस्मिन्समयेविप्रनर्मदायाःशुभेतटे ॥ महागुहाद्रिविपिनेक्षुत्तृड्भ्यांचप्रपीडितः ॥ २८७ ॥ बिल्ववृक्षस्यमूलेचसमृतःपापभाक्खलु ॥
शिवदूतैःसमंगत्वाकैलासेचगतस्तदा ॥ पुनर्वैमानुषोभूत्वाधनाढ्यश्चातिसुंदरः ॥ २८८ ॥ १ । २ । ३ । ८ । १७ । २२ । २७ ।
३१ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६८ ॥ ७१ अथमातंगीयोगः ॥ चक्रवाकोऽभवत्पूर्वंशरद्वीपेपिक्रौंचकः ॥ हंसश्चमानसेभूत्वा
गोगर्भेनर्मदातटे ॥ २८९ ॥ गोयोनिंतुपरित्यज्यमर्कटःकौशिकीतटे ॥ सरयूमरणात्पुण्यात्सजातोब्राह्मणोधुना ॥ २९० ॥ १ । ४ ।
८ । १२ । १६ । २० । २७ । ३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७२ ॥ ७१ अथद्वितीयमातंगीयोगः ॥ अथभागीरथीतीरेजम्बुकोन्यवसत्तदा ॥
दैवात्तत्रमृतःसोपिसजातोमानुषोधुना ॥ २९१ ॥ गौरोरुणोऽतिह्रस्वश्चकर्णेकंठेसचिह्नितः ॥ महाक्रोधीदानशीलोधनवान्श्री
तिमानपि ॥ २९२ ॥ १ । १० । २० । ३० । ४० । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥ ७२ अथमुज्ज्वलयोगः ॥ अथपंचालकेदेशेवैश्योवसतिधार्मि

कः ॥ साम्बहेमःसमाख्यातःपत्नीतस्यकराम्बुजा ॥ २९३ ॥ लेखविद्यारतःसोपिप्रत्यहंद्विजसत्तम॥ एकस्मिन्समयेविप्रकृतंकर्मातिदारुणम् ॥ २९४ ॥ द्रव्यार्थंतुस्वमित्रंचघातितंद्विजसत्तम ॥ यमलोकंतदागत्वायमदूतैर्नैपीडितः ॥ बहुवर्षसहस्रांतेमानुषोपिततोऽधुना ॥ ॥ २९५ ॥ २ । ४ । ८ । १२ । १६ । २० । २५ । ३० । ३२ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि७१॥७३अथमासयोगः ॥ कर्णाटनगरेपूर्वंब्राह्मणोवेदपारगः ॥ शिवस्यस्मरणेनिष्ठःपरकार्य्यविशोधकः ॥२९६॥ दत्तानितेनदानानिपर्वस्वपिविशेषतः॥ एकस्मिन्समयेतेनपुस्तकंचोरितंद्विज ॥ १९७ ॥ ब्राह्मणस्यतदापुत्रनिशायांदुष्टकर्मणा ॥ तेनपापानुसारेणसगत्वायमलोककम् ॥२९८ ॥ नानाजन्मान्यभूवन्वैमर्त्यलोकेपुनःपुनः ॥ पश्चान्मानुष्यमापन्नोगोधूमाऽऽकारवद्वपुः ॥ चंचलश्चातिचतुरोदीर्घसूत्रोमदोत्कटः॥ २९९ ॥ २ । ४ । ८ । १० । १२ । १३ । १५ । २० । २७ । ३७ ॥ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१॥७४ अथमृत्युयोगः ॥ अथातःसंप्रवक्ष्यामिपूर्वजन्मभवंफलम् ॥ कश्चिद्द्विजकुलेपूर्वंधनधान्यसमन्वितः ॥३००॥ वंगदेशेवसत्सोपिकालिकोनामविश्रुतः ॥ जीवहिंसापरोनित्यंविद्यावेदविवर्जितः ॥ ३०१ ॥ एकस्मिन्समयेविप्रकृतंकर्मातिदारुणम् ॥ भागीरथ्याश्चनिकटेक्रौंचीघातमथाऽकरोत् ॥ ३०२॥समृत्वाकालसंयुक्तोगतोवैनरकंतथा ॥ शतजन्मोत्तरेविप्रपुनरागत्यभूतले ॥ ३०३ ॥ १ । २ । ५ । ८ । १० । १२ । १७ । २१ । २६ । २९ । ३२ । ३६ वर्षेषुकष्टम्॥परमायुर्वर्षाणि ७०॥७५अथमुरहायोगः॥कदाचित्पूर्वजननेकिरातो[illegible]नारी[illegible]चर्य्यरतःसोपिकापट्याचरणेरतः३०४॥ [illegible]वजोविप्र[illegible]पश्चमालांचतिलकंतथा ॥ लोकानांवचनेव्यग्रोब्रह्मकर्मनज्ञायते ॥स्तटेमृता[illegible]सागतालोके[illegible]यपोषकः ॥ एक[illegible]स्मिन्समयेविप्रब्राह्मणस्यहृतंधनम् ॥ ३०६ ॥ एवंगतेतुवयसिव्ययंकृ[illegible]दिने[illegible] [illegible]वसन्॥ ब्रह्म[illegible] ३०७॥ [illegible]मृत[illegible] [illegible] ३०९ ॥ चेटकोनाटकोवा[illegible] [illegible]देशेऽभवत्पूर्वबाहुज[illegible] [illegible]योगः ॥ अ[illegible] [illegible] ॥ [illegible]प्राप्तित्वात्सभृतःकालचोदितः॥

[illegible]णौयुक्तःप्राप्तस्तुयमशासनम् ॥ नानानरकेषुसंस्थित्वाबहुवर्षसहस्रकम् ॥ ततोमानुष्यमापन्नोदुःखभारसमन्वितः ॥ ३०८ ॥
१ । ४ । ६ । १० । १४ । १९ । २६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६६ ॥ ७६ अथमोक्षयोगः ॥ अथवैकीकटेदेशेभारथोनामपा
र्दजः ॥ सर्वकर्मानुरक्तश्चगोविप्राणांतुपालकः ॥ ३०९ ॥ तस्यपत्नीदुराचारापतिवंचनतत्परा ॥ एकस्मिन्समयेविप्रबाहुजश्चतदानघ
॥ ३१० ॥ हस्तौपादौदृढंबद्ध्वास्वभार्य्यायास्तदानघ ॥ पातिताकूपमध्येचसामृताद्विजसत्तम ॥ ३११ ॥ तेनपापानुसारेणबाहुजो
नरकेगतः ॥ बहुवर्षसहस्रांतेचागतोधरणीतले ॥ ३१२ ॥ २ । ६ । ८ । १३ । १८ । २७ ॥ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ७७
अथमाधव्यायोगः ॥ यादवेनगरेपूर्वंवसंतिबहवोजनाः ॥ तत्रशूद्रोऽवसत्त्वेकोगम्भीरश्चधनेश्वरः ॥ ३१३ ॥ वस्त्राणांविक्रयंचक्रेबहूद्योगे
चतत्परः ॥ तत्सकाशात्कृतंद्रव्यंव्ययंकृत्वादिनेदिने ॥ ३१४ ॥ कन्योद्वाहंतथाकृत्वाब्राह्मणेभ्योददौधनम् ॥ एवंस्वल्पतिथेकालेसमृतो
गदपीडितः ॥ ३१५ ॥ बभूवबाहुजःसोपिप्रयागेधरणीपतिः ॥ तत्रपापार्जनंकृत्वापरपुत्रविघातनम् ॥ ३१६ ॥ अत्रजन्मनिपापेभ्योमृत
पुत्रोभविष्यति ॥ हिरण्याढ्येकृतेदानेपुत्रोजीवतिनिश्चितम् ॥३१७॥ १ । ४ । ६ । १० । १५ । १८ । २२ । २७ वर्षेषुकष्टम् ॥ परमा
युर्वर्षाणि १००॥७८ अथमालिनीयोगः ॥ आसीज्जन्मनियानारीपांडुदेशेतदाऽवसत् ॥ पतिस्तस्यामहारोगीपरपुंसुरताधमा ॥ ३१८ ॥
कृतानिबहुपापानिकामलोभेननिश्चयात् ॥ साम्प्रतागदसंसक्ताजाह्नवीनिकटेतदा ॥३१९॥ जाह्नवीमरणात्पुण्याद्गतासास्वर्गलोककम् ॥
स्वर्गाच्चैवच्युतिर्भूताचागताधरणीतले ॥ ३२० ॥ १।३।८।९।१५।२० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ ७९ अथमंडलीयोगः ॥
पूर्वजन्मांतरेचैवचोलदेशेवसत्यसौ ॥ वाणिज्येचसदानिष्ठःकृत्वाद्रव्यंविशेषतः ॥३२१॥ ब्राह्मणस्यप्रसंगेनकथांश्रुत्वाहरेःप्रियाम् ॥ ती

कः ॥ साम्बहेमःसमाख्यातःपत्नीतस्यकराम्बुजा ॥ २९३ ॥ लेखविद्यारतःसोपिप्रत्यहंद्विजसत्तम॥ एकस्मिन्समयेविप्रकृतंकर्मातिदारु
णम् ॥ २९४ ॥ द्रव्यार्थंतुस्वमित्रंचघातितंद्विजसत्तम ॥ यमलोकंतदागत्वायमदूतैर्नैपीडितः ॥ बहुवर्षसहस्रांतेमानुषोपिततोऽधुना ॥
॥ २९५ ॥ २ । ४ । ८ । १२ । १६ । २० । २५ । ३० । ३२ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि७१॥७३अथमासयोगः ॥ कर्णा
टेनगरेपूर्वंब्राह्मणोवेदपारगः ॥ शिवस्यस्मरणेनिष्ठःपरकार्य्यविशोधकः ॥२९६॥ दत्तानितेनदानानिपर्वस्वपिविशेषतः॥ एकस्मिन्समये
तेनपुस्तकंचोरितंद्विज ॥ १९७ ॥ ब्राह्मणस्यतदापुत्रनिशायांदुष्टकर्मणा ॥ तेनपापानुसारेणसगत्वायमलोककम् ॥२९८ ॥ नानाजन्मा
न्यभूवन्वैमर्त्यलोकेपुनःपुनः ॥ पश्चान्मानुष्यमापन्नोगोधूमाऽऽकारवद्वपुः ॥ चंचलश्चातिचतुरोदीर्घसूत्रोमदोत्कटः॥ २९९ ॥ २ । ४ ।
८ । १० । १२ । १३ । १५ । २० । २७ । ३७ ॥ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१॥७४ अथमृत्युयोगः ॥ अथातःसंप्रवक्ष्यामिपूर्वज
न्मभवंफलम् ॥ कश्चिद्द्विजकुलेपूर्वंधनधान्यसमन्वितः ॥३००॥ वंगदेशेवसत्सोपिकालिकोनामविश्रुतः ॥ जीवहिंसापरोनित्यंविद्यावेद
विवर्जितः ॥ ३०१ ॥ एकस्मिन्समयेविप्रकृतंकर्मातिदारुणम् ॥ भागीरथ्याश्चनिकटेक्रौंचीघातमथाऽकरोत् ॥ ३०२॥समृत्वाकालसंयु
क्तोगतोवैनरकंतथा ॥ शतजन्मोत्तरेविप्रपुनरागत्यभूतले ॥ ३०३ ॥ १ । २ । ५ । ८ । १० । १२ । १७ । २१ । २६ । २९ । ३२ । ३६
वर्षेषुकष्टम्॥परमायुर्वर्षाणि ७०॥७५अथमुरहायोगः॥कदाचित्पूर्वजननेकिरातो[illegible] २५ [illegible]चर्य्यरतःसोपिकापट्याचरणेरतः ३०४॥
पादजोविप्ररूपश्चमालांचतिलकंतथा ॥ लोकानांवंचनेव्यग्रोब्रह्मकर्मनज्ञायते ॥ मानियानारीदंडकारण्य[illegible] पोषकः ॥ एक
स्मिन्समयेविप्रब्राह्मणस्यहृतंधनम् ॥ ३०६ ॥ एवंगतेतुवयसिव्ययंकृ[illegible]दिने[illegible]स्तटेमृतायासागतालोकेचभास्कर ॥ [illegible] ३०७॥

सतेनकर्मणायुक्तःप्रातस्तुयमशासनम् ॥ नानानरकेषुसुस्थित्वाबहुवर्षसहस्रकम् ॥ ततोमानुष्यमापन्नोदुःखभारसमन्वितः ॥ ३०८ ॥
१।४।६।१०।१४।१९।२६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६६ ॥ ७६ अथमोक्षयोगः ॥ अथवैकीकटेदेशेभारथोनामप
दजः ॥ सर्वकर्मानुरक्तश्चगोविप्राणांतुपालकः ॥ ३०९ ॥ तस्यपत्नीदुराचारापतिवंचनतत्परा ॥ एकस्मिन्समयेविप्रबाहुजश्चतदानघ
॥ ३१० ॥ हस्तौपादौदृढंबद्धास्वभार्य्यायस्तदानघ ॥ पातिताकूपमध्येचसामृताद्विजसत्तम ॥ ३११ ॥ तेनपापानुसारेणबाहुजो
नरकेगतः ॥ बहुवर्षसहस्रांतेचागतोधरणीतले ॥ ३१२ ॥ २।६।८।१३।१८।२७ ॥ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ७७
अथमाधव्यायोगः ॥ यादवेनगरेपूर्वंवसंतिबहवोजनाः ॥ तत्रशूद्रोऽवसत्त्वेकोगम्भीरश्चधनेश्वरः ॥ ३१३ ॥ वस्त्राणांविक्रयंचक्रेबहूद्योगे
चतत्परः ॥ तत्सकाशात्कृतंद्रव्यंव्ययंकृत्वादिनेदिने ॥ ३१४ ॥ कन्योद्वाहंतथाकृत्वाब्राह्मणेभ्योददौधनम् ॥ एवंस्वल्पतिथेकालेसमृतो
गदपीडितः ॥ ३१५ ॥ बभूवबाहुजःसोपिप्रयागेधरणीपतिः ॥ तत्रपापार्जनंकृत्वापरपुत्रविघातनम् ॥ ३१६ ॥ अत्रजन्मनिपापेभ्योमृत
पुत्रोभविष्यति ॥ हिरण्याढ्येकृतेदानेपुत्रोजीवतिनिश्चितम् ॥३१७॥ १।४।६।१०।१५।१८।२२।२७ वर्षेषुकष्टम् ॥ परमा
युर्वर्षाणि १००॥७८ अथमालिनीयोगः ॥ आसीज्जन्मनियानारीपांडुदेशेतदाऽवसत् ॥ पतिस्तस्यामहारोगीपरपुंसुरताधमा ॥ ३१८ ॥
कृतानिबहुपापानिकामलोभेननिश्चयात् ॥ सामृतागदसंसक्ताजाह्नवीनिकटेतदा ॥३१९॥ जाह्नवीमरणात्पुण्याद्गतासास्वर्गलोककम् ॥
स्वर्गाच्चैवच्युतिर्भूताचागताधरणीतले ॥ ३२० ॥ १।३।८।९।१५।२० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५७ ॥ ७९ अथमंडलीयोगः ॥
पूर्वजन्मांतरेचैवचोलदेशेवसत्यसौ ॥ वाणिज्येचसदानिष्ठःकृत्वाद्रव्यंविशेषतः ॥३२१॥ ब्राह्मणस्यप्रसंगेनकथांश्रुत्वाहरेःप्रियाम् ॥ ती

र्थावगाहनंकृत्वातथादानार्चनंकृतम् ॥३२२॥ आरामान्विविधान्कृत्वावापीकासारकाःकृताः ॥ सत्पात्रेचद्विजेदत्तंस्वर्णदानकदम्बकम् ॥ ॥३२३॥समृत्वाकालसंसक्तःस्वर्गवासीबभूवह ॥ पुनरागत्यमेदिन्यांसर्वसौख्येनसंयुतः ॥ ३२४ ॥ १।३।५।८।११।१८।२२।२७ वर्षेषु कष्टम् ॥ परमायुःशतंप्रोक्तंपुत्रपौत्रसमन्वितः ॥ परत्रसुखमाप्नोतिसत्यंसत्यंवचोमम ॥३२५॥८० अथमुर्मुरीयोगः ॥ आसीज्जन्मांतरेचैवनृसिंहोनामबाहुजः ॥ मैथिलेह्यवसत्पूर्वंधनधान्यसमन्वितः॥३२६॥गुरुपत्न्यांचगमनंकृत्वासचतदानघ ॥ तेनपापानुसारेणगतोसौयममंदिरम् ॥ ३२७ ॥ बहुवर्षसहस्राणिभुक्त्वाभोगांश्चशाश्वतान् ॥ कुक्कुटःकुररश्चैवबिडालश्चबभूवह.॥ ततोवैमानुषीयोनौचांत्रवेद्येचजातवान् ॥ ३२८ ॥ १।४।८।१६।२०।२८।३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५९ ॥ ८१ अथमांजारीयोगः ॥ कालिंजरगिरौरम्येब्राह्मणोन्यवसत्पुरा ॥ हर्षदेवइतिख्यातःसपत्नीकःसपुत्रकः ॥३२९॥शिवसेवारतोनित्यंशिवालयेतथार्चनम् ॥ तत्रभाविबलाद्विप्रवैश्यपुत्रीसमागता ॥३३०॥सुन्दरीचातिशोभाढ्यानानाऽलंकरणैर्युता ॥ हठात्तयासहरतिःकृताह्निचद्विजोत्तम ॥३३१॥ सानारीचविषंपीत्वामृताचलौकिकाद्भयात्॥सविप्रःपश्चतांप्राप्तोनरकेपितदागतः॥ततोवैमानुषोजातःसर्वांगेरोगपीडितः ॥३३२॥ १।८।१६।२० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६५ ॥ ८२ अथमंतरीटकयोगः॥आसीज्जन्मांतरेचैवचोत्कलेहितदावसन् ॥ केशवेतिसमाख्यातःपत्नीद्वयसमन्वितः ॥ ॥३३३॥कृतानितेनपापानिमिथ्यावादस्तथाकृतः॥एकस्मिन्समयेविप्रजगामपरदेशके॥३३४॥व्यापारेणतदापुत्रद्रव्यस्योत्पादनंकृतम्॥स्वदेशेपुनरागत्यहर्षगद्गदमानसः॥३३५॥समृत्वाशिवगेहेचगतोऽसौपरमंपदम् ॥ इदानींपुत्ररहितःकृतेधर्मेसुतोद्भवः॥३३६॥ १।४।६।१०।१६।२० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि [illegible] ॥ ८२ द्वितीयमंतरी[illegible]द्विप्रकुले[illegible]सन्निधौ ॥ शास्त्रज्ञःकाव्य

कर्त्ताचधूर्तउज्झितसत्क्रियः ॥३३७॥ कृतं नस्वल्पदानानिपर्वस्वपियदाकदा ॥ तस्यचमातापितरौमहावृद्धौद्विजोत्तम ॥३३८॥ मातरं पितरंत्यक्काभक्काधैर्व्यसनेरतः ॥ तेनपापानुसारेणजातःपुत्रोविनश्यति॥३३९॥अयंजीवेदयंजीवेदित्याशाबहुवार्षिकी ॥ युवभावेभवेत्कष्टी महारोगेणपीडितः ॥ ३४०॥ १।९।१०।२० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ४४ ॥ ८३ अथमालकीयोगः ॥ आसीज्जन्मांतरेचैवब्राह्मणः शास्त्रपारगः ॥ दुष्टभावेनतेनापिवधोभ्रातुःकृतस्तदा ॥३४१॥ तेनपापानुसारेणगतोऽसौयमलोककम् ॥ जम्बुकोबककाकौचनकुलःकृमि रेवच ॥३४२॥ दिव्यवर्षसहस्रांतेचागतोधरणीतले ॥ भैरवोपासकोभ्रष्टोमहादुष्टोऽतिनिष्ठुरः ॥३४३॥ १।३।६।९।१३।१९।२०।२७।३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ४९ ॥ ८४ अथमोदकीयोगः ॥ कश्चिद्द्विजकुलेपूर्वंगोदावर्य्याश्चसन्निधौ ॥ गोवर्द्धनःसमाख्यातःसपत्नीकः सपुत्रकः ॥३४४॥ एकस्मिन्समयेविप्रपितातस्यप्रचोदितः ॥ यजमानस्यवैगेहेसगतोहर्षसंयुतः ॥ ३४५॥ यजमानोददौतस्मैशकटंद्रव्य संयुतम् ॥ सहस्रमितमुद्राभिर्विक्रीतश्चतदानघ ॥ ३४६ ॥ द्रव्यस्यतुव्ययंकृत्वावेश्यायांप्रापितंधनम् ॥ समृतोब्राह्मणस्तत्रगतोसौयमलोक कम् ॥ यमलोकात्परिभ्रष्टोमर्त्यलोकेचमानुषः॥३४७॥१।३।५।८।११।१५।२०।२५।३१।३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ ८५ अथमोरभंजयोगः ॥ कश्चिद्विप्रकुलेपूर्वंवाराणस्याअथोत्तरे ॥ कार्मुकोनामविख्यातोधर्मशीलोदयाकरः ॥३४८॥ देवीचपूजितातेनभक्ति युक्तेनचेतसा ॥ धूपदीपाऽक्षतैर्माल्यैर्नैवेद्यैर्विविधैस्तथा ॥३४९॥ अर्चितासुप्रकारेणजातामानसगोचरा ॥ प्रादुर्भूताचसादेवीदिव्यसिंहोप रिस्थिता ॥ ३५० ॥ वरंवरयभोविप्रतद्दास्यामिनसंशयः ॥ ब्राह्मणउवाच ॥ कृताञ्जलिपुटोभूत्वाननामशिरसातदा ॥ ३५१ ॥ नमोदेव्यै महादेव्यैशिवायैसततंनमः ॥ नमः प्रकृत्यैभद्रायैनियताः प्रणताः स्मताम् ॥३५२ ॥ आद्यंतस्थितिकारिणीसर्वोपद्रवनाशिनी॥ जयंती

मङ्गलाकालीभद्रकालीकपालिनी ॥ ३५३ ॥ गौर्य्यैधात्र्यैनमस्तुभ्यंदेहिमेपरमांरतिम् ॥ त्वदंघ्रिकमलेदेविमनोमेभ्रमरोऽस्तुवै ॥३५४॥ एवंतुब्रुवतोदेवीकैलासशिखरेगता ॥ शापानुग्रहकारीचबभूवद्विजसत्तमः ॥ ३५५ ॥ सविप्रः पंचतांप्राप्तःकैलासेचसमास्थितः ॥ ततोवै मानुषोजातः श्रेष्ठविद्योपजीविकः ॥ धनमैश्वर्य्यमतुलंप्रतापाधिकतरोऽभवत् ॥ ३५६॥ १।२।८।१२।२०।२८।३२।३८।४६।५०।५५। वर्षेषुकष्टंविशेषतः ॥ परमायुर्वर्षाणि १०० ॥ ८६ अथमोरकयोगः ॥ अथाद्रिनिकटेपूर्वंबद्रिकारण्यसन्निधौ ॥ केशवेतिसमाख्यातः पत्नीतस्यपतिव्रता ॥ ३५७ ॥ बाहुजःकृषिकर्ताचधनधर्मसमन्वितः ॥ द्रव्यस्योत्पादनंकृत्वासत्यधर्मक्रियान्वितः ॥ ३५८ ॥ अन्य थानकृतंकिंचिद्गुरुशुश्रूषणेरतः ॥ सर्वस्वंविधिनापुत्रगुरोरग्रेसमर्पितम् ॥ ३५९ ॥ समृतः स्वर्गकंगत्वापत्नीयुक्तोद्विजोत्तम ॥ दिव्यवर्षसह स्रांतेचागतोधरणीतले ॥ ३६० ॥ १ । ४ । ८ । १६ । २० । २४ ।एषुवर्षेषुकष्टेनकष्टितः ॥ परमायुर्वर्षाणि ६५ ॥ ८७ अथमार्कंडे ययोगः ॥ अत्रजन्मनिमहारोगीकासेनखलुपीडितः ॥ शुक्रउवाच ॥ पूर्वकोस्तिकृतंकर्मवदविस्तरतोऽनघ ॥ ३६१ ॥ भृगुरुवाच ॥ पू र्वजन्मनिद्विजश्रेष्ठोनिषादनगरेवसन् ॥ सदाचाराच्चविभ्रष्टः पाखंडाऽऽचरणेरतः ॥ ३६२ ॥ एकस्मिन्समयेतत्रकृतंकर्मातिदारुणम् ॥ द्विजंकंचिदृणंदत्त्वायाचितंक्रोधहेतुना ॥ ३६३ ॥ नदत्तंतेनविप्रोसौताडितश्चदृढंतदा ॥ ग्रीवायांरज्जुमाबध्यस्वयमेवमृतश्चसः ॥ पापाच्चन रकेगत्वातेनेयमीदृशीदशा ॥ ३६४ ॥ १ । ३ । ८ । ९ । १३ । १६ । २१ । २५ । ३० । ३५ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७४ ॥ ८८ अथमर्दनयोगः ॥ अथचिंतामणिर्नामपूर्वजन्मनिपादजः ॥ देशेहिकीकटेचैवन्यवसत्परिवारयुक् ॥ ३६५ ॥ धनधान्यसमृद्धस्तुनानारत्नोपशोभितः ॥ दत्तानितेनदानानिपर्वस्वपिचशक्तितः ॥ ३६६ ॥ सुत्पात्रेभ्योद्विजेभ्यश्चहर्षगद्गदमानसः ॥

एकस्मिन्समयेविप्रभाविनोर्थस्यवैबलात् । ३६७ ॥ बाहुजस्यप्रसंगेनकृतंकर्मजुगुप्सितम् ॥ परदाराभिगमनंपरद्वेषंतथाऽकरोत् ॥
॥ ३६८ ॥ आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः ॥ ततोवैमानुषीयोनौमर्त्यलोकेसमागतः ॥ ३६९ ॥ गोधूमाकारवद्देहोदक्षेभागे
प्रचिह्नितः ॥ १ । ३ । ५ । ८ । १० । १३ । १६ । २० । २४ । ३० । ३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६० ॥ ८८ अथमालती
योगः ॥ आसीज्जन्मांतरेचैवकीचकोनामब्राह्मणः ॥ सर्वज्ञःसुगतोबुद्धःसदाचारसमन्वितः ॥ ३७० ॥ पठनेपाठनेव्यग्रःपरोपकरणेरतः ॥
एकस्मिन्समयेविप्रजगामगिरिगह्वरे ॥ ३७१ ॥ तत्रस्थित्वासशिष्येणशिवस्याराधनंकृतम् ॥ तीर्थावगाहनंकृत्वाकथांकृत्वाविशेषतः ॥
॥ ३७२ ॥ पारायणसंहितातुश्रीमद्भागवतस्यच ॥ एकदाचातिक्रोधेनस्वशिष्यश्चप्रताडितः ॥ ३७३ ॥ समृतस्तेनदुःखेनपापमाचरि
तंत्विदम् ॥ सविप्रःपंचतांप्राप्तःपुनर्भूत्वाचमानुषः ॥ धर्मवान्प्रीतिमांश्चैवप्रतिवक्तागुणाकरः ॥ ३७४ ॥ १ । ४ । ८ । १३ । १८ । २० ।
२८ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९२ ॥ ८० अथमलसंज्ञकयोगः ॥ कश्चिद्वैश्यकुलेपूर्वंसोरठेनगरेवसन् ॥ प्रपंचाधिकरणेव्य
ग्रश्चौरवृत्तिरतःसदा ॥ ३७५ ॥ एकस्मिन्समयेविप्रदुष्कर्मकृतवांस्तदा ॥ भागिनेयस्ययद्द्रव्यंतत्सर्वंचोरितंबलात् ॥ ३७६ ॥ समृत्वाह्य
र्शोरोगेणपापीचद्विजसत्तम ॥ यमदूतैःपीडितोऽभूद्बहुवर्षसहस्रकम् ॥ ३७७ ॥ पुनरागत्यमेदिन्यांमानुषत्वंगतस्ततः ॥ क्रूरत्वेचसदाव्य
ग्रःपाखंडाचरणेरतः ॥ पूर्वपापाऽनुसारेणभूत्वापिम्रियतेशिशुः ॥ ३७८ ॥ ९१ अथमकरध्वजयोगः ॥ आसीत्पूर्वेतुयानारीब्राह्मणस्यव
रांगना ॥ शौचाचाररताभव्यादेवतातिथिपूजका ॥ ३७९ ॥ पाकेचकुशलादक्षागणेशोमाप्रपूजिका ॥ वैशाखेकार्तिकेमाघेसास्नाताविम
लेजले ॥ ३८० ॥ पतिस्तस्यामहाकामीपरस्त्रीरतिलम्पटः ॥ कृतस्तयापतित्यागोव्रतंचान्द्रायणंकृतम् ॥ ३८१ ॥ मृत्वाव्रतान्तेसानारी

गतास्वर्गंतदाऽनघ ॥ पुनरागत्यमेदिन्यामांत्रवेंद्येसमुद्भता ॥ पतित्यागनकात्पापात्पतिंनालभतद्विज ॥ ३८२॥१।६।१२।१५। २०।२८।
३१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८५ ॥ ९२ अथमहनयोगः ॥ पूर्वजन्मनियानारीचांगिरादेशवासिनी ॥ सावित्रीसातुविख्याताह्रूप
यौवनसंयुता ॥ ३८३ ॥ कामेनकृच्छ्राद्दग्धासारतिमिच्छतिसर्वदा ॥ एकस्मिन्समयेदेवकृतंकर्मातिदारुणम् ॥ ३८४ ॥ चर्मकार
स्यसंगात्तुपापमाचरितंतदा ॥ तेनपापेनभोविप्रनरकेतुगताखलु ॥ ३८५ ॥ षष्टिवर्षसहस्रांतेचागताधरणीतले ॥ यौवनेतुपतिंलब्ध्वाशी
घ्रंतुविधवाऽभवत् ॥ ३८६ ॥ परमायुर्वर्षाणि ६० ॥ ९३ अथमोक्षयोगः ॥ आसीज्जन्मांतरेचैवबाहुजावंगदेशके ॥ दुर्भगाद्रोहसंयु
क्तापरजाररतासदा ॥ ३८७ ॥ एकस्मिन्समयेविप्रगंगासागरसंगमे ॥ सागतातत्रभोविप्रस्थित्वाचपरिवारयुक् ॥ ३८८ ॥ तत्रभाविब
लात्पुत्रसामृताज्वरपीडिता ॥ विमानाग्र्येचसास्थित्वागतास्वर्गंद्विजोत्तम ॥ ३८९ ॥ पुनरागत्यमेदिन्यांसुंदरीविमलेकुले ॥ पतिर्वांछास
दातस्याःपतिस्तस्यामहाभ्रमी ॥ ३९० ॥ १।२।८।१३।१७।२०।२५ वर्षेषुकष्टम्॥ परमायुर्वर्षाणि ६१ ॥ ९४ अथवज्राट
योगः ॥ आसीत्पूर्वभवेकश्चिद्विराटेद्विजसत्तमः ॥ विद्याऽभ्यासविहीनश्चकृषिकर्मरतःसदा ॥ ३९१ ॥ स्वल्पवित्तोबहुत्यागीबन्धुमा
न्युदारधीः ॥ स्ववर्णधर्मनिरतोऽतिथीनांपूजनेरतः ॥ ३९२ ॥ अथतस्यगृहेकश्चिद्द्विजःस्थापितवान्धनम् ॥ नदत्तंतत्पुनर्लोभाद्भुक्तं
पत्न्यासहद्विज ॥ ॥ ३९३ ॥ गत्वाधर्मपुरंदैवाच्छुभंतुयदिवाऽशुभम ॥ ३९४ ॥ फलंभुक्त्वाऽधुनाजातोभूत्वापिम्रियतेशिशुः ॥ ३९५ ॥
१।३।४।८।१३।१७।२० एषुवर्षेषुकष्टम ॥ मृत्युः ३७ ॥ ९५ अथबोधयोगः ॥ खसदेशेनरोजातःपरमोदारमानसः ॥ दयार्द्र
स्फुटवक्ताचपरमैश्वर्यसंयुतः ॥ ३९६ ॥ एकस्मिन्समयेविप्रब्राह्मणश्चातिदुर्बलः ॥ आगतस्तत्रभोविप्रपरिवारेणसंयुतः ॥ ३९७ ॥
... ॥ ३९८ ॥ समत्वात्तत्रचखलजगामपरमंपदम् ॥ मन्व

दृष्ट्वातुबाहुजस्तस्मसर्वस्वंचददातदा ॥ जगामकार्य॥विप्रःसहारद्धारततागतः ॥ ३९८ ॥ [illegible]
न्तरान्तरेविप्रचागतोभूमिमंडले ॥ ३९९ ॥ गौरांगःसुकुमारश्चदाताभोक्तादयाकरः॥४००॥३।६।११।१९।२०। २८ एषुवर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ७० ॥ ९६ अथबेधकयोगः ॥ कुरुक्षदेशेपरमेपवित्रेबभूवविप्रोद्विजदेवभक्तः ॥ क्षात्रश्चधर्मिष्ठउदारधीश्चसततपरोदेवतारा
धनेच ॥ ४०१ ॥ यज्ञान्बहुविधान्कृत्वादानानिविविधानिच॥त्यक्त्वाराज्यंवनंगत्वाचचारदुस्तरंतपः ॥ ४०२॥ सराजापंचतांप्राप्यस्वर्ग
वासीबभूवह॥अत्रजन्मनिविप्रोऽसौसर्वसम्पद्युतोदृढः ॥ ४०३ ॥ १।३।९।१०।१९।१७।२२।२८वर्षेषुकष्टम्॥परमायुर्वर्षाणि ८० ॥
९७ अथफलाशनयोगः ॥ विराटदेशेद्विजपूर्वकालेगोविंदनामासतुविद्ययायुतः ॥ पौराणिकीवृत्तियुतोप्युदारधीर्द्रव्याणितेनाऽपिहिसं
चितानि ॥ ४०४ ॥ एकदातुकृतंपापंद्विजपुत्र्यांरतिःकृता ॥ कालेनाल्पेनविप्रोऽसौमृत्वायातोयमालयम् ॥ ४०५ ॥ ततआगत्य
भूपृष्ठेमानुषःसुंदरोऽधुना ॥ धनीमानीमहाप्राज्ञःसर्वसौख्यसमन्वितः ॥ ४०६ ॥ २।१।१९।२४।३१।३९वर्षेषुकष्टम्॥परमायुर्वर्षाणि
७० ॥ ९८ अथफल्गुयोगः ॥ कश्चिद्विप्रोमहासाधुश्चारुवर्णःप्रतापवान् ॥ आचारकुलधर्मज्ञोदेवताद्विजवत्सलः ॥ संयुक्तोवातपित्ता
भ्यांकिंचिद्वित्तसमन्वितः ॥ तस्यभार्यासदाचाराकृच्छ्रव्रतपरायणा ॥ ४०७ ॥ पतिभक्तापतिप्राणाऽतिथीनांपूजनेरता॥सात्यक्तातेनवि
प्रेणपापमाचरितंत्विदम् ॥ ४०८ ॥ मृत्वाभुक्तातुनरकमागतश्चधरातले ॥ भार्यासुखविहीनश्चसर्वांगेषुचकष्टितः ॥ ४०९ ॥ २ । १२ ।
१९ । २० वर्षेषुकष्टम् ॥ ५९ वर्षेमृत्युः ॥ ९९ अथफेत्कारीयोगः॥पूर्वजन्मनियानारीबाहुजस्यतदाऽनघ ॥ देशेचदक्षिणेचैवपितातस्य
नराधिप ॥ ४१० ॥ गताश्वशुरगेहेसाबहुवर्षगतागतैः ॥ तत्रगत्वापतिंचैवश्वशुरंद्वेष्टिनित्यशः ॥ ४११ ॥ दम्पतीह्येकदावादंकृत्वाचै

वपरस्परम् ॥ आज्ञादानंविनैवाऽसौगताचपितृवेश्मनि ॥ ४१२ ॥ कालान्तरेतुमृत्वासागृहगोधाबभूवह ॥ इदंजन्मतृतीयंतुमध्यदेशे
समुद्भवः ॥ ४१३ ॥ ३ । ४ । ८ । १६ । २२ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६० ॥ १०० अथभारद्वाजीयोगः॥ कोंकणेन्यवस
त्पूर्वंब्राह्मणोदक्षिणेतटे ॥ सागरस्याग्निहोत्रंचकृतवान्सर्वदाखलु ॥ ४१४ ॥ पत्नीतस्यमृतातेनयज्ञभ्रष्टोबभूवह॥सविप्रःशोकसंतप्तोदंडी
खलुबभूवह ॥ ४१५ ॥ दंडिनापिकृतंपापंकामलोभेनवैतदा ॥ स्वशिष्यस्यगुदभ्रंशःकृतस्तेनतदाद्विज ॥ ४१६ ॥ मृत्वातुकुम्भीपाकंस
भुक्तावर्षसहस्रकम् ॥ ततोजातोधरापृष्ठेमानुषोव्याधिपीडितः ॥ ४१७ ॥ १० । २० । २२ । ३० । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि६०॥
१०१अथभोगीयोगः ॥ विंध्याद्रिनिकटेपूर्वंब्राह्मणोन्यवसत्पुरा ॥ माहेश्वरइतिख्यातोमूर्खश्चातिदुरासदः॥४१८॥ परदाराऽभिलाषी
चपरकार्यविनाशकः ॥ शुकंतुपालयित्वासपाठितोबहुयत्नतः ॥ ४१९ ॥ तेनपुण्येनचैवासौपितृलोकंतदागतः ॥ पितृलोकाद्विहीनश्च
मर्त्यलोकेऽपिमानुषः ॥ ४२० ॥ दयाधर्मविहीनश्चपीडयमानकलेवरः॥१।८।१६।२५एषुवर्षेष्वतिरुजावर्षेसप्ततितमेमृतिः७० ॥४२१॥
१०२ अथभोगकयोगः ॥ पूर्वंपांचालदेशेतुब्राह्मणोवेदपाठकः ॥ संतुष्टश्चविवेकीचदयाधर्मपरायणः ॥ ४२२ ॥ पत्नीतस्यसुशीला
चपातिव्रत्यपरायणा ॥ मन्तुंविनैवसात्यक्ताब्राह्मणेनाऽतिकोपतः ॥ ४२३ ॥ अनशनंतुव्रतंकृत्वामृत्वास्वर्गंगताचसा॥ कालान्तरेतुविप्रो
पिमृत्वायातोयमालयम् ॥ ४२४ ॥ तत्रभुक्तामहादुःखंचागतोधरणीतले॥गौरांगोमध्यदेहश्चभार्यादुःखेनदुःखितः॥४२५॥५ । ७ ।
१० । १५ एषुवर्षेषुमहाकष्टम् ७० सप्ततिवार्षिकंपरमायुः॥ १०३ अथभर्दुलयोगः ॥ भर्दुलेचनरोजातःपूर्वंजन्मनिपादजः ॥ कृषि
कर्मरतश्चासौगोधनेनापिसंयुतः ॥ ४२६ ॥एकस्मिन्समयेविप्रवृषश्चताडितोभृशम् ॥ तेनपापेनमृत्वाऽसौह्यसिपत्रेप्रताडितः ॥ ४२७ ॥

एवंभुक्त्वातुनरकंचागतोभूतलेद्विज ॥ दारिद्र्येणप्रपीडयश्चहस्तेनटुंटकश्चसः ॥ ४२८ ॥ १० । १६ । १८ । २९ वर्षेषुपीडा ॥ परमायुर्व र्षाणि४० ॥१०४ अथमांडवीयोगः ॥ पूर्वंकर्णाटकेचैववैश्यश्चद्विजसेवकः ॥ दानशीलोदयालुश्चस्वधर्मेनिरतःसदा ॥४२९॥ एकदात्वति थिश्चाऽगाद्भोजनंयाचितंतदा ॥ क्रोधाऽऽतुरेणतुतदानान्नंदत्तंतुभिक्षवे ॥ ४३० ॥ शापंदत्त्वातुगतवानतिथिश्चनिराशकः ॥ स्वल्पेनैवतु कालेनधनंयातंहिसंक्षयम् ॥४३१॥ धनशोकेनमृत्वासदुःखंभुक्त्वातुनारके ॥ आगत्यभूतलेविप्रबभ्रामचगृहेगृहे ॥ ४३२ ॥ ९ । १९।१६ एषुवर्षेषुमहाकष्टम् ॥ परमायुर्वर्षाणि ९०॥१०५ अथमुर्गलायोगः ॥चोलदेशेऽभवत्पूर्वंबाहुजःपरदर्पहा॥शिवभक्तश्चधर्मिष्ठःप्रजापालनत त्परः ॥ ४३३ ॥ अदंडयापिसगर्भाचब्राह्मणीताडितेकदा ॥ यातेकालेतुनृपतिःस्वर्गवासीबभूवह ॥ ४३४ ॥ ततश्चागत्यनृपतिर्म ण्डलेशोदयालुकः ॥ पूर्वपापेननृपतेःसगर्भामहिषीमृता ॥४३५ ॥ ११ । १६ । १८ एषुवर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥ १०६ अथमानन्दयोगः ॥ मानन्देचनरोजातोगौडदेशेपुराद्विज॥ ब्राह्मणःशिवभक्तश्चप्रदोषव्रतपालकः॥४३६॥शिवरात्रिव्रतंकृत्वाजागर णंकृतवान्नहि॥तेनपापेनविप्रोऽसौदारिद्र्येणप्रपीडितः॥४३७॥मृतोगत्वातुकैलासमागतोधरणीतले॥ धनधान्येनसंयुक्तःपुत्रपौत्रसमन्वितः ॥ ४३८ ॥ १९ । २९ । ३० वर्षेषुकष्टम्॥ परमायुर्वर्षाणि७०॥१०७अथमर्द्धयोगः॥मर्द्धयोगेनरोजातःपूर्वजन्मनिभिल्लकः॥घातिताब हवोजीवास्तदाचद्विजसत्तम ॥४३९॥ मृत्वाभुक्त्वामहाघोरंनरकंत्वत्रचागतः ॥ श्यामांगोह्रस्वदेहश्चसर्वेष्वंगेषुपीडितः ॥४४०॥ म्रियन्ते शिशवोजाताजाताश्चैवद्विजोत्तम ॥ द्वादशेषोडशेवर्षेमहारोगैःप्रपीडितः ॥ ४४१ ॥ परमायुर्वर्षाणि ९० ॥ अथमंजिष्ठयोगः १० ॥ मंजिष्ठ योगेयोजातोबाहुजःपूर्वजन्मनि ॥ सर्वक्रियापरिभ्रष्टःप्रजापीडनतत्परः ॥ ४४२॥ मद्यपानेषुव्यग्रश्चमृगयाव्यसनेरतः ॥ यातेत्वल्पेहिका

लेतुबाहुजःपंचतांगतः ॥ ४४३ ॥ भुक्त्वातुनरकंघोरमागतोधरणीतले ॥ सर्वैःसुखैर्विहीनश्चसंततेरहितश्चसः॥४४४॥ १५ । २० । २२
एषुवर्षेषुमहाकष्टम् ॥ ५० वर्षेमृत्युः ॥इतिश्रीभृगुसंहितायांपवर्गयोगकथनंनामाष्टमंप्रकरणंसमाप्तम् ॥८॥१ अथयवर्गकयोगः ॥ आसी
जन्मनियानारीब्राह्मणस्यपतिव्रता ॥ कृच्छ्रव्रतरताचोग्रासुशीलाधर्मपालिनी१॥नपुंसकःपतिस्तस्याःशिवस्यस्मरणेरतः॥कृतानितेनदा
नानिमहापर्वणितदाऽनघ॥२॥पतिर्मृत्युवशंयातःसाभूताचसतीतदा॥ गतासापरमंस्थानंयत्सुरैरपिदुर्लभम्॥३॥पुनरागत्यमेदिन्यांकुलेम
हतिचाधुना॥पतिपुत्रसमायुक्ताधनधान्यसमन्विता॥४॥१।५।८।१४।२०।वर्षेषुकष्टम्॥परमायुर्वर्षाणि ७० ॥ २अथयलवालाद्रियोगः॥
कश्चित्क्षात्रकुलेपूर्वंपपायादक्षिणेतटे॥भानुसिंहःसमाख्यातःपत्नीतस्यदुरासदा ॥ ५ ॥ बाहुजेनप्रहर्षेणगोदानंबहुकारितम् ॥ ब्राह्मणेभ्यो
ददौक्षेत्रंस्वर्णंदत्त्वाततःपरम् ॥ तीर्थावगाहनंकृत्वाबहुवर्षंतथानघ ॥ ६ ॥ स्वदेशेपिमृतःसोपिगतइंद्रपुरंप्रति ॥ षष्टिवर्षसहस्राणिभुक्त्वाच
स्वर्गजंफलम् ॥ ७ ॥ ततोवैमानुषीयोनौधनधान्यसमन्वितः ॥ पूर्वपत्नीभवेच्चात्रसर्वदाकष्टदायिनी ॥ ८ ॥ १।३।८।१४।१८।२०।
२७ । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७३ ॥ ३ अथयजमोदायोगः ॥ प्रयागेन्यवसत्पूर्वंचंद्रसेनिश्चब्राह्मणः॥ सर्वकर्मावधाताचद्[illegible]
ण्यपरायणः ॥ ९ ॥ शिवार्चनंकृतंसम्यग्गोशालाद्विजवेश्मच ॥ तेनपुण्यप्रभावेणअत्रजन्मनिधनेश्वरः ॥१०॥ १ । ३ । ८। १२। १५
१७ । २० । २४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ४ अथराजयोगः ॥ कालिंदीनिकटेपूर्वंब्राह्मणोवेदपारगः ॥ प्रयागेचागमत्सो
पितत्रस्थित्वाविशेषतः ॥ ११ ॥ सत्पात्रायविधिज्ञायदानंदत्त्वासहर्षितः ॥ गोदानमंत्रमेरुंचदत्तंतेनविशेषतः ॥ १२ ॥ एकस्मिन्समये
विप्रकृतंकर्माऽतिदारुणम् ॥ कामलोभेनवैतत्रपरभार्यागमनंकृतम् ॥ १३ ॥ तेनपापानुसारेणभुक्त्वानरकजंफलम् ॥

पुनर्वैमानुषोभूत्वागंगायादक्षिणेतटे ॥ १४ ॥ आजन्मनोधनंधान्यंकन्याश्चबहवोद्विज ॥ प्रथमेपंचमेवर्षेद्वादशेचैवषोडशे ॥ १५ ॥
द्वाविंशेत्रिंशवर्षेवापंचत्वंसमवाप्नुयात् ॥ पुनर्जन्मभवेत्तस्यनात्रभार्गवसंशयः ॥ १६ ॥ ५ अथरनाग्रयोगः ॥ आसीज्जन्मांतरे
चैकब्राह्मणःशक्तिपूजकः ॥ ,देशेहिमैथिलेचैवन्यवसत्परिवारयुक् ॥ १७ ॥ वीरेश्वरसमाख्यातः पत्नीतस्यचमत्कृतिः ॥ व्रतपूजोप
चरणेसमर्थश्चसदाऽनघ ॥ १८ ॥ एकस्मिन्समयेविप्रवैरभावेनब्राह्मणः ॥ मारणोच्चाटनंकृत्वानाममात्रेणभोसुत ॥ १९ ॥ उन्मुक्तिकरणं
विप्रकृत्वातेनविशेषतः ॥ अथकालेगतेविप्रसंमृत्वानरकेगतः ॥ ततोवैमानुषीयोनौमर्त्यलोकेसमागतः ॥ २० ॥ १।८।१६।२०।
२५। वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१ ॥ ६ अथराजीवयोगः ॥ कश्चित्तुबाहुजोजातोदशारण्येतदानघ ॥ कृतानिपुण्यदानानिब्राह्म
णाभोजिताभृशम् ॥ २१ ॥ एकस्मिन्समयेविप्रमित्रद्रोहमथाकरोत् ॥ तेनपापानुसारेणनरकंगतवान्द्विजः ॥ २२ ॥ बहुवर्षसहस्रांते
मानुषोपिततोऽधुना ॥ ईषद्गौरोप्युदारश्चकिंचिद्वित्तसमन्वितः ॥ २३ ॥ विद्याविनयसम्पन्नः स्वक्रियानैष्ठिकःसच ॥ २४ ॥ १।२।३।५
७।११।१६।२०।२४।३०। वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०० ॥ ७ अथरामयोगः ॥ पूर्वजन्मनिक्षात्रस्तुकीकटेहितदाऽ
वसत् ॥ धनधान्यसमृद्धस्तुबहुपृथ्वीसमन्वितः ॥ २५ ॥ भागिनेयःसमायातोमहाबलपराक्रमी ॥ कचित्कालवशंयातः कृत्वायुद्धंपर
स्परम् ॥ २६ ॥ भागिनेयस्यचैतेनखड्गेनच्छेदितंशिरः ॥ यमलोकेगतःसोथाशीतिवर्षसहस्रकम् ॥ ततोवैमानुषीयोनौराजरोगेणक
र्षितः ॥ २७ ॥ १।३।५।८।१६।२२।२८।३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०५ ॥ ८ अथराघवयोगः ॥ भद्राक्षेनगरे
पूर्वविष्णुदासेतिवैश्यजः ॥ पाखंडाचरणेनिष्ठआत्मनाविनियोजितः ॥ २८ ॥ मित्रद्रोहःकृतस्तेनतथाविप्रंजघानह ॥ धनहीनोथवारोगी

सुखमध्येह्युदासत ॥ २९ ॥ अथवासंततेश्चिताजायतेनात्रसंशयः ॥ कार्य्यहानिःप्रजायेतराजद्वारेव्यथाभवेत् ॥ ३० ॥ गोदानमश्वदानंच
राजतंचहिरण्यकम् ॥ कृतेदानार्चनेसौख्यंजायतेभृगुनंदन ॥ ३१ ॥ तीर्थवासेकृतेतस्यपुत्रोभवतिनान्यथा ॥ चांद्रायणव्रतंकुर्य्यात्सर्वरो
गोपशांतये ॥ ३२ ॥ १ । ३ । ५ । ८।१२।१७।२०।३०।३२।३६।४०।४१। वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६५ ॥ ९ अथराटकयोगः ॥
चंपारण्येनरःपूर्वंबाहुजःशिवभक्तिमान् ॥ ब्राह्मणानांकृतासेवैकादश्याश्चव्रतंतथा ॥ ३३ ॥ एवंनिवसतस्तत्रबहुवर्षगतागतैः ॥ अरातेश्च
विघातार्थंसंधानंचकृतंद्विज ॥ ३४ ॥ तेनपापानुसारेणचात्रजन्मनिपीडितः ॥ रोगाश्चविविधाजातायौवनेपूर्वकर्मणा ॥ ३५ ॥ १।३।८
११ । १६ । २० । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६८ ॥ १० अथराडयोगः ॥ आसीज्जन्मांतरेचैवपादजोवंगदेशके ॥ कृषिकर्मोद्यमे
व्यग्रोधान्यराशिःकृतोभृशम् ॥ ३६ ॥ एकस्मिन्समयेविप्रहलंचवृषभेवहन् ॥ लगुडैस्ताडितोविप्रसमृतःस्वेनकर्मणा ॥ तेनदुष्टेनभो
विप्रपापमाचरितंत्विदम् ॥३७॥ पादजो भास्करेर्लोकंगतोतियमपीडितः ॥ रौरवाच्चविनिःसृत्यमानुषोपिततोऽभवत् ॥ ३८ ॥ षोडशा
ब्देऽतिकष्टंचचतुर्विंशेततःपरम् ॥ षष्टिवर्षांतरेमृत्युर्जायतेनात्रसंशयः ॥ ३९ ॥ ११ अथरीतुलंसकयोगः ॥ अथकेदारदेशेतुब्राह्मणःशक्ति
पूजकः ॥ हृदयेतिसमाख्यातःपत्नीतस्यसुशीलिका ॥ ४० ॥ शांतःशुद्धःसमःस्वच्छोनिश्छलीपापवर्जितः ॥ एकस्मिन्समयेविप्रह्यज्ञाने
नविमोहितः ॥ ४१ ॥ सम्बंधिनोधनंनीत्वातस्मैकन्यासमर्पिता ॥ तेनपापानुसारेणभुक्त्वाभोगांश्चशाश्वतान् ॥ ४२ ॥ पुण्याच्च
मातुषलोकंमध्यदेशंसमागतः ॥ ४३ ॥ १ । ४ । ६ । ८ । ११ । १५ । १९ । २० । २७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६७॥१२ अथ
रोगयोगः ॥ जयापत्तनकेविप्रचोलदेशेद्विजोपिसः ॥ तस्यपत्नीमहाशुभ्राकामस्येवप्रियायथा ॥ ४४ ॥ परपुंसिरताविप्रपापानि

कृतघ्नसौ ॥ तत्सकाशाच्चभोविप्रवभूवधनवत्यपि ॥ ४५ ॥ किंचित्पुण्यार्जनंकृत्वामृत्वायमपुरेगतः ॥ तिर्यग्योनिसमुत्पन्नःकीटभृंगवि
हगादिषु ॥ पश्चान्मानुष्यमापन्नश्चात्रदेशेऽधुनानघ ॥ ४६ ॥२।४।६।१०।१३।१६।२०।२८।३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि७७॥ १३
अथरोमावलियोगः ॥ मैथिलेनगरेपूर्वंब्राह्मणःशास्त्रकोविदः ॥ असद्व्यापीदुराधर्षःपरपीडननिंदकः ॥ ४७ ॥ अर्भकान्पाठयेत्तत्रप्रातिर्भू
पानुकम्पया ॥ सविप्रःपंचतांप्राप्तःपापात्पापफलंभृशम् ॥ ४८ ॥ पुण्यात्पुण्यफलंभुक्त्वाधरण्यांसौख्यसंयुतः ॥ प्रथमेब्देतृतीयेचह्यष्टमेच
प्रपीडितः ॥ ४९ ॥ षोडशेविंशवर्षेचमहाकष्टेनकष्टितः ॥ परमायुर्वर्षाणि ७१ ॥ १४ अथरोशनयोगः ॥ यामुनेनगरेपूर्ववैश्योनामज
नार्दनः ॥ क्रयविक्रयकर्ताचद्रव्यस्योत्पादनेरतः ॥ ५० ॥ पत्नीतस्यमहासाध्वीगृहकर्मोद्यमेरता ॥ एकस्मिन्समयेविप्रकृतंकर्मचदारुण
म् ॥ ५१ ॥ भ्रातुर्वधात्कृतंपापंद्रव्यलुब्धेनचेतसा ॥ समृत्वापापभागीचयमलोकेतदागतः ॥ ५२ ॥ रौरवेनरकेचैवप्रक्षिप्तोयमदूतकैः
॥ ५३ ॥ तिर्य्यग्योनिसमुत्पन्नोवारंवारंधरातले ॥ इदंद्वितीयंजन्मस्याद्धनपुत्रविवर्जितः ॥ ५४ ॥ १।२।४।५।७।९।१२।१६।२०।२५।
३०।३५।४४। वर्षेष्वेतेषुकष्टंस्यात्षष्टिवर्षाणिजीवति ॥ १५ अथरत्यायोगः ॥ पूर्ववनोत्तरेवासोब्राह्मणोधनवानपि ॥ शिवसेवारतस्त
त्रब्राह्मणानांप्रतोषकः ॥ ५५ ॥ एकस्मिन्समयेविप्रवनंदग्धंदवाग्निना ॥ तेनपापानुसारेणचेदानींकष्टसंयुतः ॥ ५६ ॥ १।३। ९। १४।
१७।२१।२६।३१।३६।४०वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६१ ॥ १६ अथरोपणयोगः ॥ कालिंदीकूलकुंजेनिवसतिरुचयोमाथुरीयोषि
तश्चतत्रैकोवैश्यसूनुःशिवपदनिलयोनिर्विकारोबलिष्ठः ॥ नानारत्नोपशोभीरविरिवमणिमान्शांतचित्तोऽतिभक्तःपत्नीतस्यातिदुष्टापरपु
रुषरतांचंचलासुन्दरीसा ॥ ५७ ॥ स्वपत्युर्वंचिकाभ्रष्टाकामदग्धादुरासदा ॥ ५८ ॥ एकस्मिन्समयेविप्रदृष्ट्वातांतुसकोपतः ॥ मुष्टिकाहन

नंकृत्वासामृताकमलानना ॥ ५९ ॥ स्त्रीहत्यापापदोषे णचात्रजातोव्यथाकुलः ॥ सर्वथादुःखदारिद्र्यंपुत्रपीडातथाऽनघ ॥ ६० ॥
१ । ३ । ६ । ८ । १३ । १६ । १७ । २१ । ३१ । ४० एतद्वर्षेषुमहाकष्टम् ॥ परमायुर्वर्षाणि ७४ ॥ १७ अथरोखायोगः ॥ अथका
लञ्जरेदेशेबाहुजःसत्यधार्मिकः ॥ पत्नीमनोहरातस्यचंद्रकांतिसमप्रभा ॥ ६१ ॥ अन्योन्यप्रीतिवशतोबहुवर्षगतागतैः ॥ एकस्मिन्स
मयेविप्रहृष्टास्वीयांसकोपतः ॥ ६२ ॥ परपुंसिसमासक्तांपर्य्यंकेरतिकर्तृकाम् ॥ राज्यंत्यक्त्वावनंगत्वातपश्चर्य्यामथाकरोत् ॥ ६३ ॥ वनां
तरेमृतःसोपिगतोसौपरमंपदम् ॥ पुनरागत्यमेदिन्यांसर्वसौख्येनसंयुतः ॥ ६४ ॥ १ । २ । ४ । ८ । १२ । १७ । २२ । २८ । ३० । ३६ ।
४० । ४६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥ १८ अथरोमावलीयोगः ॥ अनिरुद्धपुरेरम्येब्राह्मणोवेदपारगः ॥ देवशर्माइतिख्यातःप
त्नीपुत्रसमन्वितः ॥ ६५ ॥ प्रवृत्तिविद्यागमशास्त्रपारगः समस्तलोकेगुणिनांगुणाढ्यः ॥ शिवंस्मरन्ध्यानसमाधिनिष्ठोविमोहशून्यश्चप
रोपकर्ता ॥ ६६ ॥ शिवानुकम्पापरमंपदंगतंशिवस्यलोकंपरमंपवित्रम् ॥ पुनश्चभूमौससमागतोहिचानंदमूर्तिःसतुसर्वधार्मिकः ॥ ६७ ॥
अनेकलक्ष्मीर्जगतीजगत्पतिः समागतस्तत्रनचक्षयःक्वचित् ॥ सर्वंह्यनित्यंप्रविलोकितंचसमाजगौकाननवासवांश्च ॥ ६८ ॥ मृत्युंशता
ब्देह्यलभत्स्वयेच्छयापुनर्नजातःसचमुक्तिलाभात् ॥ ६९ ॥ इति ॥ १९ अथराज्ञीयोगः ॥ अथकाम्पिल्यनगरेवसंतिबहवोजनाः ॥
यमुनानिकटेचैवप्रकीर्णैर्गुणिनांगुणैः ॥ ७० ॥ सत्राजितोनामराजाबभूवक्षितिमंडले ॥ नानासैन्यसमायुक्तःपत्नीहारवतीशुभा ॥
॥ ७१ ॥ पुत्रौद्वौचमहाभव्यौपितृभक्तौहिचानुगौ ॥ प्रजाःपालयतेसम्यक्पुत्रवच्चतदानघ ॥ ७२ ॥ एकदाविप्रराज्ञातुयज्ञोऽका
रिसुनिश्चितम् ॥ आहूताब्राह्मणाःसर्वेयज्ञमध्येतदानघ ॥ ७३ ॥ दत्तानितेनदानानिस्वर्णमुद्रास्तथाभृशम् ॥ बधिरेणद्विजेनाथमहाको

लाहलः कृतः ॥ ७४ ॥ संमुखः पतितोह्यग्नौ भस्मीभूतस्तदानघ ॥ तेनपापेनभोविप्रभूपतिर्दुःखसंयुतः ॥ ७५ ॥ पुण्येनजन्मनैवंसधनपुत्र
समन्वितः ॥ दक्षिणांगेमुखेपार्श्वेचिह्नंतस्यप्रदर्शितम् ॥ ७६ ॥ युवभावेभवेत्कष्टीराजरोगेणभोसुत ॥ ७७ ॥ १ । ३ । ५ । ८ । ११ ।
१५ । २० । २४ । ३१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५५ ॥ २० अथराजयोगः ॥ आसीज्जन्मांतरेचैवराजाशूद्रकुलेतदा ॥
जीमूतेतिसमाख्यातोविदर्भेह्यवसत्पुरा ॥ ७८ ॥ धनधान्यसमृद्धस्तुसहसैन्येनराजते ॥ कृत्वादंडंविदंडंचप्रजानांलुंठनेरतः ॥ ७९ ॥
मित्रद्रव्याणिसर्वाणिगृहीत्वाविविधैश्छलैः ॥ प्राप्तेवार्द्धक्यसमयेकिंचित्पुण्यार्जनंकृतम् ॥ ८० ॥ पापात्पापफलंभुक्त्वापुण्यात्पुण्यफ
लंतथा ॥ ततोवैमानुषीयोनौचागतोभूमिमंडले ॥ ८१ ॥ १ । ४ । ६ । ८ । १२ । १६ । २० । २५ । ३१ वर्षेषुकष्टम् ॥ परमायुर्व
र्षाणि ७३ ॥ २१ अथराजतीयोगः ॥ पूर्वजन्मांतरेचैवबाहुजः पूर्वजन्मनि ॥ भद्रसिंहः समाख्यातः पत्नीतस्यमनोहरा ॥ ८२ ॥ कृता
नितेनदानानिपर्वस्वपिविशेषतः ॥ एकस्मिन्समयेविप्रविदग्धंब्राह्मणगृहम् ॥ ८३ ॥ निर्दग्धाश्चतथाजीवाः पापमाचरितंत्विदम् ॥ तस्मा
त्पापाच्चभोविप्रशीघ्रंचनरकेगतः ॥ ८४ ॥ ततोवैमानुषीयोनौकुलेमहतिजातवान् ॥ प्रथमेनवमेवर्षेकष्टेनातिप्रपीडितः ॥ ८५ ॥ १ ।
३ । ८ । ११ । १८ । २० । २४ । २८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०६ ॥ २२ अथराजनीतियोगः ॥ अथवेश्याकुलेजातास्वैरि
णीपरगामिनी ॥ पापाच्चविपुलंद्रव्यंलब्धमत्रद्विजोत्तम ॥ ८६ ॥ पूर्वजन्मनिसानारीकावेरीनिकटेऽवसत् ॥ द्रोणभूपस्यदुहितासुन्दरी
चातिशोभना ॥ ८७ ॥ गुप्तपापंचकारासौपतिवंचनतत्परा ॥ तेनेयंगणिकाजातापुण्याच्चैवशुभानना ॥ ८८ ॥ १ । ३ । ५ । ८ । १२ ।
१६ । २० । २७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥ २३ अथरमायोगः ॥ आसीज्जन्मांतरेचैवपादजोवंगदेशके ॥ शुद्धबुद्धिःसमाख्या

तोद्रव्यस्योत्पादनेरतः ॥ ८९ ॥ नानाछलैश्चसंयुक्तोद्रव्यंतुकृतवान्भृशम् ॥ आयुषस्तुसमाप्तत्वात्समृतःकालचोदितः ॥ ९० ॥ पापा त्पापफलंभुक्त्वापुण्यात्पुण्यफलंतथा ॥ मानुषश्चापिह्यधुनाबहुकष्टेनकष्टितः ॥ ९१ ॥ परमायुर्वर्षाणि ८३ ॥ २४ अथराजेन्द्रयोगः ॥ अथविश्वावरोनामब्राह्मणःशास्त्रपाठकः ॥ काव्यकर्त्तागुणज्ञश्चलोलुपश्चातिनिंदकः ॥ ९२ ॥ तस्मिन्ग्रामेऽवसत्त्वेकोबाहुजोधनवानपि ॥ तस्यद्रव्यंभुक्तवान्सरेमेतस्यैवभार्यया ॥ ९३ ॥ एवंस्वल्पेगतेवर्षेब्राह्मणोमृत्युमागतः ॥ सतेनकर्मणायुक्तःप्राप्तस्तुयमशासनम् ॥ ९४ ॥ पश्चान्मानुष्यमापन्नःसुखदुःखसमन्वितः ॥ ९५ ॥ १ । ३ । ४ । ६ । ८ । १० । १३ । १६ । २० । २७ वर्षेषुकष्टम् ॥ परमायुर्व र्षाणि६२ ॥ २५ अथगघुद्दायोगः ॥ जालंधरस्यनिकटेपूर्णदेवेतिब्राह्मणः ॥ ब्रह्मचर्य्यरतःसोपिधनधान्यविवर्जितः ॥॥ ९६ ॥ जपकर्म णिनिष्ठःसदेवताऽऽराधनेरतः ॥ नृपाश्चबहवःशिष्यानिर्विकारोपिब्राह्मणः ॥ ९७ ॥ मृतःस्वर्गपुरंगत्वाशिवलोकमुवासच ॥ ततःपुण्य क्षये जातेब्राह्मणश्चाऽऽभवत्पुनः ॥ ९८ ॥ षष्टिवत्सरपर्य्यंतंस्वयंराज्यंचकारह ॥ ६० ॥तस्यायुर्वर्षाणि ७१ ॥ २६ अथरामायोगः ॥ केरातेदेशकेपूर्वंबाहुजोधर्मसंज्ञकः ॥ सभार्य्यःपुत्रसहितःकृषिकर्मोद्यमेरतः ॥ ९९ ॥ कृतानितेनदानानिगजाश्वसहितानिच ॥ एकस्मि न्समयेविप्रकृतंकर्मतुदारुणम् ॥ १०० ॥ प्रभातेनिर्गतःसोपिवनाद्रिनिकटेतदा ॥ गोधनेनसमाकीर्णोदैवात्तत्रद्विजोत्तम॥१०१॥गौश्चको पातुराप्येकातस्योपरिप्रधाविता ॥ लगुडैस्ताडितातेनसामृताद्विजसत्तम ॥ १०२ ॥ पापमाचरितंतेनगोपितंचस्मरंतदा ॥ सक्षात्रःपंचतां प्राप्तोगतोसौयमशासनम् ॥ १०३ ॥ बहुवर्षसहस्रांतेमानुषश्चततोऽभवत् ॥ श्वेतकुष्ठमभूत्तेनपीड्यमानोमुहुर्मुहुः ॥ १०४ ॥ १ । ३ । ६ । ८ । ११ । १४ । १७ । २० । २५ । २९ । ३१ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥ २७ अथराकायोगः ॥ आसीज्जन्मांतरेचैवकी

टदशवसुन्सुधाः ॥ गोकर्णेतिसमाख्यातःपत्नीपुत्रसमन्वितः ॥ १०५ ॥ शतग्रामाधिपः सोपिभ्रमिकश्चातिजल्पकः ॥ एवंगेहंकृतंतत्र
चर्चितंचविचित्रितम् ॥१०६॥ माणिक्यकलशोपेतंनवभांडमनोहरम् ॥ आरामंविविधंकृत्वाब्राह्मणास्तोषिताश्चवै ॥ १०७ ॥ एकस्मि
न्समयेविप्रपापमुग्रमुपार्जितम् ॥ परस्त्रीगमनंकृत्वागंगामध्येतदानघ ॥ १०८ ॥ पापाच्चनरकंयातःपुण्यात्पुण्यफलंतथा ॥ ततोवैमानुषी
योनौसुंदरश्चातिभोगभाक् ॥ १०९ ॥ १ । ३ ।९।१६।२०। वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ २८ अथरावतीयोगः ॥ आसीत्पूर्वे
भवेकश्चिन्निषादोजाह्नवीतटे ॥ जीवानांघातनेप्यग्रोदुराधर्षोपिदुर्मुखः ॥ ११० ॥ निंदकःपापभागीचपरस्त्रीरमणेरतः ॥ बाहुजस्य
सहायेनमार्गलुंठनतत्परः ॥ १११ ॥ ब्राह्मणस्यहृतंवित्तंलगुडेनसताडितः ॥ सतेनकर्मणायुक्तःप्राप्तस्तुयमशासनम् ॥ ११२ ॥ सनाना
नरकेस्थित्वादिव्यवर्षसहस्रकम् ॥ ततोवैमानुषोजातःसर्वकष्टेनकष्टितः ॥ ११३ ॥ १ । ४ । ८ । १२ । १८ । २४ । वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ७० ॥ २९ अथरामेश्वरयोगः ॥ आसीज्जन्मांतरेचैवबाहुजःखसदेशके ॥ आखेटकेरतोनित्यंमृग्येकाचहतातदा ॥११४॥
सगर्भासाबभूवात्रपापमाचरितंत्विदम् ॥ षष्टिवर्षसहस्राणिभुक्त्वापियमयातनाम् ॥ ११५ ॥ पुनरागत्यमेदिन्यांधनधान्यसमन्वितः ॥
नभवंतिसुतातस्यभूत्वापिचनजीवति ॥ कन्याद्वयंत्रयंवापिजायतेनात्रसंशयः ॥ ११६ ॥ १ । ४ । ८ । १४ । १७ । २० । २८ ।३८।
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ ३० अथराहुयोगः ॥ प्राग्जन्मनिमहाभागगौरीदेशेचपादजः ॥ कृत्वास्वर्णमयंछत्रंगोसहस्रंतदा
नघ ॥ ११७ ॥ ब्राह्मणेभ्योददौविप्रस्वर्णालंकरणैर्युतम् ॥ तेनपुण्यप्रभावेणराजवत्सुखभोगभाक् ॥ ११८ ॥ धनीमानीविशालाक्षोबहु
भृत्यसमन्वितः ॥ गौरांगश्चपलोवक्तादाताचासौबलोत्कटः ॥ ११९ ॥ अकस्माच्चभवेत्क्रोधीपुनःशांतश्चजायते ॥ पंचषष्ट्यब्दतः

सौख्यंराजमान्योरणेजयः ॥ १२० ॥ धनकीर्तिर्भवेत्तत्रबहुभृत्यादिसंवृतः ॥ अष्टादशेतुविंशेवामहाकीर्तिर्धनंतथा ॥ १२१ ॥ दिने
दिनेमहासौख्यंवर्द्धतेनात्रसंशयः ॥ राजरोगीचविकलःयुवभावेततोऽधुना ॥ १२२ ॥ परमायुर्वर्षाणि ७३ ॥ ३१ अथरात्रियोगः ॥
चन्द्रभागानदीतीरेमर्कटोनामब्राह्मणः ॥ महाभिमाननिरतः किंचिद्विद्यासमन्वितः ॥ १२३ ॥ शिवार्चनंकृतंतत्रषोडशैरुपचारकैः ॥
एकस्मिन्समयेविप्रगुरुद्रव्यंतुचोरितम् ॥ तेनपापेनसर्पोऽभूत्पुण्याच्चमानुषोधुना ॥ १२४ ॥ १ । ४ । ७ । ९ । ११ । १३ । १५ ।
१७ । २० । २५ । ३० । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७७ ॥ ३२ अथराजियोगः ॥ चिन्तामणिपुरेरम्येनर्मदानिकटेतदा ॥
बाहुजःसर्वधर्मज्ञोविद्यायांपरिशीलितः ॥ १२५ ॥ काव्यकर्ताविवेकाढ्यःपरोपकरणेरतः ॥ एकदाचन्द्रमोग्रस्तेब्राह्मणायददौधनम् ॥
॥ १२६ ॥ पुनर्लोभेनभोविप्रहृतंतेनधनंबलात् ॥ अयंसंततिहीनश्चमध्येरोगसमाकुलः ॥१२७॥ प्रथमेतृतीयेषष्ठेद्वादशेचापिविंशके॥
कष्टेनविकलोविप्रकृतदानैःप्रमुच्यते ॥ १२८ ॥ ३३ अथराजीवयोगः ॥ भीष्मकोनामविप्रोसौप्रयागेन्यवसत्तदा ॥ तीर्थेतीर्थेकृता
सेवाऋषीणांचपुनःपुनः ॥ १२९ ॥ देवार्चनंविप्रभक्तिंकृत्वासावत्रजन्मनि ॥ सुखीसुकर्मकृच्चैवधर्मिष्ठोबहुपुत्रवान् ॥ १३० ॥
बहुस्त्रीभिःसमंभोगीबुद्धिमांश्चविचक्षणः ॥ अतिस्वस्थोभवेद्दाताधनाढ्यस्तेजसांपतिः ॥ १३१ ॥ त्रिंशद्वर्षेगतेनूनंमहासौख्यं
प्रजायते ॥ रक्तवातोद्भवापीडाराजरोगः प्रवर्त्तते ॥ १३२ ॥ १ । ४ । ८ । १३ । १९ । २० । २७ । ३४ । वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ८१ ॥ ३४ अथरंकयोगः ॥ पूर्वेगंगातटेचैवरुद्रसेवाकृताभृशम् ॥ जन्मन्यस्मिन्तथैवापिनाधिकश्चभवेन्नरः ॥ १३३ ॥ दा
ताचैवचभोक्ताचराजमान्योगुणाधिकः ॥ परोपकारीधर्मात्माकीर्तिमान्धनवांस्तथा ॥ १३४ ॥ षोडशाब्देतथाविंशेसौख्यंह्यात्मबलैर्भ

वेत् ॥ गजवाजिधनैर्युक्तोराजावाराजमंत्रिकः ॥ १३५ ॥ रुद्रसेवाप्रभावेणचैवंभूतोद्विजोत्तम॥ तपस्वीर्निंदितःपूर्वंतस्माद्धीनफलोभवेत् ॥
॥ १३६ ॥ चिंताचजायतेतस्यसौख्यंचाल्पधनंसुत ॥ १३७ ॥ परमायुर्वर्षाणि ७५ ॥ ३५ अथरागयोगः ॥ अथवैकीकटेदेशेब्राह्मणो
बहुपाठकः ॥ गदाधरइतिख्यातः पत्नीतस्यपतिव्रता ॥ १३८ ॥ सर्वविद्याविवेकीचदेवताऽऽराधनेरतः ॥ एकस्मिन्समयेविप्रकृतंकर्मजु
गुप्सितम् ॥ १३९ ॥ ब्राह्मणस्यहृतंद्रव्यंब्रह्मस्वंभक्षितंतदा ॥ तेनेदंकष्टबहुलंचोदरेपीडनंभृशम् ॥ १४० ॥ १ । ४ । ८ । ९ । १२ ।
२० । २८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८५ ॥ ३६ ॥ अथकीकटयोगः ॥ देशेकीकटकेजातः पूर्वजन्मनिब्राह्मणः ॥ विष्णुदत्तइति
ख्यातोविष्णुपूजापरायणः ॥ १४१ ॥ एकदाविष्णुपूजायामागतश्चगुरुर्द्विज ॥ गर्वेणतुनतिंचैवनचकारद्विजोत्तम ॥ १४२ ॥ क्रुद्धेनगुरु
णाशप्तउन्मत्तश्चबभूवह॥स्वल्पेकालेमृतः पश्चाद्गतवान्यममंदिरम् ॥ १४३ ॥ तत्रभुक्त्वातुपापस्यफलंजातोधरातले ॥ अस्मिञ्जन्मनि
मूर्खश्चमहापीडासमन्वितः ॥ १४४ ॥ १५ । २५ । ३४ । वर्षेषुकष्टम् ॥ ७० वर्षेमृत्युः ॥ ३७ अथरोगजयोगः ॥ कृपाचार्य्योद्विज
स्त्वेकोहस्तिनानगरेशुभे ॥ सर्वसम्पद्युतोमानीदाताभोक्तानिरामयः ॥ १४५ ॥ एकस्मिन्समयेविप्रकृतंकर्मजुगुप्सितम् ॥ कुमारीगमनं
कृत्वाविधवागमनंकृतम् ॥ १४६ ॥ प्राप्तोयमपुरंसोपिभुक्त्वाभोगांश्चशाश्वतान् ॥ षष्टिवर्षसहस्रांतेमानुषोपिततोऽधुना ॥ गौरांगःस्पष्टव
क्ताचक्षिप्रकोपीदयापरः॥१४७॥१।४।८।११।१६।२०।२७।३८ वर्षेषुकष्टम् ॥ परमायुर्भवेत्तस्यसमाःषष्टचन्दकंक्रमात् ॥ १४८ ॥ ३८
अथरजकयोगः ॥ यथेष्टदेवार्चनध्याननिष्ठः सतांप्रसंगंप्रकरोतिनित्यशः ॥ विश्वंभरोवैसजगत्प्रसिद्धश्चोलेसुदेशेन्यवसत्तदाच ॥
अथभाविबलात्पुत्रपापमाचरितंतदा ॥ १४९ ॥ देवालयेतदाविप्रमित्रपत्न्यांरतिःकृता ॥ तेनपापानुसारेणसगत्वायमलोककम् १५०॥

यमलोकात्परिभ्रष्टश्चागतोभूमिमंडले ॥ १९१ ॥ १ । ३ । ५ । ८ । ११ । १४ । १७ । २० । २४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि७१॥
३९ अथरोचनयोगः ॥ कृष्णानद्याश्चनिकटेपूर्वजन्मनिब्राह्मणः ॥ प्रसन्नइतिचाख्यातः पत्नीतस्यप्रभाकरी ॥ १९२ ॥ सर्वविद्यावि
वेकीचतामसीचसदार्तिकः ॥ एकस्मिन्समयेविप्रब्राह्मणोप्येकआगतः ॥ १९३ ॥ कोस्तिकोस्तिब्रुवन्रोषात्कृतंयुद्धंपरस्परम् ॥ अपभ्रंशं
वदन्वाक्यंशापंदत्त्वाजगामसः॥१९४॥सविप्रोराक्षसोभूत्वापुनर्भूत्वाचब्राह्मणः ॥ गौरांगोमध्यदेहश्चचंचलश्चतुरःसुधीः ॥ १९५ ॥
ग्रामिकोहिपरोक्षेचपरनिंदापरायणः ॥ कंठेमूर्ध्निभवेच्चिह्नंयुवभावेप्रपीडितः ॥ १९६ ॥ परमायुर्भवेत्तस्यषष्टिवर्षंद्विजोत्तम ॥ १९७ ॥
४० अथरणवर्द्धनयोगः ॥ पूर्वपौंड्रीकदेशेन्यवसतसचवैवैरिहंताधनाढ्यः धीरोवीरोगभीरोहयगजरथकायस्यद्वारेसदैव॥ दाताशूरःसुकर्मा
जगतिसुविदितोभूरिरत्नादिपूर्णोभूपालैर्यातिसाम्यंबहुसुतभृतकैर्दीर्घमायुर्मनोज्ञः॥१९८॥हरगेहंकृतंपूर्वंतेनायंसुखसंयुतः॥ पुत्रपौत्रादियुक्त
श्चजायतेनात्रसंशयः॥१९९॥वृद्धकालेमहादुःखंपुत्रपौत्रादितोध्रुवम् ॥ शुक्रउवाच ॥ किंजाप्यंकस्यपूजाचकिंदानंचकिमौषधम् ॥१६०॥
भृगुरुवाच॥पूर्वंतपस्वीनिहतस्तेनदुःखमभूत्खलु॥शनेःसप्ताऽक्षरंमंत्रंभौममंत्रंचत्र्यक्षरम्॥१६१॥द्विसहस्रमितंजप्त्वाप्रत्येकंतुद्विजोत्तम॥ रज
तंसप्तपट्टंचसप्तपट्टंचहाटकम्॥१६२॥वृषभंवस्त्रगोधूमौप्रदद्याद्ब्राह्मणायच ॥ एतद्दानोपचारेणसर्वंदुःखंप्रणश्यति ॥१६३॥ सप्तजन्मनिनो
दानेरंतेरोगीदरिद्रता ॥ १६४ ॥ ४१ अथलक्ष्मीयोगः ॥ पूर्वजन्मांतरेचैवपादजःसुखसंयुतः ॥ तेनतीर्थेकृतासेवाऋषीणांचपुनःपुनः ॥
॥ १६५ ॥ तेनासौसुखसम्पन्नोधनाढ्योराजपूजितः ॥ गौराङ्गश्चपलोवक्तागुणीचकटुभाषकः ॥ बहुस्थानेसुदाताचमित्रशत्रूसमोखलु
॥ १६६ ॥ १ । ३ । ५ । ८ । १४ । १८ । २० । २५ । ३१ । ३६ । ४० ४५ एषुवर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६६ ॥

४२ अथलोष्ठयोगः ॥ वैद्यनाथपुरेरम्येब्राह्मणःशास्त्रवर्जितः ॥ आश्रयेतिसमाख्यातःपत्नीपुत्रसमन्वितः ॥ १६७ ॥ निर्माल्यंभोजये
न्नित्यमनाचारेसदारतः ॥ एकदाचन्द्रमोग्रस्तेकिंचिद्दानार्चनंकृतम् ॥ १६८॥ आयुषस्तुसमाप्तत्वात्समृतोद्विजसत्तम ॥ पुनरागत्यमेदि
न्यांवंशवृद्धिर्नजायते ॥ १६९ ॥ २ । ४ । ८ । १२ । १६ । २२ । २५ । ३० । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१ ॥ ४३ अथ
लीलकयोगः ॥ आसीज्जन्मांतरेचैवबाहुजःकर्मनामतः ॥ तपश्चर्य्यारतोनित्यंजपकर्मार्चनेरतः ॥ १७० ॥ एकस्मिन्समयेविप्रकृतंपापं
सहायतः ॥ भागिनेयस्यभार्य्यायांहठात्तेनरतिःकृता ॥ १७१ ॥ तेनपापेननरकेयमदूतैश्चप्रापितः ॥ बहुवर्षसहस्रांतेमानुषोपिपुनर्भुवि॥
॥ १७२ ॥ १ ।३।८।१२।१६।२०।२४।३०।३६।४० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१ ॥ ४४ अथलीनयोगः ॥ आसीज्जन्मांतरेचैव
बाहुजःपृथिवीपतिः ॥ पक्वाऽन्नंचसवेदत्त्वापश्चात्तापंतदाकरोत् ॥ १७३ ॥ मृत्वास्वर्गापवर्गौचभुक्त्वावर्षसहस्रकम् ॥ ततोवैमानुषीयोनौ
चात्रवेद्येसमुद्यतः॥१७४॥लब्धंचापिधनंधान्यंक्षणेवृद्धिःक्षणेक्षयः ॥ बाल्येचलभतेदुःखमधिकाराच्चजायते॥१७५॥गुप्तचिंताभवेत्तस्यसुत
कांताधनस्यच ॥ मध्येमध्येभवेत्कष्टीराजरोगेणभार्गव॥१७६॥ १।८।१४।२०।३०।३५।४०।४५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७३॥४५
अथलालकठयोगः ॥ पूर्वंवनांतरेवात्सीद्ब्राह्मणोधनवानपि ॥ शिवसेवारतस्तत्रब्राह्मणानांप्रतोषकः ॥१७७॥ एकस्मिन्समयेविप्रवनंदग्धं
दवाग्निना ॥ पश्चात्तुकृतवान्विप्रपुण्यपुंजंतुशक्तितः॥१७८॥ देवानांवैमन्दिराणिकारितानिचभक्तितः॥ नित्योत्सवार्थंभोगार्थंजीविकावि
निर्माकृता ॥ १७९ ॥ पापमाचरितंपश्चात्सुकृतस्याभिमानतः ॥ गुरुनिन्दाकृतातेनपुत्रेणरहितोऽत्रवै ॥ अन्यसौख्यैरुपेतश्चधनधान्य
युतोपिवा ॥ १८० ॥ १ । ३ । ८ । १७ । २२ । २८ । ३१ । ३४ । ३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६० ॥ ४६ अथलुता

योगः ॥ आसीज्जन्मांतरेचैवब्राह्मणोबहुधार्मिकः ॥ विंशतिवर्षांतरेचासौवानप्रस्थोबभूवह॥ १८१॥आत्मारामेतिविख्यातःकांपिल्येनगरे
वसन् ॥ शिवस्मरणेचनिष्ठावान्वनवासेचवैमृतः ॥ १८२ ॥ कैलासशिखरेगत्वातत्रस्थित्वाविशेषतः॥पुनरागत्यमेदिन्यांमानुषःसुंदरोऽ
धुना ॥ १८३ ॥ विंशतिवर्षांतरेचात्रराजमान्योमहाऽद्भुतः ॥ गजाश्वधनसंयुक्तःपृथ्वीपतिस्ततःपरम् ॥ १८४ ॥ १ । ५ । ६ । १०
२८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०० ॥ ४७ अथलेखकयोगः ॥ बाहुजस्यकुलेपूर्वंगोपाचलस्यसन्निधौ ॥ प्रचंडइतिविख्यातःपत्नीषु
त्रसमन्वितः ॥ १८५ ॥ क्षात्रकर्मपरित्यक्त्वाव्यसनेषुसदारतः ॥ मिथ्यावादीपरद्रोहीपरनिंदापरायणः ॥१८६॥ एवंनिवसतस्तत्रबहुवर्षग
तागतैः ॥आयुषस्तुसमाप्तत्वात्समृतःकालचोदितः ॥१८७॥ पापात्पापफलंभुक्त्वापुण्यात्पुण्यफलंतथा ॥ बहुवर्षसहस्रान्तेमानुषोपिततो
धुना ॥ १८८ ॥ २ । ८ । १४ । १८ । २५ । ३० । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि७१॥४८अथलघुनाशनयोगः ॥ लघुनाशनेचयोजातः
पूर्वजन्मनिपादजः॥कृषिबाणिज्यनिरतोगोधनैःपरिवेष्टितः॥१८९॥एकदातेनशूद्रेणकृतंकर्मसुदारुणम्॥ स्तनंधयंतुवत्संचगृहीत्वासुरभिं
ददौ॥१९०॥वियोगाद्दुःखतप्तासामृताशीघ्रंद्विजोत्तम ॥ तेनपापेनविप्रोऽत्रपुत्रदारवियोगवान् ॥१९१॥ १०।२५।३० वर्षेषुकष्टम्७५वर्षेमृ
त्युः॥४९ अथलंबोदरयोगः ॥ चंद्राद्रिनिकटेपूर्वंशंकरोनामधार्मिकः ॥ धनधान्ययुतस्तत्रपरोपकरणेरतः ॥१९२॥ दत्तानितेनदानानि
पर्वस्वपिविशेषतः ॥ नानागंधाढ्यमाल्यंचनानारत्नहिरण्यकम् ॥१९३॥ तीर्थेतीर्थेकृतासेवाऋषीणांचपुनःपुनः ॥ तीर्थभूमौमृतःसोपिगं
धर्वेनगरेगतः ॥ १९४ ॥ बभूवपादजःसोपिबाहुजोपिततःपरम् ॥ तत्रपापार्जनंकृत्वातेनात्रकष्टसंयुतः ॥ गंभीरोधनवान्सोपिवामभागेस
चिह्नितः ॥ १९५ ॥ १ । ४ । ८ । १६ । २४ । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६० ॥ ५० अथलालात्मकयोगः ॥ यामुनेनगरेपूर्वं

यवनःसचधार्मिकः ॥ अकरोद्बहुपुण्यानिह्यन्नदानंविशेषतः ॥ १९६ ॥ एकस्मिन्समयेविप्रप्रजादंडश्चकारितः ॥ प्रजाःसर्वाश्चविमु
खाबभूवुर्द्विजसत्तम ॥ १९७ ॥ यवनस्यकृतोघातोबाणैःखड्गैःसहस्रधा ॥ मृत्वासत्रिदिवंगत्वाबभूवपादजोपिच ॥ नानाद्रव्यसमायुक्तः
पुत्रदारैःसमन्वितः ॥ परमःसाहसीधैर्य्यपरोपकरणेरतः ॥ १९८ ॥ १ । ४ । ६ । ८ । १२ । १९ । २७ । ३१ वर्षेषुकष्टम् ॥ परमायु
र्वर्षाणि ६७ ॥ ५१ अथलीलायोगः ॥ अग्रजेवैपुरेरम्येतत्रवैश्योऽसुदर्शनः ॥ चौरकर्मणिनिरतस्तत्सकाशाद्धृतंधनम् ॥ १९९ ॥
एकस्मिन्समयेविप्रनृपद्रव्यंतुचोरितम् ॥ शृंखलाबंधनंप्राप्यकारागृहनिवासकृत् ॥ २०० ॥ दैवात्तत्रमृतःसोपिसगत्वायमसादनम् ॥
षष्टिवर्षसहस्रांतेमानुषश्चात्रजन्मनि ॥ २०१ ॥ १ । ३ । ५ । ८ । १० । १२ । १५ । २० । २५ । ३० । ३३ । ३६ । ४० वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ७१ ॥ ५२ अथलंपटयोगः ॥ कश्चिद्वैश्योऽभवत्पूर्वंबर्बरेदेशकेतदा ॥ कृतानितेनपुण्यानिह्यारामंकृतवान्सरः ॥ २०२ ॥
पथिकूपाःकारिताश्चदानंदत्तंद्विजायच ॥ एवंन्यवसतस्तत्रबहुवर्षगतागतैः ॥ बभूवबाहुजःसोपिजन्मन्यत्रसुखान्वितः ॥ २०३ ॥ १ ।
४ । ८ । १२ । १६ । २० । २५ । २६ । ३१ । ४० । ४६ वर्षेष्वतिकष्टम् ॥ परमायुर्वर्षाणि ६५ ॥ ५३ अथलौपिकयोगः ॥
आसीज्जन्मांतरेचैवचात्रवैश्येवसन्नसौ ॥ सौदासोनामक्षात्रस्तुकिंचिद्भूमिपतिस्तदा ॥ २०४ ॥ पत्नीतस्यमहाभागादानपुण्यार्चनेरता ॥
बाहुजःपापभागीचपरस्त्रीरमणेरतः ॥ २०५ ॥ बाहुजस्याभवन्मृत्युःपत्नीजातासतीतदा ॥ उभयोःकर्मणांहेतोःस्वर्गंगत्वाद्विजोत्तम ॥
पुनरागत्यमेदिन्यांपुण्यपापफलादपि ॥ २०६ ॥ १ । २ । ५ । १० । १५ । २० । २५ । ३० । ३५ । ४० । वर्षेषुकष्टम् ॥ परमायुर्व
र्षाणि ८७ ॥ ५४ अथलोपामुद्रायोगः ॥ चित्रकूटाद्रिनिकटेवसंतिबहवोजनाः ॥ तत्रवैश्योवसत्त्वेकोक्रयविक्रयकारकः ॥ २०७ ॥ नानामनो

रथैर्युक्तःशिवस्योद्यापनंकृतम् ॥ ब्राह्मणायददौदानंपर्वस्वपिविशेषतः ॥ २०८ ॥ एकस्मिन्समयेविप्रमित्रद्रव्यव्ययःकृतः॥नदत्तंतेनतत्त
स्मैलोभोपहतचेतसा ॥ तेनायंधनहीनोपिकष्टेनातिप्रपीडितः ॥ २०९ ॥ परमायुर्वर्षाणि ८१ ॥ ९५ अथलीलाम्बरयोगः ॥ बाहुजः
पूर्वमुत्पत्तौ पाखंडाऽऽचरणेरतः ॥ परवित्तापहारीचयमलोकेततोगतः ॥ २१० ॥ यमलोकात्परिभ्रष्टोमानुषोपिततोधुना॥ क्रोधीस्थूलो
महामानीसलज्जोधनवांस्तथा॥सदातीर्थाभिलाषीचकुटिलोजायतेधुना ॥ २११ ॥ २।४।८।१३।२०।३१वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि
७९ ॥ ९६ अथलंबकर्णयोगः ॥ लम्बकर्णपुरेरम्येतत्रविप्रःसुधाकरः ॥ धर्मशीलोतिमतिमान्दाताभोक्तानिरामयः॥२१२॥सुधीश्चसर्व
शास्त्रेषुकाव्यालंकारबोधकः ॥ एकस्मिन्समयेविप्रप्रमादात्कामलोभतः ॥ २१३ ॥ गोत्रजागमनंकृत्वाबलात्कारेणभार्गव ॥ तेनपापा
नुसारेणपतत्यंघेतदाऽनघ ॥ २१४ ॥ पुनर्वैमानुषोभूत्वाधनपुत्रविवार्जितः ॥ गोशतदानमात्रेणवंशवृद्धिर्भविष्यति ॥ २१५ ॥ १ । ८ ।
१६ । २४ । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७३ ॥ ९७ अथलम्पाकयोगः ॥ कुरुक्षेत्रस्यनिकटेबाहुजोपिवसत्यसौ ॥ कृषिवाणिज्य
निरतःपुण्यार्जनरतःसदा ॥ २१६ ॥ पापात्पापफलंभुक्तापुण्यात्पुण्यफलंतथा ॥ अत्रजन्मनिमहारोगीपीडचमानोमुहुर्मुहुः॥गोदानाच्च
भवेच्छ्रेयस्ततःसुखमवाप्नुयात् ॥ २१७ ॥ १।८।१३।१६।२०।२९ वर्षेषुकष्टम्॥परमायुर्वर्षाणि६२॥९८ अथलंपकयोगः ॥ अर्यमाख्येपुरे
रम्येब्राह्मणःशास्त्रपाठकः॥महोद्यमीगुणाऽतीतोब्रह्मभक्तिरतःसदा ॥ २१८ ॥ एकस्मिन्समयेविप्रसस्नातोमृगगेरवौ । दत्तानितत्रदानानि
वेण्यांमग्नोबभूवह ॥ २१९ ॥ तेनेयंसुखसम्पत्तिःपरमोदारवत्सलः ॥ राजमान्योगुणातीतोभव्यकांतिर्महाबलः ॥ सपिशाचाधिकः
कार्यीदीर्घायुर्बहुपुत्रकः ॥ २२० ॥ १।५।८। १६।२०। २७। ३२। ३६। वर्षेषुकष्टम् ॥ परमायुर्वर्षाणिः६२ ॥ ९९अथलोकभूषण

सं॰टी॰ १३१

योगः ॥ अथभीमानदीतीरेबाहुजःपापभागसौ ॥ धनमैश्वर्य्यमतुलंप्रजानांलुंठनेरतः ॥ २२१ ॥ ततोमृत्युवशंप्राप्तोनरकेषुसुसंस्थितः॥ किंचित्पुण्याऽवशेषेणमानुषोजायतेऽधुना ॥ २२२ ॥ क्षणेसौख्यंक्षणेचिंताधनंस्वल्पंतुजायते ॥ महांश्चराजमान्यश्चमानसौख्यंसदाभवेत् ॥ २२३ ॥ युवभावेमहत्कष्टंवार्धक्येपितदानघ ॥ देशेदेशेव्रजन्त्सोपिद्रव्यार्थंचद्विजोत्तम ॥ २२४ ॥ १ । ८ । १६ । २२ । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८९ ॥ ६० अथलवंगदलयोगः ॥ कश्चिद्द्विजकुलेपूर्वंशतद्रुनिकटेतथा ॥ देवदासइतिख्यातःपादजःसुखसंयुतः ॥ २२५ ॥ नृपानुकम्पयाप्राप्तश्चासौभोग्यवसुंधराम् ॥ अज्ञातेनकृतंकर्मबाहुजस्यप्रताडनम् ॥ २२६ ॥ समृतस्तेनदुःखेनपापमाचारितंत्विदम् ॥ तेनाऽयंकष्टसंयुक्तोहस्तेपादेप्रपीडयते ॥ स्वर्णदानाद्भवेच्छ्रेयश्चान्यथाविपरीतकम् ॥ २२७ ॥ २ । ४ । ८ । १२ । १६। २६ । २७ । ३२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७४ ॥ ६१ अथलेखायोगः ॥ आंत्रवेद्येवसद्योऽसावाभीरःपूर्वजन्मनि ॥ कृतानितेनपुण्यानिपर्वस्वपिविशेषतः ॥ २२८ ॥ एकस्मिन्समयेविप्रकृतंकर्मचदारुणम् ॥ गोधनेनसमाकीर्णआरामोध्वंसितश्चवै ॥ २२९ ॥ तेनपापानुसारेणनरकेगत्वाभोसुत ॥ पश्चान्मानुष्यमापन्नोधनधान्यसमन्वितः ॥ २३० ॥ १ । ३ । ८ । १६ । २४ । २८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥ ६२ अथलंबयोगः ॥ आसीत्पूर्वेभवेकश्चित्कर्णाटेपादजस्त्वसौ ॥ धीरदासइतिख्यातःपत्नीतस्यगुणेश्वरी॥२३१॥तत्रवैनगरेचैवन्यवसत्परिवारयुक् ॥ क्रयविक्रयणाद्वापिद्रव्यंतुबहुसंचितम् ॥ २३२ ॥ एकस्मिन्समयेविप्रकृतंकर्मजुगुप्सितम् ॥ मिथ्यापवादंप्रवदन्ज्ञातिहानितदाऽकरोत् ॥ २३३ ॥ तेनपापानुसारेणसभुक्तायमशासनम् ॥ ततोमानुष्यमापन्नोगौरकांतिर्धनान्वितः ॥ २३४ ॥ १ । ९ । ८ । १४ । १८ । २९ । ३१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ६३ अथलालामृतयोगः ॥ कश्चिद्विप्रकुलेपूर्वंधर्मशीलश्च

कौंकणे ॥ पुंश्चलीमान्प्रकोपीचकिंचिद्वित्तसमन्वितः ॥ २३५ ॥ तस्यभ्रातुःकनिष्ठस्यतस्यभार्य्यामहाशुभा ॥ बलादाकर्षितातस्यांकृ
त्वातुरतिसंगमम् ॥ २३६ ॥ भुक्त्वादुःखंचनरकेबहुवर्षसहस्रकम् ॥ ततोवैमानुषीयोनावधनीरोगदुर्बलः ॥ बहुप्रकारेनिरतःहिंसाकर्मणि
तत्परः ॥ २३७ ॥१।४।८।११ । १६ । २० । २८ । ३० । ३५ । ४० । ४५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ ६४ अथलंबरयो
गः ॥ लंबरेयोगकेजातःसवैश्यःपूर्वजन्मनि ॥ व्यापारेवंचनांकृत्वाचास्मिञ्जमनिनिर्धनः ॥ २३८ ॥ पुत्रदारैश्चरहितःसर्वदाकष्टसंयुतः॥
वर्षेतुषोडशेकष्टंमृतिःसप्ततितमेऽब्दके ॥ २३९ ॥ ॥ ६५ अथलकुटयोगः ॥ कीकटेचगयाक्षेत्रेब्राह्मणःप्रेतकर्मणि ॥ गृहीत्वाविविधं
दानमपात्रंपात्रमेववा ॥ २४० ॥ सदाचारपरिभ्रष्टोमद्यमांसेनजीवति ॥ परदाराभिगमनःपरनिंदापरायणः ॥ २४१ ॥ आयुषस्तुसमाप्त
त्वात्समृतोगदपीडितः ॥ अत्रजन्मनिभवेत्कष्टीपुत्रदारविवर्जितः ॥ २४२ ॥ १ । ३ । ६ । ९ । १३ । १६ । २१ । २८ । ३० । ३६ ।
४० । ४५ एतद्वर्षेभवेत्कष्टीपरमायुःशतंनृणाम् ॥ २४३ ॥ ६६ अथलिंबयोगः ॥ अथचोत्कलदेशेतुब्राह्मणोब्रह्मचर्यवान् ॥ शिवेध्यानर
तोनित्यंपरानंदेसनातने ॥ २४४ ॥ सर्वदाज्ञानमार्गेचतत्परश्चद्विजोत्तम ॥ एकस्मिन्समयेविप्रनास्तिकस्यप्रसंगतः ॥ २४५ ॥ गुरुर्भ
दावेदनिंदाकृतातेननिरंतरम् ॥ नानाजन्मोत्तरेविप्रमानुषोपिततोऽधुना ॥२४६॥ परोक्षवादीधीरश्चनिंदकोबहुजल्पकः ॥ मध्येपिचभ
वेत्कष्टीदारिद्र्येणगदेनवा ॥ २४७ ॥१।३।८।१२।१६।२०।२४।३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०० ॥ ६७ अथलीनयोगः ॥ कश्चि
च्छूद्रकुलेपूर्वंक्षिप्रानद्याश्चसन्निधौ ॥ प्रकीर्णःसर्वसौख्यैश्चसर्वविद्याविनोदकः ॥ २४८ ॥ अर्भकान्पाठयेत्तत्रदयार्द्रःपापकर्शितः ॥ शिव
सेवनजात्पुण्याच्चात्रजन्मनिभार्गव ॥ २४९ ॥ धनपुत्रधरादारैः संयुतः प्रीतिदायकः ॥ राजसश्चतुरःसुज्ञोद्विजदेवार्चकः सदा ॥ २५० ॥

भंहि

१३

१ । २ । ५ । ८ । १२ । २० । ३० । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥ ६८ अथलज्वायोगः ॥ नैपालेनगरेपूर्वंसर्वसौख्यसम
न्वितः ॥ बाहुजश्छत्रधारीचकृत्वाराज्यंनिरंतरम् ॥ प्रतापलोभयुक्तेनकृतंकर्मसुदारुणम् ॥ २५१ ॥ प्रजानांपुत्रवधूः पुत्रीयच्चसुतातुशुभा
नना ॥ बलादाकर्षितासातुविधवासधवातथा ॥ २५२ ॥ पापकर्मणिसक्तोऽसौबहुवर्षनिरन्तरम् ॥ गतोसौनरकेघोरेषष्टिवर्षसहस्रकम् ॥
॥ २५३ ॥ ततोवैमानुषीयोनौचागतोधरणीतले ॥ निष्ठुरः कूटवादीचनिर्धनः परवंचकः ॥ असद्व्यापीदुराधर्षः सर्वकष्टेनकष्टितः ॥
॥ २५४ ॥ १ । ८ । १५ । २४ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ ६९ अथलांछनयोगः ॥ पूर्वजन्मांतरेचैवजयनामातु
बाहुजः ॥ नानाकर्मकृतंतत्रवृषलीरमणंकृतम् ॥ २५५ ॥ किंचित्कालांतरेविप्रसमृतः कालचोदितः ॥ तिर्य्यग्योनिषुचोत्पन्नः शतधाच
महीतले ॥ पश्चाद्वैमानुषीयोनौमर्त्यलोकेप्रतिष्ठितः ॥ २५६ ॥ १ । ४ । ८ । १६ । २० । २८ । ३६ । ३८ । वर्षेषुकष्टम् ॥ परमा
युर्वर्षाणि ६७ ॥ ७० अथलाटकयोगः ॥ मध्यदेशेतदापुत्रवसंतिबहवोजनाः ॥ तत्रशूद्रोऽवसत्त्वेकोधनपुत्रविवर्जितः ॥ २५७ ॥
कृतातुपरिचर्य्याचशिवस्यस्मरणेरतः ॥ एकांघ्रिभुजमुत्थाप्यजपन्वर्षाष्टकंतदा ॥ २५८ ॥ कालेनमृत्युरभवत्स्वर्गलोकेतथागतः ॥
ततः पुण्यक्षयेजातेचागतोधरणीतले ॥ पुत्रदारधनैर्युक्तोमध्येकष्टसमावृतः ॥ २५९ ॥ १ । ४ । ८ । १२ । २० । ३५ वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ७४ ॥ ७१ अथलोमशयोगः ॥ आसीज्जन्मांतरेचैवन्यवसत्कुरुजांगले ॥ जगन्नाथइतिख्यातः सपत्नीकः
सपुत्रकः ॥ २६० ॥ किंचिद्द्रव्याधिकारीचदेवब्राह्मणपूजकः ॥ शिवस्यस्मरणेनिष्ठःसत्यधर्मपरायणः ॥ २६१ ॥ एकस्मिन्समये
विप्रकृतंकर्मातिदारुणम् ॥ स्वगोत्रवनिताचावैगर्भपातमथाऽकरोत् ॥ २६२ ॥ तेनपापानुसारेणगतोसौयमशासनम् ॥ यमलो

कात्पारेभ्रष्टश्चागतोधरणीतले ॥ सजरोगेणसततंपीडयमानकलेवरः ॥ २६३ ॥ १ । ५ । ८ । १६ । २० । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि
७१ ॥ ७२ अथलोभयोगः ॥ वैश्योजन्मांतरेचैववैश्यकर्मपरायणः ॥ क्रयविक्रयकर्ताचवाणिज्येचपरायणः ॥ २६४ ॥ लोभासक्तेन
वैश्येनब्राह्मणस्यहृतंधनम् ॥ नदत्तंतेनतत्तस्मैसमृतः पापभागसौ ॥२६५ ॥ पापाच्चनरकेगत्वाह्यपिवर्षसहस्रकम् ॥ कीटयोनिशतंभुक्त्वा
काकयोनौतथापुनः ॥ ततोमानुष्येवैयातोलोभाक्रांतोतिदुःखितः ॥ २६६ ॥ १ । ६ । १० । १५ । २० । २५ । ३० । ३५ । ३८ ।
एतद्वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि८०॥७३अथलोभाख्ययोगःप्रकथ्यते ॥ पूर्वजन्मनिविप्रोसौश्रीगोपालस्यसन्निधौ ॥ प्रवर्षणःसमाख्यातः
पत्नीपुत्रसमन्वितः ॥२६७॥ ससद्विद्योपजीवीचकृत्वापौराणिकींकथाम् ॥ तत्सकाशात्कृतंद्रव्यंबहुकालगतागतैः ॥२६८॥ एकदातुह्यसौ
दानंगृहीत्वासचहर्षितः ॥ सविप्रः पञ्चतांप्राप्तः सगत्वायमशासनम् ॥ २६९ ॥ पुनर्वैमानुषोभूत्वाह्यत्रजन्मनिदारिद्रता ॥ २७० ॥ १ ।
३ । ८ । ११ । २० । ३४ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७८ ॥ ७४ अथलेहयोगः ॥ लक्ष्मणेवैपुरेदेवबाहुजः करुणाकरः ॥ द्रव्यंतुवि
पुलंकृत्वाकार्पण्येनविमोहितः ॥२७१॥ नदानंनचभोज्यंचनश्राद्धंनद्विजार्पणम् ॥ एवंनिवसतस्तत्रबहुवर्षगतागतैः ॥२७२॥ आयुषस्तुस
मातित्वात्समृतःकालचोदितः ॥ पापात्पापफलंभुक्त्वापुण्याच्चमानुषोधुना ॥२७३ ॥ गौरांगश्चपलोवक्तादुराचारीदुराशयः ॥ १ । ४ । ८
१० । २० । २८ । ३३ । ३५ । ३८ । ४० एतद्वर्षेषुमहाकष्टंजायतेनात्रसंशयः ॥ २७४ ॥ परमायुर्वर्षाणि ६८ ॥ ७५ अथलालाकांति
योगः ॥ आसीज्जन्मांतरेचैवकर्णोनामचबाहुजः ॥ किंचिद्भूमिपतिस्तत्रचोग्रदंडःप्रतापवान् ॥ २७५ ॥ देशेमरुस्थलेचैवन्यवसत्पारि
वारयुक् ॥ क्षात्रधर्मेरतःसोपितथादानार्चनेद्विज ॥ २७६ ॥ एकस्मिन्समयेविप्रकृतंकर्मसुदारुणम् ॥ ब्राह्मणस्यहृतंद्रव्यंनदत्तंलोभ

हेतुना ॥२७७॥ सगत्वायमलोकंचभुक्त्वानरकजंफलम् ॥ पुनर्वैमानुषोभूत्वाचागतोधरणीतले ॥२७८॥ १ । ४ । ८ । १३ । १७ । २० ।
२८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५९ ॥ ७६ अथरेचकयोगः ॥ पूर्वींचितापुरेरम्येवसंतिबहवोजनाः ॥ सदाशिवःसमाख्यातःपत्नी
तस्यातिचंचला ॥ २७९ ॥ रहितोधर्मकर्मभ्यांपरवंचनतत्परः ॥ एकस्मिन्समयेविप्रकृतंतत्कर्मदारुणम् ॥ २८० ॥ मिथ्यापवादवादे
नपरद्रव्यंहृतंमहत् ॥ प्राप्तेवार्द्धक्यसमयेगोदानंचकृतंखलु ॥ २८१ ॥ अत्रजन्मनिधनीमानीतेजस्वीबहुधार्मिकः ॥ २८२ ॥ १ ।
३ । ५ । ८ । १६ । २० । २५ । ३३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६६ ॥ ७७ अथरंध्रयोगः ॥ अथपांचालदेशेतुबाहुजःशिवपू
जकः ॥ कृतानितत्रदानानिपर्वस्वपिविशेषतः ॥ २८३ ॥ सूर्य्यस्याराधनेनिष्ठःसर्वपापविवर्जितः ॥ गुरोरवज्ञयाचासौघोरेचनरके
गतः ॥ २८४ ॥ कतिवर्षसहस्रांतेनरकाद्भुविमानुषः ॥ नानाकष्टसमाकीर्णोनानाचिह्नैश्चचिह्नितः ॥ किंचिद्धनीमनोत्साहीभ्रमंश्च
बहुकालतः ॥ २८५ ॥ १ । २ । ४ । ६ । ८ । १२ । १७ । २५ । ३० । ३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥ ७८
अथरेज्जुकीयोगः ॥ कश्चिद्द्विजकुलेपूर्वंचांत्रवेद्येवसन्नपि ॥ धर्मदेवःसमाख्यातःपत्नीपुत्रसमन्वितः ॥ २८६ ॥ शिवार्चनेसदानिष्ठः
पत्नीतस्यपतिव्रता ॥ परस्त्रींपरद्रव्यंचगृहीत्वाविविधैश्छलैः ॥ २८७ ॥ राजकन्यांविप्रकन्यांबाहुजांपादजांतथा ॥ अगम्यागमनंकृ
त्वामृत्वातुनरकेगतः ॥ २८८ ॥ बहुवर्षांतरेविप्रमानुषोपिततोऽधुना ॥ चंचलश्चतुरोवक्तापाखंडाऽऽचरणेरतः ॥ २८९ ॥ १ ।
३ । ६ । ९ । १५ । २० । २५ । ३२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६५ ॥ ७९ अथराचकीयोगः ॥ गौरीकुमारिकाखंडेवैश्योनामक
दर्जकः ॥ बहुद्रव्यान्वितःसोपिकदन्नंचभुनक्तिसः ॥ २९० ॥ एकस्मिन्समयेविप्रपितृष्वसासमागता ॥ नादरंचददौकिंचित्तिरस्का

रमथाऽकरोत् ॥ २९१ ॥ विमुखाचगतासापिशापंदत्त्वाचदुष्करम् ॥ विषदोषेमृतोवैश्यस्तिर्य्यग्योनौपुनःपुनः ॥ ततोमनुष्यतांयातः
पीड्यमानकलेवरः ॥ २९२ ॥ १ । ४ । ८ । १६ । २४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७९ ॥ ८० अथरापतियोगः ॥ आसीज्जन्मां
तरेचैवभिल्लोनामगुणाकरः ॥ परपीडाप्रदत्तातुबहुवर्षगतागतैः ॥ २९३ ॥ एकस्मिन्समयेविप्रप्रावृष्यपिवनांतरे ॥ दृष्ट्वापथिकमा
यान्तंब्राह्मणंदीनदुर्बलम् ॥ २९४ ॥ दत्तानितस्मैवस्त्राणिभोजनानिविशेषतः ॥ तेनपुण्यावशेषेणसजातश्चात्रसुंदरः ॥ धनधान्य
समायुक्तःपुत्रस्त्रीभिश्चसंयुतः ॥ २९५ ॥ १ । ३ । ६ । ९ । १३ । २० । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥ ८१ अथरेपन
योगः ॥ चंद्रागिरेश्चनिकटेब्राह्मणःशास्त्रपारगः ॥ महालोभेनसंयुक्तस्तेनकोपिनपाठितः ॥ २९६ ॥ एतत्पापफलेनाऽसौघोरंचनरकंग
तः ॥ कृमियोनिशतंभुक्त्वाकीटभृंगेषुपुत्रक ॥ २९७ ॥ ततोवैमानुषीयोनौप्रथमाब्देसकष्टितः ॥ १ । ४ । ८ । ११ । २४ ।
३२ । ३६ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७३ ॥ ८२ अथलोमसयोगः ॥ अथयोलोमसेजातःसमनुष्योगुणाधिकः ॥ सर्व
कार्य्यप्रकर्ताचसर्वपूज्योधनाधिपः ॥ २९८ ॥ आसीज्जन्मांतरेचैवबाहुजःपुण्यपत्तने ॥ किंचिद्देशाधिकारीचदानपुण्यपरा
यणः ॥ २९९ ॥ सुधीश्चशास्त्रवेत्ताचकार्यकर्त्ताविचक्षणः ॥ एकस्मिन्समयेविप्रस्वभार्यात्यागनंकृतम ॥ ३०० ॥ साम्रता
चातिकष्टेनपापमाचरितंत्विदम् ॥ अत्रजन्मनिभवेद्दुःखीसंग्रहण्यतिसारतः ॥ ३०१ ॥ १ । ३ । ४ । ८ । १३ । १८ ।
२२ । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७९ ॥ ८३ अथलोपपायोगः ॥ आसीज्जन्मांतरेचैवब्राह्मणःशास्त्रवर्जितः ॥ परमो
दारश्चातुलश्चयमुनायांदक्षिणेतटे ॥ ३०२ ॥ कृषिकर्मोद्यमेव्यग्रोधान्यराशिःकृतोभृशम ॥ एकस्मिन्समयेविप्रतीर्थावगाहनंकृतम ॥

॥ ३०३ ॥ दत्तानितेनदानानिचंद्रग्रस्तेचपर्वणि ॥ अत्रजन्मनिधनाढ्योसौपुत्रकन्यासमान्वितः ॥३०४॥ प्रथमतृतीयवर्षेषष्ठेवाद्वादशे
पिवा ॥ पीड्यतेह्येषुवर्षेषुविंशतिवर्षेविशेषतः ॥ ३०५ ॥ परमायुर्वर्षाणि ८० ॥ ८४ अथलतार्कयोगः ॥ आसीज्जन्मांतरेचैववंगदेशेनृ
पोत्तम ॥ वीरसिंहःसमाख्यातःपत्नीपुत्रसमन्वितः ॥ ३०६ ॥ कृतानितेनपुण्यानिब्राह्मणेभ्योविशेषतः ॥ एकस्मिन्समयेविप्रद्रव्यलोभे
नचेतसा ॥ ३०७ ॥ प्रजानांलुंठनात्पापात्सगत्वायमशासनम् ॥ यमलोकात्परिभ्रष्टश्चागतोभूमिमंडले ॥ ३०८ ॥ १ । २ । ८ । ११ ।
१५ । २० । २४ । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ ८५ अथलालयोगः ॥ काचिद्वेश्याकुलेपूर्वंचंद्रभागानदीतटे ॥
सर्वेष्वंगेषुरमणीप्रीतिकृच्चंद्रवन्मुखी ॥ कृतानिबहुपापानितत्सकाशात्कृतंधनम् ॥ ३०९ ॥ प्राप्तेवार्द्धक्यसमयेगोदानंगृहदानकम् ॥
तडागोवापिकाभव्याःकारिताश्चत्विमेखलु ॥ ३१० ॥ सामृत्वात्रिदिवंगत्वागंधर्वेनगरेद्विज ॥ पूर्वपुण्यावशेषेणसाऽधुनापुरुषोत्रवे ॥
गौरांगोभव्यदेहश्चधनधान्यसमन्वितः ॥ ३११ ॥ १ । ३ । ९ । १२ । १५ । २० । २७ । ३० । ३५ । ३६ । ४० अस्मिन्वर्षे
षुकष्टम् ॥ परमायुर्वर्षाणि ७७ ॥ ८६ अथलिंगघोषीयोगः ॥ लिंगघोष्यांचयोजातःसपुमांश्चंचलःसदा ॥ गीतवाद्यरतःसोपिसाहसी
चसदाव्ययी ॥ ३१२ ॥ वंशवृद्धिस्तथाकिंचित्पीड्यमानकलेवरः ॥ आसीत्पूर्वंधनाढ्यश्चबाहुजोबलविक्रमी ॥ निर्दग्धंचपुरंरम्यंते
नासौ कष्टसंयुतः ॥ ३१३ ॥ १ । ४ । ८ । १२ । २० । २८ । ३० । ३५ । ३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ ८७ अथलीक
संसयोगः ॥ इंद्रप्रस्थपुरेरम्येपूर्वजन्मनिपादजः ॥ गुणीदासःसमाख्यातःपत्नीपुत्रसमन्वितः ॥ ३१४ ॥ शिवस्यध्याननिरतोविप्राणां
खलुवंचकः ॥ एकस्मिन्समयेविप्रब्राह्मणाश्चनिमंत्रिताः ॥ ३१५ ॥ भोजनंविविधंदत्तंपक्वान्नंमिष्टशष्कुली ॥ दक्षिणांचततोदत्त्वासायं

कालोबभूवह ॥ ३१६ ॥ तदाविप्रः समायातः शुष्कदेहोभयानकः ॥ क्षुधार्तोयाचितंतेननदत्तंतस्यवैक्वचित् ॥ ३१७ ॥ विमुखोब्राह्मणो
यातः पापमाचरितंत्विदम् ॥ मृत्वायमपुरंप्राप्तः पुण्यात्स्वर्गेतथाऽनघ ॥ ततोवैमानुषीयोनौपीडयमानकलेवरः ॥ ३१८ ॥ ३ । १३ ।
२० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६५ ॥ ८८ अथलाजवर्तकयोगः ॥ श्रीह्रदेनगरेपूर्वंबाहुजःसुंदरस्तथा ॥ चिंतामणिःसमाख्यातः
कन्यापुत्रसमन्वितः ॥ ३१९ ॥ नानाविलासविभवैःशिवस्यध्यानतत्परः ॥ कृतानिपुण्यदानानिमासिमासिचहायने ॥ ३२० ॥
आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः ॥ पुनरागत्यमेदिन्यांधनधान्यसमन्वितः ॥ ३२१ ॥ १ । ३ । ५ । ८ । १३ । १७ । २२ ।
२६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६६ ॥ ८९ अथलचातिकयोगः ॥ अथचिंतापुरेपूर्वंशोणभद्रस्यपश्चिमे ॥ वैश्योनामप्रवीरश्चगोधान्य
धनसंकुलः ॥ ३२२ ॥ कृतानिबहुपापानिपश्चात्पुण्यंकृतंमहत् ॥ समृतश्चातिकष्टेनपापाच्चनरकंगतः ॥ ३२३ ॥ पुण्यात्पुण्यफलंसम्य
क्ततोवैमानुषोऽधुना ॥ चंचलश्चातिचतुरोमनस्वीतेजसायुतः ॥ ३२४ ॥ १ । ३ । ८ । १३ । २० । २८ । ३१ वर्षेषुकष्टम् ॥ परमायु
र्वर्षाणि ६७ ॥ ९० अथरुजायोगः ॥ कश्चिद्वैश्यकुलेपूर्वंगोदेचनगरेखलु ॥ चौलदासइतिख्यातःसपत्नीकः सपुत्रकः ॥ ३२५ ॥ राज
कार्य्येसदानिष्ठश्चोग्रदंडःप्रतापवान् ॥ एकस्मिन्समयेविप्रब्राह्मणाश्चनिमंत्रिताः ॥ ३२६ ॥ आदरंबहुधाकृत्वाभोजनंचददौभृशम् ॥
तन्मध्येह्यामिषंदत्तंदृष्ट्वाचकुपिताद्विजाः ॥ ३२७ ॥ सर्वैशापंददुस्तंवैराक्षसोपिबभूवह ॥ इदंजन्मतृतीयंतुसर्वसौख्येन संयुतम् ॥ ३२८॥
१ । २ । ४ । ८ । १२ । १७ । २० । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६७ ॥ ९१ अथरुजार्तियोगः ॥ अथपंपापुरेदेशेब्राह्मणः
शास्त्रकोविदः ॥ धर्मदत्तइतिख्यातःपत्नीतस्यपतिव्रता ॥ ३२९ ॥ कृतानितेनपुण्यानितीर्थेतीर्थेविशेषतः ॥ एकस्मिन्समयेविप्रकृतं

कर्मजुगुप्सितम् ॥ ३३० ॥ मिथ्यापवादनिरतःपरवृत्तिहरोभृशम् ॥ तेनपापानुसारेणगतोसौयमलोककम् ॥ ३३१ ॥ षष्टिवर्षसहस्रांते
मानुषोपिततोधुना ॥ गौरोरुणोमध्यदेहोदक्षिणांगेप्रचिह्नितः ॥ मातृपितृवियोगीचसाहसीधर्मवानपि ॥ ३३२ ॥ १ । ३ । ५ । ८ । १० ।
१५ । २० । २४ । ३० । ३६ । ३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६८ ॥ ९२ अथरावलायोगः ॥ कश्चिद्वैकीकटेदेशेनर्तकोगुणगायकः ॥
नृपस्याग्रेप्रतिष्ठावान्धनधान्यसमन्वितः ॥ ३३३ ॥ नानाविलासविभवैःसुखानंदेनसंयुतः ॥ एकस्मिन्समयेविप्रकृतंकर्म
जुगुप्सितम् ॥ ३३४ ॥ मित्रस्यभवनंरम्यंदग्धंतुकृतवान्भृशम् ॥ गोपितोघस्मरस्तेनपापमाचरितंत्विदम् ॥ ३३५ ॥ पापाच्चनरकं
गत्वातिर्यग्योनौपुनःपुनः ॥ ततोवैमानुषीयोनौसुन्दरश्चसुलोचनः ॥ ३३६ ॥ १ । ४ । ६ । १० । १७ । २२ वर्षेषुकष्टम् ॥ परमा
युर्वर्षाणि ८१ ॥ ९३ अथरघुवंशयोगः ॥ कुलाचलाद्रिनिकटेब्राह्मणश्चतपोधनः ॥ शिवस्यस्मरणेनिष्ठःपरमोदारश्चवत्सलः ॥ ३३७ ॥
तपसोंतेतदाविप्रकृतंकर्मजुगुप्सितम् ॥ विद्यार्थीचापिपुत्रश्चलकुटेनप्रताडितः ॥ ३३८ ॥ समृतस्तेनदुःखेनपापमाचरितंत्विदम् ॥
तेनपापानुसारेणसविप्रोनरकंगतः ॥ ३३९ ॥ नरकान्निःसृतःसोपिमानुषोपिततोऽधुना ॥ चंचलश्चातिचतुरोभूत्वापिम्रियतेशिशुः ॥
॥ ३४० ॥ १ । ३ । ८ । १२ । १८ । २० । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६१ ॥ ९४ अथरावटीयोगः ॥ आसीज्जन्मां
तरेचैवबाहुजःशिवपूजकः ॥ परमानंदविख्यातःपत्नीतस्यकलिंगिनी ॥ ३४१ ॥ जीवानांघातनेव्यग्रःपरस्त्रीरतिलोलुपः ॥ पराप
वादनिरतश्चात्मार्थेविनियोगिकः ॥ ३४२ ॥ एकस्मिन्समयेविप्रदैवाद्गंगातटेगतः ॥ समृत्वात्रिदिवंगत्वापापाच्चनरकंतथा ॥ पुन
रागत्यमेदिन्यांकिंचित्पुण्यप्रभावतः ॥ ३४३ ॥ १ । ३ । ८ । ११ । १५ । २० । २४ । २८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७२ ॥

९५ अथरुक्मयोगः ॥ चक्रवर्तीमहाराजः सार्वभौमाधिपस्तदा ॥ अतिपुण्यार्जनंकृत्वासहस्रसैन्येनराजते ॥ ३४४ ॥ ब्राह्मणे
भ्योगृहस्थेभ्यः सत्पात्रेभ्योददौधनम् ॥ एवंनिवसतस्तत्रबहुवर्षगतागतैः ॥ ३४५ ॥ आयुषस्तुसमातित्वात्सराजापंचतांगतः ॥
पापात्पापफलंभुक्त्वापुण्यात्पुण्यफलंतथा ॥ ३४६ ॥ षष्टिवर्षसहस्रांतेचागतोधरणीतले ॥ गोधूमाकारवद्देहोयौवनेकष्टसंयुतः ॥
॥ ३४७ ॥ १ । ५ । १० । १५ । २० । २४ । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥ ९६ अथरोषयोगः ॥
विंध्याद्रिनिकटेपूर्वंतपस्वीचजितेंद्रियः ॥ गौरीशिवात्मकंध्यानंकृतंतेननिरंतरम् ॥ ३४८ ॥ एकस्मिन्समयेविप्रभाविनोर्थस्य
गौरवात् ॥ एकातुस्वैरिणीभव्यासुन्दरीचंद्रवन्मुखी ॥ ३४९ ॥ बलादाकर्षितातस्यांकृत्वासुरतसंगमम् ॥ किंञ्चित्काला
तरेचैवसविप्रःपंचतांगतः ॥ ३५० ॥ ततोवैमानुषीयोनौमर्त्यलोकेसमुद्भवः ॥ ३५१ ॥ २ । ८ । ११ । १७ । २० । २४ । ३०
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५८ ॥ ९७ अथरूपावलियोगः ॥ अनिरुद्धपुरेरम्येतत्रराजाप्रतापवान् ॥ धर्मशीलोमहातेजाः सत्यवार्ता
परायणः ॥ ३५२ ॥ कृतानिसर्वदानानिकन्योद्वाहशतानिच ॥ गोदानमश्वदानंचतथादानंचवेश्मनाम् ॥ ३५३ ॥ प्रस्थंप्रस्थं
ददौस्वर्णंब्राह्मणेभ्योविशेषतः ॥ एवंनिवसतस्तत्रबहुवर्षगतागतैः ॥ ३५४ ॥ सराजापंचतांप्राप्तोगतइन्द्रपुरंतदा ॥ इन्द्रलोका
त्परिभ्रष्टश्चागतोभूमिमंडले ॥ ३५५ ॥ सर्वेष्वङ्गेषुचारोग्यंबलाढ्यःसर्वपूजकः ॥ राजवत्सुखसौभाग्यंलभतेवांछितंफलम् ॥
॥ ३५६ ॥ ३९ वर्षेमृत्युः ॥ ९८ अथरवेर्मुखयोगः ॥ अथशम्भलदेशेतुबोधनोनामब्राह्मणः ॥ ब्रह्मकर्मपरिभ्रष्टः क्रय
विक्रयणेरतः ॥ ३५७ ॥ धनधान्यसमायुक्तः कार्पण्येनविमोहितः ॥ एकस्मिन्समयेविप्रब्राह्मणस्यप्रसंगतः ॥ ३५८ ॥ तीर्था

ऽगाहनंकृत्वातथादानार्चनंकृतम् ॥ एवंनिवसतस्तत्रबहुवर्षगतागतैः ॥ ३५९ ॥ आयुषस्तुसमाप्तित्वात्समृतस्त्रिदिवंगतः ॥
पापात्पापफलंभुक्त्वापुण्यात्स्वर्गंतथाऽनघ ॥ ३६० ॥ ततोवैमानुषीयोनौचागतोधरणीतले ॥ ३६१ ॥ १ । २ । ४
७ । ९ । १५ । २० । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ९९ अथराज्याभिषेकयोगः ॥ आसीज्जन्मांतरेचैव
भीष्मकोनामब्राह्मणः ॥ कृतानितेनपुण्यानिमासिमासिचहायने ॥ ३६२ ॥ एकस्मिन्समयेविप्रब्राह्मणस्यहृतंधनम् ॥ नदत्तं
लोभहेतोश्चपापमुग्रमुपार्जितम् ॥ यमलोकेऽभवत्प्रातस्ततोवैमानुषोऽधुना ॥ ३६३ ॥ २ । ५ । १० । २० । २८ । ३५ ।
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७६ ॥ १०० अथरोकांगीयोगः ॥ देशेचोत्कलकेचैवनृसिंहोब्राह्मणःसच ॥ देवताराधनेमग्नःपरि
वारस्यपोषकः ॥ ३६४ ॥ वामाचाररतोधीमान्बहुशास्त्रस्यपाठकः ॥ सर्वजीवबलिंदत्त्वादेव्यैचैवविशेषतः ॥ ३६५ ॥ एकस्मिन्समये
विप्रमद्यपानंकृतंभृशम् ॥ उन्मत्तोपिबभूवापिकृतंकर्मजुगुप्सितम् ॥ ३६६ ॥ आत्मजस्यशुभापत्नीतस्यांतुरमणंकृतम् ॥ तेनपापानुसारेण
कुष्ठरोगेणवैमृतः ॥ शतजन्मानिकीटाश्चमानुषोपिततोऽधुना ॥ ३६७ ॥ १ । ३ । ६ । ९ । ११ । १८ । १९ । २० । २८ । ३१ ।
३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६७ ॥ १०१ अथरुस्वरयोगः ॥ आसीज्जन्मान्तरेचैवकेशवोनामपादजः ॥ सरस्वत्याश्चनिकटेन्यव
सत्परिवारयुक् ॥ ३६८ ॥ धनधान्यसमृद्धोपिस्वज्ञातीयाश्चभोजिताः ॥ अभ्यागताश्चभोविप्रमासिमासिचहायने ॥ ३६९ ॥ एकस्मि
न्समयेविप्रगोगृहंचतदाऽकरोत् ॥ तेनाऽयंबाहुजोजातोराजरोगेणकष्टितः ॥ ३७० ॥ २ । ४ । ८ । १२ । १८ । २० । २८ । ३६ वर्षेषु
कष्टम् ॥ परमायुर्वर्षाणि ७४ ॥ १०२ ॥ अथलक्ष्मियोगः ॥ विजयाद्रिसमीपेचवैश्योनामकृपाकरः ॥ क्रयविक्रयकर्ताचद्रव्यस्योत्पाद

नेरतः ॥ ३७१ ॥ श्रुत्वातुपुस्तकंनित्यंकथांचविविधांतथा ॥ सस्नातोमृगगेभानौमासमेकंनिरंतरम् ॥ ३७२ ॥ सम्प्राप्यभवनेशीघ्रंकृ
तंकर्मचदारुणम् ॥ ज्येष्ठभ्रातुश्चयापत्नीबलादाकर्षिताखलु ॥ ३७३ ॥ पापमाचरितंतेनकृत्वाभोगंनिरंतरम् ॥ प्राप्तेवार्द्धक्यसमयेसमृत
स्त्रिदिवंगतः ॥ तिर्यग्योनिशतंभुक्त्वापश्चाद्वैमानुषोऽधुना ॥ ३७४ ॥ १ । ३ । ८ । १७ । २० । २८ । ३२ वर्षेषुकष्टम् ॥ परमायुर्वर्षा
णि ८१ ॥ १०३ अथलुंठनयोगः ॥ नीलकंठेचनगरेवसंतिबहवोजनाः ॥ तत्रशूद्रोवसत्त्वेकःकृपणोनामविश्रुतः ॥ ३७५ ॥ कृषिवाणि
ज्यनिरतोबहुवर्षगतागतैः ॥ एकदाचंद्रमोग्रस्तेमलमूत्रंतथाऽकरोत् ॥ ३७६ ॥ तेनपापानुसारेणकुंभीपाकंतदागतः ॥ कतिवर्षसह
स्रांतेमानुषोपिततोऽधुना ॥ ३७७ ॥प्रशस्तवक्तानिपुणोयौवनेकष्टसंयुतः ॥ ३७८ ॥१ । ३ । ७ । १३ । १८ । २३ । ३१ वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ७८ ॥ १०४ अथलोकपालयोगः ॥ आसीत्पूर्वभवेकश्चिद्विष्णुभक्तश्चपादजः ॥ कृतानितेनपुण्यानिसाधूनांचप्रसंगतः ॥
॥ ३७९ ॥ एकस्मिन्समयेविप्रप्रयागेह्यगमत्तदा ॥ सर्वस्वंविधिनादत्त्वासत्पात्रायद्विजायच ॥ ३८० ॥ वेण्यांमग्नोबभूवापिगतइंद्र
पुरंतदा ॥ बभूवबाहुजःसोपिचक्रवर्तीप्रतापवान् ॥ इदंजन्मतृतीयंतुसुखसौभाग्यसंयुतम् ॥ ३८१ ॥ १ । ३ । ५ । ८ ।
११ । १७ । २० । ३३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८९ ॥ १०५ अथलोकाधीशयोगः ॥ हस्तिनानगरेरम्येवसंतिबहवोजनाः ॥
चक्रपाणिःसमाख्यातोब्राह्मणःशास्त्रकोविदः ॥ ३८२ ॥ नृपस्याग्रेप्रतिष्ठावान्महोदारश्चसत्क्रियः ॥ तत्रभूपानुकम्पायाद्रव्यंतुविविधं
कृतम् ॥ ३८३ ॥ कन्योद्वाहंतथाकृत्वागोत्रकन्याविवाहिताः ॥ एवंनिवसतस्तत्रबहुवर्षगतागतैः ॥ ३८४ ॥ आयुषस्तुसमाप्तित्वात्स
विप्रःपंचत्वंगतः ॥ अंत्यवेद्येसमुत्पन्नःसुखानंदेनसंयुतः ॥ ३८५ ॥ कन्याश्चबहवोजाताःकिंचित्पुत्रधनान्वितः ॥ गुप्तंपापं

कृतंतेनदक्षिणांगेप्रचिह्नितः ॥ ३८६ ॥ १ । ३ । ८ । १३ । १७ । २१ । २५ । २८ । ३१ । ३६ वर्षेषुकष्टम् ॥ परमा
युर्वर्षाणि ७७ ॥ १०६ अथयवकयोगः ॥ अथवाराणसीक्षेत्रेबाहुजोधनवानपि ॥ क्षात्रधर्मंपरित्यज्यक्रयविक्रयकारकः ॥ ३८७ ॥
कृतानितेनद्रव्याणिकार्पण्येनबहूनिच ॥ एकस्मिन्समयेविप्रद्रव्यलुब्धेनचेतसा ॥ ३८८ ॥ परदेशेगतोदैवात्तत्रप्राप्तिःकृताभृशम् ॥
परस्त्रीगमनासक्तोबहुवर्षगतागतैः ॥ ३८९ ॥ सक्षत्रःपंचतांप्राप्तोयमलोकेसमागतः ॥ षष्टिवर्षसहस्रांतेचागतोधरणीतले ॥
नात्युच्चोनातिह्रस्वश्चनगौरोनातिश्यामलः ॥ ३९० ॥ १ । ३ । ६ । ८ । ११ । १६ । २० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि
६८ ॥ १०७ अथवार्जकयोगः ॥ अथचंद्राद्रिनिकटेबाहुजःकृषिकर्मकः ॥ सेवकेतिसमाख्यातःपत्नीपुत्रसमन्वितः ॥ ३९१ ॥
शिवस्यस्मरणेमग्नःशौचाचारविवर्जितः ॥ एकस्मिन्समयेविप्रसीमावादरतस्तदा ॥ ३९२ ॥ स्वगोत्रेणकृतंयुद्धमतिप्रबलदंडिना ॥
घातितःसोपिबहुभिःप्रहारैरतिदारुणैः ॥ ३९३ ॥ संग्रामभूमौसमृतोगत्वाचेंद्रपुरंतदा ॥ पुनरागत्यमेदिन्यांकिंचित्पुण्यप्रभा
वतः ॥ ३९४ ॥ उज्ज्वलःसुखसंयुक्तःपरोपकरणेरतः ॥ वामनेत्रविकारीचभुजदेशेप्रचिह्नितः ॥ ३९५ ॥ १ । ४ । ८ । १६ २२ वर्षेषु
कष्टम् ॥ परमायुर्वर्षाणि ७६ ॥ १०८ अथरुणहायोगः ॥ जंञ्वालेनगरेपूर्वंमहाक्षत्रीनराधिपः ॥ सशूद्रकुलसंभूतश्चोग्रदंडःप्रतापवान्
॥ ३९६ ॥ जयराजइतिख्यातःसपत्नीकःसपुत्रकः ॥ नानायुद्धंकृतंतत्रजित्वाशत्रुबलंबलात् ॥ ३९७ ॥ बहुयज्ञाःकृतास्तेनचातुर्मासव्र
तंतथा ॥ सराजापंचतांप्राप्तःपत्नीजातासतीतदा ॥ ३९८ ॥ उभयोःकर्मणोर्हेतोरिंद्रलोकंसमागतौ ॥ षष्टिवर्षसहस्रांतेमानुषोपिततोऽ
धुना ॥ ३९९ ॥ १ । ४ । ८ । १३ । १७ । २० । ३० । ३६ । ३८ । ४१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०० ॥ १०९ अथरौद्र

योगः ॥ गांधारेनगरेपूर्वंवसंतिबहवोजनाः ॥ तत्रत्वेकोद्विजःशुद्धःशास्त्रज्ञोबहुभाषकः ॥४००॥ अहंकारेचनिरतस्तेनकोपिनपाठितः॥
परस्त्रीलोलुपःसोपिपरद्रव्यापहारकः ॥ ४०१ ॥ एकस्मिन्समयेविप्रगयाश्राद्धमथाऽकरोत् ॥ संप्राप्यभवनंशीघ्रंकृतंकर्मसुदारुणम्
॥ ४०२ ॥ भगिनीपुत्र्यांचगमनंहठात्कृत्वाद्विजोत्तम ॥ संप्राप्ययमलोकंचभुक्त्वाभोगांश्चशाश्वतान् ॥ ४०३ ॥ ततोवैमानुषीयोनौदुः
खेनातिप्रपीडितः ॥ ४०४ ॥ १ । ४ । ८ । १२ । २० । २४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥ ११० अथद्वितीयरौद्रयोगः ॥
चित्रकूटाद्रिनिकटेब्राह्मणोवेदपारगः ॥ सत्यधर्मार्जनेनिष्ठःपठनेपाठनेरतः ॥ ४०५ ॥ नृपस्याग्रेप्रतिष्ठावान्परमात्मसुचिन्तकः ॥
एकस्मिन्समयेविप्रतीर्थावगाहनेगतः ॥ ४०६ ॥ तत्रशूद्रस्यदुहितासुंदरीकामुकीप्रिया ॥ बलादाकर्षितातेनमोहनोन्मादनेखलु॥ ४०७ ॥
पत्नीवत्स्थापनंकृत्वातथाभोगंनिरंतरम् ॥ किंचित्कालांतरेविप्रसाचनिष्कासिताहठात् ॥ ४०८ ॥ तेनपापानुसारेणसविप्रोनरकेगतः ॥
बहुवर्षसहस्रांतेमानुषोधरणीतले ॥ ४०९ ॥ आयुर्वर्षाणि ५९ ॥ १११ अथतृतीयरौद्रयोगः ॥ कश्चित्क्षात्रकुलेपूर्वमंशुमानोमहाबलः ॥
सहसैन्येनराजतेस्मप्रतापीचगुणाकरः ॥ ४१०॥ पत्नीदेवमतीतस्यपतिसेवापरायणा ॥ समरेषुजयंनित्यंकृत्वावशेवसुंधराम्॥ ४११ ॥
एकदाचंद्रमोग्रस्तेकृत्वादानंविशेषतः ॥ सत्पात्रेचद्विजेदत्तंगोभूम्यश्वहिरण्यकम् ॥ तेनपुण्यप्रभावेणचात्रजन्मसुखाधिकम् ॥ ४१२ ॥
१ । ६ । १० । १६ । २४ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१ ॥ इतिश्रीभृगुसंहितायांयरलवादियोगकथनंनामनवमंप्रकरणम् ॥ ९ ॥
अथशवर्गयोगाः ॥ १ अथशिवायोगः ॥ शिवायोगेचयोजातःपूर्वजन्मनिब्राह्मणः ॥ सिद्धदेवःसमाख्यातःपत्नीतस्यमनोहरा ॥ १ ॥
धनधान्यसमृद्धस्तुतपश्चर्य्यारतःसदा ॥ सुशीलातस्यपुत्रीचपितृभक्तिपरायणा ॥ २ ॥ साबालायुवतीजातापतियोग्याबभूवह ॥ उद्वाह

कृतास्तस्याबृद्धविप्रायदापिता ॥ ३ ॥ तस्यद्रव्याणिसर्वाणिगृहीत्वाविविधैश्छलैः ॥ पुत्रावित्तःकृताभागाबहुवर्षगतागतः ॥ ४ ॥
सविप्रःपंचतांप्राप्तःपापाच्चनरकेगतः ॥ पुण्यात्स्वर्गेऽभवद्वासोह्यपिवर्षसहस्रकम् ॥ ५ ॥ ततोवैमानुषोजातश्चात्रैवचेतथाधुना ॥
ईषद्गौरोमध्यमश्चदक्षिणांगेप्रचिह्नितः ॥ ६ ॥ प्रथमेद्वितीयेवर्षेलूतावाथव्रणानिच ॥ षष्ठाऽष्टमेचविकलःशीतलायाज्वरेणच ॥ ७ ॥
दशमैकादशेवर्षेपीड्यमानकलेवरः॥तथारुद्रार्कवर्षेस्मिन्मंगलंप्राप्यकामिनम्॥८॥विंशतिवर्षेभवेत्पुत्रश्चतुर्विंशेरुजाकुलः॥ खवेदाब्देगतेक
ष्टंषष्टिरब्दांश्चजीवति॥९॥२अथसत्ययोगः॥आसीज्जन्मांतरेचैवब्राह्मणःशास्त्रकोविदः॥दुःखंतुसर्ववस्तूनांभोजनंचयदाकदा ॥ १०॥नयाच
नंकृतांकिंचिन्नकृतश्चोद्यमःखलु॥पत्नीपतिव्रतातस्यसंतुष्टासर्वदाद्विज ॥ ११ ॥ एकस्मिन्समयेविप्रह्येकविंशद्दिनानिच ॥ महोत्पातोबभूवा
पिपर्जन्यकृद्वलाहकः ॥ १२ ॥ भगवन्नामस्मरन्तौहितूष्णीभूतौचदम्पती ॥ द्वाविंशाहेतुविप्रेणकणभिक्षाकृताद्विज॥ १३ ॥ सक्तूनांपि
डनंकृत्वाभोजनार्थेसमाविशत् ॥ विष्णुश्चभिक्षुकोभूत्वाहरेर्नामस्मरन्नगात् ॥ १४ ॥ सक्तुपिंडश्चसजलस्तस्याग्रेचनिवेदितः ॥ आविर्ब
भूवसहसाबिडौजाश्चद्विजोत्तम ॥ १५ ॥ विमानाग्रोपरिस्थाप्यजगामनिजवेश्मनि ॥ बहुवर्षसहस्राणिभुक्तास्वर्गभवंफलम् ॥ १६ ॥
ततः पुण्यक्षयेजातेपुनरागत्यभूतले ॥ सुशीलश्चातिभक्तश्चसर्वसम्पद्युतोधुना ॥ १७ ॥ गौरश्चचपलोवक्तादानधर्मपरायणः ॥
॥ १८ ॥ १ । ४ । ७ । ११ । १८ । २८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६१ ॥ ३ अथसौदासयोगः ॥ सभामान्योनरोजातःपूर्वंशूद्रस्य
वैकुले ॥ देशेपांचालकेचैवन्यवसत्परिवारयुक् ॥१९॥ बुद्धिसेनिरितिख्यातापत्नीतस्यमनोहरा ॥ सर्वविद्याविवेकीचसभामानीप्रतिष्ठितः
॥ २० ॥ समंत्रविद्ऽथोभूत्वानृपस्याग्रेप्रतिष्ठितः ॥ नृपानुकम्पयाविप्रराजवत्सुखभोगभाक् ॥ २१ ॥ एकदाद्रव्यलोभेनप्रजानांलुं

ठनंकृतम् ॥ अन्यायात्कुक्कुटोभूत्वातिर्यग्योनिशतंखलु ॥ ततोवैमानुषीयोनौदद्रुकुष्ठसमन्वितः ॥ २२ ॥ १ । ३ । ८ । १४ । १९ । २८ । ३१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ४ अथसात्त्विकयोगः ॥ आसीज्जन्मांतरेचैवतपस्वीसात्त्विकस्त्वसौ ॥ धर्मसेनीरितिख्यातःशिवस्यस्मरणेरतः ॥ २३ ॥ एकांघ्रिभुजमुत्थाप्यनिराहारत्तश्चनिर्जलः ॥ तमसायास्तटेचैवतपश्चर्य्यामथाकरोत् ॥ २४ ॥ एकातुकन्यकाभव्याचाकस्मात्तुतदागता ॥ रूपयौवनलावण्यायथाचेंद्रस्यचोर्वशी ॥ २५ ॥ तपश्चर्य्यांपरित्यज्यनिशम्यव्यसनेरतः ॥ मृताश्चपापबाहुल्यादर्भकाश्चद्विजोत्तम ॥ २६ ॥ समृत्वादिविगत्वातुभुक्त्वाभोगांश्चशाश्वतान् ॥ ततोमानुष्यमापन्नःकुशीलचेष्टयान्वितः ॥ २७ ॥ १ । ३ । ६ । ९ । १२ । १७ । २० । ३० । ३६ । ४० । ४६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७७ ॥ ५ अथसत्यवर्त्तिकयोगः ॥ कश्चिद्वैश्यकुलेपूर्वंधनाढ्योमृदुभाषकः ॥ शौचाचाररतोनित्यमात्मार्थेविनियोगितः ॥ २८ ॥ द्रव्यंतुविपुलंकृत्वाकार्पण्येनविमोहितः ॥ नदानंनचभोक्तव्यंनातिथ्यंश्राद्धकर्मणि ॥ २९ ॥ एकस्मिन्समयेविप्रभगवद्गीताश्रुताखलु ॥ सर्वस्वंविधिनादत्त्वासत्पात्रायद्विजायच ॥ ३० ॥ तेनपुण्यप्रभावेणस्वर्गेगत्वाचवैश्यजः ॥ ततोवैमानुषोजातःसर्वसौख्येनसंयुतः ॥ धनीमानीमहोग्रश्चधर्मकर्म्मार्चनेरतः ॥ ३१ ॥ सज्जनसेवीदयालुश्चब्राह्मणोगुणसागरः ॥ सर्वकर्मविघातीचमधुपानंसदाऽकरोत् ॥ ३२ ॥ एकस्मिन्समयेविप्रगुरुपत्नीसमागता ॥ बलादाकर्षितातस्यांहठात्तेनरतिःकृता ॥ ३३ ॥ सतेनैवतुपापेनपशुयोनौबभूवह ॥ जम्बूकोगर्दभोभूत्वासूकरोपिबभूवह ॥ ३४ ॥ महाकष्टाहनरकेशीतिवर्षसहस्रकम् ॥ ततोवैमानुषोजातोभीषणोभैरवाकृतिः ॥ ३५ ॥ १ । ३ । ८ । १२ । १७ । २१ । २४ । ३० । ३६ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०९ ॥ ६ अथ

संघायोगः ॥ पुराह्याभीरजातिश्चकीकटेहिवसत्यसौ ॥ गोधनंधनधान्यंचक्रयविक्रयतत्परः ॥ ३६ ॥ तत्सकाशात्कृतंद्रव्यंका
र्पण्येनविमोहितः ॥ भिक्षुकोद्वारमगमद्दधिभिक्षाचयाचिता ॥ ३७ ॥ नदत्तंतेनवैकिंचिदपभ्रंशंवदंस्तदा ॥ शापंदत्त्वाचवि
प्रोऽसौजगामस्वगृहेतदा ॥ ३८ ॥ तत्पापेनश्रियस्तस्यक्षयंयाताद्विजोत्तम ॥ मृत्वाचनरकेगत्वाकुंभीपाकेतथाभृशम् ॥ बहु
वर्षसहस्रांतेमानुषोपिततोऽधुना ॥ ३९ ॥ १ । ३ । ८ । १३ । १८ । २८ । ३० । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७९ ॥ ७
अथसारार्द्धयोगः ॥ अंगदेशेऽभवत्पूर्वंबाहुजः कृषिकारकः ॥ देवदत्तः समाख्यातःपत्नीद्वयसमन्वितः ॥ ४० ॥ ज्येष्ठातुचंच
लाकिंचित्परपुंसुरताऽधमा ॥ बहुंजनंविलोक्यापितृणवत्त्यागनंकृतम् ॥ ४१ ॥ जगामतीर्थयात्रायांमार्गेमृत्युमुपागता ॥ स्वर्गा
पवर्गभोगश्चततोवैमानुषोऽधुना ॥ कुशलः सर्वधर्मेषुकिंचिद्वित्तसमन्वितः ॥ ४२ ॥ १ । ८ । १६ । २४ । ३४ । वर्षेषुकष्टम् ॥ पर
मायुर्वर्षाणि ७८ ॥ ८ अथसारावलीयोगः ॥ कश्चिद्वैश्यकुलेपूर्वंवंगदेशेवसत्यसौ ॥ केशवेतिसमाख्यातःपत्नीपुत्रसमन्वितः ॥ ४३॥
क्रयविक्रयकर्ताचवाणिज्येचपरायणः ॥ द्रव्यंचविपुलंकृत्वाधर्ममार्गपरायणः ॥ ४४ ॥ एकस्मिन्समयेविप्रकृतंकर्मजुगुप्सितम् ॥ ब्रा
ह्मणानांकृतानिंदासगर्भास्त्रीप्रताडिता ॥ ४५ ॥ सामृतातेनदुःखेनपापमाचरितंत्विदम् ॥ सवैश्यःपंचतांगत्वापापाच्चनरकेगतः ॥ षष्टिव
र्षसहस्रांतेमानुषत्वंततोभुवि ॥ ४६ ॥ १ । ३ । ८ । ११ । १६ । २० । २४ । २९ । ३३ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥ ९
अथसनातनयोगः ॥ आसीत्पूर्वेभवेकश्चिद्ब्राह्मणोवेदपारगः ॥ चित्रदेवःसमाख्यातः पत्नीतस्यातिकर्कशा ॥ ४७ ॥ अर्भकान्पाठयेत्त
त्रस्मार्तेश्रौतेचनैष्ठिकः ॥ एकस्मिन्समयेतत्रलोभाकृष्टेनचेतसा ॥ ४८ ॥ धनंहृतंस्वशिष्यस्यतेनवैविविधैश्छलैः ॥ पापात्पापफलं

मुक्ततोनेमानुषोऽधुना ॥ ४९ ॥ २ । ५ । ८ । १३ । १७ । २१ । २८ । ३३ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६६ ॥ १०
अथसोमयोगः ॥ शृंगवेरपुरेरम्येवसंतिबहवोजनाः ॥ तत्रवैश्योवसत्त्वेकोमहोदारश्चवत्सलः ॥ ५० ॥ आरामान्विविधान्कृत्वापथिकूपा
श्चनिर्मिताः ॥ तीर्थेतीर्थेकृतासेवाऋषीणांचपुनःपुनः ॥ ५१ ॥ प्रस्थंप्रस्थंददौस्वर्णंसत्पात्रायद्विजायच ॥ एकस्मिन्समयेविप्रदेवात्स्व
स्नासहारतः ॥ ५२ ॥ तत्पापान्नरके गत्वापुण्याज्जातोत्रबाहुजः ॥ गौरोरुणोमध्यदेहोमुखेपार्श्वेप्रचिह्नितः ॥ ५३ ॥ १ । ४ । ८ । १६ ।
१८ । २४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ११ अथसज्यायोगः ॥ सज्यायोगेपियोजातःपूर्वजन्मनिब्राह्मणी ॥ सुंदरीचातिलाव
ण्यामृगाक्षीचंद्रवन्मुखी ॥ ५४ ॥ नानाविलासकुशलापतिवंचनतत्परा ॥ नररतिसमासक्तास्वैरिणीकामपीडिता ॥ ५५ ॥ तत्सकाशा
त्कृतंद्रव्यंबहुकालगतागतैः ॥ प्राप्तेवार्द्धक्यसमयेवापीनिर्मितवत्यसौ ॥ ५६ ॥ तीर्थाटनंकृतंसम्यक्साम्रताबद्रिकाश्रमे ॥ तेनपुण्या
वशेषेणसाजाताऽत्रपुमान्द्विज ॥ प्रसन्नवदनोभव्योदक्षिणांगेसचिह्नितः ॥ ५७ ॥ १ । ५ । ८ । १३ । १७ । २० । २४ । ३०
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥ १२ अथशाकुनीयोगः ॥ आंत्रवेद्येऽवसत्पूर्वंबाहुजश्चधनाधिपः ॥ सहदेवःसमाख्यातः
पत्नीतस्यहुताशिनी ॥ ५८ ॥ कृषिकर्मोद्यमेमग्नोधान्यराशिःकृतोभृशम् ॥ ॥ एकस्मिन्समयेविप्रगौरेकातुक्षुधार्दिता ॥ ५९ ॥
तयाजवेनकवलोभुक्तश्चैवद्विजोत्तम ॥ बाहुजोपिप्रधावित्वालगुडेननिवारिता ॥ ६० ॥ साम्रतातेनदुःखेनपापमाचरितंत्विदम् ॥
बाहुजःससहायश्चकुंभीपाकंतुभुक्तवान् ॥ तिर्यग्योनौसमुत्पन्नःपश्चाद्वैमानुषोऽधुना ॥ ६१ ॥ १ । ४ । ७ । १४ । १८ । २१
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७८ ॥ १३ अथशाकिनीयोगः ॥ चम्पकारण्यनिकटेविप्रएकस्तुवैष्णवः ॥ सर्वधारीतिविख्यातःपत्नी

तस्यविवेकिनी ॥ ६२ ॥ ब्रह्मकर्मपरिभ्रष्टोमदांधःपापमोहितः ॥ एकदाकार्त्तिकेमासिसेवितंतुलसीवनम् ॥ ६३ ॥ दीपावलिं
ततोदत्त्वाब्राह्मणस्यप्रसंगतः ॥ ततःपुण्यप्रभावेणस्वर्गंगत्वाचब्राह्मणः ॥ ततःपुण्यक्षयेजातेपुनरागत्यभूतले ॥ ६४ ॥ १।५।८।
१३। १७। २१। वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥ १४ अथशचीयोगः ॥ आसीज्जन्मांतरेचैवपादजोधनवानपि ॥ पत्नीचंद्र
वतीतस्यमहाभव्यागुणान्विता ॥ ६५ ॥ शूद्रःपरमधर्मात्मापरकार्य्यपरायणः ॥ एकस्मिन्समयेविप्रदृष्ट्वास्वीयांसकोपतः ॥६६॥
परनरसमासक्तांपर्य्यंकेषुद्विजोत्तम ॥ जवेनतरसागत्वाखड्गमुद्यम्यक्रोधतः ॥ ६७ ॥ सारात्रौघातितातेनपापमाचरितंत्विदम् ॥
तत्पापान्नरकंगत्वाह्यसिपत्रवनांतरे ॥ ६८ ॥ कृकलासोऽभवत्सोपिमर्कटोपिबभूवह ॥ ततोवैमानुषीयोनौचागतोधरणीतले ॥ ६९ ॥
३।६।९।१७। २२ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥ १५ अथसेनायोगः ॥ कलिंगदेशेह्यवसच्चशूद्रःशांतो
पिदांतःखलुदेवभक्तः ॥ क्रियाविशुद्धः परमोप्युदारःशिवस्यनामस्मरणेसमर्थः ॥ ७० ॥ पाटीरपुष्पैःसयवैस्तिलैश्चह्यभ्यर्चयंश्चप्रतिवास
रंहरम् ॥ तीर्थाभिलाषीसततंकृपायुतः परत्रशुद्धार्थकृतातुनम्रता ॥ ७१ ॥ एकस्मिन्समयेविप्रकृतंकर्मजुगुप्सितम् ॥ स्वस्त्रियास्त्याग
नंकृत्वापरमार्य्यासुमानिता ॥ ७२ ॥ तत्पापान्नरकेगत्वापुण्यात्स्वर्गंतथाऽनघ ॥ पुनरागत्यमेदिन्यांसर्वसौख्येनसंयुतः ॥ ७३ ॥
१।४।८। १३ । १७ । २१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८६ ॥ १६ अथसचानकयोगः॥पर्वतारण्यनिकटेब्राह्मणोन्यवसत्तदा ॥
ब्रह्मचर्य्यरतोनित्यंव्रतकर्मसमाचरत् ॥ ७४ ॥ कृतस्तेनजपस्तत्रदुर्गामन्त्रस्यवैद्विज ॥ जपस्यांतेमृतःसोपिबभूवक्षितिपाधिपः ॥ ७५ ॥
उग्रदंडः प्रतापीचजित्वाशत्रुबलंबलात् ॥ दत्तानितत्रदानानिब्राह्मणायकुटुंबिने ॥ ७६ ॥ राज्यदोषात्कृतंपापंनानाछलसमन्वितम् ॥

मृत्वातुनरकंगत्वाबहूब्दांश्चनिरंतरम् ॥ ततोवैमानुषोजातःसुन्दरश्चसुलोचनः ॥ ७७ ॥ २ । ४ । ८ । १२ । १७ । २० । २४ । २८ । ३१ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ १७ अथशिवानाम्नीयोगः ॥ नैमिषारण्यनिकटेबाहुजश्चप्रतापवान् ॥ गन्धर्वइतिविख्यातः पत्नीद्वयसमन्वितः ॥ ७८ ॥ पापकर्मणिनिष्ठश्चपरदाराभिलाषुकः ॥ एकस्मिन्समयेविप्रमदालीढोबभूवह ॥ ७९ ॥ भ्रातृकन्याविशालाक्षीसुन्दरीषोडशाब्दिका ॥ बलादाकर्षितातस्यांकृत्वासुरतसंगमम् ॥ ८० ॥ पापमाचरितंतेनगोपितंयस्मरंद्विज ॥ कालांतरेमृतः सोपिनानानरकेषुसंस्थितः ॥ ८१ ॥ नानायोनौभ्रमन्सोपिपश्चाद्भूत्वाचमानुषः ॥ ८२ ॥ १ । ४ । ८ । १३ । १९ । २२ २६ । २९ । ३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६८ ॥ १८ अथसृतयोगः ॥ वंगदेशेऽवसत्पूर्वंनारदोनामबाहुजः ॥ प्रपञ्चाधिकरणेनिष्ठः परद्रोहाभिलाषुकः ॥ ८३ ॥ यत्रतत्राभ्रमत्सोपिव्याकुलश्चमनोरथैः ॥ दारिद्र्येणाऽभवत्कष्टीरोगेणमहतावृतः ॥ ८४ ॥ गंगास्नानंकृतंतेनसमृतः कालचोदितः ॥ पापात्पापफलंभुक्त्वायोनिंभुक्त्वाकथंचन ॥ ८५ ॥ ततोवैमानुषीयोनौमर्त्यलोकंसमागतः ॥ ८६ ॥ १ । २ । ९ । १७ । २० । २५ । २९ । ३६ । ४० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ १९ अथसौराष्ट्रीयोगः ॥ पूर्वंजन्मांतरेचैवकीकटेनिवसन्द्विज ॥ गयायान्निकटेचैवब्राह्मणःशास्त्रकोविदः ॥ ८७ ॥ अर्भकान्पाठयामासलोभाकुलितमानसः ॥ प्रतिग्रहेणजीवेद्वैप्रत्यहंचतदानघ ॥ ८८ ॥ एकदाचन्द्रमोग्रस्तेगंगातीरेतदानघ ॥ छागदानंगृहीत्वातुपुनश्चगृहमागतः ॥ ८९ ॥ मृत्वाचनरकेवासः षष्टिवर्षसहस्रकम् ॥ ततोवैमानुषीयोनौदारिद्र्येणप्रपीडितः ॥ ९० ॥ २ । ५ । ९ । १५ । १८ । २२ । २४ । २९ । ३० । ३३ । ३६ । ३९ । ४० । ४२ । ४३ । ४५ । ४८ । ५१ । ५७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८३ ॥ २० अथहस्तियोगः ॥

कांपिल्येनगरेपूर्वंब्राह्मणःशिवभक्तिमान् ॥ केशवेतिसमाख्यातःपत्नीपुत्रसमन्वितः ॥ ९१ ॥ धनधान्यसमृद्धस्तुकापण्यनातानघ्नुरः ॥
एकस्मिन्समयेविप्रब्राह्मणस्यप्रसंगतः ॥ ९२ ॥ व्रतंकृतंह्येकादश्यांमासिमासिनिरंतरम् ॥ सत्पात्रायद्विजायाथददौदानंचश्रद्धया॥९३॥
तेनपुण्यप्रभावेणस्वर्गंगत्वाचब्राह्मणः ॥ भुक्त्वास्वर्गफलंसम्यक्पुनरागत्यभूतले ॥ ९४ ॥ १ । ३ । ६ । ९ । १२ । १८ । २१ । २६ ।
२९ । ३४ । ४० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९५ ॥ २१ अथहत्यायोगः ॥ कुंडिनेनगरेपूर्वंनृपस्त्वेकःसनातनः ॥ सर्वेश्वरःसमाख्या
तःपत्नीतस्यहुताशनी ॥ ९५ ॥ निर्विघ्नंचाकरोद्राज्यंदेवब्राह्मणपूजकः ॥ एकस्मिन्समयेविप्रभाविनोर्थस्यवैबलात् ॥९६॥ प्रजाद्रव्यंहृतं
तेनसमृतःशोकसंयुतः ॥ तत्पापान्नरकंगत्वाभुक्त्वावर्षसहस्रकम् ॥ ततोवैमानुषोजातोधनधान्यसमन्वितः ॥ ९७ ॥ ३ । ५ । ८ । १३ ।
१७ । २२ । २७ । २९ । ३३ । ३७ । ४३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०५ ॥ २२ अथहोरायोगः ॥ मैथिलेनगरेपूर्वंकुलालोन्यव
सत्तदा ॥ प्ररोहणःसमाख्यातःपत्नीतस्यपतिव्रता ॥ ९८ ॥ भांडानिक्रियतेसम्यक्तत्सकाशात्कृतंधनम् ॥ पुण्यमार्गेव्ययंकृत्वातथा
तीर्थाटनंकृतम् ॥ ९९ ॥ मृतःस्वर्गंगतःसोपिपुनरागत्यभूतले ॥ १०० ॥ १ । ४ । ८ । १३ । १८ । २४ । २८ । ३० । ३५ । ३९
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८६ ॥ २३ अथसानुमान्योगः ॥ आसीज्जन्मांतरेचैववैश्योनामदिवाकरः ॥ देशेहिसिद्धपृष्ठेच
ज्वालामुख्याश्चसन्निधौ ॥ १०१ ॥ धनधान्यसमायुक्तोमहोदारश्चभक्तिमान् ॥ कृतानिसर्वकर्माणिपर्वस्वपिविशेषतः ॥ १०२ ॥
एकस्मिन्समयेविप्रनृपेणलुंठितस्तदा ॥ गृहंत्यक्त्वावनंगत्वातपश्चर्य्याकृताद्दढम् ॥ १०३ ॥ एकांघ्रिभुजमुत्थाप्यविष्णोर्ना
मस्मरन्नसौ ॥ विमानाग्र्योपरिस्थित्वाह्यप्सरोगणसेवितः ॥ १०४ ॥ गतोसौचेंद्रलोकेचतत्रस्थित्वाविशेषतः ॥ इन्द्रलोका

त्वारिभ्रष्टश्चागतोधरणीतले ॥ १०५ ॥ १ । ३ । ६ । १० । १८ । २४ । २९ । ३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि
९१ ॥ २४ अथसहरोषायोगः ॥ विंध्याद्रिनिकटेपूर्वंब्रह्मदत्तेतिब्राह्मणः ॥ पत्नीपुत्रसमायुक्तः परिवारस्यपोषकः ॥ १०६ ॥
यजमानात्सुखंतस्यप्रत्यहंजीवनंतदा ॥ एकस्मिन्समयेविप्रभाविनोर्थस्यवैबलात् ॥ १०७ ॥ गृहदानंगृहीतंचवस्त्रंस्वर्णंतुभाज
नम् ॥ एवंनिवसतस्तत्रबहुवर्षगतागतैः ॥ १०८ ॥ सविप्रःपंचतांप्राप्तःपापाच्चनरकेगतः ॥ सर्पयोनिशतंभुक्त्वाततोवैमानुषोऽ
धुना ॥ १०९ ॥ १ । ३ । ५ । ७ । १२ । १६ । २० । २८ । ३० । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥
२५ अथसुरकार्यसाधकयोगः ॥ मरुस्थलेवसत्पूर्वंबाहुजोनामशंकरः ॥ प्रतापमदयुक्तेनकृतंकर्मचदारुणम् ॥ ११० ॥ अगम्या
गमनंकृत्वाचादंडयादंडितास्तदा ॥ अधर्मेनिरतः सोपिप्रजानांदंडनेरतः ॥ १११ ॥ प्राप्तेवार्द्धक्यसमयेतीर्थयात्रांतथाऽकरोत् ॥
आयुषस्तुसमाप्तित्वात्समृतः कालचोदितः ॥ ११२ ॥ पापात्पापफलंभुक्त्वापुण्यात्स्वर्गंतथानघ ॥ ततोवैमानुषोजातोधनधान्य
समन्वितः ॥ ११३ ॥ १ । २ । ५ । ८ । ११ । १६ । २० । २५ । ३० । ३४ । ३९ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६८ ॥
२६ अथशांभवीयोगः ॥ सुभद्रेनगरेपूर्वंकीकटस्याऽतिसन्निधौ ॥ अक्रूरेतिसमाख्यातःशूद्रवंशेतदाऽभवत् ॥ ११४ ॥ पितातस्यमहा
राजासत्यवादीधनान्वितः ॥ राजकार्य्यंपरित्यज्यगतोसौगह्वरेवने ॥ ११५ ॥ तपश्चर्य्याकृतातेनबहुवर्षगतागतैः ॥ आयुषस्तु
समाप्तित्वात्सशूद्रःपञ्चतांगतः ॥ पुनरागत्यमेदिन्यांसर्वसौख्येनसंयुतः ॥ ११६ ॥ १ । २ । ५ । १४ । १९ । २५ । ३० । ३५ ।
४० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥ २७ अथसुरसेनायोगः ॥ किरातेनरेपूर्ववसंतिबहवोजनाः ॥ तत्रविप्रोवसत्त्वेकोमहो

दारश्चवत्सलः ॥ ११७ ॥ सत्यकेतुरितिख्यातःसर्वशास्त्रस्यपाठकः ॥ विख्यातःसर्वदेशेषुप्रतिष्ठामानसंयुतः ॥ ११८ ॥ द्रव्य
स्योत्पादनंकृत्वाकन्यादानंतथाऽकरोत् ॥ एकस्मिन्समयेविप्रगोदावर्याश्चसन्निधौ ॥ ११९ ॥ तपश्चर्य्याकृतातेनबहुवर्षगतागतैः ॥ आयु
षस्तुसमाप्तित्वात्समृतःकालचोदितः ॥ १२० ॥ १ । ३ । ८ । १५ । २० । २४ । २९ । ३२ । ३६ । ३९ । ४५ वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ७८ ॥ २८ अथसौख्ययोगः ॥ इलावर्तेऽवसत्पूर्वंकुंतलोनामबाहुजः ॥ कृषिकर्मोद्यमेनिष्ठोद्रव्यस्योत्पादनेरतः॥१२१॥
मनोहरःसमाख्यतःपत्नीपुत्रसमन्वितः ॥ एकस्मिन्समयेविप्रब्राह्मणस्यप्रसंगतः ॥ १२२ ॥ तीर्थावगाह्नंकृत्वाकृतंकर्मचदारुणम् ॥
चोरितंपरद्रव्यंतुलोभाकुलितचेतसा ॥ १२३ ॥ स्वदेशेपुनरागत्यहर्षगद्गदमानसः ॥ आयुषस्तुसमाप्तित्वात्समृतोगदपीडितः ॥१२४॥
प्रापात्पापफलंभुक्त्वायोनीर्भुक्त्वाकथंचन ॥ पुनरागत्यमेदिन्यांपूर्वपुण्याच्चमानुषः ॥ १२५ ॥ २ । ४ । ७ । १२ । १८ । २० । २६ ।
३१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६१ ॥ २९ अथशोभनयोगः ॥ कीकटेचावसत्सोपिपूर्वजन्मनिपादजः ॥ नारायणःसमाख्यातः
पत्नीतस्यमनोरमा ॥ १२६ ॥ धनमैश्वर्य्यमतुलंकार्पण्येनविमोहितः ॥ नश्राद्धंनद्विजेभोज्यंनगोत्रेनापिचस्वयम् ॥ १२७ ॥ एकदा
चन्द्रमोग्रस्तेपरोपदेशतस्तदा ॥ यवान्नंशेषमात्रंतुब्राह्मणेभ्यस्तदात्वदात् ॥ १२८ ॥ तेनपुण्यप्रभावेणस्वर्गेस्थित्वाविशे
षतः ॥ ततोवैमानुषीयोनौसर्वसौख्येनसंयुतः ॥ १२९ ॥ १ । ४ । ८ । ११ । १७ । २१ । २९ । ३६ वर्षेषुकष्टम् ॥ परमायु
र्वर्षाणि६७ ॥ ३० अथस्यमंतकयोगः ॥ अयोध्यानिकटेपूर्वंबाहुजोह्यतिधार्मिकः ॥ सनातनःसमाख्यातःपत्नीतस्यकलास्मृता॥१३०॥
दम्पतीतौगतौतीर्थंब्राह्मणस्यप्रसंगतः ॥ तीर्थेतीर्थेकृतासेवाऋषीणांचपुनःपुनः ॥ १३१ ॥ एकस्मिन्समयेविप्रगृहेयज्ञश्चकारितः ॥

विप्रस्य भोजनंकृत्वानानापक्वान्नशष्कुलिम् ॥ १३२ ॥ भोजनांतेचदत्ताश्वदक्षिणाश्चद्विजोत्तम ॥ मृत्वापापात्फलंभुक्त्वायोनिंभुक्त्वाकथं
चन ॥ ततोमानुष्यमापन्नःप्रथमाब्देसकष्टितः ॥ १३३ ॥ १ । ३ । ६ । ९ । १४ । १८ । २० । २५ । ३१ । ३८ वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ७३ ॥ ३१ अथसुखार्कयोगः ॥ वेदर्भेनगरेपूर्वंसात्त्विकोब्राह्मणःपरः ॥ कांचनेतिसमाख्यातःसर्वसिद्धांतपाठकः ॥
॥ १३४ ॥ अर्भकान्पाठयेत्तत्रदारिद्र्येणप्रपीडितः ॥ परदेशात्कृताप्राप्तिर्द्रव्याणिविविधानिच ॥ १३५ ॥ वृषलीगमनंकृत्वा
तत्सकाशात्सुतोद्भवः ॥ समृतोनरकेगत्वाततोवैमानुषोऽधुना ॥ १३६ ॥ १ । ३ । ६ । ११ । १६ । २० । २६ ।
३७ । ४० । ४५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ३२ अथसच्चायोगः ॥ बांधवेदेशेन्यवसत्पत्नीपुत्रसमन्वि
तः ॥ हरिदेवःसमाख्यातःपत्नीतस्यपतिव्रता ॥ १३७ ॥ द्रव्यस्योत्पादनेनिष्ठःक्रयविक्रयतत्परः ॥ ब्रह्मकर्मपरिभ्रष्टोव्यापारेनिरतः
सदा ॥ तस्मिन्ग्रामेवसत्त्वेकोवैश्यःपरमधार्मिकः ॥ १३८ ॥ तस्यकन्याविशालाक्षीसुन्दरीचातिशोभना ॥ बलादाकर्षितातस्यांकृत्वा
सुरतिसंगमम् ॥ १३९ ॥ साबालाचविषंपीत्वामृतासालोकशंकया ॥ कालांतरेमृतोविप्रःसगत्वायमशासनम् ॥ यमलोकात्परिभ्रष्टश्चा
गतोधरणीतले ॥ १४० ॥ १ । ४ । ७ । ११ । १६ । २० । २७ । ३६ । ३९ । ४० । ४६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि
७५ ॥ ३३ अथसोमकयोगः ॥ आसीज्जन्मांतरेचैवविप्रवेश्योविचक्षणः ॥ चित्रदेवःसमाख्यातःपत्नीतस्यवरांगना ॥ १४१ ॥
परपुंसुरताभ्रष्टापतिवंचनतत्परा ॥ एकस्मिन्समयेविप्रब्राह्मणस्यहृतंधनम् ॥ तत्पापान्नरकेगत्वापुनरागत्यभूतले ॥ १४२ ॥ १ । २
७ । ८ । ११ । १३ । १९ । २३ । २७ । ३० । ३६ । ४० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८५ ॥ ३४ अथसोनावरयोगः ॥ आसीज्ज

त्कालांतरेचैवकान्यकुब्जेवसन्पुरा ॥ गणदेवःसमाख्यातःपत्नीतस्यगुणाकरी ॥ १४३ ॥ धर्मशीलश्चमतिमाञ्छिवपूजापरायणः ॥ किंचि
द्वित्तंहृद्वैश्यकर्मसमापयत् ॥ १४४ ॥ एकस्मिन्समयेविप्रकृतंकर्मजुगुप्सितम् ॥ तस्यकन्यातुयुवतीविक्रीतातेनवैद्विज ॥ १४५ ॥
तत्पापान्नरकेगत्वातिर्यग्योनौपुनःपुनः ॥ ततोवैमनुजोजातःकष्टेनातिप्रपीडितः ॥ १४६ ॥ १ । २ । ४ । ८ । १२ ।
१६ । २० । २४ । २९ । ३५ । ३८ । ४० । ४६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ ३५ अथहस्तियोगः ॥ पूर्वं
जन्मनियानारीविष्णुकांचींपुराऽवसत् ॥ वासुदेवेतिविख्यातोबाहुजोबलवानपि ॥ १४७ ॥ क्षात्रधर्मरतःसोपिबहुस्त्रीपरिवारकः ॥ किं
चिद्भूमिपतिस्तत्रप्रजानांदंडनेरतः ॥ १४८ ॥ स्वगोत्रस्यहृतंद्रव्यंतत्पापाच्छ्रीःक्षयंगता ॥ पापाच्चनरकंगत्वाषष्टिवर्षसहस्रकम् ॥ ततो
वैमानुषोजातोधनपुत्रविवर्जितः ॥ १४९ ॥ १ । ४ । ८ । १९ । २४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ ३६ अथहिमाद्रियोगः ॥
इंद्रप्रस्थस्यनिकटेबाहुजःपूर्वजन्मनि ॥ दानसिंहःसमाख्यातःपत्नीतस्यमनोहरा ॥ १५० ॥ नृपानुकम्पयातत्रद्रव्यंतुविपुलंकृतम् ॥
असन्मार्गेव्ययंकृत्वावेश्यायांप्रापितंधनम् ॥ १५१ ॥ एकस्मिन्समयेविप्रब्राह्मणस्यप्रसंगतः ॥ श्रीमद्भागवतंश्रुत्वादानंदत्त्वाद्विजायच
॥ १५२ ॥ कालयोगेमृतःसोपिगतोसौनंदनेवने ॥ ततःपुण्यक्षयेजातेचागतोधरणीतले ॥ १५३ ॥ १ । ३ । ५ । ८ । १० । १६ । २४ ।
३४ । ३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६६ ॥ ३७ अथहोलकायोगः विश्वंभरपुरेरम्येचोलदेशे पुराऽवसत् ॥ राघवेतिसमा
ख्यातःपादजःसर्वशास्त्रवित् ॥ १५४ ॥ तस्यमित्रंद्विजस्त्वेकोमहोदारश्चभक्तिमान् ॥ तस्यप्रतिच्छलंकृत्वाविश्वासेनतदानघ ॥ १५५ ॥
सविप्रश्चातिक्रोधेनशापंदत्त्वाचपुष्कलम् ॥ भोभोधृष्टमहाभ्रष्टविश्वासघातनं कृतम् ॥ १५६ ॥ किंचित्कालांतरेचैवसवैश्यःपं

चतांगतः ॥ नानानरकेषुसस्थित्वानानाजन्मानिप्राप्तवान् ॥ पश्चाद्वैमानुषीयोनौमध्यदेशेसमुद्गतः ॥ १५७ ॥ २ । ४ । ८ । ११ । १६ । २० ।
२४ । २८ । ३० । ३५ । ४० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७६ ॥ ३८ अथहायनयोगः ॥ आसीज्जन्मांतरेचैवद्विजोत्तमकुलेद्विज ॥
तथाचर्मण्वतीकूलेदेवलोनामविश्रुतः ॥ १५८ ॥ स्वधर्मेषुसदानिष्ठोमहोदारश्चवत्सलः ॥ अर्भकान्पाठयामासदानंदत्त्वाद्विजायच ॥
॥ १५९ ॥ तीर्थेतीर्थेकृतंपुण्यंगयाश्राद्धंतथाऽकरोत् ॥ एकस्मिन्समयेविप्रकन्यादानंतथाकरोत् ॥ १६० ॥ तस्यसम्बंधिनायुद्धम
भूद्द्रव्यार्थमेवच ॥ सम्बंधिनाकृतोरोषःस्वशरीरंजघानह ॥ १६१ ॥ तत्पापान्नरकंगत्वापुण्यात्स्वर्गंतथानघ ॥ पुनरागत्यमेदिन्यांपूर्वपु
ण्यप्रभावतः ॥ १६२ ॥ १ । ३ । ५ । ८ । १२ । १५ । २० । २५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ३९ अथहिंगुलाजयोगः ॥
पूर्वजन्मनियानारीकाकुत्स्थेनगरेऽवसत् ॥ पादजस्यसुताश्रेष्ठापतिसेवापरायणा ॥ १६३ ॥ एकस्मिन्समयेविप्रतस्याःपतिर्दुरात्मवान् ॥
परस्त्रींगेहेह्यानीयत्यक्तवांश्चविवाहिताम् ॥ १६४ ॥ रतिंददौनभार्य्यायामनृतौचविमोहितः ॥ कालांतरेमृतःशूद्रःसतीजाताचसाङ्गना ॥
॥ १६५ ॥ उभयोःकर्मणोर्हेतोःस्वर्गंयातौचदम्पती ॥ पुनरागत्यमेदिन्यांपूर्वपुण्यप्रसंगतः ॥ १६६ ॥ १ । ३ । १० । ११ । १७ ।
२१ । २४ । २८ । ३० । ३७ । ४० । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१ ॥ ४० अथहयानाम्नीयोगः ॥ मैथिलेनगरेपूर्वंबाहुजश्चम
हाधनी ॥ चंद्रसेनिरितिख्यातःपत्नीतस्यहुताशनी ॥ धनमैश्वर्य्यमतुलंकिंचिद्भूमिपतिस्तदा ॥ १६७ ॥ नानाविलासविभवैःशिवस्या
ऽऽराधनेरतः ॥ एकस्मिन्समयेविप्रभाविनोर्थस्यगौरवात् ॥ १६८ ॥ ब्राह्मणस्यहृतंद्रव्यंछलैश्चप्रचुरैर्द्विज ॥ नदत्तंतेनतत्तस्मैलो
भोपहतचेतसा ॥ १६९ ॥ परस्परंकृतंयुद्धमतिप्रबलदंडिना ॥ कोलाहलःकृतःसम्यग्वाग्बाणेनचवैहतः ॥ १७० ॥ अपभ्रंशंव

दन्सोऽपिलगुडेनप्रताडितः ॥ ब्राह्मणःक्रोधवशतःस्वशरीरंजघानह ॥ १७१ ॥ बाहुजोपिमृतस्तत्रगतोवैनरकंद्विज ॥ पुनर
गत्यमेदिन्यांभीषणोभैरवाकृतिः ॥ १७२ ॥ प्रथमेद्वितीयेवर्षेचतुर्थेसप्तमेपिवा ॥ वर्षेकष्टंभवेत्तस्यदशमैकादशेसुखम् ॥ १७३ ॥
विंशतिवर्षांतरेकष्टंषोडशेगृहणीभवेत् ॥ विंशतिवर्षांतरेचैवमातातस्यनजीवति ॥ १७४ ॥ चतुर्विंशेभवेत्कन्याह्यष्टाविंशेसुतोद्भवः
॥ चतुस्त्रिंशेपितृमरणंचत्वारिंशेपिचस्वयम् ॥ ॥ कार्त्तिकेधवलेपक्षेद्वादश्यांमरणंभवेत् ॥ १७५ ॥ ४१ अथहृदययोगः ॥ पूर्वे
जन्मांतरेचैवव्याधोनाम्नाकलेवरः ॥ निर्दयःसर्वजीवघ्नः पक्षिघातरतस्सदा ॥ १७६ ॥ एकस्मिन्समयेविप्रबाहुजस्यप्रसंगतः ॥
प्रयागेह्यगमत्सोपिसस्नातोमृगगेरवौ ॥ १७७ ॥ कथांपौराणिकींश्रुत्वापूर्वंकर्मचत्यक्तवान् ॥ धर्ममार्गेचकुशलःसाधूनांचप्रसंगतः
॥ १७८ ॥ समृतस्त्रिदिवंगत्वास्वर्गंभुक्त्वानिरंतरम् ॥ षष्टिवर्षसहस्रांतेचागतोधरणीतले ॥ १७९ ॥ २ । ४ । ८ । १२ ।
१७ । २२ । २७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७४ ॥ ४२ अथतुलांकयोगः ॥ कालञ्जरस्यनिकटेवैश्योनामकराम्बुजः ॥
क्रयविक्रयणेनिष्ठो महोदारश्चपावनः ॥ १८० ॥ धर्मकर्मणिनिपुणोदानधर्मपरायणः ॥ कृतानितेनधर्म्याणिपर्वस्वपिविशेषतः ॥
॥ १८१ ॥ एकस्मिन्समयेविप्रह्यन्नदानंतथाकरोत् ॥ तेनपुण्यप्रभावेणलक्ष्मीवृद्धिर्दिनेदिने ॥ १८२ ॥ समृत्वासंमरेविप्रगतइंद्रस्य
वेपुरे ॥ इन्द्रलोकात्परिभ्रष्टश्चागतोधरणीतले ॥ १८३ ॥ गौरस्वरूपःशोभाढ्यःपुत्रदारसमन्वितः ॥ प्रथमेद्वितीयेवर्षेशीर्षेकष्टंप्रजायते॥
॥ १८४ ॥ पंचवर्षोत्तरेविप्रशीतलाज्वरसम्भवः ॥ अष्टवर्षांतरेकष्टंद्वादशेगृहिणीतिच ॥ १८५ ॥ प्राप्तेपंचदशेवर्षेपितातस्यनजीवति ॥
विंशेकविंशवर्षेवापुत्रोभवतिनान्यथा ॥ १८६ ॥ चतुर्विंशेद्रव्यवृद्धिरष्टाविंशेधनागमः ॥ त्रिंशद्वर्षांतरेविप्रभार्यातस्यनजीवति

॥ १८७ ॥ पत्नीनाशान्मनस्तापःषट्त्रिंशेतुगदान्वितः ॥ खवेदाब्देगतेविप्रसर्पस्यभयमादिशेत् ॥ १८८ ॥ चतुर्वेदोत्तरेचैवतीर्थ
यात्रांतथाऽकरोत् ॥ पंचपंचाशत्तमेऽब्देभाद्रेमासेमृतिःखलु ॥ १८९ ॥ ४३ अथहाटकयोगः ॥ पुराक्षात्रकुलेजातःसरस्वत्या
श्चसन्निधौ ॥ धर्मसिंहःसमाख्यातः पत्नीतस्यमनोहरा ॥ १९० ॥ व्यापारेनिरतःसोपिद्रव्यस्योत्पादनेरतः ॥ कृतानितेनपुण्यानिपर्व
स्वपिविशेषतः ॥ १९१ ॥ एकस्मिन्समयेविप्रश्राद्धंकृत्वासहर्षितः ॥ आहूयब्राह्मणानांवैह्यादरंकृतवान्भृशम् ॥ १९२ ॥ पुरोहितेहठं
कृत्वानदत्तंच धनंक्वचित् ॥ विमुखश्चगतः सोपिपापमाचरितंत्विदम् ॥ १९३ ॥ सक्षात्रः पंचतांप्राप्तश्चंद्रलोकेसमाविशत् ॥ चंद्रलो
कात्परिभ्रष्टश्चागतो धरणीतले ॥ १९४ ॥ २ । ४ । ८ । १२ । १६ । २४ । २९ । ३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८० ॥ ४४
अथहनुमुखयोगः ॥ बभूववैश्यजः पूर्वंदशारण्येगुणाकरः ॥ प्रसेनिरितिविख्यातःपत्नीतस्यसुलोचना ॥ १९५ ॥ धर्मशीलोऽतिमति
मान्सर्वशास्त्रविनोदकः ॥ एकस्मिन्समयेविप्रकृतंकर्मजुगुप्सितम् ॥ १९६ ॥ मातुलान्यांचगमनंकृत्वातेनतदानघ ॥ तत्पापान्नरके
गत्वाबहुवर्षंतुभुक्तवान् ॥ पुनर्वैमानुषीयोनौधनधान्यसमन्वितः ॥ १९७ ॥ १ । ४ । ८ । १३ । १८ । २४ वर्षेषुकष्टम् ॥ परमायुर्व
र्षाणि ६१ ॥ ४५ अथहोमयोगः ॥ खशदेशेबभूवाऽपिब्राह्मणःशास्त्रकोविदः ॥ देवदत्तःसमाख्यातः पत्नीतस्यपतिव्रता ॥ १९८ ॥
धनधान्यसमृद्धस्तुदेवतासधनेरतः ॥ एकस्मिन्समयेविप्रकृतंकर्मजुगुप्सितम् ॥ १९९ ॥ भ्रातृपक्षात्कृतोद्वेषस्तद्धनंचहृतंबलात् ॥
एवंनिवसतस्तत्रबहुवर्षगतागते ॥ २०० ॥ प्राप्तेवार्द्धक्यसमयेतीर्थयात्रांतथाऽकरोत् ॥ आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः
॥ २०१ ॥ पापात्पापफलंभुक्त्वापुण्यात्स्वर्गेतथानघ ॥ पुनरागत्यमेदिन्यांधनधान्यसमन्वितः ॥ २०२ ॥ १ । ३ । ६ । ७ । ९ ।

१२ । १५ । २० । २४ । २७ । २९ । ३० । ३५ । ४० । ४५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७३ ॥ ४६ अथपुनहोमयोगः ॥
गौरीकुमारिकाखंडेपादजःपूर्वजन्मनि ॥ धीरदासइतिख्यातःपत्नीतस्यप्रभाकरी ॥ २०३ ॥ व्यापारेनिरतःसोपिद्रव्यंतुविपुलंकृतम् ॥
कदन्नंभुज्यतेनित्यंनदानंकृतवान्कचित् ॥ २०४ ॥ प्राप्तेवार्द्धक्यसमयेसर्वस्वंब्राह्मणेददौ ॥ सत्पात्रेचगृहस्थेचश्रद्धायुक्तेनचेतसा ॥
॥ २०५ ॥ समृत्वात्रिदिवंगत्वानंदनेचवनेशुभे ॥ बहुवर्षसहस्रान्तेचागतोभूमिमंडले ॥ २०६ ॥ १ । ३ । ६ । ९ । १५ । २० । २८ ।
३० । ३६ । ४० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७४ ॥ ४७ अथहर्षिणीयोगः ॥ चंद्रभागानदीतीरेवैश्योनामकृपाकरः ॥ क्रयविक्रय
कर्ताचपत्नीतस्यातिकर्कशा ॥ २०७ ॥ व्यापाराच्चकृतंद्रव्यंमिथ्याजल्पतिनित्यशः ॥ एकस्मिन्समयेविप्रब्राह्मणस्यप्रसंगतः ॥ २०८ ॥
प्रयागेह्यगमत्सोपिसस्नातोभक्तिसंयुतः ॥ दत्तानितेनदानानिपर्वस्वपिचशक्तितः ॥ २०९ ॥ स्वदेशेपुनरागत्यहर्षगद्गदमानसः ॥
आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः ॥ ततोवैमानुषोजातःकन्यापुत्रविवर्जितः ॥ २१० ॥ १ । ४ । ९ । १७ । २१ । २५ ।
२८ । ३३ । ३८ । ४० । ४६ । ५० । ५५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०० ॥ ४८ अथहर्म्यैनीयोगः ॥ इक्षुकारण्यनिकटेपूर्वे
जन्मनिपादजः ॥ धूम्रकेतुःसविख्यातःपत्नीपुत्रसमन्वितः ॥ २११ ॥ किंचित्कालांतरेविप्रविरक्तोपिबभूवह ॥ गृहंत्यक्त्वावनेगत्वा
तपश्चर्याकृताभृशम् ॥ २१२ ॥ मृत्वास्वर्गेतदागत्वाबभूवभूरुजस्तदा ॥ बहुद्रव्यान्वितःसोपिपुत्रकन्यासमन्वितः ॥ इदंजन्मतृतीयंतु
तेजस्वीतेजसांपतिः ॥ २१३ ॥ १ । ३ । ५ । ८ । १३ । १७ । २१ । २५ । २९ । ३८ । ४१ । ४७वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥
४९ अथहोमावलियोगः ॥ अथचंद्राद्रिनिकटेशूद्रोवसतितत्रच ॥ कर्दिदासइतिख्यातःपत्नीतस्यवरांगना ॥ २१४ ॥ व्रतंचांद्रायणंक्व

त्वाश्रद्धायुक्तेनचेतसा ॥ मृत्वास्वर्गेऽभवद्दासोह्यपिवर्षसहस्रकम् ॥ २१५ ॥ ततःपुण्यक्षयेजातेपुनरागत्यभूतले ॥ सर्वसौख्येनयुक्तःसक्षात्र
धर्मपरायणः ॥ आंत्रवेद्येपुनश्चैवज्ञानीभूत्वाचब्राह्मणः ॥ २१६ ॥ १।२।८।१७।२०।२८।३६वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६७ ॥ ५०
अथहयग्रीवयोगः ॥ गिरनाराद्रिनिकटेपूर्वजन्मनिबाहुजः ॥ पुरुषोत्तमइतिख्यातःपत्नीतस्यमहेश्वरी ॥ २१७ ॥ धर्मकर्मणिनिपुणो
द्रव्यस्योत्पादनेरतः ॥ कृषिवाणिज्यनिरतोव्यवहारपरायणः ॥ २१८ ॥ एकस्मिन्समयेविप्रकृतंकर्मतुदारुणम् ॥ ब्रह्मस्वंभक्षितंतेन
नदत्तंलोभहेतुना ॥ २१९ ॥ परस्परंकृतंयुद्धमतिप्रबलदंडिना ॥ ब्राह्मणःक्रोधसंयुक्तःस्वशरीरंजघानह ॥ २२० ॥ बाहुजो
नरकंप्राप्तःसप्तजन्मान्यहिश्वसः ॥ इदंतुह्यष्टमंजन्मराजरोगेणकष्टितम् ॥ २२१ ॥ १ । ३ । ७ । १५ । २० । २७ । ३५ ।
४० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९७ ॥ ५१ अथसुंडयोगः ॥ पातंजलपुरेचैवब्राह्मणःशास्त्रवर्जितः ॥ ब्रह्मकर्मपरिभ्रष्टोह्यसि
जीवीगुणाकरः ॥ २२२ ॥ नृपानुकम्पयातत्रद्रव्यस्योत्पादनंकृतम् ॥ नदानंतुद्विजेदत्तंनकृतंश्राद्धकर्मणि ॥ २२३ ॥ एवंनिवस
तस्तत्रबहुवर्षगतागतैः ॥ प्राप्तेवार्द्धक्यसमयेसमृतःकालचोदितः ॥ २२४ ॥ पापात्पापफलंभुक्त्वापुण्यात्स्वर्गंतथाऽनघ ॥ चक्रवाको
बभूवाऽपिहंसःसरसिमानसे ॥ २२५ ॥ विंध्याद्रिनिकटेचैवशुकोभूत्वाचपर्वते ॥ शुकयोनिंपरित्यज्यततोभूत्वाचमानुषः ॥ २२६ ॥
१ । ४ । ८ । १७ । २२ । २७ । ३५ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८८ ॥ ५२ अथसुंभयोगः ॥ ब्रह्मपुत्रस्यनिकटेब्राह्मणः
शास्त्रकोविदः ॥ देवकीनंदनोनामपरमैश्वर्यसंयुतः ॥ २२७ ॥ अर्भकान्पाठयेत्तत्रनृपद्वारेप्रतिष्ठितः ॥ एकस्मिन्स
मयेविप्रह्यतिथेश्चहृतंधनम् ॥ २२८ ॥ नदत्तंलोभहेतोश्चकृत्वाद्वंद्वंपरस्परम् ॥ सविप्रःपञ्चतांप्राप्तोभुक्त्वाभोगांश्चशाश्वतान् ॥ २२९ ॥

ततोनैमानुषीयोनौचागतोधरणीतले ॥ २३० ॥ १ । ३ । ५ । ८ । १७ । १९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९७ ॥ ९३ अथसु
तात्मकयोगः ॥ अनन्तनगरेपूर्वंकोंकणस्यातिसन्निधौ ॥ तत्रविप्रःकामुकश्चशिवस्याराधनेरतः ॥ २३१ ॥ ॥ पठनेपाठनेसुज्ञो
यशस्वीप्रीतिकारकः ॥ तस्मिन्ग्रामेवसत्त्वेकोबाहुजोधनवानपि ॥ २३२ ॥ तस्यकन्याविशालाक्षीसुन्दरीषोडशाब्दिका ॥ बलादा
कर्षितातस्यांहठाचैवरतिः कृता ॥ २३३ ॥ सामृतालौकिकाद्भीतापापमाचरितंत्विदम् ॥ समृतश्चातिकष्टेननरकेभृशमाप्तवान् ॥ ततो
नैमानुषीयोनौमर्त्यलोकेसमुद्भवः ॥ २३४ ॥ २ । ५ । ८ । १६ । २१ । २८ । ३० । ३४ । ३७ । ४१ । ४६ । वर्षेषुकष्टम् ॥
परमायुर्वर्षाणि ६६ ॥ ९४ अथसासरीयोगः ॥ विंध्याद्रिनिकटेपूर्वंवैश्योनामगजाननः ॥ गणेशव्रतरतोनित्यंक्रयविक्रयणेरतः ॥२३५॥
पत्नीतस्यमहादुष्टाकर्कशाकटुभाषिणी ॥ वैश्यस्तुपरमोदारोनृपस्याग्रेप्रतिष्ठितः ॥ २३६ ॥ एकस्मिन्समयेविप्रतीर्थावगाहनेगतः ॥
कृतानितेनपुण्यानिसत्पात्रायददौकिल ॥ २३७ ॥ आरामाश्चकृतास्तेनकूपाश्चपथिकारिताः ॥ शस्त्रघातेनमृत्वासइंद्रलोकंतदागतः ॥
॥ २३८ ॥ इंद्रलोकात्परिभ्रष्टःपुनरागत्यभूतले ॥ कुलेचविमलेजातःपत्नीपुत्रसमन्वितः ॥ २३९ ॥ १ । ३ । ८ । १३ । १८ । २२ ।
२७ । ३१ । ३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ ९५ अथसुंठयोगः ॥ अवंतीनगरीश्रेष्ठाप्रकीर्णागुणिनांगणैः ॥ तत्रवैश्यो
वसत्त्वेकोदुर्बलोनामभोद्विज ॥ २४० ॥ कृतानितेनद्रव्याणिपराक्रमेणवैतदा ॥ धर्ममार्गेव्ययंकृत्वाव्रतंचांद्रायणंकृतम् ॥ २४१ ॥
पुरुषोत्तमस्यकृतासेवापूजाश्चविविधास्तथा ॥ एकस्मिन्समयेविप्रसाध्वीचस्त्रीकलंकिता ॥ २४२ ॥ तत्पापान्नरकेगत्वापुण्याद्भूत्वाचमा
नुषः ॥ २४३ ॥ १ । ४ । ८ । १५ । २१ । २९ । ३६ । ४० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१ ॥ ९६ अथसाकीयोगः ॥ पट्टने

नगरेपूर्वपादजःपूर्वजन्मनि ॥ कालीदासःसमाख्यातःपत्नीतस्यचकंदरा ॥ २४४ ॥ काव्यकर्ताविवेकीचचंचलश्चातिभक्तिमान् ॥ देशा
टनंकृतंसम्यग्विद्यादानमथाकरोत् ॥ २४५ ॥ परदारसमासक्तोहिंसामदविमोहितः ॥ दत्तानितेनदानानिपरोपकरणेरतः ॥ २४६ ॥
एवंनिवसतस्तत्रबहुवर्षगतागते ॥ आयुषस्तुसमाप्तित्वात्समृतःकुरुजांगले ॥ देवीलोकेचसंप्राप्तःपुनर्भूत्वाचमानुषः ॥ २४७ ॥ १ । ३
५ । ९ । १५ । २० । २७ । ३० । ३७ । ४० । ४२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १२० ॥५७ अथसरठयोगः ॥ गंडक्याश्चशुभेतीरेके
शवोनामपादजः ॥ सरस्वत्यास्तटेगत्वातपश्चर्य्यांतथाऽकरोत् २४८ ॥ शिवस्याराधनेनिष्ठःप्रपंचेनविवर्जितः ॥ एकांघ्रिभुजमुत्थाप्य
कृत्वाजाप्यंनिरंतरम् ॥ २४९ ॥ स्वर्गंगत्वासमागत्यबभूववैश्यजात्मजः ॥ ततश्चबाहुजोजातोराजकार्यपरायणः ॥ २५० ॥ १ । ३ ।
५ । ९ । १३ । १७ । २१ । २८ । ३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६३ ॥ ५८ अथसरठयोगः ॥ कुरुक्षेत्रस्यनिकटेबाहुजोन्य
वसत्पुरा ॥ कर्मदासइतिख्यातःपत्नीपुत्रसमन्वितः ॥ २५१ ॥ दत्तानितेनदानानिपर्वस्वपिविशेषतः ॥ एकस्मिन्समयेविप्रकृतंकर्म
चदारुणम् ॥ २५२ ॥ पितृसेवांपरित्यज्यभक्ताद्यैर्व्यसनेरतः ॥ तत्पापान्नरकेगत्वाकीटयोनौसमुद्भृतः ॥ २५३ ॥ नानायोनिसमुत्पन्नो
मर्त्यलोकेपुनःपुनः ॥ मर्कटोपिबभूवाथकौशिक्याश्चशुभेतटे ॥ दैवाद्गंगातटेमृत्युर्बभूवद्विजसत्तम ॥ २५४ ॥ १ । ३ । ८ । ११ ।
१६ । २१ । २८ । ३६ । ३८ । ४० । ४५ । ५० । ५५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ ५९ अथसूचीमुखीयोगः ॥ ५७ ॥
अयोध्यानिकटेपूर्वंशूद्रोनामदयाकरः ॥ कृषिवाणिज्यनिरतोद्रव्यस्योत्पादनेरतः ॥ २५५ ॥ दत्तानितेनदानानिपर्वस्वपिविशेषतः ॥
एकस्मिन्समयेविप्रवैजनाथेसमागतः ॥२५६॥ तत्रवर्षद्वयंस्थित्वाचाकारिशिवपूजनम् ॥ सर्वस्वंविधिनादत्तंसत्पात्रायद्विजायच ॥२५७॥

एवंकालंव्यतीत्यांतेसमृतःकालचोदितः ॥ पत्नीतस्यसतीजातास्वर्गलोकमुभोगतौ ॥ २५८ ॥ षष्टिवर्षसहस्रांतेपुनरागत्य
भूतले ॥ २५९ ॥ २ । ५ । ८ । १३ । १७ । २१ । २६ । ३० । ३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७७ ॥ ६० अथशीतलायोगः ॥
अथचंद्राद्रिनिकिटेवसंतिबहवोजनाः ॥ तत्रशूद्रोवसत्त्वेकोजीमूतेतिसुविश्रुतः ॥ २६० ॥ काष्ठविक्रयकर्त्ताचकृत्वाद्रव्यंनिरंतरम् ॥
दत्तानितेनदानानिकाश्यांचैवविशेषतः ॥ २६१ ॥ तीर्थेतीर्थेकृतासेवाऋषीणांचपुनःपुनः ॥ देवाद्गंगातटेचैवसमृतःकालचोदितः॥२६२॥
विमानाग्र्योपरिस्थित्वागत्वास्वर्गंतदानघ ॥ पुनरागत्यमेदिन्यांसर्वसौख्येनसंयुतः ॥ २६३ ॥ ५ । ११ । १८ । २१ । २६ । २९ ।
३१ । ३६ । ४० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥ ६१ अथशर्करीयोगः ॥ अयोध्यानिकटेपूर्वंयोजनोपरिसंस्थितः ॥ शिवरामः
समाख्यातो बाहुजःपूर्वजन्मनि ॥ २६४ ॥ नानाद्रव्यापहारीचप्रजानांदंडनेरतः ॥ कृतानितेनदानानिपर्वस्वपिविशेषतः ॥ २६५ ॥
आयुषस्तुसमाप्तित्वात्समृतःसरयूतटे ॥ गतोसौत्रिदिवंविप्रपुनरागत्यभूतले ॥ २६६ ॥ १ । ४ । ८ । १६ । १९ । २२ । २८ ।
३१ । ३६ । ३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९१ ॥ ६२ अथशाक्तयोगः ॥ अथपंपापुरेरम्येपादजश्चविचक्षणः ॥ विविधस्यैवद्रव्य
स्यह्यसन्मार्गेव्ययःकृतः ॥ २६७ ॥ वेश्यायांनीतवान्द्रव्यंपरस्त्रीरतिलम्पटः ॥ व्यभिचारवशाद्वापिकृतंकर्माऽतिदारुणम् ॥ २६८ ॥
गोत्रपुत्रीविशालाक्षीसुंदरी नवयौवना॥बलादाकर्षितातस्यांकृत्वाभोगंनिरंतरम् ॥२६९॥ तत्पापान्नरकेगत्वापुनरागत्यभूतले ॥ २७० ॥
२।६।९।१२।२०।२८वर्षेषुकष्टम्॥परमायुर्वर्षाणि८५॥६३अथशिनार्जकयोगः॥कीकटेन्यवसत्पूर्वंदालभ्योनामविश्रुतः॥परदाराभिगमने
समर्थोपिवभूवहा॥२७१॥स्वकीयापरकीययोश्चगमनंक्रियतेसदा ॥ चर्मकार्यांरजक्यांचकृत्वारतिंविशेषतः ॥ २७२ ॥ एकस्मिन्समयेवि

प्रकथांश्रुत्वाविशेषतः ॥ प्रयागेह्यगमत्सोपितत्रमृत्युवशंगतः ॥ २७३ ॥ पापात्पापफलंभुक्त्वापुण्यात्पुण्यफलंतथा ॥ पुनरागत्यमेदिन्यां सुखसौभाग्यसंयुतः ॥ २७४ ॥ २ । ४ । ७ । १२ । १६ । १९ । २३ । २७ । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८० ॥ ६४ अथसरकीयोगः ॥ कौंकणेनगरेपूर्वंभिक्षुकोनामपादजः ॥ सर्वव्यापारनिरतोद्रव्यस्योत्पादनेरतः ॥ २७५ ॥ पत्नीतस्यमहादुष्टाकर्कशाकटुवादिनी ॥ दम्पतिभ्यांकृतंद्वंद्वंह्यकार्य्यंभृगुनंदन ॥ २७६ ॥ पत्नीघातःकृतस्तेनसामृतातत्क्षणादपि ॥ तत्पापान्नरकंगत्वाबहुवर्षंतथास्थितः ॥ २७७ ॥ पुनरागत्यमेदिन्यांकिंचित्पुण्यप्रभावतः ॥ २७८ ॥ २ । ५ । ९ । १३ । १८ । २७ । ३५ । ४२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि७० ॥ ६५ अथसोढूयोगः ॥ वंगदेशेवसत्पूर्वंभास्करोनामपादजः ॥ कृतानितेनपुण्यानितीर्थेतीर्थेविशेषतः ॥ २७९ ॥ गयाश्राद्धंतथाकृत्वाब्राह्मणाभोजिताश्चवै ॥ संप्राप्यभवनेशीघ्रंकृतंकर्मचदारुणम् ॥ २८० ॥ राजमंत्रीबभूवापिचोग्रदंडःप्रतापवान् ॥ द्रव्यार्थंचैवभोःपुत्रकृतंकर्मसुदारुणम् ॥ २८१ ॥ मृतोपिनरकेगत्वाषष्टिवर्षसहस्रकम् ॥ नानायोनौसमुत्पन्नस्ततोभूत्वाचमानुषः ॥ २८२ ॥ २ । ५ । ८ । १२ । १५ । २० । २७ । ३२ । ४० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि८७ ॥ ६६ अथसहस्रायोगः ॥ पूर्वजन्मांतरेचैवब्राह्मणःशास्त्रकोविदः ॥ देवदत्तइतिख्यातःपत्नीतस्यपतिव्रता ॥ २८३ ॥ देशेकुमारिकाखंडेन्यवसत्परिवारयुक् ॥ ईश्वराराधनेनिष्ठःप्रत्यहंसुखसंयुतः ॥ २८४ ॥ राजकार्येसदाव्यग्रोविष्णुभक्तिरतःसदा ॥ आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः ॥ देवलोकेऽभवद्वासःपुनरागत्यभूतले ॥ २८५ ॥ १ । ५ । ८ । १४ । २० । २८ । ३१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ ६७ अथसौरभयोगः ॥ नेपालेनगरेपूर्वंब्राह्मणः शास्त्रकोविदः ॥ पठनेपाठनेव्यग्रः परोपकरणेरतः ॥ २८६ ॥ दत्तानितेनदानानिचंद्रग्रस्तेचपर्वणि ॥ एकदावृंदकारण्येकृत्वापुण्यंविशेषतः ॥ २८७ ॥

[illegible]रतंवाजिहस्तिनः ॥ वेदविप्रायविदुषेदत्त्वादानंतुश्रद्धया ॥ २८८ ॥ स्वदेशेपुनरागत्यहर्षगद्गदमानसः ॥ एवंवि[illegible]
[illegible]तागतेः ॥ २८९ ॥ आयुरंतुसमाप्तित्वात्समृतः कालचोदितः ॥ पुनरागत्यमेदिन्यांसर्वसौख्येनसंयुतः ॥ २९० ॥
१ । ४ । ९ । १२ । १५ । १९ । २४ । २९ । ३६ । ३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ ६८ अथमूडयोगः ॥ कर्णाटेनगरे
[illegible]नामपादजः ॥ धनधान्यसमायुक्तःक्रयविक्रयणेरतः॥२९१॥धर्मसेनिरितिख्यातस्तस्यकन्यावरांगना ॥ तस्यगृहेगतःसोपि
[illegible]कृतःकचित् ॥ २९२ ॥ तेनक्रोधेनवैतस्याः श्वशुरश्चैवघातितः ॥ तत्पापान्नरकेगत्वाह्यपिवर्षसहस्रकम् ॥ तिर्यग्योनौसमु
[illegible]महीतले ॥ २९३ ॥ १ । ४ । ७ । १० । १३ । १८ । २२ । २७ । ३३ । ३६ । ३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि
९४ ॥ ६९ अथमुरसेनायोगः ॥ अथचोत्कलदेशेतुप्रभुर्नाम्नाचवैश्यजः ॥ द्रव्यंतुविपुलंतस्यकार्पण्येनविमोहितः ॥ २९४ ॥
आत्मार्थेविनियोगीचपरवंचनतत्परः ॥ एवंबहुतिथेकालेदैवाद्गंगातटंगतः ॥ २९५ ॥ तत्रविप्रोऽवसत्त्वेकःपंडितःसर्वबोधकः॥ तस्याऽऽ
[illegible]कथांश्रुत्वाविशेषतः ॥ २९६ ॥ पूर्वाज्ञानंपरित्यक्त्वाधर्ममार्गेचतत्परः ॥ बभूवपुण्यमार्गेचसत्पात्रायददौधनम् ॥ २९७ ॥
गुरुसेवा[illegible]सम्यक्कायवाङ्मानसैरपि ॥ मृतःस्वर्गंगतःसोपिइंद्रलोकेसमास्थितः ॥ इंद्रलोकात्परिभ्रष्टश्चागतोधरणीतले ॥ २९८ ॥
१ । २ । ७ । १३ । १८ । २३ । २८ । ३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०४ ॥ ७० अथसभायोगः ॥ असत्कर्मणि
निरतः पूर्वजन्मनिबाहुजः ॥ पैठणेनगरेचैवन्यवसत्परिवारयुक् ॥ २९९ ॥ कौंडिन्योनामवैश्योसौक्रयविक्रयकारकः ॥
[illegible]तत्परोद्रव्यहारकः ॥ ३०० ॥ एकस्मिन्समयेविप्रनृपेणलुंठितंधनम् ॥ द्रव्यलोभेनविकलोबभूवद्विजसत्तम

॥ ३०१ ॥ सम्मृतः सागरेविप्रपापाच्चनरकंगतः ॥ पुण्याच्चब्रह्मागतोभूमौनानाकष्टसमन्वितः ॥ ३०२ ॥ २ । ४ । ६ । ९ । १५
१९ । २४ । २८ । ३१ । ३६ । ३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०६ ॥ ७१ अथसांकृतयोगः ॥ बद्रिकारण्यनिकटेशूद्रोनाम
जरद्रवः ॥ परमोदारोतुलश्चपापकर्मविवर्जितः ॥ ३०३ ॥ ब्राह्मणानांकृतासेवाह्यन्नदानंतथाकरोत् ॥ गयाश्राद्धंप्रयागेचमकरेभ्युदिते
रवौ ॥ ३०४ ॥ सर्वस्वंब्राह्मणेदत्त्वाहरिद्वारेतथागतः ॥ तत्राकार्षीद्विष्णुपूजांनित्यंगंगाम्भसाद्विज ॥ ३०५ ॥ एवंगतेतुवयसिवृद्धे
सतिद्विजोत्तम ॥ गंगाजलेमृतः सोपिवैकुंठेभवनेगतः ॥ षष्टिवर्षसहस्रांतेवैकुंठाद्दागतःसच ॥ ३०६ ॥ १ । ५ । १० ।
१५ । २० । २५ । २९ । ३३ । ३८ । ४१ । ४५ । ४९ । ६० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ११५ ॥ ७२ अथसुरपूजकयोगः ॥ जगन्ना
थस्यनिकटेब्राह्मणोन्यवसत्पुरा ॥ इंद्रसेनिरितिख्यातः पत्नीतस्यातिकर्कशा ॥ ३०७ ॥ प्रत्यहंद्वंद्वकर्त्रीसातृणवन्मन्यतेपतिम् ॥ ब्राह्म
णोपिदुराचारीपरस्त्रीरतिलम्पटः ॥ ३०८ ॥ असत्कर्मणिसदानिष्ठः परनिंदापरायणः ॥ ब्राह्मणस्यहृतंवित्तंतेननानाछलैरपि ॥ ३०९ ॥
प्रातेवार्द्धक्यसमयेसमृतः कालचोदितः ॥ भुक्त्वानानाविधान्भोगान्नरकेभृशदारुणे ॥ ततोवैमानुषोजातः कष्टेनातिसमन्वितः ॥ ३१० ॥
१ । ४ । ८ । १२ । १९ । २२ । २९ । ३१ । ३६ । ४०वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९७ ॥ ७३ अथहुताशनयोगः ॥ अयो
ध्यापश्चिमेभागेबाहुजश्चपराक्रमी ॥ शिवनेत्रइतिख्यातःपत्नीतस्यमनोरमा ॥ ३११ ॥ कृतानितेनपुण्यानिपर्वस्वपिविशेषतः ॥
दम्पतीचगतौतीर्थंकृत्वाधर्मनिरंतरम् ॥ ३१२ ॥ स्वगृहेपुनरागत्यहर्षगद्गदमानसः ॥ ब्राह्मणायददौदानंगोभूम्यश्वहिरण्यकम् ॥
॥ ३१३ ॥ कन्योद्वाहंतथाकृत्वागोशालांश्चद्विजगृहम् ॥ एवंस्वल्पेगतेकालेबाहुजःपंचतांगतः ॥ देवलोकेऽभवत्प्राप्तोबहुवर्षसहस्रकम् ॥

॥ ३१४ ॥ ततोवैमानुषोजातः सर्वसौख्यसमन्वितः ॥ स्वंगःशुद्धः सुभक्तश्चस्वप्रतापीजनेश्वरः ॥ ३१५ ॥ १ । ३ । ७ । ११ । १६ । २१ । २४ । २९ । ३३ । ३८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९८ ॥ ७४ अथहनुमान्योगः ॥ अथ केदारनिकटेशूद्रोनामदिनेश्वरः ॥ पत्नीसत्यवतीतस्यपातिव्रत्यपरायणा ॥ ३१६ ॥ विक्रीयतुफलंपत्रंप्रचुरंद्रव्यमाप्तवान् ॥ दैवात्पत्नीमृतातस्यशोकाकुलितमानसः ॥ ३१७ ॥ स्वगृहंचपरित्यज्यजगामगिरिगह्वरे ॥ तपस्यंतेमृतः सोपिपुनरागत्यभूतले ॥ ॥ ३१८ ॥ १ । ७ । ९ । १५ । २१ । २५ । २९ । ३७ । ४७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०२ ॥ ७५ अथहौत्रीयोगः ॥ ऐरावतीनदीतीरेब्राह्मणः शास्त्रकोविदः ॥ चंडक्रोधीह्यनर्थीचस्वात्मार्थेविनियोगिकः ॥ ३१९ ॥ परनिंदारतो नित्यंद्रव्यलोभेचतत्परः ॥ एकस्मिन्समयेविप्रयजमानगृहेगतः ॥ ३२० ॥ नानाछलयुतेनाथतस्यद्रव्यंहृतंद्विज ॥ स्वगृहेपुनरागत्यस मृतःकालचोदितः ॥ पापात्पापफलंभुक्त्वायोर्निभुक्त्वाकथंचन ॥ ३२१ ॥ २ । ६ । १० । १७ । २५ । २९ । ३४ । ४१ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७१ ॥ ७६ अथहीलार्पियोगः ॥ देशेमरुस्थलेचैवनापितश्चैवधार्मिकः ॥ तस्यपत्नीमहाभ्रष्टापतिवंचनतत्परा ॥ ॥ ३२२ ॥ परपुंसुरतादुष्टाचंचलाकाममोहिता ॥ एकस्मिन्समयेविप्रदृष्ट्वास्वीयांसकोपतः ॥ ३२३ ॥ खड्गेनैवाहनत्तांविसामृतागदपीडिता ॥ पापमाचारितंतेनस्वगृहंचात्यजत्खलु ॥ ३२४ ॥ तीर्थेतीर्थेह्यटन्सोपिजगन्नाथेमृतस्तदा ॥ सोपियातइन्द्रपुरंषष्टिवर्षसहस्रकम् ॥ पुनरात्यमेदिन्यांमानुषःसुन्दरश्चसः ॥ ३२५ ॥ ४ । ८ । १६ । २४ । ३३ । ३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७७ ॥ ७७ अथहिंदुमाख्ययोगः ॥ आसीज्जन्मांतरेचैवभीष्मसेनिश्चबाहुजः ॥ आंत्रवेद्येऽवसत्सोपिकिंचिद्भूमिपतिस्तदा ॥ ३२६ ॥ प्रजानां

[illegible]तान्जीवहिंसापरायणः ॥ परापवादनिरतोमिथ्याजल्पतिनित्यशः ॥ ३२७ ॥ एकस्मिन्समयेविप्रब्राह्मणस्यप्रसंगतः ॥ शिव
[illegible]कृत्वागोदानंचसहस्रकम् ॥ ३२८ ॥ तेनपुण्यप्रभावेणपितृलोकंतदागतः ॥ पितृलोकात्समागत्यमेदिन्यांचतथाऽधुना
॥ ३२९ ॥ १।८।१६।२४वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६५ ॥ ७८ अथहुताशयोगः ॥ मथुरायांवसन्पूर्वंब्राह्मणोग्रामयाचकः ॥ सु
[illegible]नसदाविप्रपरिवारस्यपोषकः ॥ ३३० ॥ पत्नीतस्यमहाभव्यापातिव्रत्यपरायणा ॥ सामृतातत्रभोविप्रशोकतश्चब्राह्मण ॥ ३३१ ॥
विरक्तोपिबभूवाथतीर्थावगाहनेरतः ॥ तपश्चर्य्यांतथाकृत्वायोगाऽभ्यासंनिरंतरम् ॥ ३३२ ॥ योगमार्गेमृतःसोपिगतोऽसौपरमंपदम् ॥
वर्षाशीतिसहस्रांतेमानुषोऽपिततोऽधुना ॥ ३३३ ॥ गौरश्चचपलोवक्ताधनीमानीगुणेश्वरः ॥ ३३४ ॥ १ । ४ । ६ । ९ । १६ । २० ।
२६ । २९ । ३१ । ३८ । ४१ । ४७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ७९ अथहिंसकयोगः ॥ अंतर्वेद्यांव
सत्पूर्व[illegible]नामकुबेरकः ॥ वित्ताढयश्चापिशूरश्चसप्रतापीजनेश्वरः ॥ ३३५ ॥ कृतानितेनपुण्यानिमहापर्वणिवैतथा ॥ एक
स्मिन्समयेविप्रबाहुजस्यप्रसंगतः ॥ ३३६ ॥ परस्त्रीलोलुपोभूत्वाबहुवर्षगतागतैः ॥ यवनस्यसुताभव्याबलादाकर्षितातदा ॥ ३३७ ॥
[illegible]प्रीतिः कृतातस्यांसामृतातुतदाद्विज ॥ मृत्वापिनरकंगत्वाकीटोभूत्वाविहंगमः ॥ ततोवैमानुषीयोनौप्रथमाब्देसकष्टितः ॥ ३३८ ॥
१ । ८ । १३ । २० । २८ । ३१ । ३८ वर्षेषुमहत्कष्टम् ॥ परमायुर्वर्षाणि ७३ ॥ ८० अथशिवप्रशंसकयोगः ॥ प्रपंच
[illegible]धर्मसाधकः शिवस्यभक्तःपरमःपवित्रः ॥ चिंतामणिज्ञःसचबाहुजोपिप्रतापशीलश्चसुधर्मसंचयी ॥ ३३९ ॥ परत्रलोभी
[illegible]नयेविनीतः ॥ तीर्थेषुपुण्यानिकृतानिसम्यग्देवद्विजानांचसुसेवकश्च ॥ ३४० ॥ प्रपंचमान्योजमति

...कोध्यानसमाधिनिष्ठः ॥ मृहामतोभिक्षुरवज्ञयागतोमत्तोबभूवस्वशरीरदोषात् ॥ ३४१ ॥ अभक्ष्यभक्षाअनृताव
...अनर्थकर्ताचबभूवपादजः ॥ वनांतरेमृत्युवशंसमागतःसतेनपापेनहिदिव्यवर्षम् ॥ ततोवैमानुषोजातोधनधान्यसमन्वितः
॥ ३४२ ॥ १ । ३ । ६ । ९ । २० । २८ । ३७ । ४१ । ४८ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ८१ अथहोता
योगः ॥ अथकेरातदेशेतुनारदोनामबाहुजः ॥ किंचिद्राज्याधिकरणेसमर्थोपिबभूवह ॥ ३४३ ॥ उग्रदंडःप्रतापीचकुशलःसर्व
कर्मणि ॥ एकस्मिन्समयेविप्रकृतंकर्मातिदारुणम् ॥ ३४४ ॥ बाहुजस्यविशालाक्षीपुत्रीगुणवतीशुभा ॥ बलादाकर्षितातस्यांकृत्वासुर
तसंगमम् ॥ ३४५ ॥ मृतोवैनरकंप्राप्तःपुण्यात्स्वर्गंतथानघ ॥ षष्टिवर्षसहस्रांतेपुनरागत्यभूतले ॥ ३४६ ॥ १ । ४ । ६ । ८ । १२ ।
१६ । २२ । २९ । ३० । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८५ ॥ ८२ अथहर्म्याख्ययोगः ॥ चम्पकारण्यनिकटेब्राह्मणो
पितपोधनः ॥ परमोदारश्चसुज्ञश्चब्रह्मचर्य्यपरायणः ॥ ३४७ ॥ सत्यधर्मार्चनेव्यग्रईश्वरस्यस्मृरत्यसौ ॥ एकस्मिन्समयेविप्रतीर्थ
यात्राकृताश्रमः ॥ ३४८ ॥ अवन्तीनगरीश्रेष्ठातत्रवैब्राह्मणोऽवसत् ॥ तस्यकन्यामहागौरायथाकामस्यचांगना ॥ ३४९ ॥ बला
दाकर्षितातस्यांकृत्वासुरतसंगमम् ॥ लोकनिन्दाभयेनाथब्रह्मचारीमृतस्तदा ॥ पापात्पापफलंभुक्त्वापुनरागत्यभूतले ॥ ३५० ॥
१ । ५ । १० । १७ । २६ । ३३ । ३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८७ ॥ ८३ अथहार्दिक्ययोगः ॥ समुद्रस्यातिनिकटे
...वसत् ॥ चक्रपाणिरितिख्यातोब्राह्मणःशास्त्रकोविदः ॥ ३५१ ॥ हंसराजिस्तस्यपत्नीपातिव्रत्यपरायणा ॥ धर्मकर्मणि
नि...ठः ॥ ३५२ ॥ एकस्मिन्समयेविप्रसोमयज्ञस्तदाकृतः ॥ आहूयब्राह्मणाःसर्वेसत्कृताबहुशस्तदा ॥ ३५३ ॥

दक्षिणारजतंस्वर्णंदत्तंदानंचतेनवै ॥ एकाक्षोपिद्विजस्तत्रतस्मैकिंचिन्नदत्तवान् ॥ ३५४ ॥ सविप्रश्चातिक्रोधेनशापंदत्त्वाचदुष्करम् ॥
किंचित्कालांतरेचैवदैवात्सपंचतांगतः ॥ ३५५ ॥ पापात्पापफलंभुक्त्वापुण्यात्स्वर्गंतथाऽनघ ॥ पुनरागत्यमेदिन्यांसुखदुः
खसमाकुलः ॥ ३५६ ॥ १ । ४ । ७ । १२ । २७ । ३० । ३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७३ ॥ ८४ अथसंशययोगः ॥
अथकालिंजरेदेशेबाहुजोपिमनोरथः ॥ कृत्वाराज्यंविशेषेणसहसैन्येनभोःसुत ॥ ३५७ ॥ अदंड्यादंडितास्तेनह्यगम्यागमनंकृतम् ॥
तत्पापान्नरकेगत्वापुनर्जन्मशतैरपि ॥ ३५८ ॥ भूमौवैमानुषोजातःपाखंडाचरणेरतः ॥ द्रव्यस्योत्पादनेनिष्ठोवंचकःखलुसंचयी ॥
॥ ३५९ ॥ १ । २ । ११ । १५ । १९ । २४ । २७ । ३६ । ४१ । ४७ । ५० । ५५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०७ ॥ ८५ अथ
हरतियोगः ॥ कलिंगदेशेऽवसत्सोपिबाहुजःसर्वपूजकः ॥ शिवरामइतिख्यातःपत्नीतस्यचसुव्रता ॥ ३६० ॥ किंचिद्भूमिपतिस्तत्रचोग्र
दंडःप्रतापवान् ॥ देशाटनंकृतंसम्यग्द्रव्यस्योत्पादनंकृतम् ॥ ३६१ ॥ स्वदेशेपुनरागत्यहठाद्द्रुदमानसः ॥ स्वज्ञातिवनितायांवैव्यभि
चारंतथाऽकरोत् ॥ ३६२ ॥ एकस्मिन्समयेविप्रतीर्थयात्राकृताचवै ॥ आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः ॥ ३६३ ॥ पापात्पा
पफलंभुक्त्वापुण्यात्स्वर्गंतथाऽनघ ॥ पुनरागत्यमेदिन्यांराजरोगेणकष्टितः ॥ ३६४ ॥ १ । ३ । ६ । ११ । १३ । १८ । २२ । २८ ।
३५ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८८ ॥ ८६ अथशौरिकयोगः ॥ वंगदेशेऽवसत्पूर्वंकेवलोनामपादजः ॥ बहुग्रामाधिकारीचहिंसा
कर्मविमोहितः ॥ ३६५ ॥ परसंतापदाताचसव्ययीपापभागसौ ॥ एकस्मिन्समयेविप्रशिवालयंविनिर्मितम् ॥ ३६६ ॥ ब्राह्मणाभो
जिताःसम्यक्कन्योद्वाहंतथाऽकरोत् ॥ नानाविलासविभवैःसर्वानंदमयःसदा ॥ ३६७ ॥ आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः ॥

पुनरागत्यमेदिन्यांकष्टेनातिप्रपीडितः ॥ ३६८ ॥ १।४।६।१२।१८।२२।२९।३२ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥
८७ अथशोनभद्रयोगः ॥ कुक्कुटेनगरेपूर्वंगंधर्वोनामब्राह्मणः ॥ ब्रह्मकर्मपरिभ्रष्टोमद्यमांसेनजीवति ॥ २६९ ॥ कृतानिबहुपापानि
सर्वकालेद्विजोत्तम ॥ एकस्मिन्समयेविप्रदैवाद्गंगातटेगतः ॥ ३७० ॥ सस्नातस्तत्रवैमृत्युर्बभूवद्विजसत्तम ॥ पापाच्चनरकेगत्वाकीटयोनौ
विहंगमः ॥ ३७१ ॥ गंगास्नानस्यपुण्याद्धिस्वर्गेस्थित्वातदानघ ॥ बहुवर्षसहस्रांतेमानुषोपितथाधुना ॥ ३७२ ॥ २।६।१०।
१७।२२।२८।३१।३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८१ ॥ ८७ अथसाराख्ययोगः ॥ गुर्जरेनगरेपूर्वंयशोदानंदबाहुजः ॥
सहसैन्येनराज्येनशूरश्चातिपराक्रमी ॥ ३७३ ॥ एकस्मिन्समयेविप्रसहसैन्येनबाहुजः ॥ गतस्त्वरिपुरंतत्रकृत्वायुद्धंपरस्परम् ॥ ३७४॥
घातितःसोपिबहुभिःप्रहारैरतिदारुणैः ॥ सप्तवासरपर्य्यंतंजित्वाशत्रुबलंबलात् ॥ ३७५ ॥ तत्पुरंलुंठितंतेनद्रव्यलोभेनचद्विज ॥
तत्पुरंनाशितंतेनभस्मीभूताश्चधेनवः ॥ ३७६ ॥ स्वदेशेपुनरागत्यसमृतःकालचोदितः ॥ पापात्पापफलंभुक्त्वापुण्यात्स्वर्गंतथाऽनघ ॥
पुनरागत्यमेदिन्यांप्रथमाब्देसकष्टितः ॥ ३७७ ॥ १।३।८।१४।२१।२५।३०।३७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥
८९ अथ सुरपोषकयोगः ॥ कीकटेनगरेपूर्वंपादजस्यकुलेतदा ॥ बहुद्रव्यान्वितःसोपिपुण्यमार्गपरायणः ॥ ३७८ ॥ तीर्थावगाहनेनिष्ठः
सत्पात्रायददौधनम् ॥ तीर्थेतीर्थेकृतासेवाऋषीणांचपुनःपुनः ॥ ३७९ ॥ एकस्मिन्समयेविप्रसर्वस्वंब्राह्मणेददौ ॥ सत्पात्रायविधिज्ञा
यश्रद्धायुक्तेनचेतसा ॥ ३८० ॥ कालेयातेसहर्षेणगयायांचमृतःसवे ॥ ततोवैमानुषोजातःपूर्वपुण्यप्रभावतः ॥ ३८१ ॥ ३।९।१६।२०
२४।२९।३३।३७।४१।४९।५१।५४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ९९ ॥ ९० अथसचीकरयोगः ॥ इंद्रप्रस्थपुरेरम्येलोह

[illegible] ॥ बुनीदासःसमाख्यातःपत्नीपुत्रसमन्वितः ॥ ३८२ ॥ स्वकर्मनिरतोधीरःपुण्यमार्गपरायणः ॥ वापीकूपांश्चनिर्मा
[illegible]ऽकरोत् ॥ ३८३ ॥ अन्नदानंकृतंतेनबभूवबहुरुजःसच ॥ वैश्ययोनिंपरित्यज्यबभूवबाहुजःपुनः ॥ इदंजन्मचतुर्थंतुसर्व
[illegible]समन्वितः ॥ ३८४ ॥ १ । २ । ४ । ८ । १२ । १६ । २० । २७ । ३१ । ३६ । ३९ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥ ९१
अथसौख्ययोगः ॥ विराटनगरेचैवब्राह्मणःपूर्वजन्मनि ॥ गोवर्द्धनःसमाख्यातःपत्नीद्वयसमन्वितः ॥ ३८५ ॥ विद्याविलासीसततमर्मं
[illegible]कान्पाठयेत्ततः ॥ विद्यार्थीवैस्वशिष्यश्चलगुडेनप्रताडितः ॥ समृतस्तेनदुःखेनपापमाचरितंत्विदम् ॥ ३८६ ॥ गोपितंवस्मरंतेनबहुका
[illegible]गतेः ॥ आयुषस्तुसमाप्तित्वात्समृतःकालचोदितः ॥ ३८७ ॥ पापात्पापफलंभुक्त्वापुण्यात्स्वर्गंतथाऽनघ ॥ नानायोनौभ्रम
त्सोपिततोभूत्वाचमानुषः ॥ ३८८ ॥ १ । ३ । ८ । १२ । १७ । २० । २८ । ३१वर्षेषुकष्टम्॥परमायुर्वर्षाणि १०७॥९२ अथसंहारयोगः
अथचंद्रावतीतीरेब्राह्मणःशास्त्रकोविदः ॥ देवशर्माइतिख्यातःपत्नीतस्यमनोहरा ॥ ३८९ ॥ धर्मशास्त्रेचमत्कारीपठनेपाठनेरतः ॥
[illegible]स्मिन्समयेविप्रदेशेचदक्षिणेगतः ॥ द्रव्यस्योत्पादनंकृत्वास्वगेहेपुनरागतः ॥ ३९० ॥ सन्मार्गेचव्ययंकृत्वाकन्योद्वाहंतथा
[illegible] ॥ भ्रातृभागोहतस्तेनपापमाचरितंत्विदम् ॥ ३९१ ॥ समृतःसरयूतीरेगतइन्द्रपुरंप्रति ॥ इन्द्रलोकात्परिभ्रष्टश्चागतोधरणी
[illegible] ॥ ३९२ ॥ १ । ३ । ६ । ९ । १३ । १७ । २४ । २६ । ३० । ३६ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ ९३ अथसरस
[illegible] ॥ गौरीकुमारिकाखण्डेबाहुजःपूर्वजन्मनि ॥ हृदयेतिसमाख्यातःपत्नीद्वययुतस्तदा ॥ ३९३ ॥ कृतानितेनधर्माणिमर्व
[illegible] ॥ [illegible]दायादेंस्तंद्रव्यंपादजस्यतदानघ ॥ ३९४ ॥ गोपितंवस्मरंतेनसमृतोवरुणातटे ॥ पापात्पापफलंभुक्त्वापुण्या

...कंतथा ॥ ततश्चमानुषोजातोधनधान्यसमन्वितः ॥ ३९५ ॥ २ । ४ । ८ । १२ । १८ । २३ । २८ । ३० । ३४ । ३७ ।
...वर्षेयुकष्टम् ॥ परमायुर्वर्षाणि १०० ॥ ९४ अथसाधकयोगः ॥ जयंतदेशेन्यवसत्पुराजनोप्रवृत्तिर्हिंसाव्रतिमोदतत्परः ॥ कुशी
...परदारगामीधूतेनमार्गेणतुद्रव्यसंग्रहः ॥ ३९६ ॥ एकस्मिन्समयेविप्रगयाश्राद्धमथाकरोत् ॥ दत्तानितत्रदानानिकाम्यप्राधा
निकानिच ॥ ३९७ ॥ संप्राप्यभवनेशीघ्रंकृतंकर्मसुदारुणम् ॥ सगोत्रायांहठात्पापंकृतंतेनतदानघ ॥ ३९८ ॥ तत्पापान्नरकेगत्वा
...पत्रवनान्तरे ॥ नानाजन्मानिभूत्वापिततोवैमानुषोऽधुना ॥ ३९९ ॥ १ । ३ । ६ । ९ । १७ । २० । २५ । ३० । ३६
वर्षेयुकष्टम् ॥ परमायुर्वर्षाणि ६५ ॥ ९५ अथसेकरयोगः ॥ आसीज्जन्मांतरेचैवब्राह्मणःशास्त्रवर्जितः ॥ चूडामणिःसमाख्यातःपत्नीतस्य
हुताशनी ॥ ४०० ॥ देशेपाञ्चालकेचैवन्यवसत्परिवारयुक् ॥ चंचलश्चातिमलिनोधूर्त्तविद्यापरायणः ॥ ४०१ ॥ एकस्मिन्समये
विप्रकृतंकर्मजुगुप्सितम् ॥ स्वगोत्रार्थंतदाविप्रमिथ्याशपथमाचरत् ॥ ४०२ ॥ तेनपापानुसारेणगतोसौयमलोककम् ॥ यमलो
कात्परिभ्रष्टश्चागतोधरणीतले ॥ तृष्णालोभसमासक्तःप्रथमाब्देसकष्टितः ॥ ४०३ ॥ ४ । ९ । १३ । १८ । २२ । २७ । ३१ ।
३६ । ३८ वर्षेयुकष्टम् ॥ परमायुर्वर्षाणि ८० ॥ ९६ अथसरयूयोगः ॥ पूर्वजन्मांतरेचैवपादजोयमुनातटे ॥ भास्करेतिसमाख्यातः
पत्नीपुत्रसमन्वितः ॥ ४०४ ॥ शिवस्यस्मरणेनिष्ठोब्रह्मभक्तिपरोदृढः ॥ कृतानितेनधर्म्याणिपरोपकरणंतथा ॥ ४०५ ॥ वते
...तंदत्त्वाद्विजायच ॥ नानामनोरथैर्युक्तःशिवस्योद्यापनंकृतम् ॥ ४०६ ॥ आयुषस्तुसमाप्तित्वात्सशूद्रःपंचतांगतः ॥
...गतोभूमिमण्डले ॥ ४०७ ॥ १ । २ । ४ । ८ । १३ । १८ । २० । २८ । ३३ । ३८ । ४० वर्षेयुकष्टम् ॥

परमायुर्वर्षाणि ९८ ॥ ९७ अथशेवयायोगः ॥ पूर्वंपयस्विनीतीरेचित्रनामाचब्राह्मणः ॥ सर्वसम्पद्युतोमानीबहुशास्त्रैश्चशोभितः ॥
॥ ४०८ ॥ मन्त्रविद्याविवेकीचलोभाकुलितमानसः ॥ धनंहृतंचशिष्यस्यनदत्तंमोहकारणात् ॥ ४०९ ॥ सर्वसंग्रहकर्ताचं
नदानंनद्विजार्पणम् ॥ एवंनिवसतस्तत्रबहुवर्षगतागते: ॥ ४१० ॥ सविप्रःपञ्चतांप्राप्तःससहायोद्विजोत्तमः ॥ शतजन्मोत्तरेविप्र
मानुषत्वंगतोऽधुना ॥ ४११ ॥ १ । ३ । ६ । ८ । १२ । १६ । २० । २४ । २९ । ३३ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७७ ॥
९८ अथशैवीयोगः ॥ क्षिप्रानद्याश्चनिकटेपूर्वजन्मनिबाहुजः ॥ कृतानितेनपापानिबहुवर्षगतागतेः ॥ ४१२ ॥ कदाचित्तीर्थ
यात्रायांसर्वस्वंब्राह्मणेददौ ॥ तेनपुण्यप्रभावेणस्वर्गेगत्वाचबाहुजः ॥ ४१३ ॥ पुनरागत्यमेदिन्यांसर्वसौख्येनसंयुतः ॥ तीक्ष्णबुद्धिः
प्रवक्ताचकन्यापुत्रसमन्वितः ॥४१४॥ षोडशेऽब्देगतेचैवभाग्यस्यास्योदयोभवेत् ॥ दक्षिणांगेतथावामेलांछनंतिलमाषयोः ॥ ४१५ ॥
१ । ३ । ५।७।१०।१४।१८।२४ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि६७॥९९ अथसाधनीयोगः ॥ देशेहिचोत्कलेपूर्वबाहुजःसुखसंयुतः ॥ गोवि
प्राश्चतथादेवाःस्वर्चितास्तेननित्यशः॥४१६॥क्षात्रधर्मेसनिष्ठश्चपरमोदारवत्सलः ॥ एकस्मिन्समयेविप्रभाविनोर्थस्यगौरवात् ॥ ४१७ ॥
गोत्रक्षेत्रंहृतंतेनमिथ्यावादेनवैबलात् ॥ तत्फपान्नरकेगत्वाह्यपिवर्षसहस्रकम् ॥४१८॥ कीटभृंगविहंगानांयोनीर्भुक्त्वाकथंचन ॥ ततोवैमानु
षोजातोमर्त्यलोकेतथाधुना ॥ ४१९ ॥ १ । ३ । ५ । ८ । ११ । १६ । २० । २८ । ३६ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७० ॥
१०० अथसहसारूढयोगः ॥ योजातःसहसायोगेपूर्वजन्मनिब्राह्मणः ॥ इंद्रजीतइतिख्यातः पत्नीतस्यमनोरमा ॥ ४२० ॥ पतिसेवार
ताशुभ्राधनधान्यसमन्विता ॥ ऐरावतस्यनिकटेन्यवसत्पूर्वजन्मनि ॥ ४२१ ॥ एकस्मिन्समयेविप्रकृतंकर्मसुदारुणम् ॥ ब्राह्मणस्यगृहंहृं

र्यचार्पितंनूतनंद्विज ॥ ४२२ ॥ वैरभावेनभोविप्रदाहितंचतदाद्विज ॥ पापमाचरितंतेनपश्चात्तुगोपितंतदा ॥ ४२३ ॥ कालान्तरे मृतः
सोऽपिगतोऽ सौयमशासनम् ॥ षष्टिवर्षसहस्राणिभुक्त्वानरकजंफलम् ॥ ४२४ ॥ तिर्यग्योनिशतंभुक्त्वामर्त्यलोकेपुनःपुनः ॥ पश्चाद्वैमा
नुषीयोनौचंचलश्चारुलोचनः ॥ ४२५ ॥ मातापितृवियोगीचपरदारेषुतत्परः ॥ नाशितंचकुलंतेनप्रथमाब्देसुकष्टितः ॥ ४२६ ॥ द्वित्रि
वर्षांतरेसौख्यंचतुर्थेगदपीडितः ॥ षष्ठेवासप्तमेवर्षेशीतलाज्वरसम्भवः ॥ ४२७ ॥ नवमेब्देहिदशमेपीडाभवतिदारुणा ॥ द्वादशेविंशकेव
र्षेस्वल्पंकष्टंप्रजायते ॥ ४२८ ॥ चतुर्दशेपंचदशेजलभीतिःप्रजायते ॥ द्वाविंशत्यब्देभोमित्रह्यल्पमृत्युर्भविष्यति ॥ ४२९ ॥ यदिमृत्यु
निवर्तेततदाऽऽयुःपंचषष्टिकम् ॥ श्रावणेधवलेपक्षेह्यष्टम्यांनिधनंभवेत् ॥ ४३० ॥ १०१ अथसंस्कृतयोगः ॥ मध्यदेशेऽवसत्सोऽपिगंगा
याश्चोत्तरेतटे ॥ अरिमर्दनः समाख्यातः पत्नीतस्यकलेवरी ॥ ४३१ ॥ वैश्योनामप्रदेवश्चब्राह्मणानांचसेवकः ॥ धर्माश्रितोगुणग्रामः
पुण्यारण्यविहारवान् ॥ ४३२ ॥ दैवात्पत्नीमृतातस्यकामलोभेनविह्वलः ॥ तस्मिन्ग्रामेऽवसच्छूद्रस्तस्यकन्यावराङ्गना ॥ ४३३ ॥
बलादाकर्षितासातुगृहेचस्थापितातदा ॥ एवंबहौगतेकालेसमृतःकालचोदितः ॥ ४३४ ॥ पापात्पापफलंभुक्त्वायोनिंभुक्त्वाकथंचन ॥
ततोवैमानुषोजातःपूर्वपुण्यप्रभावतः ॥ ४३५ ॥ २ । ४ । ६ । ९ । १७ । २५ । ३१ । ३७ । ४० । ४५ । वर्षे
षुकष्टम् ॥ परमायुर्वर्षाणि ९५ ॥ १०२ अथसोमनाथयोगः ॥ सोमनाथेचयोजातःपूर्वजन्मनितैलिकः ॥ तैलचौर्यंकृतंतेन
चात्राऽसौदुष्टगन्धवान् ॥ ४३६ ॥ भार्यासुतसुखैर्हीनःपीडितःसर्वदारुजा ॥ प्राप्तेत्रिंशत्तमेवर्षेमरणंतुसुनिश्चितम् ॥ ४३७ ॥
१०३ अथसारावलीयोगः ॥ सारावल्यांचयोजातः सोऽभूत्पूर्वंतुबाहुजः ॥ आखेटकेजीवगणाहिंसितास्तेनवैमुदा ॥ ४३८ ॥

…त्वातुतत्पापफलंभुक्त्वाचासिकनान्तरे ॥ वर्षाणामयुतंतस्मादागत्यभुविजातवान् ॥ ४३९ ॥ शूलादिरोगैःपीडास्यात्…
…राकेषु च ॥ वर्षेषुमहतीपीडाषड्विंशतितमेमृतिः ॥ ४४० ॥ अथसनत्कयोगः ॥ १०० ॥ योगेसनत्केयोजातः सपूर्वंगौडदे
…के ॥ ब्राह्मणः कर्मविभ्रष्टोमद्यमांसरतःसदा ॥ ४४१ ॥ वेश्यागामीनीचसंगाद्द्यूतेचौर्येरतः सदा ॥ एवंगतेतुवयसिमृतोऽसौ
…णाऽधमः ॥ ४४२ ॥ तदैवभीतोदूतैः सधर्मराजपुरंप्रति ॥ तत्रभुक्त्वायुताऽब्दान्सघोरंदुःखंद्विजोत्तम ॥ ४४३ ॥ अन्य
जन्मभवात्पुण्याच्चागतोभूमिमंडले ॥ विरूपोधनहीनश्चस्त्रीपुत्रसुखवर्जितः ॥ ४४४ ॥ ७ । ११ । १९ । १८ । २९ ।
वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७९ ॥ १०४ अथसोमयाजियोगः ॥ सोमयाजिनियोजातः सपूर्वं वेदपाठकः ॥ कृत्वाया
…न्बहुविधांश्चंद्रलोकंगतस्तदा ॥ ४४५ ॥ अत्रागत्यधरापृष्ठेसर्वसौख्यसमन्वितः ॥ परस्त्रीलम्पटोविप्रचंचलश्चातिशोभनः ॥
४४६ ॥ ८ । १० । १२ । १७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६९ ॥ १०५ अथशक्रवल्लभयोगः ॥ आसीत्पूर्वे
…केश्चित्पादजस्तुकृषीवलः ॥ कृत्वैकदाधान्यराशिंसंकल्प्याथसपर्वणि ॥ ४४७ ॥ नदत्तवान्ब्राह्मणेभ्यस्ततःपापैश्चलितवान् ॥
…नायातोधर्मगेहंतत्रभुक्त्वाफलंतदा ॥ ४४८ ॥ अयुताऽयुतवर्षैस्तुचागतोभूमिमंडले ॥ सर्वदाचान्नसंक्लेशोमहारोगैःप्रपीडितः ॥
४४९ ॥ १ । ५ । ७ । १० । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ५९ ॥ १०६ अथसंगयोगः ॥ आसीत्पुराकलिंगेचब्राह्म
…णोविधृतव्रतः ॥ ब्रह्मज्ञानेतुनिष्ठावान्भक्तिमार्गेपिनक्वचित ॥ ४५० ॥ एकदावैष्णववरःशास्त्रार्थमकरोद्द्विजः ॥ पराजि
…तोयंनिषद्भक्तिमार्गेरतः ॥ ४५१ ॥ सभक्तस्तीर्थयात्रायांत्यक्त्वास्वीयंकलेवरम् ॥ स्वर्गेभुक्त्वाबहून्भोगानाजगामधरा

॥ ४५२ ॥ ब्राह्मणोबहुविद्यावान्धनपुत्रादिसंयुतः ॥ द्वादशेषोडशेवर्षेकष्टहानिःसुदानकैः ॥ ४५३ ॥ परमायुर्वर्षाणि ७०
। १०७ अथसंगावलीनयोगः ॥ संगावलीनेयोजातःसपूर्वंचोलदेशके ॥ वैश्यश्चातिदयालुश्चसर्वसौभाग्यसंयुतः ॥ ४५४ ॥ एकदातिथि
यातस्तस्मैभिक्षांनदत्तवान् ॥ तेनपापेनमृत्वासौभुक्त्वादुःखंयमालये ॥ ४५५ ॥ आगत्यचधरापृष्ठेनिर्धनश्चबभूवह ॥ सकुटुम्बी
भवादुःखीसुखीस्याद्देवपूजनात् ॥ ४५६ ॥ १ । ५ । ११ । २० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ६५ ॥ १०८ अथशौरीयोगः ॥
शौरीयोगेचयोजातःसपूर्वंबाहुजोह्यभूत् ॥ कृत्वाराज्यंसधर्मेणह्येकदापापमाचरत् ॥ ४५७ ॥ सगोत्रारमणंकृत्वाल ... निन्दांचलोक
के ॥ मृत्वायातश्चदूतैःसयमलोकेद्विजोत्तम ॥ ४५८ ॥तत्रभुक्त्वापापफलंचागतोधरणीतले॥सर्वदाह्युपदंशेनरोगेणातिप्रपीडितः ॥४५९॥
द्विजकन्याविवाहेनभवेच्छान्तिर्नचाऽन्यथा ॥ ४६०॥ १ । २५ । ३० वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ८० ॥ १०९ अथसोभनीयोगः॥
सोभनीयोगेयोजातोधीवरःपूर्वजन्मनि ॥ मत्स्यान्हत्वाबहूंश्चापिमृत्वागत्वायमालयम् ॥ ४६१ ॥ तत्रभुक्त्वापापफलंचागतोधरणी
तले ॥ तेनावशिष्टपापेनजातःपुत्रोविनश्यति ॥ ४६२ ॥ रामनामानिलक्षंचपादयुक्तंद्विजोत्तम ॥ लेखयित्वाचमत्स्येभ्यःपिष्टयुक्तानि
दापयेत् ॥ ४६३ ॥ तदास्यात्संततेःसौख्यंचान्यथानद्विजोत्तम ॥ ४६४ ॥ ३ । ७ । १० । १५ । वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि ७५ ॥
११० अथशरणागतयोगः ॥ पुरुषोत्तमपुरेरम्येन्यवत्परिवारयुक् ॥ धनमैश्वर्य्यमतुलंदेवलोनामविश्रुतः ॥ पादजःसत्यवक्ताचसभास
... ॥ ४६५ ॥ एकस्मिन्समयेविप्रद्रव्यलोभेनचेतसा ॥ आत्मार्थेचनृपस्याग्रेमिथ्याऽब्रुवत्तदानघ ॥ ४६६ ॥ तत्पापात्
... लुकः ॥ मर्कटोगोमतीतीरेपुनर्भूत्वाचमानुषः ॥ ४६७ ॥ अत्रजन्मन्यभूच्चासौधनधान्यसमन्वितः ॥ पुत्रार्थं

चिंतयामासभ्रमणंयत्रतत्रच ॥ ४६८ ॥ १ । ४ । ७ । ११ । १७ । २० । २८ । ३० । ३४ । ३७ । ३९ । ४१ । ४६ । ४९ वर्षेषु कष्टम् ॥ परमायुर्वर्षाणि ६७ ॥ १११ अथसामयोगः ॥ आसीज्जन्मांतरेचैवब्राह्मणःशास्त्रकोविदः ॥ देशेहिकीकटेचैवगयायादक्षिणे तटे ॥ ४६९ ॥ हरिनारायणोनामपत्नीपुत्रसमन्वितः ॥ वैष्णवोदानशीलश्चपितृभक्तिपरायणः ॥ ४७० ॥ सुधीश्चसर्वशास्त्रेषुकाव्यालंकारबोधकः ॥ रक्षको निजवर्गाणांब्राह्मणानांविशेषतः ॥ ४७१ ॥ एवंनिवसतस्तत्रबहुवर्षगतागतेः ॥ आयुष्कस्तुसमाप्तित्वात्समृतः कालचोदितः ॥ ४४२ देवलोकेऽभवत्प्राप्तोयत्रदेवोमहेश्वरः ॥ स्वर्गलोकात्परिभ्रष्टश्चागतोधरणीतले ॥ ४७३ । १ । ३ । ५ । ७ । ११ । १५ । १८ । २० । २५ । ३० । ३२ । ३६ । ३९ । ४५ । ५० । ५७ वर्षेषुकष्टम् ॥ परमायुर्वर्षाणि १०४ ॥ योगाध्यायाश्चह्येतेवैकथिताःपूर्वजन्मकाः ॥ बोद्धव्यंपूर्ववद्वाक्यैःशृणुशुक्रह्यनन्यधीः ॥ ४७४ ॥ इति श्रीभृगुसंहितायांभृगुशुक्रसंवादेयोगावलिःसमाप्ता ॥

इदं पुस्तकं हर्यनदेशान्तर्गतमाजराग्रामनिवासिश्रीयुतपण्डितश्रीनंदलालशास्त्रिभिः श्रीक्षेमराजश्रीकृष्णदासश्रेष्ठिनामनुज्ञया न्यूनाधिकविषयपरिपूरणपुरःसरं सम्यक्परिशोधितम् ।

इदं पुस्तकं मुम्बय्यां क्षेमराज–श्रीकृष्णदासश्रेष्ठिना स्वकीये
"श्रीवेङ्कटेश्वर" स्टीम्–यन्त्रालयेऽङ्कयित्वा प्रकाशितम् ।
संवत् १९६७, शके १८

"श्रीवङ्कटेश्वर" स्टीम्-मुद्रणालयको-विक्रेय पुस्तकें।

नाम.	की. रु. आ.
पंडितमहीधरकृत भाषाटीकासहित ग्लेज कागज ...	१–४
तथा रफ कागज	१–०
चक्रावलीसंग्रह सटीक–व्यवहारमें प्रायः जिन जिन वस्तुओंकी आवश्यकता पडती है उन सबके ३९२ चक्र इसमें हैं।	२–०
बृहज्जातकसटीक–भट्टोत्पलीटीकासमेत उपरोक्त विषयानुसार ग्लेज	१–८
" तथा रफ	१–४
केरलीजातक–सान्वय सोदाहरण जगदीशत्रिपाठीकृत भाषाटीकासमेत जन्मपत्रिका बनानेमें अपूर्व गणित है ग्लेज	१–८
" तथा रफ	१–४
मानसागरीपद्धतिः–मूल मानसागर प्रणीत इससे जन्मपत्रबनाना अतिसुगमहै ज्योतिषीके परमोपयोगी है	०–१४
मानसागरी–भाषाटीका सम्पूर्णजन्मपत्रबनानेका मास, तिथि, वार, नक्षत्र, योग करण, द्वित्रिग्रहयोग आदि संपूर्ण फलादेशादि वर्णित है ग्लेज	२–८
" " तथा रफ	२–४
लघुपाराशरी–भाषाटीका अन्वय सहित दशाप्रकरणमें उत्तम है	०–३

॥ इति भृगुसंहितान्तर्गतयोगावलिः समाप्ता ॥